श्रीः ।

द्वितीयभागभूमिका ।



इतः पूर्वं वत्सरद्वयात् क्रमशो वेदान्तकल्पतरुग्रन्थस्य समारब्धे मुद्रणकार्ये सिद्धं प्रथमाध्यायगतप्रथमपादान्तं भागमतीते संवत्सरे विदुषामुपहारं विधायाग्रे ऽपि तथैव समारब्धकार्ये ऽद्ययावत्सिद्धं प्रथमाध्यायद्वितीयपादादिद्वितीयाध्यायसमाप्त्यन्तं द्वितीयं भागं समुत्सुकजनानां विलम्बखेदपरिजिहीर्षया साम्प्रतं दृष्टिगोचरतामुपनयामि । आशासे चावशिष्टे तृतीये भागे ग्रन्थसमाप्तिम् अभ्यर्थये च जगदीश्वरात् सकलप्रत्यूहपरिहारेणाचिरात्तत्सिद्धिम् ।

प्रथमे भागे यथाऽधिकरणसूचीपत्रं शुद्धिपत्रादिकं च निवेशितवानस्मि तथैवास्मिन्नपि भागे सावधानं तत्सर्वं निवेशितवानस्मि विदुषां सौकर्याय ।

तदमुं भागं यथामति संशोध्य सुपरिष्कृत्य पुरोनिहितं समुपनीय करकमलस्थितिपात्रतां समनुभवन्तु वेदान्तसागरसमुत्थसुधास्वादमहानन्दं सफलयन्तु च मामकीनं परिश्रमं बुधवरा इति सविनयमभ्यर्थये । शम् ।

वाराणस्याम्
संवत् १९५३ ।

मानवल्ल्युपाह्वस्तैलङ्ग-
रामशास्त्री ।



प्रथमाध्यायद्वितीयपादादिद्वितीयाध्यायान्तभागाधिकरणसूची ।

प्रथमाध्यायस्य द्वितीयपादे ।

संख्या	अधिकरणनाम ।	पृ॰	पं॰	—	पृ॰	पं॰
१	सर्वत्रप्रसिद्ध्यधिकरणम्	२२५	१	—	२३५	२१
२	अत्त्रधिकरणम्	२३५	२२	—	२३९	६
३	गुहाप्रविष्टाधिकरणम्	२३९	७	—	२४२	२२
४	अन्तराधिकरणम्	२४२	२३	—	२४६	२३
५	अन्तर्याम्यधिकरणम्	२४६	२४	—	२४८	३
६	अदृश्यत्वाद्यधिकरणम्	२४८	४	—	२५१	१२
७	वैश्वानराधिकरणम्	२५१	१३	—	२५६	१६

प्रथमाध्यायस्य तृतीयपादे ।

१	द्युभ्वाद्यधिकरणम्	२५७	१	—	२६४	३
२	भूमाधिकरणम्	२६४	४	—	२६६	१८
३	अक्षराधिकरणम्	२६६	१९	—	२७०	१४
४	ईक्षतिकर्माधिकरणम्	२७०	१५	—	२७३	२०
५	दहराधिकरणम्	२७३	२१	—	२८९	२१
६	अनुकृत्यधिकरणम्	२८९	२२	—	२९५	१९
७	प्रमिताधिकरणम्	२९५	२०	—	२९८	२७
८	देवताधिकरणम्	२९९	१	—	३२२	२०
९	अपशूद्राधिकरणम्	३२२	२१	—	३३२	१४
१०	कम्पनाधिकरणम्	३३२	१५	—	३३४	७
११	ज्योतिरधिकरणम्	३३४	८	—	३३५	१७
१२	अर्थान्तरव्यपदेशाधिकरणम्	३३५	१८	—	३३७	२३
१३	सुषुप्त्युत्क्रान्त्यधिकरणम्	३३७	२४	—	३३९	१७

प्रथमाध्यायस्य चतुर्थपादे ।

१	आनुमानिकाधिकरणम्	३४०	१	—	३५२	१२
२	चमसाधिकरणम्	३५२	१३	—	३५३	१५
३	संख्योपसंग्रहाधिकरणम्	३५३	१६	—	३६०	६
४	कारणत्वाधिकरणम्	३६०	७	—	३६३	१२
५	जगद्वाचित्वाधिकरणम्	३६३	१३	—	३६७	२६
६	वाक्यान्वयाधिकरणम्	३६८	१	—	३८०	१४
७	सर्वव्याख्यानाधिकरणम्	३८०	१५	—	३८०	१९

द्वितीयाध्यायस्य प्रथमपादे ।

संख्या	अधिकरणनाम ।	पृ०	पं०	—	पृ०	पं०
१	स्मृत्यधिकरणम्	३८१	१	—	३८४	१७
२	योगप्रत्युक्त्यधिकरणम्	३८४	१८	—	३८४	२७
३	विलक्षणत्वाधिकरणम्	३८५	१	—	३८८	३
४	शिष्टापरिग्रहाधिकरणम्	३८८	४	—	३९१	७
५	भोक्त्रापत्त्यधिकरणम्	३९१	८	—	३९१	१४
६	आरम्भणाधिकरणम्	३९१	१५	—	४०१	१९
७	इतरव्यपदेशाधिकरणम्	४०१	२०	—	४०१	२६
८	उपसंहारदर्शनाधिकरणम्	४०२	१	—	४०३	२२
९	कृत्स्नप्रसक्त्यधिकरणम्	४०३	२३	—	४०५	२
१०	सर्वोपेताधिकरणम्	४०५	३	—	४०५	१०
११	प्रयोजनवत्त्वाधिकरणम्	४०५	११	—	४०६	२१
१२	वैषम्यनैर्घृण्याधिकरणम्	४०६	२२	—	४०७	१६
१३	सर्वधर्मोपपत्त्यधिकरणम्	४०७	१७	—	४०८	२३

द्वितीयाध्यायस्य द्वितीयपादे ।

१	रचनानुपपत्त्यधिकरणम् (अनुमानाधिकरणं वा)	४०९	१	—	४१६	३
२	महद्दीर्घाधिकरणम्	४१६	४	—	४२०	८
३	परमाणुजगदकारणत्वाधिकरणम् ..	४२०	९	—	४२६	२२
४	समुदायाधिकरणम्	४२६	२३	—	४३३	४
५	अभावाधिकरणम्	४३३	५	—	४४२	२२
६	एकस्मिन्नसंभवाधिकरणम्	४४२	२३	—	४४४	१९
७	पशुपत्यधिकरणम्	४४४	२०	—	४५०	२३
८	उत्पत्त्यसंभवाधिकरणम्	४५०	२४	—	४५३	२०

द्वितीयाध्यायस्य तृतीयपादे ।

१	वियदधिकरणम्	४५४	१	—	४५९	५
२	मातरिश्वव्याख्यानाधिकरणम्	४५९	६	—	४५९	९
३	असंभवाधिकरणम्	४५९	१०	—	४६१	२
४	तेजोऽधिकरणम्	४६१	३	—	४६२	७
५	अबधिकरणम्	४६२	८	—	४६२	१५
६	पृथिव्यधिकाराधिकरणम्	४६२	१६	—	४६३	२
७	तदभिध्यानाधिकरणम्	४६३	३	—	४६६	२४
८	विपर्ययाधिकरणम्	४६६	२५	—	४६६	१८
९	अन्तराविज्ञानाधिकरणम्	४६७	१९	—	४६८	२५
१०	चराचरव्यपाश्रयाधिकरणम्	४६८	२६	—	४६९	१३
११	आत्माधिकरणम्	४६९	१४	—	४७०	३

संख्या	अधिकरणनाम ।	पृ॰	प॰	—	पृ॰	प॰
१२	ज्ञाधिकरणम्	४७०	४	—	४७०	१२
१३	उत्क्रान्तिगत्याद्यधिकरणम्	४७०	१३	—	४७१	२४
१४	कर्त्रधिकरणम्	४७१	२५	—	४७२	१७
१५	तक्षाधिकरणम्	४७२	१८	—	४७३	३
१६	परायत्ताधिकरणम्	४७३	४	—	४७३	१६
१७	अंशाधिकरणम्	४७३	१७	—	४७४	२२

द्वितीयाध्यायस्य चतुर्थपादे ।

१	प्राणोत्पत्त्यधिकरणम्	४७५	१	—	४७६	२६
२	सप्तगत्यधिकरणम्	४७७	१	—	४७८	२
३	प्राणाणुत्वाधिकरणम्	४७८	३	—	४७८	१०
४	प्राणश्रैष्ठ्याधिकरणम्	४७८	११	—	४७८	१३
५	वायुक्रियाधिकरणम्	४७८	१४	—	४७९	१३
६	श्रेष्ठाणुत्वाधिकरणम्	४७९	१४	—	४८०	६
७	ज्योतिराद्यधिकरणम्	४८०	७	—	४८२	२
८	इन्द्रियाधिकरणम्	४८२	३	—	४८५	६
९	संज्ञामूर्तिक्लृप्त्यधिकरणम्	४८५	७	—	४८६	१९



शुद्धिपत्रम् ।

पृ॰ । पं॰	अशुद्धम् ।	शुद्धम् ।
२३१ । * टि॰	व्या॰ अ॰ १ पा॰ १ सू॰ सू॰	व्या॰ सू॰ अ॰ १ पा॰ १ सू॰
२३४ । २१	विसत्यास्या-	विसत्यस्या-
२३६ । * टि॰	स्वाभिमवि-	स्वाभिमतसवि-
२४६ । १४	सदापद्दं	सदपद्दं
२४६ । २२	अनिर्ज्याति	अनिर्ज्ञाति-
२५६ । ५	छुभ्याद्यायन-	छुभ्याद्यायतन
२६० । ११	नस्पष्टा	न स्पष्टा
२६४ । १८	प्रतिष्ठात्य-	प्रतिष्ठत्य-
२६६ । २२	विभुत्यपत्त	विभुत्यपत्ते
२७६ । १६	प्रत्यपरत्य-	प्रत्यपुरत्य-
२७६ । १०	सुपास्यत्व	सुपास्यत्वे
२८० । १३	विपये	विशये
२८२ । १७	कालस्व	कालस्ये
२८२ । २४	दाप्टान्तिक्ते	दार्ष्टान्तिके
२८५ । १६	भमानुवृत्तेः	भ्रमानुवृत्तेः
२६० । ४	सिद्धः	सिद्धेः
२६७ । १८	जाय-	जीव
२६६ । १६	धिकरा-	धिकारा-
३१० । १८	सृष्ट	सृष्टे-
३१५ । १३	यात्ता	या सता
३१८ । १८	विशिष्ट	विशिष्टे
३२१ । २५	स्तिरर्पायवं	स्तिरःपर्यवं
३२५ । १२	तद्धस्यापनं	तद्धयस्यापनं
३२७ । २३	दर्ऽितः	दर्शितः
३३२ । १ टि॰	पाठन्तरम्	पाठान्तरम् ।
३३८ । ६	सद लम्बनं	सदालम्बनं
३४० । १२	महत्तत्वा-	महात्तत्त्वा-
३४१ । २६	सद्रूपा-	सद्रूपा

पृ॰ । पं॰	अशुद्धम् ।	शुद्धम्
३४३ । २२	यत्नेन	यत्नेन
३४४ । २०	कत्तव्य-	कर्त्तव्य-
३४५ । ११	विपरात-	विपरीत-
३४६ । १	बीजाङ्कर-	बीजाङ्कुर-
३५३ । २०	मपमयो	मन्मयो
३५७ । २६	सिद्धेरति	सिद्धेरिति
३७१ । १	मपमया-	मन्मया-
३७७ । ६	मपमय-	मन्मय
३८१ । १५	येदी-	येदि-
३८७ । २२	मोपपत्तः	मोपपत्तेः
३६८ । २२	प्रसरोदति	प्रसरेदिति
४०२ । २०	दङ्कीक-	दङ्कीय-
४०५ । १०	न्यायोपन्याश	न्यायोपन्या
४०७ । २०	यचेऽत्यने	यचेत्यने
४२४ । १ टि॰	न तु दटि-	न तु तटि-
४२६ । १	यो ऽभनि-	यो ऽभिनि
४३० । ६	स्यामति	स्यमिति
४३५ । ८	वर्तिनं	वर्ति
४४३ । १६	विपेयण-	निपेयण-
४४७ । २८	मनुत्यति	मनुत्येति
४५३ । १३	न हि नि-	नहिनि
४५५ । १४	पापव्य	पापव्य
४५७ । शिरसि Heading	विपदु	विपदु-
४६६ । २५	कर्मापपय	कर्मापपेय
४७० । १४	ऽपीात	ऽपीति
४७४ । १६	मनुपे-	मनपे-
४७६ । ११	धारणा-	धारण-



प्रान्ताङ्कशुद्धिपत्रम् ।

अशुद्धाः अङ्काः ।	शुद्धाः अङ्काः ।	पङ्क्तौ ।	पृष्ठे
१४८ । ६७	१५८ । १६	१७	२७६
१५६ । ४	१५६ । ३	२	२८१
१६३ । १०	१६३ । ११	१	२९०
१७३ । २४	१७२ । २४	२१	३०६
१७२ । २४	१७२ । २५	८	३१०
१७२ । २५	१७२ । २६	२	३११
२०७ । १	२०७ । २	२२	३५८
२०७ । २०	२०७ । १४	७	३५९
२२४ । ०	२२४ । १	१३	३७४

अशुद्धाः अङ्काः ।	शुद्धाः अङ्काः ।	पङ्क्तौ ।	पृष्ठे
२११ । २५	० । ०	१४	३८४
० ०	२३१ । १२	१८	३८४
,, । २३	,, । २२	२२	३८७
२४१ । ८	२४१ । ७	२८	३९८
२४४ । १७	२४४ । १८	२३	४०२
२७८ । १२	२७८ । १०	४	४३१
० ०	३०२ । ६	२५	४४५
३२ । २२	३२१ । २२	७	४७१



वेदान्तकल्पतरुपरिमले

प्रथमाध्यायस्य द्वितीयः पादः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥ १३२ । १

यत्सिद्धाविति । जगत्कर्तृत्वसिद्धौ सार्वज्ञ्यादिसिद्धिरेव तार्किकाणामप्युदाहरणम् । प्रथमे पादे इत्याद्युक्त एव भवतीत्यन्तं* वृत्तानुवादभाष्यं प्रथमपादार्थस्योपजीव्यत्वप्रदर्शनेन संगतावुपयुज्यते । अर्थान्तरप्रसिद्धानामित्यादि तु वृत्तानुवादभाष्यान्तरं न तत्रोपयुज्यते । प्रत्युत कैमुतिकन्यायावलम्बेनोत्तरपादारम्भाक्षेपगमकतया तदारम्भप्रतिकूलमित्याशङ्क्य तद्भाष्यमाक्षेपपरतयैव योजयित्वा तत्समाधानमस्पष्टब्रह्मलिङ्गानीति विशेषणेन भाष्यगतेन सूचितम् । पूर्वपक्षाभिप्रायं त्विति टीकायां दर्शितं तच्छङ्कान्तरस्यापि समाधानार्थमित्यवतारयति **यद्यर्थान्तरेति । कैव कथेति ।** श्रुतिबाधकस्य लिङ्गबाधनक्षमत्वं कैमुतिकन्यायसिद्धमित्यर्थः । अपि चेत्यादिना शङ्कान्तरं दर्शितम् । *तल्लयमित्यर्थ इति ।* डप्रत्ययान्तत्वेन टिलोप इति भावः । तस्मिन्ननितीति टीकोपवर्णितस्यैव विग्रहस्य प्रदर्शनं येन जातानि जीवन्तीत्यादिश्रुत्यनुसारेण तृतीयान्तं तत्पदं व्याख्येयमिति शङ्कावारणार्थं जन्मस्थितिलयान्वयिनि तत्पदे विभक्त्यैक्यायैवं व्याख्यानमिति† भावः । एवं च तस्माद् ब्रह्मणो जायतइति तज्जमिति टीकायन्थे सप्तम्यर्थे पञ्चम्यपादानपञ्चम्युपादानस्पष्टीकरणायेति तात्पर्यम् । श्वसितीत्यनितीति क्विबन्तस्य अनमित्यर्थतः पचाद्यजन्तेन ग्रहणम् । **क्रतुर्ध्यानमिति ।** क्रतू अध्वरसंकल्पाविति निघण्टुः । *तत्प्रधानस्तन्मय इति ।* मयड् विकारप्राचुर्यप्राधान्यादिष्विति के चन वैयाकरणाः पठन्ति ।

सापेक्षस्य गुणविध्यर्थमिति । *यद्यपि अग्निहोत्रं जुहोतीति केव-* ,, । १६
लकर्मविधिवत्केवलोपासनाविधिरप्युपपद्यते तस्य च दध्ना जुहोति दध्नेन्द्रि-

---

* उक्ता एव भवन्तीति २ पु॰ पा॰ ।   † व्याख्यातमिति १ पु॰ पा॰ ।

यत्कामस्य जुहुयात् चतस्रो गार्हपत्ये जुहोतीत्यादिगुणविधिं प्रत्यग्निहोत्रविधे-रिव शमविधिं प्रत्याश्रयदातृत्वमपि युज्यते तथापि स्ववाक्योपात्तधर्मविशिष्ट-जीवविषयकवेोपासनाविधिर्लब्धात्मा शमविधेराश्रयदाता भवतीत्युत्पत्तिशिष्ट-गुणाविरोध*एव तात्पर्यम् । ननु शूर्पविधेर्हेत्वपेक्षाभावे ऽपि दर्व्यादीनामपि होमकरणत्वस्य लाभार्थो हेतुः स्याद् दृष्टो ह्यातिथ्यायां चतुर्गृहीतान्याज्यानि भवन्तीत्योपभृताग्रगृहीतव्यवच्छेदार्थस्य विधेर्हेत्वनपेक्षत्वे ऽपि न ह्यत्रा-नूयाजा इज्यन्तइति तदनन्तराम्नातो हेतुरौपभृतमाज्यं चतुर्गृहीतं प्रयाजार्थम् उपरितनमनूयाजार्थमिति विभागज्ञापनद्वारा ऽन्यत्रापि यत्रेष्टिविकृतावनूयाजा-नामभावस्तत्र सर्वत्राप्यौपभृतोपरितनं चतुर्गृहीतं न कार्यमित्यधिकार्थस्य प्रकृतौ यदुपभृति प्रयाजानूयाजेभ्यस्तदिति वचनस्यातिह्रायेडोबर्हिः प्रति समानयते जुह्वामौपभृतमिति वचनस्य च पर्यालोचनया उपरितनप्रयाजद्वया-नूयाजत्रयार्थतया ऽवगतादौपभृताग्रगृहीतात्प्रयाजद्वयार्थमर्द्धं समानेतव्यमि-त्यधिकार्थस्य च लाभार्थं इत्यभिप्रायां शङ्कामनुवदति यत्त्विति । अनु-याजानामभावो हेतुर्मुख्यो लभ्य इति† तत्र तथा भवतु नाम इह तु दर्व्या-दिषु मुख्यमन्त्रकरणत्वं न लभ्यतइति विशेषमभिप्रेत्य परिहरति न हि **साक्षादिति । हेतुवचनस्येति ।** हिशब्दबोध्यहेतुत्वाधिष्ठानान्नकरणत्व-वाचिन्यास्तृतीयाविभक्तेरित्यर्थः ।

अनुवादत्वादिति । ननु स्तुतिपक्ष इव हेतुपक्षे ऽप्यन्नकरणत्व-स्यानुवादस्तुल्यः । तेनेत्यनेन प्रातिपदिकपरामृष्टशूर्पगतमन्त्रकरणत्वं यथा-सिद्धमनूद्य *तस्य हिशब्दश्रुत्या हेतुत्वं प्रतिपाद्यते न त्वपूर्वमन्त्रकरणत्वं* विधीयते तस्य हेतुत्वनिर्देशान्यथानुपपत्त्या यद्यदन्नकरणं तेन तेन होत-व्यमिति व्याप्त्याक्षेपेण दर्व्यादीनामपि शूर्पसाधारणान्नकरणत्व‡सद्भावेन होमसाधनत्वं प्राप्यते । सत्यम् । तुल्ये ऽप्यनुवादत्वे स्तुतिपक्ष एवाश्र-यणीयः । अन्यथा श्रुतस्य शूर्पस्याऽश्रुतानां दर्व्यादीनां च विकल्पापत्तेः । विषमशिष्टविकल्पस्य चात्यन्ताऽन्याय्यत्वात् । हिशब्दस्तु निपातत्वात् प्रसिद्ध्याद्यर्थान्तरमालम्ब्य चरितार्थः । हेत्वर्थत्वे ऽपि स्तुतावेव हेतुभावं

---

* गुणाविरोधे इति १-२ पु॰ पा॰ । † लभ्यतइति १ पु॰ पा॰ ।
‡ शूर्पसाधारण्यवाचकवाचकरणत्वेति २ पु॰ पा॰ ।

ब्रूयात्तस्माद्यजमानो ऽयजमानादुत्तरः तस्माद् दक्षिणो ऽर्द्धं आत्मनो वीर्यवत्तर इत्याद्यर्थवादेषु हेतुवचनात् । **अतः स्ववाक्यस्थेनेति ।** मयडर्थो मनोवच्छिन्नतया तद्विकारो जीव इति स एव सर्वनामार्थो भवेदिति भावः । अस्तु तर्हीति क्व चित्पाठः सोपि कथं चिदुक्ताभिप्रायो योज्यः । **विकार-** १३३ ।
प्राचुर्येति । प्राधान्यादेरप्युपलक्षणमेतत् । एवं च प्रकृतेन ब्रह्मणैवाकाङ्क्षाशान्तिः । व्युत्पत्तिसिद्धस्य सर्वनाम्नां प्रकृतपरामर्शित्वस्य प्रत्यभिज्ञापकानपेक्षत्वात् तदभावेपि सा वैश्वदेव्यामिक्षेत्यादिषु प्रकृतपरामर्शदर्शनादिति भावः ।

ननु मा भूद्विकारादिरूपतया संदिग्धेन मयडर्थेनाकाङ्क्षापूरणं स क्रतुं कुर्वीतेत्यत्र श्रुतेन तत्पदार्थेन स्यात् । न च तथा सति मनोमयत्वादीनां सर्वेषामुपासकविशेषणत्वापत्त्योपास्यगुणत्वालाभः । कस्य क्रतुमिति प्रति*सम्बन्ध्याकाङ्क्षायामन्तर्ङ्गो येनादर्शनमिच्छतीत्यत्रेवान्तरङ्गत्वात् स्वात्मन इति लब्धे स्वात्मन इह मनोमयत्वादिगुणविशिष्टतया बुद्धिसन्निहितत्वात्तावद्गुणाम्नानवैयर्थ्यानुरोधाच्च तेषामर्थादुपास्यगुणत्वलाभादेवं मनोमयत्वादीनां समानाधिकरणसमानलिङ्गतत्पदोपात्तविषयत्वे संभवति न विप्रकृष्टवाक्यान्तरश्रुतभिन्नलिङ्गोपात्तब्रह्मविषयत्वकल्पनं युक्तम् । तत्कल्पने स क्रतुमिति तत्पदस्य वैयर्थ्यं च स्यात् क्रियया कर्तुराक्षेपतो लभ्यत्वात् तेषां तत्पदोपात्तविषयत्वाङ्गीकारे वक्ष्यमाणगुणाश्रयदानार्थतया तस्यावैयर्थ्यं शक्यं वक्तुम् । उमां स पश्यन् ऋजुनैव चक्षुषेत्यत्र चक्षुषः पश्यतिक्रियाकरणत्वेनाक्षेपतो लभ्यत्वे ऽपि ऋजुत्वगुणाश्रयदानार्थतयैव चक्षुषेत्यस्य । तस्मादिहान्यपरवाक्यान्तरश्रुतब्रह्मोपादानकथनं न युक्तमित्याशङ्कानिराकरणार्थत्वेन तथा चेत्येतदर्थमवतारयति **ब्रह्मोपादानइति ।** ,, । १३

अयमाशयः । मनोमयः प्राणशरीर इत्यादीनां प्रथमान्तानां न तत्पदोपात्तजीवविशेषणसमर्पकतया ऽन्वयः किं तु स क्रतुं कुर्वीतेति विधीयमानोपासनाप्रकारसमर्पकतया । एतमितः प्रेत्याभिसंभविता ऽस्मीत्येतदनन्तरमितिकरणादनेन प्रकारेण क्रतुं कुर्वीतेत्यन्वयप्रतीतेः । तथा ऽन्वये

---

* प्रतीति नास्ति २ पु ।

सत्येव एष मे आत्मान्तर्हृदयइति वाक्यसामञ्जस्याच्च । तस्योपासनाप्रकाराभिनयपरत्वं विना स्वतन्त्रश्रुतिवाक्यत्वे मे इत्यस्यान्वयसामञ्जस्याभावात् । तथा सत्येव च एष मआत्मा ऽन्तर्हृदयइति वाक्यानां त्रिः पाठस्य सर्वकर्मा सर्वकाम इत्यादिवाक्यानां द्विः पाठस्य च तत्र तत्र स्थाने हृदयान्तर्वर्तित्वाद्यनुसन्धानाभ्यासार्थत्वेन सार्थकत्वात् । दृष्टो हि प्रायणीयं प्रथममहश्चतुर्विंशं द्वितीयं चत्वारो ऽभिप्लवाः षडहाः एकः पृष्ठ्यः* षडहः समासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयो ऽभिप्लवाः षडहाः एकः पृष्ठ्यः षडह इत्यादौ गवामयनिकाहःक्लृप्तिवाक्ये अभिप्लवषडहादिशब्दानामसकृत्पाठस्तत्र तत्र स्थाने षडहाद्यनुष्ठानाभ्यासार्थः । एवमितिशब्दोक्तः प्रकारश्च मनोमयत्वाद्यनुसंधेयगुणजातरूपस्तत्क्रमरूपो वा द्वितीयपक्षे मनोमयत्वादीनामुपास्यगुणानां विधानं तत्क्रमविधानादाक्षेपतो लभ्यते पृष्ठगतसर्वताविधानादिव पृष्ठानाम् । एवं च मनोमय इत्यारभ्यान्वयिनेतिकरणेन मनोमयत्वादेरेतं मनोमयत्वादिविशिष्टं प्राप्तास्मीत्येतदन्तस्य सर्वस्याप्यर्थजातस्य क्रतुं कुर्वीतेति विधीयमानायामुपासनायां प्रकारतापादनान्मनोमयत्वादिप्रकारेण मनोमयत्वादिक्रमेण वा क्रतुं कुर्वीतेत्युपासनावाक्यार्थपर्यवसाने स्थिते तेन प्रकारेण तत्क्रमेण वा कस्य क्रतुः कार्य इत्याकाङ्क्षितं विशेष्यमन्यतः प्राप्नुवदपेक्षणीयम् । तत्र शमविधिवाक्ये अन्यार्थसन्निधानाद् ब्रह्म विशेष्यतया प्राप्नोति स्ववाक्ये स इत्यन्यार्थसन्निधानाज्जीवः तत्र कतरस्य ग्रहणं न्याय्यमिति विशये वाक्यशेषगतानां प्रथमान्वितानां बहूनां लिङ्गानां ब्रह्मश्रुतेश्च सामञ्जस्यानुरोधाद् ब्रह्मण एव ग्रहणं न्याय्यमिति निश्चीयते । ब्रह्मण उपास्यत्वे ऽप्येष मआत्मेति समभिव्याहृतात्मशब्दानुसारेण मनोमयादिशब्देषु पुँल्लिङ्गोपपत्तेः ।

यत्तु मनोमयत्वादीनां स क्रतुं कुर्वीतेत्यत्र तत्पदोपात्तजीवान्वयित्वाभावे तस्य वैयर्थ्यं स्यादिति । तन्न । तस्य वाक्यान्तरसन्निधापितमपि ब्रह्मैवोपास्यत्वेन ग्राह्यमित्येतज्ज्ञापनार्थत्वेनैव चारितार्थ्यात् । तथा हि । तत्र तत्पदं जीवं परामृशत् संकल्पानुसारिफलप्राप्तियोग्यत्वेन परामृशति तेन रूपेण कृतत्वात् तथा तत्परामर्शश्च मनोमयः प्राणशरीर इति जीवलिङ्गे ऐहिकामु-

* अभिप्लवाः पृष्ठ्यानामेक पृष्ठ्य इति २ पु. पा. ।

ष्मिकपरिश्रमखेदसंपादकमनःप्राणसम्बन्धित्वरूपस्वतःसिद्धहेयगुणपरतया न व्याख्येये तत्क्रतुन्यायविरोधात् किं तूपादेयगुणपरतया व्याख्येये इति सूचनार्थः । तेन मनोमय इत्येतत्सगुणब्रह्मोपासनासिद्धस्य ब्रह्मलोके भोग्यभोगोपकरणानि यानि* प्राकृसिद्धान्यर्णवादीनि यानि च स्वसंकल्पसाध्यानि स्त्यन्नपानादीनि तानि† सर्वाणि स्वाप्नपदार्थवद् मानसप्रत्यय‡रूपाणीति छान्दोग्यभाष्ये दहरविद्याप्रकरणे ये वर्णिता मनोविकारा भोग्यादयः तदुपादानतया तत्तादात्म्यपरम् । प्राणशरीर इत्येतत्प्राणा इन्द्रियाणि वायवो वा शरीराणि शरीरवन्नियम्यान्यस्येति सर्वात्मना यद्वश्येन्द्रियत्वं वश्यप्राणवायुत्वं वा हिरण्यगर्भेण सह मोक्षमाणानाम् अहंग्रहोपासकानामपेक्षितपरब्रह्मसाक्षात्कारादिसंपादनार्थचित्तवशीकरणोपयोगि तत्परमिति सिध्यति तेनैवंभूतगुणानुसंधानानुसारिफलोपयोगितया वाक्यान्तरसन्निधापितमपि ब्रह्मैवोपास्यत्वेन ग्राह्यमिति च सिध्यति । न चैतद्यथाक्रतुरित्युपन्यस्तात्तत्क्रतुन्यायमात्रात्सिध्यति । यथा सत्यपि तत्क्रतुन्याये वचनबलाद् जीवविषयया ऽपि पञ्चाग्निविद्यया ब्रह्मप्राप्तिः तथा क्रतुं कुर्वीतेत्यत्र विहितया ऽन्तरङ्गत्वादाख्यातार्थान्वितत्वेन बुद्धिसन्निहितत्वाच्च जीवरूपास्य परिगृहे तवत्योपासनयापि ब्रह्मप्राप्तिरस्त्विति शङ्कावकाशसद्भावात् । तस्मात्त्व इत्ये तदपि ब्रह्मोपादानहेतुवाक्यशेषोपष्टम्भकमिति न तद्वैयर्थ्यमिति । ए षाच ब्रह्मणि जीवलिङ्गयोजना कार्या जीवे वा ब्रह्मलिङ्गयोजनेत्यग्रिमवि चारस्य नास्त्यवकाशः । मनोमयत्वप्राणशरीरत्वरूपपर्यालोचनायां तयो स्वत एव ब्रह्मपर्यवसानात् । ब्रह्मलिङ्गानां बाहुल्यात्तदनुरोधेनापि तयोर्ब्रह्मपर्य वसायित्वाच्च । बहूनि ह्यत्र ब्रह्मलिङ्गानि । सर्वकर्मत्वं बालाक्यधिकरणन्यायेन कर्मशब्दस्य कार्यपरतया सकलकार्यकर्तृत्वं सर्वकामत्वं तदुपयोगिसकलद्रव्य विषयसृष्टिकामनावत्त्वं सर्वगन्धत्वं सर्वरसत्वं च सकलदेशकालवर्तिवस्तु जातगतसर्वगन्धरसाश्रयत्वम् सर्वमिदमभ्यात्तमित्यनेनोक्तं सर्वव्यापित्व मित्यादीनि । न चैतानि जीवउपपद्यन्ते । नन्वेषां जीवे ऽनुपपत्तौ पुनः स एव तत्क्रतुन्यायविरोधः । मनःप्राणोपकरणत्वयोर्हेयत्वनित्यप्राप्त्वाभ्या

* यानीति २-३ पु॰ नास्ति । † तानीति २ पु॰ नास्ति ।
‡ प्रत्ययेति नास्ति २ पु॰ । § व्या सू अ १ पा॰ ४ सू॰ १६ ।

मिव तेषामपि प्राप्तुमशक्यत्वेनोपासकप्रेप्सितत्वासम्भवादिति चेत् । उच्यते । तत्क्रतुन्यायो न सर्वगुणविषयः किं तूपासकप्राप्यर्हगुणविषयः । तथा चोद्गीथोपास्याकाशादिश्रुतसर्वभूतकारणत्वादि*वन्नोपासकेनोपासनाफलानुभवदशायां सर्वकर्मत्वादयः प्राप्तुं योग्या इति न तद्विषयः । न चैतावता मनोमयत्वादिकमपि तदप्रेप्सितगुणतया व्याख्याय तथापि तत्संकोचः कल्पनीयः । तदसंकोचव्याख्यानसंभवे ऽन्यथा व्याख्याय तत्संकोचकल्पनानौचित्यात् । अथ वा सर्वगतत्वादिकमप्यर्हंयहोपासकानां क्रममुक्तिफलकत्वादाविर्भूतस्वरूपैरुपासकैः क्रमेण प्राप्तुं योग्यमिति न तथापि तत्क्रतुन्यायसंकोचः कल्प्यः । अन्यथा हिरण्मयपुरुषोपासनाफले सर्वदुरितविरहे का गतिः । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति तत्र सफलवाक्ये सर्वशब्दस्य संकोचकल्पने तथैव स एष सर्वेभ्यः पाप्मभ्य इति तत्पूर्ववाक्ये ऽपि तत्संकोचः प्रसज्येतेति सर्वदुरितविरहो ब्रह्मलिङ्गं न स्यात् । एवं सत्यपि यदि मनोमयत्वं जीवस्य मनोवच्छेदकृतमनोविकारत्वं प्राणशरीरत्वं च प्राणोपकरणत्वम् । यदि च ब्रह्मजीवलिङ्गानां नाल्पत्वबहुत्वकृतं वैषम्यं तथापि जीवलिङ्गानामेव ब्रह्मणि योजनं कार्यमिति न्यायान्तरव्युत्पत्त्यर्थमुपरितनटीकाकल्पतरुग्रन्थयोः प्रवृत्तिरिति द्रष्टव्यम् ।

प्रस्तुते इति । ननु यदि प्रस्तुते अधिष्ठानासाधारणरूपज्ञानमस्ति कथं तर्हि समारोपितो जीवभावो न निवर्तते यदि तदानीं† सदपि समारोपितनिवर्तनाक्षमं किमिति जीवस्तेन रूपेण रूपवान्न स्याद् रज्ज्वसाधारणरूपज्ञाननिवर्तनीयभुजगविलक्षणत्वादिति चेत् । अत्रायमाचार्याणामाशयः । जीवधर्मयोर्ब्रह्मणि योजनायां हि तस्मिन्ननवच्छिन्नब्रह्मत्वबुद्धिर्न हातव्या तरङ्गधर्माणां समुद्रे योजनायां तस्मिन् व्यापित्वबुद्धिरिव । ब्रह्मधर्माणां जीवे योजनायां तु तस्मिन् परिच्छिन्नजीवत्वबुद्धिर्हातव्या दर्पणमुखे ऽवदातत्वयोजनाया ग्रीवास्थमुखभिन्नत्वबुद्धिरिव । न च क्व चित्स्वरूपमनुपमृद्य वाक्यशेषगतलिङ्गयोजनाया कर्तुं शक्यायामन्यत्र तदुपमृद्य

* करणत्वादीति २ पु पा ।

† तर्हिदानीमिति २ पु पा॰

था कार्येति । आचार्यैस्तुतो ब्रह्माभिन्नस्यापि जीवस्येत्यादिपूर्वग्रन्थेनायमाशयः स्पष्टीकृतः । अधिष्ठानासाधारणरूपज्ञाने सति समारोप्याभावोत्प्याप्येष एवार्थो विवक्षितः ।

नन्वेतदुपलक्षणायेति टीका न युक्ता । वाक्योपक्रमान्निर्णयस्यापि युक्ततया तेन वाक्यशेषानिर्णयस्यानुपलक्षणीयत्वात् । न चान्यार्थसन्निधानान्निर्णयो न दृढ इति तदुपलक्षणत्वोक्तिरिति वाच्यम् । बुद्धिस्थपरामर्शिना सर्वनाम्ना ऽन्यार्थसन्निहितस्यापि परामर्शोपपत्तेः । ज्योतिरधिकरणे* तथाभूतपरामर्शादेव निर्णयस्य कृतत्वाच्च । न च तेन गतार्थः स न्याय इति न्यायान्तरोपलक्षणत्वोक्तिरिति वाच्यम् । ब्रह्माब्रह्मलिङ्गसमवाये ब्रह्मलिङ्गादेव निर्णयो युक्त इति न्यायस्यापि प्रतर्दनाधिकरणे† प्रदर्शितत्वात् । न च जीवे ऽपि जीवबुद्ध्युपमर्देन ब्रह्मबुद्ध्या तल्लिङ्गानि योजयितुं न शक्यन्तइत्यधिकरणशङ्कापरिहारप्रदर्शनाय प्रतर्दनाधिकरणसिद्धन्यायस्य पुनरुद्भावनमिति वाच्यम् । ज्योतिरधिकरणन्यायपुनरुद्भावनमपि वस्तुतो ऽन्यार्थमपि न भवति ब्रह्मणः सन्निधानमित्यधिकार्थप्रदर्शनाय पुनरुद्भावनमिति‡ वक्तुं शक्यत्वात् । सर्वं खल्विति वाक्ये इदमिति न सर्वस्य विशेषणं वैयर्थ्यात् किं तु ब्रह्मणस्तस्य च फलं प्रकृतत्रिपाद्ब्रह्माधिकारलाभः । स च प्रकृतस्य प्रयत्नेनाधिकारः स्वानर्थक्यपरिहाराय क्रतौ वाक्यशेषगतलिङ्गं वाधित्वोपास्यत्वेन ब्रह्मसमर्पणार्थं इत्येवमनन्यार्थं ब्रह्मणः सन्निधानम् । ब्रह्मणः सर्वात्मत्वोक्त्या सर्वस्य ब्रह्मात्मता ऽप्यर्थात् सिध्यतीति तदवलम्बना प्रासङ्गिकोपकाराभिप्राया भाष्ये शमविध्यर्थवादतोक्तिः न तु शमविधिशेषत्वाभिप्राया । यद्यपि शमविधिविवक्षयेति भाष्ये यद्यपीत्यनेनाभ्युपेत्यवादत्वद्योतनाद् ज्योतिरधिकरणे न केवलं ज्योतिर्वाक्यएव ब्रह्मानुवृत्तिः परत्रापि शाण्डिल्यविद्यायाम् अनुवर्तिष्यते ब्रह्मेति ज्योतिर्वाक्ये त्रिपाद्ब्रह्मानुवृत्तौ विवदमानं पूर्वपक्षिणं प्रति शाण्डिल्यविद्यायां तदनुवृत्तिः कथं हेतुभावं प्रतिपद्येत । यदि तदनुकर्षणैकप्रयोजनेनेदं

---

* व्या॰ अ॰ १ पा॰ १ सू॰ सू॰ २४–२७ । † व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ २८–३१ ।

‡ पुनरुद्भावनमिति १ पु॰ नास्ति ।

विशेषणसामर्थ्यं नाश्रीयेतेत्यधिकार्थप्रदर्शनपरत्वं हि शक्यं वक्तुम् । तस्मादेतदुपलक्षणायेति ग्रन्थो न युक्त इत्याशङ्कापनयार्थमेतस्यैवोपलक्षणायेति न तदर्थः किं त्वेतस्याप्युपलक्षणायेति तदर्थ इति दर्शयितुम् ।

२ झटिति प्रतीयमानमाद्यार्थमादाय शङ्कते **ननु यद्युक्तरीत्येति** । नन्वधिकशङ्कापरिहारस्यास्मिन्नेव सूत्रे विवक्षितत्वे द्वितीयतृतीयसूत्रे पुनरुक्ते स्याताम् । ताभ्यां खलु ब्रह्मजीवयोर्जीवब्रह्मधर्मोपपत्त्यनुपपत्ती वर्णयिष्येते§ इति । न च ताभ्यामनुगमादिति प्रतर्दनाधिकरणसूत्रावयवेनास्पष्टं दर्शिता युक्तिः स्पष्टमनूदिता ऽधिकशङ्कापरिहारस्त्वाद्यसूत्रगवेति वाच्यम् । उपन्यस्ताधिकशङ्कापरिहारार्थत्वेनैव तृतीयसूत्रस्य टीकायामवतारितत्वात् । यदवोचाम इमारोप्यधर्मास्समारोपविषये सम्भवन्ति न तु विषयधर्माः समारोप्या इति तस्यैतदुत्थानमिति । तच्च सूत्रे टीकायामेवोक्तत्वाच्चेति चेत्सत्यम् । द्वितीयतृतीयसूत्रयोरनुवृत्तिव्यावृत्तिभ्यां ब्रह्मजीवयोर्जीवब्रह्मधर्माणामुपपत्त्यनुपपत्ती दर्शिते इह तु तयोरारोप्याधिष्ठानत्वारोपविषयत्वाभ्यामिति टीकाकारैः स्वोल्लिखितप्रकारमवलम्ब्येह सूत्रे तदुपलक्षणायेत्युक्तम् । तस्यैतदुत्थानमिति तु ब्रह्मजीवयोर्जीवब्रह्मधर्मोपपत्त्यनुपपत्तिप्रतिपादनसाम्यमात्रेणोक्तं न तु तदुपपादकप्रकारैक्येनापि । अतो न पुनरुक्त्यादिप्रसङ्गः ।

ननु भाष्ये विवक्षाभावाभिधानमनुपपन्नं पारतन्त्र्ये ऽपि विवक्षासम्भवात् ।

> शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते ।
> तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥
>
> तथर्ग्वेदादयो वेदाः प्रोक्ता ये ऽपि पृथक् पृथक् ।
> भोग्यत्वेनात्मनां ते ऽपि चैतन्यानुगताः सदा ॥
>
> तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने ।
> विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः ॥ इति

§ धर्मोपपत्तिर्दर्शयिष्यत इति २ पु० पा० ।

न्यायेन संप्रदायाद्या ये मीमांसकयाज्ञिकाः ।
वेदं व्याचक्षते तेषामभिप्रायो ऽयमिष्यते ॥

इति च पूर्वमीमांसकैरपि वेदे विवक्षायाः समर्थितत्वादित्याशङ्क्य तदपि भाष्यं स्वातन्त्र्याभावाभिप्रायमिति व्याख्यातमित्यवतारयति **विव-** १३४ । २
क्षाभावाभिधानमपीति ।

उद्देश्याऽविवक्षायामिति । यद्यपि विवक्षितशब्देन स्वार्थं परित्यज्योपादेयत्वलक्षणायां न विवक्षितत्वस्य वाक्यार्थानुप्रवेशस्तथापि लक्ष्यस्य मुख्यार्थसम्बन्धो ऽपेक्षणीय इत्युद्देश्योपादेययोर्मध्ये विशिष्योपादेयस्य विवक्षासम्बन्धिविवक्षायां तत्प्रतिद्वन्द्विन उद्देश्यस्य विवक्षाभावः पर्यवस्येदिति तात्पर्य्यम् । **सोमाधारत्वाविशेषेणेति ।** तथा च सोमावसेकनिर्हरणादिदृष्टप्रयोजनं ग्रहेष्विव चमसेष्वप्यपेक्षितमिति ग्रहैकत्ववद् ग्रहत्वमपि न विवक्षणीयमिति भावः । ननु यथा व्रीहीन्प्रोक्षतीत्यत्र द्वितीययोच्यमानं प्रोक्षणसाध्यत्वं पूर्वसिद्धानां व्रीहीणां स्वरूपेण न सम्भवतीत्यपूर्वसाधनत्वाकारेण साध्यत्वनिर्वाहार्थम् अपूर्वसाधनत्वलक्षणायां व्रीहिपदस्य यथा यवसाधारण्यं तथेहापि ग्रहपदस्योद्देश्यसमर्पकस्य चमससाधारण्यं स्यादित्याशङ्क्याह **ग्रहयागावान्तरेति ।** ननु सोमावसेकनिर्हरणादिदृष्टप्रयोजनाविशेषे ऽपि ग्रहयागाभ्यां सावान्तरापूर्वसाधनविवक्षया ग्रहेष्विव तदेकत्वविवक्षयैकस्मिन्नेव ग्रहे संमार्गो व्यवतिष्ठतामित्याशङ्कते **नन्विति । उपादेयविशेषणत्वादिति ।** उपादानाय संख्याविशेषस्यापेक्षितत्वात्तदपेक्षितविभक्त्युपनीतसंख्याविशिष्टएव प्रातिपदिकार्थे यागविशेषणं स्यादित्यर्थः । **अत्र** ,, ।
त्विति । उद्देश्ययोः परस्परसंबन्ध एकक्रियावशीकारप्रयुक्तः तयोरेवान्योन्याकाङ्क्षाप्रयुक्तो वा वाच्यः । द्विविधो ऽप्यत्र न संभवति । उद्देश्ययोः क्रियां प्रति प्रधानयोरुपादेयवत्क्रिया*वश्यत्वाभावात् । सोमावसेकनिर्हरणप्रयोजनस्य संमार्गस्य सर्वेषु प्राकरणिकेषु ग्रहेष्वपेक्षितत्वेन तेषु केषां चिद्व्यावर्त्तकस्य संख्याविशेषस्यानाकाङ्क्षितत्वाच्चेति भावः । ननु तथापि प्रत्ययानां प्रकृत्यर्थगतस्वार्थाभिधायकत्वनियमेन शब्दस्वाभाव्यादेकत्वविशिष्टस्य ग्रह-

---

* उपादेयक्रियेति २ पु॰ पा॰ ।

स्योद्देश्यत्वमनिधार्यमित्याशङ्क्याह ग्रहएवेति । एकत्वविशेषणे ऽपि सोमाव-सेकनिर्हरणप्रयोजनस्य सर्वग्रहेरवेवितत्वादुपादेयविशेषणस्योद्देश्यविशेषणस्य क्रियाङ्गत्वाभावेन तद्वैकल्यप्रयुक्तक्रियावैकल्याप्रसक्तेश्च ग्रहाणां प्रत्येकमेक-त्वमवलम्ब्य ग्रहमात्रणोद्देश्यत्वपर्यवसानं स्यात् । अथाप्येकवचनसार्थक-त्वाय तदुपनीतमेकत्वं ग्रन्थेकमुद्देश्यं कृत्वा ग्रहं संमृज्यात् चेकमेवेति वा-क्यार्थः कल्प्येत तदा वाक्यभेदः स्यादित्यर्थः । इदमुपलक्षणं त्रिदोषदुष्ट-
४ परिसंख्यादोषापत्तेरपि । विदिमात्रेति । ज्ञानमात्रफलकत्वात्तत्त्वावेदकप्रमा-णवत्प्रमितिफलकत्वाभावादित्यर्थः । विधिमात्रेति पाठे ऽपि विधिपदं ज्ञापनमात्रपरम् । कुतः प्रमितत्वाभाव इत्याकाङ्क्षायां तद्बाधनादित्यनेनोक्तं हेतुं व्याचष्टे तैर्वेदान्तैरिति । जीवाभिव्यक्तीनामिति । आध्यासि-कजीवरूपाभिव्यक्तीनामित्यर्थः । पूर्वपूर्वभ्रमनिमित्तकत्वमित्यनेन बीजा-ङ्कुरन्यायसाम्यार्थे टीकायामविद्यापदं भ्रमपरमिति व्याख्यातम् । तर्हि किं प्रवाहानादिभ्रमसन्तानव्यतिरेकेण* स्वरूपानादिरविद्या नास्ति सा ऽप्यस्ति वक्ष्यमाणेत्याह अनादिस्त्वति । ननु तादृशानां च जीवानामविद्या न तु निरुपाधिनो ब्रह्मण इति टीकायां सा ऽप्यविद्या जीवाश्रिता ऽभ्युपगता तत्प्रसङ्गाद् भ्रमरूपा ऽविद्यायामन्योन्याश्रयः परिहृतः तथा चाविद्या-धीनो जीवब्रह्मविभागस्तद्विभागे च सति जीवाश्रितत्वसिद्धिरविद्याया इत्यन्योन्याश्रयमाशङ्क्याह अनादिजीवाविद्ययोरिति । अविद्यासंबन्ध-स्तन्निरूपकाविद्याधीनः अविद्या ऽपि तत्संबन्धाधीना अविद्यासंबन्धाधी-नत्वात्सर्वविवर्तानाम् । तत्र यद्येतरेतरतन्त्रत्वमनादित्वान्न दोषावहम् एव-मिहापीत्यर्थः । क्वचित् प्रमेयत्वाभिधेयत्वादौ । ननु स्वाश्रयाश्रितत्वास्या-प्रसिद्धेः तेन विरोधप्रसञ्जनं मैवोपपादि जीवो यद्याश्रितः स्यादविद्या-श्रयो न स्यात्तदुपादानकप्रपञ्चवदिति प्रसञ्जनमुपपद्यते इत्यस्वरसादाह
१६ अपि चेति । नन्वमूर्तत्वे ऽपि नभःशब्दवदाश्रयाश्रयिभावः संभवतीत्या-शङ्क्याह अवच्छेद्येति । अन्यत्र यथा तथा वा ऽस्तु प्रकृते जीवाविद्ययो-रवच्छेद्यावच्छेदकभावमात्रमिष्यते अविद्यावच्छेदकोपाधिकं जीवत्वमिति जीवो विद्यया ऽवच्छिद्यते अविद्या च चैतन्याश्रिता वृक्षाश्रितः कपिसं-

---
* सन्तानाव्यतिरेकेणेति पु. ।

ो मूलेनेव जीवत्वेनावच्छिद्यतइति । नन्विदमप्यन्योन्याश्रयदुष्टमि-
शङ्क्याह तत्रेति । प्रमेयत्वाकारावगाहि प्रमाणं निरूपकप्रमेयावच्छेद्यं
यं च स्वविशेषणीभूतप्रमाणावच्छेद्यमित्येवमादिष्ववच्छेद्यावच्छेदकत्व-
तरेतरतन्त्रत्वं दुष्ट*मित्यर्थः ।

जीवाविद्ययोराश्रयाश्रयिभावाभावे कस्तयोराश्रय इत्याकाङ्क्षायां सर्व-
ञ्चविवर्त्ताधिष्ठानं चैतन्यरूपं ब्रह्मैव केवलमित्यवच्छेदकतोक्त्या† गर्भि-
मर्थं विवृणोति अधिष्ठानमिति । वैशेष्यादिति ष्यञ्प्रत्ययस्य चातु- १३५ । १८
र्ण्यादिवत्स्वार्थिकत्वे वक्तुं शक्ये ऽप्यधिकार्थलाभाय भावार्थत्वमाश्रितं‡
वो ऽप्यचातिशयो विवक्षितः न तु विशेषशब्दप्रवृत्तिनिमित्तरूपो धर्म
ते टीकातात्पर्यमाह न वैशेष्यादिति सूत्रइत्यादिना । अत्र मनो-
यत्वप्राणशरीरत्वयोर्जीवलिङ्गयोस्तत्क्रतुन्यायेन समारोप्यस्य रूपेण वि-
ये रूपवान् भवेदिति न्यायेन चापतद् ब्रह्मणि§ पर्यवसानमस्पष्टं ताभ्या-
पगताभ्यां स्पष्टमपि सत्यसंकल्पत्वादिब्रह्मलिङ्गमभिभूतम् । किं च हृद-
ायतनत्वं हृदये पर्याप्तवृत्तित्वं न तु हृदये कथनमात्रमित्यणीयस्त्वोप-
न्युपन्यासेनावगम्यतइत्युपपत्तिरूपतात्पर्यलिङ्गावगतं हृदयायतनत्वं तदु-
पत्तिरूपमणीयस्त्वं च प्रबलं जीवलिङ्गमिति ताभ्यामपि सत्यसंकल्पत्वा-
द्कमभिभूतमित्यस्पष्टब्रह्मलिङ्गतया पादसंगतिः । तर्हि दिवि दिव इति
भक्तिभेदेन प्रत्यभिज्ञाविच्छेदसंदेहादस्पष्टगायत्रीब्रह्मानुवृत्तिकं ज्योतिर्वाक्यं
षयीकृत्य प्रवृत्तं ज्योतिरधिकरणमप्यत्रैव पादे कर्तव्यं स्यादिति चेन्न ।
ाच स्पष्टब्रह्मलिङ्गस्य गायत्रीवाक्यस्यापि निर्णेतव्यत्वेन तस्य प्रथमपादे ऽपि
ंगतिसत्त्वात्॥ ॥

अत्ता चराऽचरग्रहणात् ॥ ९ ॥ १३६ ।

यत्र च सो ऽत्तेति । एवं क इत्था वेदेत्यस्यावृत्तिरुक्ता ।
ादि न भोक्तृत्वात्संशय इति । यद्यप्यत्तृत्वस्य भोक्तृत्वसंहर्तृत्वान्यत-
रूपाऽनिर्द्धारणाद् जीवाग्निपरमात्मसंशय इति भोक्तृत्वस्य तदर्थसंशयैक-

* तत्त्वदुष्टमिति १ पु॰ पा॰ । † अयच्छेद्यावच्छेद्यावच्छेदकतोक्त्येति १ पु॰ पा॰ ।
‡ आश्रितुमिति २ पु॰ पा । § न्यायेन चा एतद्ब्रह्मणि इति २ पु॰ पा॰ ।
॥ अत्र प्रथमं सर्वत्रप्रसिद्ध्यधिकरणं संपूर्णम् ।

नीयः । न च किंचित्पदगतस्यायत्तलक्षणीयगुणग्रहणानुसारेणैतेषां संकोचो युक्त इत्यर्थः ।

। ७ **यदि मृत्युपदादिति** । अयमाशयः । मृत्युपदसन्निधानात्तद्विनाश्यं सर्ववस्तु ग्राह्यमित्येतदयुक्तम् । तथा सति ब्रह्मक्षत्रपदयोर्लक्षणापत्तेः । न चेष्टापत्तिः । ब्रह्मक्षत्रयोर्मृत्युमिश्रणसत्त्वेन मुख्यार्थे अन्वयानुपपत्त्यभावात् । न च तदभावे ऽपि समभिव्याहृतस्य मृत्युमिश्रणस्यान्यसाधारण्यमात्रेण लक्षणा वाच्या "अन्नकरणत्वस्य दर्व्यादिसाधारण्ये ऽपि तेषु शूर्पशब्दस्य लक्षणाऽनभ्युपगमादिति । **प्राणिष्विति** परिहारवाक्यस्यायमाशयः । अत्तृत्वं भोक्तृत्वं संहर्तृत्वमिति पक्षद्वये ऽप्योदनपक्षवद् ब्रह्मक्षत्रपदयोरपि लक्षकत्वमवश्यंभावि न हि स्त्यादिरूपतया भक्ष्यतया वा ब्रह्मक्षत्रयोरेव भोक्ता कश्चिद् जीवो ऽस्ति । न वा परमेश्वरस्तदुभयमात्रसंहर्ता न चाधिकभोक्तृत्वे ऽप्यधिकसंहर्तृत्वे ऽपि तन्मात्रग्रहणे प्रयोजनमस्तीति ।

नन्विदमेव प्रयोजनं यत् पञ्चनखादिष्विवान्यनिवृत्तिरित्याशङ्कते **नन्विति** । पञ्चनखादिवाक्येषु मनुष्यादिनिवृत्तिः प्रत्यवायपरिहारेण फलवती । इह तु प्रयोजनं न पश्यामः । स्वरूपेणान्यनिवृत्तेर्बाधितत्वात् । उपासनाप्रकरणाभावेनात्त्यादित्यपुरुषयोर्व्यवस्थितलोककामविशेषेणात्तृत्वश्रवणवद्विशिष्य ब्रह्मक्षत्रसंहर्तृत्ववर्णनमुपासनार्थमिति कल्पयितुमशक्यत्वाच्च । तथा च यथा यस्मिन् पञ्चपञ्चजना इति मन्त्रे विशिष्य पञ्चानां मनुष्याणामाधार इति कीर्तने प्रयोजनं न किं चिदस्तीति तल्लक्षणीयाकाङ्क्षायां वाक्यशेषात् प्राणादयस्तल्लक्षणीया निश्चीयन्ते एवं विशिष्य ब्रह्मक्षत्रग्रहणं निष्प्रयोजनं सदितरेषामपि केषां चिदुपलक्षणमित्युपलक्षणीयविशेषाकाङ्क्षायां पश्चात्तनमृत्यूपसेचनकीर्तनात् तदुपसिच्यमानं सर्वमुपलक्षणीयं निश्चीयत-

१० इति परिहाराद्यभिप्रायमाह **पञ्चपञ्चनखादौ हीति** । अग्नेर्व्याघ्रादिजीवस्य च यत्किञ्चित्संहर्तृत्वसम्भवे ऽपि सकलचराचरसंहर्तृत्वं परमात्मन एवेति टीकोक्तमयुक्तम् । अविकारस्य तस्य संहर्तृत्वस्यैवायोगादिति शङ्कां निराकरोति **मायोपाधेरिति** । मायिनं तु महेश्वरमिति मायोपाधिकपरमेश्वरप्रकरणे यस्मिन् चेचे संहरत्येष देव इति तस्य संहर्तृत्वं श्रूयते तच्च

संसारपरिभ्रमणखिन्नान्प्राणिनः कं चित्कालं महासुषुप्त्या विश्रान्तिं प्रापयितुमिति न तत्तस्य दोषावहम् । प्रायः प्राणिनां दैनन्दिनशर्वरीषु युगपत् सुषुप्तिप्रापकाऽदृष्टोन्मेषवन्महाशर्वरीषु सर्वप्राणिनां युगपन्महासुषुप्तिप्रापकाऽदृष्टोन्मेषोऽपि नानुपपन्न इति भावः । अत्र प्रथमप्रतीतभोग्यत्वलक्षणापवादेन विनाश्यत्वलक्षणां व्युत्पाद्य ब्रह्मलिङ्गस्योन्मेषणीयत्वादस्यष्टब्रह्मलिङ्गता* ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥ १३७

पूर्वसिद्धान्तपक्षाक्षेपं इति । बुद्धिजीवाविति पूर्वपक्षस्य जीवपरमात्मानाविति सिद्धान्तपक्षस्य चाक्षेप इत्यर्थः । प्राकृतसुपर्णेति । द्वा सुपर्णेति मन्त्रान्तरे† द्वित्वस्य सुपर्णविषयत्वादिहापि तद्विषयत्वशङ्केत्यर्थः । यदि स्तृष्टिमन्त्रकेष्टकानामिति । तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोरित्यनुशासनात्स्तृष्टिशब्दः स्तृष्टिमन्त्रोपधेयेष्टकावाची ।

नन्विष्टकानामुपधाने विधानमित्ययुक्तम् । मन्त्रविशेषोपधेयत्वेन स्तृष्टिशब्देनानूद्यमानानामिष्टकानामुपधानस्य प्रागेव प्राप्तिर्वक्तव्यत्वात् । अन्यथा स्तृष्टिशब्देनानुवादस्योपधानविधानस्य चान्योन्यापेक्षत्वेन परस्पराश्रयापत्तेः । स्तृष्टस्तृष्टिमन्त्रकत्वविशेषस्येत्याद्यप्ययुक्तम् । स्तृष्टस्तृष्टिमन्त्रोपधेयत्वविशेषावगमोपायाभावे सर्वासामिष्टकानां स्तृष्टिमन्त्रोपधेयत्वावगमे ऽपि तुल्यन्यायतयोपायाभावेनास्याप्यनवगमप्रसङ्गात् । स्तृष्टिमन्त्राम्नानचारिताथ्र्याय तदुपधेयत्वावगमे तथैवास्तृष्टिमन्त्राम्नानचारितार्थ्याय स्तृष्टिमन्त्रैश्चतुर्दशभिरुपधेयाः‡श्चतुर्दशेष्टकास्तत्संकलितैस्त्रिभिरस्तृष्टिमन्त्रैरुपधेयास्तिस्र इष्टका इति विशेषावगमोपपत्तेः । कथं चित्स्तृष्टिमन्त्रोपधेयत्वावगम एवोपायो ऽस्ति नाऽस्तृष्टिमन्त्रोपधेयत्वावगम इति विशेषसमर्थने ऽपि सर्वा एवेष्टकाः स्तृष्टिमन्त्रकाः स्युरित्यापादनमयुक्तम् । प्राणभृत उपदधाति चित्रिणीरुपदधाति वज्रिणीरुपदधातीत्यादिविध्यन्तरबलात् प्राणभृदादिमन्त्रान्तरोपधेयेष्टकानामप्यङ्गीकार्यत्वात्सर्वेष्टकोपधानस्य स्तृष्टिमन्त्रकत्वे ऽप्यस्तृष्टिमन्त्रान-

---

* अत्र द्वितीयम् अत्त्रधिकरणम् संपूर्णम् ।

† सुपर्णा मन्त्रान्तरे इति २ पु· पा· ।

‡ उपधेया इति २ पु· पा· ।

कोटितया फलसंशयहेतुत्वं सम्भवति तथापि कोटिद्वयसाधारणधर्मतया
१३६ । २३ संहर्तृत्ववत्संशयहेतुत्वं न सम्भवतीत्यत्र तात्पर्यम् । **मृगयाविनोदे**
युद्धमृगयाविनोदे । मृगयाविनोदिन इति पाठः साधुः । मृगयाविन इति
पाठस्त्वक्षरद्वयभ्रंशेन प्रामादिकः । अथ वा युद्धरूपया मृगयया अवति परप्र-
णीतदुष्टमृगोपद्रुतं स्वदेशमिति वा हिनस्ति तानिति वा मृगयावी ।
अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवा
प्त्यालिङ्गनहिंसादानभागवृद्धिष्विति धातोराभीक्ष्ण्ये ताच्छील्ये वा णिनिः ।

क्षत्रिय एवेति । वस्तुतो मृगयासु मृगहन्ता क्षत्रिय एव प्रतीयत इ-
त्यर्थः । यद्यपि त्वत्कृपाणभुजङ्गस्य वीर विद्विषतो यश इत्यत्रोपचरितवीरप्रति-
सम्बन्धिनि कृपाणे मुख्यतत्पातृत्वादर्शनान्नायं नियमः । तथाप्युभयथा
दर्शने सत्यत्र बाधकाभावेनानारोपितमेव भोक्तृत्वं ग्राह्यमिति भावः ।
नन्वोदनशब्देन प्रसिद्धौदनगतं भोग्यत्वं लक्ष्यते चेत्तत्प्रतिसम्बन्धित्यतृत्वं
भोक्तृत्वमिति प्रतीतावपि तेन विनाश्यत्वं लक्ष्यते चेदत्तृत्वं विनाशकत्वरूपं
संहर्तृत्वं पर्यवस्येत् तत्परस्मिन् सम्भवतीति चेन्न । गौणवृत्तावसाधारणगु-
णग्रहणसम्भवे साधारणगुणग्रहणायोगात् । न ह्यग्निर्माणवक इत्यत्र पैङ्गल्या-
देरिव द्रव्यत्वादेर्ग्रहणमस्ति । मृत्यूपसेचनसन्निधानादत्तृत्वं संहर्तृत्वमित्य-
भ्युपगमे ऽप्यग्निरेवात्तेति पूर्वपक्षान्तरं यदि त्विति टीकायां दर्शितं तदनु-
,, । २५ पपन्नं परमात्मनो ऽपि संहर्तृत्वसम्भवादित्याशङ्क्याह **अविक्रियस्येति ।**
नन्वत्ता निर्विशेषः परमात्मेति नोच्यते यत्र स इति तस्य पृथग्ग्रहणात्
सविशेषस्य तु स्रष्टृत्वादिविकारवत् संहर्तृत्वविकारो ऽप्युपपद्यते । नैष दोषः ।
अविक्रियस्येत्यनेन रागद्वेषादिप्राणिसंहारहेतुविकाराभावस्य विवक्षितत्वात् ।
न च प्राणिकर्मानुसारेण संहर्तृता स्यादिति वाच्यम् । समृत्युकस्य सकलस्य
युगपन्नाशहेत्वदृष्टपरिपाकमेलनासम्भवात् । न च क इत्था वेदेति दुर्ज्ञा
नत्वलिङ्गादत्ता परमात्मा स्यादिति वाच्यम् । तस्य सोता यत्र प्रतिष्ठित-
स्तन्मात्रविषयत्वे सम्भवत्यावृत्त्या ऽत्तृविषयत्वस्याकल्पनीयत्वादिति भावः ।

सिद्धान्तटीकायां ब्रह्मक्षत्रशरीरयोर्भोगायतनभोगसाधनरूपयोरोदनवद्
भोग्यत्वगुणस्य गौणवृत्तिनिमित्तत्वं निराकृत्य स्वाभिमतं विनाश्यत्व*गुणस्य

* स्वाभिमतविनाश्यत्वात १ पु० मा० ।

तन्निमित्तत्वमुपपादयितुं प्रवृत्तस्य न चात्र मृत्युरिति टीकाग्रन्थस्य तात्प-
र्येमाह **अपि चेति** । ब्रह्मक्षत्रयोर्मृत्योश्च तावदोदनोपसेचनभावरूपणा- १३७ । २
दन्नदधिरीत्या संबन्धः प्रतीयते तथा च विनाशकमृत्युसंसृष्टत्वप्रतीत्यनु-
सारादोदनशब्देन विनाश्यत्वं लक्षणीयं स्वबुद्ध्युपस्थापितवैशेषिकगुणग्रह-
णादप्येकवाक्यतापन्नपदान्तरार्थोपस्थापितगुणग्रहणस्य बुद्धिलाघवेनैकवाक्य-
तासामर्थ्येन च न्याय्यत्वात् चरमश्रुतेनाप्येकवाक्यान्तर्गतपदान्तरार्थेनानु-
पस्थितएवापेक्षिते तस्य पुरुषबुद्ध्या कल्पनीयत्वात्* । अत एव ह्यक्ताः
शर्करा इति विधेयस्याञ्जनस्य साधनापेक्षायां वाक्यशेषस्तुतं घृतमेव गृह्यते
न तु पुरुषकल्पनीयं तैलवसादिसाधारणं द्रव्यमात्रम् । एवं चोपसेच-
नत्वरूपणे ऽपि† स्वयमद्यमानत्वे सत्यन्यादनहेतुत्वरूपमुख्यगुण एवासा-
धारणतया स्वारस्यावगतो निमित्तमवतिष्ठते । अतस्तस्य निमित्तत्वमदनं
ब्रह्मकर्तृकसंहार इति पक्षएव घटते । तेन मृत्योरपि संहार्य्यत्वाद् भूत-
वर्गसंहारे मृत्योर्द्वारत्वेनान्यसंहारहेतुत्वाच्च । न त्वदनं जीवकर्तृको भोग
इति पक्षे मृत्योरभोग्यत्वादन्यभोगाऽहेतुत्वाच्च । एवं मृत्योरुपसेचनत्व-
रूपणान्मृत्युना संहार्य्यं यावच्चराचरात्मकं भूतजातं तत्सर्वं ब्रह्मक्षत्रशब्दा-
भ्यामुपलक्षणीयमित्यपि सिध्यति । तेन सकलचराचरसंहारकर्ता परमेश्वर
इहात्ता प्रतीयतइति भावः ।

ओदनपदात्प्रथममिति । ब्रह्मक्षत्रयोः स्वशरीरभृत्यशरीरादिरू-
पेण भोगायतनभोगसाधनत्वे ऽपि स्त्र्यादिरूपतया भोग्यत्वमपि संभवति ।
व्याघ्रादिजीवविशेषं प्रति तयोर्भक्ष्यतया अत्यन्तान्तरङ्ग‡ भोज्यत्वमपि संभ-
वतीति भावः । **ब्रह्मक्षत्रमृत्युश्रुतीनामिति** । न तावत्सर्वं ब्रह्म क्षत्रं च ११ । ०
कस्य चिज्जीवविशेषस्य भोग्यं भोज्यं§ वा संभवति नतरां ब्रह्मक्षत्रोपलक्षि-
तचराचरमतो यावद् ब्रह्म क्षत्रं च कस्य चिज्जीवविशेषस्य भोग्यं भोज्यं वा
तत्परतया ब्रह्मक्षत्रपदयोः संकोचो वर्णनीयः । मृत्युशब्दश्चाविशेषेण संहा-
रकं प्रत्याययन् किं चिद् व्याघ्रादिभक्षणीयब्रह्मक्षत्र॥संहारकपरतया संकोच-

---

* पुरुषबुद्धिकल्पितमिति २ पु॰ पा॰ ।
† रूपेणापीति २ पु॰ पा॰ ।
‡ अन्तरङ्गभोज्यत्वमिति २ पु॰ पा॰ ।
§ भोग्यमिति नास्ति १ पु॰ ।
॥ क्षत्रमिति २ पु॰ ।

र्थक्योक्तिरयुक्ता । उपधानाऽविनियुक्तानामपि तेषामिष्टकाग्रहणादिषु विनियो-गेनाग्निप्रकरणाम्नानचरितार्थ्योपपत्तेः । अत एव तदानर्थक्यपरिहारायाऽज-हल्लक्षणोक्तिरप्ययुक्ता । तस्मात्सर्वमिदमसमञ्जसमिति चेत् ।

उच्यते । अयमिहाचार्याणामभिप्रायः । स्तृष्टिशब्दोक्तमन्त्रविशेषोपधेय-त्वेनानुवादान्यथानुपपत्त्येष्टकाङ्गे उपधाने तत्र स्तृष्टिमन्त्राणां विनियोगे च विधिः कल्प्यते कल्प्यश्रुतिसिद्धमपीष्टकोपधानं प्रत्यक्षविधिस्पृष्टं भवत्विति एतदर्थं तस्य पुनर्विधानं प्रत्यक्षविधानस्य च फलं स्तृष्टिमन्त्रोदितानामिष्ट-कानां मध्यमचितावुपधानं न त्वप्राप्तप्राप्तिः । असति तस्मिन्विधौ मध्यम-चितिप्रकरणानाम्नातानां तासां तस्यामुपधानं न लभ्यते सति तु तस्मिन् लभ्यते । मध्यमायां तु वचनाद् ब्राह्मणवत्य* इति पञ्चमाध्यायाधिकरणे यां वै कां चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपद-ध्यादिति वचनेन प्रत्यक्षज्ञानबाध्यमिपूर्वजानातिवशाद् वचनेन प्रत्यक्ष-ब्राह्मणोदितानामिष्टकानां मध्यमचितावुपधानं न त्वन्ते तु बादरायण† इति न्यायाच्चित्यन्तरइति निर्णीतत्वात् । एवं च स्तृष्टिशब्दस्य स्तृष्टिलिङ्गकमन्त्र-बाधित्वेनैतद्विध्युपात्तास्विष्टकासु स्तृष्टसृष्टिमन्त्रकत्वरूपावान्तरविशेषानवग-मात् सर्वा एवैतद्विध्युपात्ता इष्टकाः स्तृष्टिमन्त्रकाः स्युः । तथा चासृष्टिलि-ङ्गकमन्त्रोपधेयेष्टकानां मध्यमचित्यलाभान्मध्यमचित्युपधेयेष्टकामन्त्रसंवलि-ततयैकस्मिन्ननुवाके समाम्नानमनर्थकं स्यात् सृष्टीरुपदधातीति विधानान-न्तरमेकया ऽस्तुवतेत्यादिमन्त्रोपधेयानां सप्तदशानामिष्टकानां प्रत्येकस्तुतिपू-र्वकमाम्नातो यत्सप्तदशेष्टका उपदधातीति वाक्यशेषस्यानर्थक्यं स्यात् तन्मा भूदित्येतदर्थं सृष्टसृष्टिमन्त्राणां सप्तदशानामप्येकसमुदायवर्तित्वेनाऽजह-ल्लक्षणा ऽऽश्रितेति ।

यद्यप्यस्तु वेत्यादिटीकायां जीवपरमात्मपक्षे बुद्धिजीवपक्षे च प्रकृ-तिप्रत्ययावुभावपि मुख्यावेव हेतुकर्तृसाधारणकर्तृत्वसामान्यस्य कृदर्थत्वात् हेतुकर्तृत्वरूपकर्तृत्वविशेषविवक्षायां णिजर्थान्तर्भावे कर्तव्ये ऽपि कर्तृत्व-सामान्यविवक्षायां तदन्तर्भावाऽनपेक्षणात् । करणस्यापि बुद्धेः कर्मवत्कर्मणा

* जै॰ सू॰ अ॰ ५ पा॰ ३ सू॰ १९ । † जै॰ सू॰ अ॰ ५ पा॰ ३ सू॰ १९ ।

तुल्यक्रिय इति सूत्रोक्तरीत्या कर्मण इव कर्तृत्वसंभवाच्चेति तयोर्मुख्यतैवोपपादितेति योजयितुं शक्यम् । यतुः स्वतन्त्रकर्तर्येव शक्तिः करणे च न मुख्यं कर्तृत्वमित्यङ्गीकारे ऽपि बुद्धिजीवपक्षे कारकत्वसामान्यइव जीवपरमात्मपक्षे कर्तृत्वसामान्ये प्रत्ययस्यैव लक्षणोक्तेति योजयितुं शक्यम् । तथाप्येवमपि योजयितुं शक्यमिति वैभवादित्यं व्याख्यातम् ।

गुहाप्रविष्टादिपदानुसारेणेति । सर्वगतस्य ब्रह्मणो गुहावर्तित्वसंभवे ऽपि गुहाप्रवेशो न संभवति । अस्मिन्प्रकरणे प्रकरणान्तरेषु च ब्रह्मणः प्रवेशश्रवणम् अनेन जीवेनात्मना ऽनुप्रविश्येति श्रुताविव जीवभावाभिप्रायम् । न चेह तथा योजयितुं शक्यम् । गुहां प्रविष्टाविति जीववद् द्वितीयस्यापि पृथक्प्रवेशश्रवणात् । न हि जीवभावेन संसारित्वमभिप्रेत्य ब्रह्मैव संसरतीति व्यवहारवद् ब्रह्मणी संसरत इत्यपि व्यवहारः संगच्छते । तथा अनुत्तमेपूत्तमेषु लोकेष्वित्यादिश्रुत्यन्तरेषु ब्रह्मणो लोकवर्तित्वप्रसिद्धावपि सुकृतस्येति विशेषणादिह प्रतीयमानं सुकृतफलभोगार्थलोकावस्थानं ब्रह्मणो न संभवति । न च ब्रह्मविद्वचनविषयत्व ब्रह्मलिङ्गमपि श्रूयतइति शङ्कनीयम् । तस्य पञ्चाग्न्यादिवचनविषयत्वरूपप्रबलजीवलिङ्गप्रतिहतस्य ब्रह्मविदो ऽपि ब्रह्मैक्यबोधनाय बुद्धिविविक्त*जीवमन्विच्छन्तीत्येतत्परतया कथं चिद्योज्यत्वात् । न हि पञ्चाग्न्यादयः कर्मठाः संसारिजीवविविक्तमसंसार्यात्मस्वरूपं वदन्ति तदवगमस्य कर्मानुष्ठानविरोधित्वादिति भावः । १३८ । ६

अस्य द्वितीयतेति श्लोकभागं व्याकुर्वन्नेव श्लोकमवतारयति अस्येति । द्वितीयशब्दः पूरणप्रत्ययान्तो ऽप्यच जीवस्य ब्रह्मणा सह द्वित्वाधारत्वं लक्षयतीति भावः । द्वितीयवान् द्वितीय इति मत्वर्थीयाच्प्रत्ययान्ततया ऽपि द्वितीयशब्दो योजयितुं शक्यते अर्शआदेराकृतिगणत्वात् प्रथमं सद्वितीयत्वद्त्युत्तरश्लोकानुरोधाच्च ।

प्रथममितीति† । जीवस्यापि स्वतो गुहाप्रवेशो न संभवति तस्य ,, । १२
स्वोपाध्यन्तःकरणोपाधिकः संभवति चेत् परस्यापि स्वनियम्यान्तःकरणोपाधिकः संभवतीति तुल्यम् । प्रत्युत बुद्धिजीवपक्षण स्वतःप्रवेशवत्या बुद्ध्या सह तदुपाधिकप्रवेशस्य जीवस्य प्रवेशवर्णनं न संभवति न ह्युपष्टम्भ-

---

* विविक्तमिति २ पु॰ पा । † एतत्प्रतीकस्थाने प्रथमनिर्णीतेति दृश्यते २ पु॰ ।

कोपाधिकगुरुत्वशालिनि सुवर्णे गुरु सुवर्णमिति व्यवहारवदुपष्टम्भकसुवर्णे गुरुणी इत्यपि व्यवहारो दृश्यते । सुकृतलोकवर्तित्वं कर्मफलभोक्तृजीवस्येव तदन्तर्यामिणो ऽप्यस्ति । छायातपत्वनिर्देशो ऽपि जीवपरयोरेव प्रकृतार्थोपयोगितया श्लिष्यते समाने चेतनत्वे कथमृतपाने जीवस्य पारतन्त्र्यं परस्य स्वातन्त्र्यं चेति शङ्कानिवर्तनाय तयोरज्ञानतमोऽभिभवतदभावरूपविशेषप्रदर्शनार्थत्वात् । पञ्चाग्नय इत्यादिब्रह्मविदां विशेषणं ये प्राक्पञ्चाग्निशुश्रूषया ये वा नाचिकेतादिचयनैरन्तःकरणशुद्धिं प्राप्ताः तएव तत्प्रसादाद् लब्धनिर्विचिकित्सब्रह्मविद्याः इत्थं वदन्तीति विशेषप्रतिपत्त्यर्थमिति प्रथमावगतब्रह्मद्वितीयत्वानुसारेण सर्वं सुयोजम् । न च स्वरूपद्वितीयान्वेषणे परतन्त्रत्वादिना तस्य बुद्धिरपि सरूपेति शङ्कनीयम् । स्वाभाविकधर्मस्य चेतनत्वस्यान्तरङ्गत्वात् सुखाद्यनुभवितृपरपिबच्छब्दसंस्पृष्टत्वाच्चेति भावः ।

आध्वंसते आगच्छतीति । ध्वंसु गतौ चेति धातुः । उच्छेद्यत्वाद्वृक्षमिति । ओ व्रश्चू च्छेदन*इति धातोर्वृक्षशब्दः । ननु पिप्पल-
९ । १
शब्दो ऽश्वत्थवाची फले लुगिति विकारार्थतद्धितलुकि तत्फलं ब्रूयात् फले सस्यं च पिप्पलमित्यनुशासनाद्वृक्षवल्ल्यादिफलसामान्यं वा ब्रूयाद् न तु कर्मफलमित्यत आह **संसारस्येति** । ऊर्ध्वमूलो ऽवाक्शाख एषो ऽश्वत्थः सनातन इति श्रुतिः । अस्य महिमानमिति वीतशोक इति श्रुतिगतमितिशब्दं भिन्नक्रमतया योजयति **अस्यैवेति यदा पश्यतीति** । क्रियाश्रवणाभावाद्वीतशोक इत्यस्यापेक्षिता भवतीति क्रिया ऽध्याहृता । वीतशोकः सन्नस्य महिमानमिति एति प्राप्नोतीत्यपि योजयितुं शक्यम् । गुणाभावश्छान्दसत्वेन स्वयंभुवे इत्यादाविव संज्ञापूर्वकविधेरनित्यत्वेन वोपपादयितुं शक्यः† ॥

,, १० **अन्तर उपपत्तेः ॥ १३ ॥**

ननु य एष इति सर्वनाम्नः प्रकृतपरामर्शित्वसंभवे तत्त्यागायोगादव्यवहितप्रकृतपरामर्शासंभवे व्यवहितप्रकृतपरामर्शस्य तस्मिन् यदन्तस्तदन्वेष्टव्यमित्यादिषु संप्रतिपन्नत्वेन अग्निविद्याव्यवधानस्याप्रतिबन्धकत्वाद्

---

* टु ओ व्रश्चू च्छेदने इति टु इत्यनुबन्धो धातुपाठे ऽदृष्टो ऽधिको दृश्यते १ पु. ।

† शक्यत्वादित्यन्वितः पाठः १ । २ पु. । अत्र तृतीयं गुहाप्रविष्टाधिकरणं संपूर्णम् ।

वक्तृभेदे ऽप्यग्न्युपदिष्टार्थस्याचार्यबुद्धिस्थत्वाच्च कं ब्रह्मेति वाक्यप्रकृतब्रह्मप-
रामर्शित्वं तयोर्वक्तुं युक्तमिति तदनुसारेणाऽक्षिवाक्यस्य ब्रह्मपरत्वनिर्णयः
स्यादित्याशङ्क्याह **इयं चेति । प्रतिबिम्बनिश्चायकत्वादिति** । न चा-
न्तरादित्यवाक्यइव अन्तरक्षिवाक्यइव च दृश्यतइत्येतत् शास्त्रीयदर्शनपरं
किं न स्यादिति शङ्कनीयम् । यत आदित्ये प्रतिबिम्बादर्शनेन अन्तरादित्य-
वाक्यप्रतिबिम्बपूर्वपक्षो न संभवति । अन्तरक्षिवाक्ये ऽपि तत्स्वरूपे स न
संभवतीति तयोर्देवतापूर्वपक्षः कृतः । अतस्तत्र पूर्वपक्षे ऽपि शास्त्रीयमेव
दर्शनमन्वेष्यं जातम् इह तु प्रतिबिम्बपक्षः संभवति प्रतिबिम्बे सुप्रसिद्ध-
लौकिकदर्शनसत्त्वान्न शास्त्रीयपूर्वपक्षे ऽपि शास्त्रीयमेव दर्शनमन्वेष्यमिति
वैषम्यात् ।

अनेन सङ्गतिश्चोक्तेति । नन्वेकेनोपक्रमगतेन पाश्चात्यानां बहूनां १३९ । १९
बाधनमयुक्तम् । भूयसां स्यात्सधर्मत्वमिति न्यायविरोधात् । भूतादि-
पादव्यपदेशाद्यैर्बहुभिरुपक्रमश्रुतस्यापि गायत्रीपदस्य ब्रह्मणि नीतत्वाच्च ।
पूर्वाधिकरणे तु गुहाप्रवेशादीनामुपक्रमानुसारेण न बाधनं कृतं किं तु
तेषामपि जीवपरमात्मपक्षे स्वारस्यमेवास्तीत्युपपादितम् । इह तु प्रतिबि-
म्बपूर्वपक्षवादिना ब्रह्मात्मश्रुत्यमृतत्वाभयत्वसंयद्वामत्ववामनीत्व*भामनी-
त्वपुष्करपलाशवाक्यावगतार्चिरादिवाक्यावगतफललिङ्गानि बहूनि बाध्या-
नीति चेन्नैष दोषः । आत्मश्रुत्यादीनामितिशब्दशिरस्कत्वेन मनो ब्रह्मेतो-
त्यादिवदतस्मिंस्तद्रूपप्रत्ययपरत्वावगमाद् वचनबलाद्वैवाहिकवधूदर्शनेना-
भ्युदयवत्पुष्करपलाशवाक्यावगतफलस्य पञ्चाग्निविद्ययेवाब्रह्मविषयया† ऽपि
प्रतिबिम्बोपासनया ऽर्चिरादिवाक्यावगतफलस्य चोपपत्तेरिति भावः । अत
आहेति गतिवचनं‡ विद्यान्तराभिप्रायम् । गतेरचत्यर्थत्वात् । न तूक्तपरिशि-
ष्टाभिप्रायम् एषा सोम्य तइत्यादिना ऽग्निविद्यावदात्मविद्याया अपि निरव-
शेषोपदिष्टत्वेनोपसंहारात् । अन्यथा देवयानगतिवचनस्यात्मविद्यायामिवा-
ग्निविद्यायामप्यन्वयप्रसङ्गादित्याहेत्यर्थः । **सापेक्षत्वादिति** । प्रकृताभावेन ,, । १७
प्रागपर्यवसिताभिधानयोः सर्वनाम्नोः पुरुषपदादिविशेष्यान्वयापेक्षत्वादित्य-

* संयद्वामनीत्ववामनीत्वेति ५ पु॰ पा॰ । † ब्रह्मविपर्ययेति २ पु पा॰ ।
‡ गतीति नास्ति ३ पु॰ ।

र्थः । **छायात्मनीति** । इतिशब्दस्तत्रार्थविवक्षां वारयति यत्र प्रत्ययो विवक्ष्यते न तु यथोक्तार्थावच्छेदेनाप्रवचनसंबन्धस्तत्रापि यथा इति ह स्मोपाध्यायः कथयतीति इह चोवाचेति । अस्येतिशब्दयुक्तेषूत्तरेष्वपि वाक्येष्वनुषङ्ग इति न ब्रह्मश्रुत्यादिष्वप्यविवक्षाप्रसङ्गः । अतः छायात्मनि तेषां क्लेशेन योजना
९ । २३ कार्येति भावः । **तद् व्याख्यातीति** । प्रसिद्धवदित्यादि विद्वद्भिरेवं प्ररोचनार्थमित्यन्तमुपात्तं भाष्यं विदुषो विषयः शास्त्रत उपलब्धि*रित्यादिग्रन्थेन व्याख्यातीत्यर्थः । केषु चित् टीकाग्रन्थकोशेषु विदुषः शास्त्रत उपलब्धिरित्यादिविषयशब्दरहितः पाठो दृश्यते स तु सुगम इति न व्याख्यातः । **वननीयानीति** । वन सम्भक्ताविति धातोरौणादिकप्रत्ययान्ततया निष्पन्नो वानशब्दः सम्भजनीयवाची शोभनेषु पुण्यफलेषु स्वर्गादिभोग्यवस्तुषु पर्यवस्यतीति भावः । निमित्तीकृत्येत्यपेक्षितो ऽध्याहारस्तदनध्याहारे परमेश्वरस्यैव फलभोक्तृत्वप्रतिपादकत्वापत्तेरिति भावः । न चैतदिष्टमिति टीकायामेतच्छब्दार्थमाह **न चैतत्प्रतीकत्वमिष्टमिति** । नन्विष्टव्यमेव प्रतीकत्वं प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति निर्दिष्टस्य नाम ब्रह्म मनो ब्रह्मेत्यादिनिर्दिष्टसाम्यात् प्राणं च हास्मै तदाकाशं चोचुरिति प्राणादिशब्दैर्निगमनदर्शनाच्च । ब्रह्मप्रधानत्वे हि ब्रह्मशब्देन निगमनं स्यादित्यत आह **एषा सौम्येति** । इदमुपलक्षणं प्रतीकत्वे कं च खं च न विजानामीति पृष्टवन्तं प्रति यद्वाव कमित्याद्युत्तरमप्यसमञ्जसं स्यात् । न चेदमपि वैषयिकसुखे भूताकाशदृष्टिपरं भूताकाशे वैषयिकसुखदृष्टिपरं च किं न स्यादिति शङ्क्यम् । कं ब्रह्म खं ब्रह्मेत्यस्यार्थाऽज्ञानेन पृष्टवन्तं प्रति दृष्टिविध्यन्तरकथनस्योत्तरत्वाऽयोगादतो निगमनवाक्यमुपक्रमानुरोधात् प्राणं हिरण्यगर्भाख्यं कार्यं ब्रह्म तदाकाशं परं ब्रह्मरूपं सुखविशिष्टाकाशं चोचुरित्येतदर्थकमिति न तद्विरोध इत्यपि द्रष्टव्यम् ।

१४० । १८ **पूरयित्वेति** । नन्वाचार्यस्तु ते गतिं वक्तेति वदतामग्नीनां स्थानगुणविशेषान् पूरयित्वेत्यभिप्रायः कुतो ऽवगतः । आचार्यवाक्ये स्थानगुणकीर्तनाऽदर्शनादिति चेन्न । तत्कीर्तनस्य प्रतिबिम्बोपासनाविषयत्ववादिनं पूर्वपक्षिणं प्रति सुखत्वविशिष्टब्रह्मोपासनाविधिशेषत्वासिद्धेः । स एष इति

---

* शास्त्रतस्त्वोपलब्धिरिति २ पु० ।

षर्वनाम्नोः प्रकृतपरामर्शित्वस्याभाव्यात् सुखविशिष्टब्रह्मप्रकरणसद्भावे ऽचिपुरुषस्तदेव प्रकृतं ब्रह्म भवेदिति स्थानगुणकीर्तनस्य तेन तद्विषयत्वसिद्धा ततः पूरयित्वेत्यभिप्रायो ऽवगत इति चेद् न । अत एव य एष आदित्य इत्यादिष्वग्निविद्योपदेशवाक्येषु तयोः प्रकृतब्रह्मपरामर्शित्वाभावेन तद्वदिहाप्युपपत्तेः । यद्यग्निभिः स्वविद्यानामात्मविद्यायाश्च भेदेन कीर्तितत्वात्तत्र तयोः प्रकृतपरत्वं त्यक्तं तर्ह्यत्रापि निरवशेषोपदिष्टत्वेनात्मविद्यायां उपसंहृतत्वात् तयोस्तत्त्यक्तमिति समानम् । न चाचार्येणाचिपुरुषोपदेशानन्तरं पराङ्गं वेदेत्यक्षिपुरुषविदमुपविश्य अथ यदु चैवास्मिन्नित्यादिना तस्यार्चिरादिगतेरुपदिष्टत्वादचिपुरुषः प्रकृतं ब्रह्मैव भवेदन्यथा गत्युपदेशस्य तद्विषयत्वाभावेन गतिवचनविरोधप्रसङ्गादिति वाच्यम् । गतिवचनस्य विद्यान्तरोपदेशविषयत्वोपपत्तेः । तस्य प्रकृतब्रह्मविद्यान्वयिदेवयानगतिविषयत्वे ऽप्याचार्यः स्वयमपि विद्यान्तरमुपदिश्य तदन्वितदेवयानगतिमुपदेक्ष्यतीत्येतदग्नयो निश्चित्याचार्यो यां गतिमुपदेक्ष्यति सा प्रकृतब्रह्मविदो ऽपीत्यभिप्रायेणाचार्यस्तु तइत्याद्यवोचन्निति तदुपपादनोपपत्तेः । गतिमात्रवचनप्रतिज्ञानस्य स्थानगुणवचनयोः प्रकृतब्रह्मान्वयित्वकल्पनाविरुद्धत्वाच्च । तस्मात्पूरयित्वेति शेषाध्याहारो न युक्त इति चेदुच्यते । गतिवचनप्रतिज्ञानं देवयानगतिवचनप्रतिज्ञानमेव शुक्लकृष्णे गती ह्येते श्रुतोपनिषत्कगत्यभिधानाच्चे*त्यादिवेदार्थाभिज्ञव्यवहारेषु गतिशब्दस्य देवयानविषयनिरूढप्रयोगदर्शनात् । तत्र च पूरयित्वेति न शेषाध्याहारः किं त्वाचार्यस्तु ते इति श्रुततुशब्दार्थकथनं तथा चान्यैश्च कैश्चन विशेषैः सहाचार्यो गतिमुपदेक्ष्यतीति गतिवाक्यस्यार्थः । तत्र गतिवाक्यं ब्रह्मप्राप्तिलिङ्गात्प्रकृतब्रह्मविद्यामात्रविषयं नाग्निविद्याविषयमपीति ते विशेषा आचार्यवाक्ये वक्ष्यमाणस्थानगुणादिरूपाः पर्यवस्यन्तीति । न च वाच्यमथ यदु चैवास्मिन्नित्यादिना पञ्चाग्निविद्यादिप्रसिद्धायां देवयानगताविह विद्यायां दहनादिशवकर्माभावे ऽप्यर्चिरादिप्राप्तिर्भवतीति विशेषो ऽभिधीयते अतः स एव विशेषस्तुशब्दार्थः स्यादिति । सङ्कोचे कारणाभावेनाऽऽचार्यवाक्ये ये ये विशेषा दृष्टास्तेषां सर्वेषामपि तुशब्दार्थत्वोपपत्तेः । गतिमात्रा-

---

* व्यास सू॰ अ॰ ९ पा॰ २ सू॰ ९५ ।

भिधानप्रतिष्ठानमिति भाष्ये गतिमात्राभिधानप्रतिष्ठानादिति टीकायां च मात्रशब्दो धर्म्यन्तरव्यवच्छेदक इति न विरोधः । अथ वा श्रुतिसूत्रयोर्गतिशब्दः कर्मव्युत्पत्त्या फलवाची देशानां प्राप्यफलोक्तावेव तत्प्रापकमार्गाकाङ्क्षोत्पादात्* । आचार्यवाक्यं च सर्वं सोपपादकविद्याफलपरमेव । पुष्करपलाशवाक्यं तावत्फलपरमिति स्पष्टम् । सर्पिरुदकवाक्यं निर्लेपस्य ब्रह्मणस्तदुचितमक्षि स्थानमिति स्थानगुणकीर्तनद्वारा तत्क्रतुन्यायलभ्यपापाश्लेषपरम् । संयद्वामादिवाक्यान्यपि तत्क्रतुन्यायाश्रयेणैवोपास्यगुणानुसारिफलप्रतिपादकानि । स एतानिति वाक्यमनावृत्तिवाक्यं च पुनरावृत्तिक्लेशरहितब्रह्मलोकप्राप्तिफलकम् । अर्चिरादिवाक्यानि तत्प्रापकमार्गोपदेशेन फलप्राप्त्युपपादकानीति सर्वमिदमाचार्यवाक्यं गतिमात्राभिधानपर्यवसायीति न भाष्यटीकाविरोधः । आत्मानं जगतः सूर्यमिति सूर्यान्तर्याम्यभिप्रायम् । सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतिः । तस्माद्युक्तं पूरयित्वेति ।

४० । २२ हिरण्यगर्भभूतमिति । आदित्यस्य ब्रह्माण्डोदरजातहिरण्यगर्भरूपत्वमसदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्तदाण्डं निरवर्ततेत्यादिच्छन्दोगोपनिषद्वचनजातेन मृते द्विधाभवनादार्ते ब्रह्माण्डे जाते मार्तण्ड इत्यादितद्वाचिनो मार्तण्डशब्दस्य पौराणिकव्युत्पादनेन

विद्यासहायो भगवान् यस्यासौ मण्डलान्तरे ।
हिरण्यगर्भः पुत्रो ऽसावीश्वरो दृश्यते परः ॥

इत्यादिपुराणवचनेन चावगतम् ।

के चित्तु आत्मपदं केवलपरमात्मपरं परमात्मानमुपास्य सत्यलोके हिरण्यगर्भमादित्यं प्राप्नुवन्ति आत्मशब्दमात्रस्य सूर्यान्तर्यामिपरत्वकल्पकाभावादिति व्याचक्षते । ज्योतिः सूर्य इति । अग्निर्ज्योतिरिति स्मृतौ क्रमो न विवक्षित इति भावः† ॥

४१ । १ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

श्लोकनिरसनीयव्यभिचारशङ्कास्पदमनुमानं दर्शयति अशरीर इति । इदं हेतुगर्भं विशेषणं परमेश्वरस्यापि नियम्येन पृथिव्यादिना शरीरवत्व-

---

* आकाङ्क्षोदयादिति ब-५ पु. पा. ।   † अत्र चतुर्थमन्तराधिकरणं पूर्णम् ।

मस्ति यस्य पृथिवी शरीरमित्यादिश्रुतेः । अतो हेत्वसिद्धिपरिहारार्थं नियम्यातिरिक्तशरीरराहित्यं हेतुरिति वक्तव्यमित्यापाद्य तत्र व्यभिचारमाशङ्कते **नन्विति । पारिशेष्यादिति ।** सो ऽपि नान्तर्यामीति पूर्ववाक्यादन्तर्यामीत्यनुषङ्गः । तस्य पारिशेष्याज्जीव एवेति समनन्तरं वक्ष्यमाणेन संबन्ध इत्यर्थः न तु पारिशेष्याज्जीव एवेत्यस्य तस्माज्जीवात्मैवान्तर्यामीत्युपसंहारवाक्ये वक्ष्यमाणेनान्तर्यामिपदेन संबन्ध इत्यर्थः । तथापि जीवात्मपदश्रवणात्तेन पौनरुक्त्यापत्तेः । अमृतत्वाद्युपपादकैरन्यथेत्यादिवाक्यैर्व्यवहितस्यास्य तथान्वयासम्भवाच्च ।

ननु तस्माज्जीवात्मैवेत्युपसंहारो न युक्तः । पृथिव्यादिशरीरकाणां तत्तदधिदेवतात्मनां श्रोतुर्गौतमस्यात्मनश्चैकत्वाभावेन पृथिव्यादिपर्यायेष्वेव तआत्मेत्यस्यानन्वयात् । अतः पूर्वपक्षाभासो ऽयमित्याशङ्कावतारयति **पूर्वपक्षमिति ।** अदृष्टो द्रष्टेत्यादौ दर्शनश्रवणमननविज्ञानानि यद्यात्मनो वा ऽरे दर्शनेन श्रवणेन आत्मनि खल्वरे दृष्टे श्रुते मते इत्यादिश्रुत्यन्तरप्रत्यभिज्ञानादात्मविषयसाक्षात्कारश्रवणमनननिदिध्यासनानि यदि वा चक्षुःश्रोत्रमनोबुद्धिकरणकज्ञानानि उभयथापि तद्वत्त्वं तद्विषयत्वं च जीवे एवोपपद्यते न परमात्मन्यतद्वति तद्विषये च । अत एव तआत्मेति स तआत्मेति च सर्वनाम्नोस्तज्जातीयविषयत्वं कल्पयितुं युक्तम् । पूर्वस्मिन्वत्सरे ये भुक्तास्तएव शालयो भुज्यन्ते तदेवौषधं सेव्यतइत्यादिषु व्यवहारेषु सर्वनाम्नस्तज्जातीयविषयत्वस्यापि दर्शनादित्याशयः । १४१

ननु नियन्तुरपि जीवस्य नियन्त्रन्तरनियम्यत्वे तस्यापि नियन्त्रन्तरनियम्यत्वं स्याद् नियन्तृत्वाविशेषादित्यनवस्थापादने* जीवपरयोस्तात्त्विकाभेदोपन्यासमात्रेण परिहारो न लभ्यते सत्यपि तात्त्विकाऽभेदे जीवपरयोरिव पर†तन्नियन्त्रोरपि कल्पितभेदेन नियम्यनियामकतोपपत्तेरित्याशङ्क्याह **औपाधिकस्य हीति ।** जीवनियन्ता परो यद्यौपाधिकः परतन्त्रः स्यात्तदा भृत्यनियन्तुरमात्यस्य राजेव जीवनियन्तुः परस्याप्यन्यो नियन्ता ऽऽपाद्येत न त्वेवम् । यतः परमेश्वरो नौपाधिकः उपाध्यायत्तपारतन्त्र्यवान्न भवति तथा

* अनवस्थापादने ऽवस्थापादनेति २ पु॰ असङ्गतः पाठः ।
† परेति नास्ति २ पु॰ । १ पु॰ ऊर्ध्वलिखितम् ।

ऽश्रवणादित्याशयः। नन्वभेदे ऽपि जीवपरयोर्भेदव्यवहारो दृष्ट इत्याशङ्क्य व्याचष्टे **औपाधिकभेदाभावे ऽपीति**। जीवस्य स्वस्मादौपाधिकभेदो ऽपि नास्तीत्यर्थः। लौकिके कर्तरि डित्थ इति पुरुषान्तराभिप्रायम्* ॥

१४२ · - **अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥**

तत्त्वतो ऽन्यथाभावः परिणामः अतत्त्वतो ऽन्यथाभावो विवर्त इति वा धर्मिसमसत्ताको ऽन्यथाभावः परिणामस्तदसमसत्ताको विवर्त इति वा परिणामविवर्तयोर्भेदे स्थिते यदि विश्वस्य भूतयोनिपरिणामत्वमभ्युपगम्यते यदि वा तद्विवर्तत्वमुभयथापि भूतयोनिर्जडा ऽङ्गीकार्या कनकरुचकसम्भुजङ्गादिलोकदृष्टार्णनाभ्यादिश्रुत्युपात्तदृष्टान्तानुसारेण। यथा सुदीप्तादिति मन्त्रोपात्तसरूपविशेषणानुसारेण च विकारसारूप्यावश्यम्भावादित्यभिप्रेत्यानुमानमाह **भूतयोनिर्जडेति। द्वितीयार्द्धमिति।** योनिशब्दो निमित्तं चेदित्यर्द्धमित्यर्थः। **ब्रह्मपरत्वं दुर्निवारमिति।** ब्रह्मण एव जगत्कर्तृत्वादित्याशयः। निमित्तवाचिनो योनिशब्दस्यादृष्टद्वारा निमित्ते जीवे ऽपि वृत्तिः संभवति अतो भूतयोनिर्ब्रह्मैवेति निर्णयहेतुर्नास्तीत्यविनिगमेन पूर्वपक्षसंभव उपपादितः। अक्षरात् परतः पर इति श्रुतब्रह्मगतपरत्वावधित्वलिङ्गेन भूतयोन्यक्षरं ब्रह्म न भवति किं तु जीव एवेति निर्णयेनापि पूर्वपक्षः संभवतीति द्रष्टव्यम्। उपादानत्वप्रत्यभिज्ञालिङ्गावगमितैकवाक्यभावमन्त्रप्रतिपन्नः सर्वज्ञ एव भूतयोनिरिति वाक्यार्थानुसारेणाक्षरं सर्वविदित्यर्थे सर्ववित्वान्वयो विधेयत्वेन विवक्षित इति दर्शयितुं भवेदित्यस्यैव भिन्नक्रमेण योजनां दर्शयति **विश्वयोनिरिति।** एवं च नाचेतनमिति शेषस्य सर्ववित्वलिङ्गविरोधान्नाचेतनं प्रधानं विश्वयोन्यक्षरं
१४३। १० किं तु परमात्मैवेत्यर्थ इत्याशयः। **न चाक्षरशब्देति।** अक्षरात्परत इत्यत्र प्रत्यभिज्ञानं श्रुतिप्रत्यभिज्ञानत्वात् तथा ऽक्षरात्संभवतीह विश्वं तथा ऽक्षराद्विविधाः सोम्य भावा इत्यतः प्रत्ययकृतस्यापि विशेषस्याभावेन तदेकरूप्यप्रत्यभिज्ञानत्वाच्च सर्वोपादानत्वलिङ्गप्रत्यभिज्ञानाद् बलवदित्याशयः। **प्रथमश्रुते यः सर्वज्ञ इति वाक्ये इति।** लिङ्गप्रत्यभिज्ञानमेव प्राथमि-

---

* अत्र पञ्चमम् अन्तर्याम्यधिकरणं समाप्तम्। + शब्देनेति २ पु॰।

त्वात्पुँल्लिङ्गनिर्दिष्टभूतयोनिपरामर्शियच्छब्दरूपसर्वनामश्रुत्योपसंहारिकाचर-श्रुतिप्रत्यभिज्ञानुगृहीतत्वात्तस्मादित्युपादानपञ्चमीश्रुतिप्रत्यभिज्ञानुगृहीतत्वाच्च ततो बलवदित्याशयः । एतेन प्राथम्यादर्णे ऊर्णनाभ्याद्यचेतनपरिणामिदृष्टान्तीकरणं प्रधानलिङ्गमुपादानत्वलिङ्गप्रत्यभिज्ञापेक्षया ऽपि बलवत्स्यात्तस्य ततो ऽपि प्राथमिकत्वादिति शङ्का निरस्ता । **द्वितीयार्द्धमिति** । द्वितीयार्द्धं अनादिवासनोद्भूतइत्यंशमित्यर्थः । ननु नाच प्रधानं नामेत्यादिभाष्येण सांख्यैरनुमानकल्प्यत्वेनोक्तं स्वतन्त्रं प्रधानं नाभ्युपगम्यतइत्युक्तं तत्र को हेतुरित्याकाङ्क्षायामाह **प्रधानस्यागमिकत्वेनेति** । कल्पनाया दृष्टानुसारित्वात् प्रकृतिविकारसारूप्यकृत्स्नप्रसक्त्यादिदोषो दुष्परिहरः स्यादित्यर्थः ।

मूर्धादिबहुश्रुतीना*मिति । ननु मूर्धादिश्रुतिविरोधो हिरण्यगर्भपक्षे ऽपि तुल्यः । न हि तं प्रत्यपि द्युप्रभृतयः संस्थानविशेषाभिव्यङ्ग्यमूर्धत्वादिजातियुक्ता भवितुमर्हन्ति । सर्वात्मत्वविवक्षायां तथात्वकल्पनं तु परमात्मानं प्रत्यपि समानं प्रत्युत परमात्मनो मुख्यं सार्वात्म्यं हिरण्यगर्भस्य तु सर्वप्राणाधिष्ठानत्वादधिष्ठात्रधिष्ठेययोरभेदोपचारात् प्राणात्मना सर्वभूतानुगतत्वरूपं सार्वात्म्यं कथं चिदमुख्यं कल्पनीयम् । अतो मुख्यसार्वात्म्यावलम्बनं मूर्द्धादिकल्पनं परमात्मन्येव समञ्जसं न ततो ऽन्यत्र । अत एवाग्रिमाधिकरणे देवतापक्षनिराकरणार्थं भाष्यं देवताया:† सत्यप्यैश्वर्ये न द्युमूर्द्धत्वादिकल्पनं संभवति अकारणत्वादिति । न च कल्पनमपि श्रुताऽपाणिपादत्वादिविरुद्धस्य रूपवत्त्वस्य न युज्यतइति वाच्यम् । शाण्डिल्यविद्यायामुपासनार्थे श्रुतज्यायस्त्वविरुद्धाणीयस्त्वकल्पनादर्शनात् । न च तथा कल्पनमप्युपासनार्थे सगुणे एव युज्यते न निर्गुणे इति वाच्यम् । निर्गुणे ऽपि सार्वात्म्यप्रतिपत्त्यर्थं तत्कल्पनोपपत्तेः । तस्मिन्नपि प्रतिपत्त्युपायतया प्रियशिरस्त्वरथरथिभावादिकल्पनादर्शनात् । सगुणे संभवतस्तस्य निर्गुणप्रकरणे ऽपि स्तुत्यर्थं तदुपन्यासोपपत्तेश्च । निर्विशेषब्रह्मप्राप्तिफलभूमविद्याप्रकरणे स एकधा भवतीत्यादिना सविशेषणसगुणविद्याफलेन स्तुतिदर्शनादिति चेत् । सत्यम् । अन्ये पुनरित्यादिभाष्येण येषां मतमुपन्यस्तं तेषामित्यमाशय इत्याचार्यैस्तदाशयः परं वर्णितः । स्वाभिमतं तु १४४

* बहुश्रुतीनामिति ५-३ पु॰ पा॰ । † देवतायामिति २ पु॰ पा॰ ।

द्युमूर्द्धत्वादिकल्पनमेव । अत एवाचार्यैर्हृदयं विश्वमित्यत्र हृदयं मन इति व्याख्याय विश्वस्य मनस्त्वकल्पनायां हेतुः संबन्धो दर्शितस्तन्मनसा सृष्टत्वादिति । न चाग्निर्मूर्द्धेति मन्त्रस्य परमात्मपरतायां यस्याग्निरास्यमित्यादिस्मृतीनामेतन्मूलत्वसंभवेन स्मर्यमाणमनुमानं स्या*दित्यग्रिमाधिकरणसूत्रविरोधः शङ्कनीयः । अस्य हिरण्यगर्भपरतायामपि तासां पुरुषसूक्तमूलत्वशङ्कानपायेन तस्य ह वा एतस्येत्यादिवैश्वानरविद्यागतवाक्यमूलत्वाऽसिद्ध्या तद्विरोधतादवस्थ्यात् । न च पुरुषसूक्ते द्युप्रभृतीनां शीर्षादिभ्यो जननश्रवणं स्मृतिषु तत्तादात्म्यस्मरणमिति न तासां पुरुषसूक्तमूलत्वशङ्कावकाश इति वाच्यम् । अग्निर्मूर्द्धेति मन्त्रे ऽपि पद्भ्यां पृथ्वीति श्रवणात्† तत्र चैतस्माज्जायते प्राण इति पूर्वमन्त्रगतस्य जायतइत्यस्य तस्मादग्निः समिधो यस्य सूर्य इत्युत्तरमन्त्रे ऽप्यनुवर्तिष्यमाणस्यानुवृत्त्यौचित्येन पद्भ्यां पृथ्वी जायतइत्यर्थलाभात् । यद्युच्येत अग्निर्मूर्द्धेत्यादिसामानाधिकरण्यं पद्भ्यां पृथ्वीति वैयधिकरण्यं चेत्युभयमुभयत्राप्युपलक्षणम् । तथा च द्युप्रभृतिकं सर्वं मूर्द्धाद्यवयवतादात्म्येन मूर्द्धाद्यवयवजातत्वेन चोपासनीयमिति तादात्म्योपासनांशमपेक्ष्य स्मृतिमूलत्वं प्राप्नुयादिति तथोपलक्षणत्वकल्पनं पुरुषसूक्ते ऽपि तुल्यम् । तत्रापि ब्राह्मणो ऽस्य मुखमासीदित्यादिसामानाधिकरण्यश्रवणात् । तस्मात्पुरुषसूक्तस्य स्मृतिमूलत्वसंभवे ऽपि विनिगमनाविरहाद् वैश्वानरवाक्यमपि तन्मूलं भवेदित्याशयमेव स्मर्यमाण‡सूत्रमुपपादनीयम् । तथोपपादनमग्निर्मूर्द्धेति मन्त्रस्य तन्मूलत्वेऽपि तुल्यम् । किं चास्यापि मन्त्रस्य स्मृतिमूलत्वमवश्यं वाच्यम् । चन्द्रसूर्यौ च नेत्रे इति स्मृत्यंशार्थस्य पुरुषसूक्तवैश्वानरविद्याभ्यामलाभात् ।तस्मादयं मन्त्रः परमात्मपर इत्येव भाष्यकारमतम् । स्वमतमुपन्यस्यतीति भाष्यकारमतत्वेन टीकायामवतारणं तु ज्ञेये परब्रह्मणि रूपोपन्यासाङ्गीकारे रूपवत्त्वं पारमार्थिकं स्यादिति बिभ्यतां परितुष्ट्यर्थम् । वस्तुतस्तु

मुसलं चरणद्वन्द्वं पृथ्वी जघनमण्डली ।
यत्कीर्तेर्मध्यमाकाशं सुमनोवासभूः शिरः ॥

* व्या॰ सू॰ अ॰ १ पा॰ २ सू॰ २५ । † पद्भ्यांदिवयणादिति २ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ २ सू॰ २५ ।

इति श्लोके कीर्तेस्सर्वगतत्वप्रतिपत्त्यर्थं पातालचरणत्वादीनामिव ब्रह्मणः सर्वात्मत्वप्रतिपत्त्यर्थं द्युमूर्द्धत्वादीनां कल्पनेत्येवं टीकाकाराणामप्यभिमतमित्यनुसंधेयम् ।

आयादित्यत्र लङो लिङर्थत्वकल्पनायां प्रमाणमाह **गच्छेदिति** १४४
वाक्यशेषादिति । अध्याहार इति । किंशब्दाध्याहार इत्यर्थः । कृतेन कर्मणा अकृतो लोको नास्तीति योजनायां लोकत्वावच्छिन्नः सर्वोऽपि कृतक इति परीक्षास्वरूपालाभान्न नास्त्यकृत इति भिन्नवाक्यं कृत्वा वाक्यद्वयस्यापेक्षितलोककिंशब्दाध्याहारेण पूरणं कृतम् । **अतोऽकृतज्ञानार्थमिति ।** अकृतं ब्रह्म । **यस्येत्यर्थे इति ।** अस्यशब्दस्य हिरण्यगर्भपक्षे प्रकृतपरामर्शित्वाभावाद् एष सर्वभूतान्तरात्मेति प्रकरिष्यमाणपरामर्शसामञ्जस्यार्थे यस्येत्यर्थे वृत्तिरुक्ता । **कस्मै ।** एकस्मादित्यर्थः । एको देवोऽत्र ब्रह्मेवेत्यर्थेतो ब्रह्मण इति व्याख्यातम्* ।

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥ १४५ ।

जाठरोऽन्यो वेति । अन्यशब्देन भूतदेवतापक्षो संगृहीतो । नन्वादित्यो वैश्वानर इत्यपि पूर्वपक्षः संभवति । प्रश्नोपनिषदि स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयतइत्यादित्येऽप्यग्निवैश्वानरश्रुतिदर्शनात् । तदनन्तरं तदेतदृचाऽभ्युक्तमित्युपक्रम्य सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्य† इति सोरमन्त्रस्य वैश्वानरविषयत्वेनोदाहरणात् । तत्र स एष इति सर्वनाम्नोरादित्यो ह प्राण इति प्रकृतादित्यपरत्वाच्चेति चेद् उच्यते । यत्र परमात्मनोऽन्यस्मिन्नग्निवैश्वानरशब्दो पूर्वपक्षिणः सिद्धान्तिनश्च संप्रतिपन्नो स पूर्वपक्षीकर्तव्यः । न च तथादित्ये सिद्धान्तिनस्तौ संप्रतिपन्नौ वैश्वानरविद्यायामिव तत्राप्ययिमसंदर्भानुसारेण तयोः परमात्मपरत्वात् । अथोत्तरेण तपसा श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजायते एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त‡इति अग्रे श्रवणात् । अनेन संदर्भेण सर्वप्राणसमष्टिभूतत्रैलोक्यशरीरहिरण्यगर्भरूपापन्नादित्यान्तर्यामिणं परमात्मानमुपासीनस्य स-

* अत्र पञ्चमं अदृश्यत्वाद्यधिकरणं संपूर्णम् । † उदयत्येव सूर्य इति २ पु॰ पा॰ ।
‡ आयतनं इति २ पु॰ पा॰ ।

त्प्राप्तिरपुनरावृत्तिफलोच्यतइत्येतदन्तर उपपत्ते*रित्यधिकरणावसानकृतेनाचार्यव्याख्यानेन स्पष्टम् । अतो यद्यपि वैश्वानरविद्यायामिव तत्राप्यग्निवैश्वानरशब्दावन्यपराविति पूर्वपक्षी मन्येत तथापि सिद्धान्तिनो न तत्संप्रतिपत्तिरस्तीति तथा पूर्वपक्षो भाष्यटीकयोर्न कृतः । यदि तु वैश्वानरं केतुमन्हामकृण्वन् यो भानुना पृथिवीं द्यामुतेमामित्यादिमन्त्रानुसारेण अग्निरेवादित्य इति† अग्निवाचकावेव सन्तावग्निवैश्वानरशब्दावादित्ये ऽपि प्रवृत्ताविति पूर्वपक्षी मन्येत तदा ऽग्निपूर्वपक्षेणैवादित्यपूर्वपक्षो ऽपि लब्ध इति तस्य पृथगप्रदर्शनम् । तस्यापि पृथक्प्रदर्शनीयत्वे भाष्यटीकयोर्जाठरादिपक्षप्रदर्शनं तस्याप्युपलक्षणार्थम् । अत एवाचार्यैरन्यो वेति सामान्येन पक्षान्तराणां निर्देशः कृतः ।

देहमध्यमिति । सम्यगुपचितो देह इति व्युत्पत्त्या संदेहशब्दो नाभिकण्ठमध्यवाची । **वैश्वानरोऽहमिति मन्यतइतीति ।** अहंग्रहोपासकत्वात् को न आत्मेत्युपक्रमाच्चेति भावः । **हृदयाद्धीति ।** सुषुप्तौ हृदये निलीनं मनः प्रबोधे ततो निष्क्रामत् प्रणीतमिव भवतीत्यर्थः ।

१४६ । ५ **यथा हीति ।** यद्यप्यपूर्वविशेषरूपव्यवस्थितैकार्थवाचिपुरोडाशशब्दो निश्चितार्थ एव न त्वनेकार्थसाधारण्येन वैश्वानरशब्दवदनिश्चितार्थः । न चैकार्थत्वे ऽप्याकाङ्क्षितविशेषाऽनिश्चयो ऽस्तीति वाच्यम् । पुरोडाशं पर्यग्नि करोतीति वचनेन पर्यग्निकरणस्येवानेन चतुर्द्धाकरणस्यापि सर्वपुरोडाशविषयत्वोपपत्त्या स्वतो विशेषाकाङ्क्षाविरहादिति चेत्सत्यम् । एकया ऽनेकया वा शक्त्या साधारणस्य शब्दस्य व्यवस्थितैकार्थसमर्पकशाखान्तरवाक्यानुसारेण विशेषपर्यवसानमात्रे दृष्टान्तो ऽयं निश्चितार्थेनेत्येतदप्याग्नेयरूपव्यवस्थितैकार्थनिश्चयाभिप्रायम् । नन्वाग्नेयशब्दो यथा निश्चितविशेषार्थः एवं पुरोडाशशब्दो ऽपि निश्चितसामान्यार्थ इत्येतदनुसारेण विशेषशब्द एवैन्द्राग्नाग्नीषोमीयपुरोडाशसाधारणः किं न स्यात् । अविशिष्टो हि तयोरप्यग्निसंबन्धः । आग्नेर्ढगिति प्रतिपदविहितस्य देवतातद्धितस्य बलीयस्त्वे ऽपि पुरोडाशशब्दस्य सङ्कोचरूपैकदेशबाधन‡परिहाराय सर्वेषाग्निकलिभ्यां ढगिति स्मृतसंबन्धसामान्यतद्धिताश्रयणोपपत्तेः । यद्यपि चतुरवत्ती यजमानः पञ्चा-

* व्यास सू॰ अ॰ १ पा॰ ३ सू॰ १४ । † अग्निरेवादित्य इति नास्ति ३ पु॰ । ‡ बाधकेति ३ पु पा ।

यत्रैव वपा कार्येत्यत्र हि पाशुकहविर्विशेषवाचिनो वपाशब्दस्यैकादश पशोरवदानानि तानि द्विरवद्यतीति पाशुकहविर्मात्रपञ्चावदानगमकप्रकृतिप्राप्त-त्र्यवदानपुनर्विध्यनुसारेण पाशुकहविःसामान्ये लक्षणा समाश्रिता इह तु पुरोडाशसामान्यचतुर्द्धाकरणप्रतिपादकप्रत्यक्षवचनानुसारेण संबन्धसामान्य-वाचित्वसमाश्रयणं कथं न स्यात् । यत्र ह्युपादानाय विशेषाकाङ्क्षा तत्रैव सामान्यशब्दस्यान्यत्र श्रुतविशेषे पर्यवसानं यथा पशुशब्दस्य च्छागे । एवमेव मीमांसकप्रवादो ऽपि ।

सामान्यविधिरस्पष्टः संक्रियेत विशेषतः ।
स्पष्टस्य तु विधेर्नैवमुपसंहार इष्यते ॥ इति ।

अस्पष्टत्वमनुष्ठानाय विशेषाकाङ्क्षं तदनाकाङ्क्षायामपि विशेषपर्यवसाने न ब्राह्मणं हन्यादिति निषेधस्यापि नात्रेयं हन्यादिति श्रुतविशेषनिषेधे पर्यवसानं स्यादिति चेत् । उच्यते । तं बर्हिषदं कृत्वा पुरोडाशं चतुर्द्धा करोतीति शतपथवाक्यं न चतुर्द्धाकरणविधिपरं किं तु शाखान्तरश्रुताग्नेयवाक्यप्राप्तं तदनूद्य तं बर्हिषदं कृत्वेत्येतद्विधिपरं तदपि वा शाखान्तरप्राप्तमनूद्योभयोरपि क्रमविधिपरम् । अतो यथाप्राप्त्यनुवाद इति पुरोडाशशब्द आग्नेयपर इति भवतीदं वाक्यान्तरश्रुतविशेषपर्यवसानोदाहरणम् ।

स एषो ऽग्निरिति वाक्यस्येति । प्रथमाम्नातस्य स एषोऽग्निरिति वाक्यार्थत्वेना*प्युद्देश्यकपुरुषत्ववेदनमनन्तराम्नाते स यो हैतमिति वाक्ये ऽनूद्यतइत्यर्थः । **विश्वेषां वा अयं नर इति** । योगाद्रूढेः प्राबल्ये ऽपि विश्वस्य वसुराटोरित्यनुवृत्तौ नरे संज्ञायामिति सूत्रेण विश्वशब्दस्य नरे उत्तरपदे संज्ञायामेव दीर्घविधाने ऽपि ब्रह्मैकस्वारस्यवन्निरुक्त†-निर्वचनसार्थकत्वाय योगं समाश्रित्यान्येषामपीति केशाकेशीत्यादाविव दीर्घत्वमुपपादनीयमिति भावः । **शब्दोपात्तेति** । भ्रुवो घ्राणस्य च यः संधिरित्यत्र भ्रूघ्राणशब्दौ नामनिर्वचनमुखेन दर्शितयोर्वरणानास्योरिदंतया विवरणार्थमिति संख्याविशेषाऽविवक्षया विवरणीयप्रातिपदिकार्थमात्रविवक्षया-मौत्सर्गिकमेकवचनं युज्यते । संख्याविशेषाऽविवक्षायामेकवचनमुत्सर्ग इति शाब्दिकन्यायात् । अतो ऽत्र द्वयोरेकवचनमुपपद्यते स्त्रीलिङ्गेनाऽप्रकृते १४६ ।

* वाक्यस्यार्थत्वेनेति च पु पा० । † स्वारस्यार्थकेति च पु पा० ।

तूपासनाविज्ञानेन स्त्रीलिङ्गमुपपादयितुं शक्यम् । न चोपासनाविज्ञानैकस्मिन्नेव वरणाया नास्याश्च मध्य इति चकारार्थः समुच्चयो मध्यशब्दार्थश्चोपपादयितुं शक्य इति भावः ।

१४८ । ३ देवाः सूर्यादय* इति । चक्षुर्विश्वरूप इत्यादिनोक्ता वैश्वानरावयवभूताः सूर्यादयो यदा प्रादेशमात्रमिव प्राप्ता भवन्त्युपासनया तथोपासिता भवन्तीति यावत्तदा सुष्ठु सम्यगुपासनीयेन प्रकारेण विदिता भवन्तीत्यर्थः । अत्र द्युमूर्द्धत्वादीनां द्युलोकादिव्यापिनि ब्रह्मणीव जाठरे कल्पनामात्रस्याप्यालम्बनाभावेन तेषां जाठरव्यावृत्तब्रह्मलिङ्गत्वे ऽपि प्रादेशमात्रत्वश्रवणेन तेषामुपासकमूर्द्धादिषु कल्पनीयत्वप्रतीतेः । तथा कल्पनायाश्च स्वोष्मणा देहव्यापिनि जाठरे ऽपि सम्भवाद् वेदिर्बर्हिर्गार्हपत्यादिकल्पनाप्रतिरुद्धत्वाच्चास्पष्टता । को न आत्मा किं ब्रह्मेति विमृशतां प्राचीनशालादीनामपि द्युप्रभृतिषु वैश्वानरात्मदृष्टिर्विधीयतेति तदनुसारेण तदीयवचनगतयोरात्मब्रह्मश्रुत्योरात्मब्रह्मदृष्टिविषयत्वाकारेणान्यत्र गौणत्वं वाच्यमित्युक्तशङ्काभिभूतत्वात्तथाभूतशङ्कानास्पदाग्निवैश्वानरश्रुतिप्रतिरुद्धत्वाच्चास्पष्टता । तस्य च च्छान्दोग्यगतात्मब्रह्मोपक्रमस्य वाजसनेयकगतवैश्वानरोपक्रमप्रतिरुद्धत्वादस्पष्टता । पुरुषश्रुतेर्मूर्द्धादिपादान्तावयवत्वात्मकसादृश्यरूपपुरुषविधाम्नानात्पुरुषस्य सतः पुरुषविधत्वासम्भवेन गौणत्वशङ्काभिभूतत्वादस्पष्टता । सार्वत्रिकान्नलाभफलस्याग्निरहस्योक्तपूर्णायुःप्राप्तिफलस्य चावेष्ट्यायुष्कामेष्ट्यादिफलवदन्यतो ऽपि संभवाशङ्कास्पदत्वात् सर्वपाप्मप्रदाहफलस्य प्राणाग्निहोत्रमात्रफलत्वशङ्कास्पदत्वाच्चास्पष्टतेति पादसङ्गतिः । एवमेषामस्पष्टानां ब्रह्मलिङ्गादीनामुन्मेषणमित्यम् एष वा प्रतिष्ठा वैश्वानर इत्यादिवाक्येन केवलमुपासकमूर्द्धादिषु वैश्वानरमूर्द्धादिकल्पन क्रियते नापि केवल द्युलोकादिदृष्टिर्विधीयते किं तु ये वैश्वानरस्य मूर्द्धाद्यवयवरूपा प्रतिष्ठादिशब्दोक्तगुणविशेषविशिष्टा द्युलोकादयस्तद्दृष्टिर्विधीयते । ततश्चाध्यात्मिकस्य द्युमूर्द्धत्वादेर्जाठरे सम्भवे ऽप्याधिदैविकस्य तस्य न तत्र सम्भवोऽस्ति भूतदेवतयोः कथं चिद् द्युलोकादिव्याप्तिसंभवे ऽपि न तन्मूर्द्धत्वादिकल्पनं समञ्जसं नियन्तारं प्रति नियम्यस्यैव मूर्द्धत्वादिकल्पनौचित्यात् । भूतस्य तन्नियन्तृ-

* सूर्यादये इति कल्पतरुपुस्तके प्रमादान्मुद्रितं तदेव शोध्यम् ।

स्योऽसंभवाद् देवताया अपि तन्नियन्तृत्वस्य क्लृप्तस्याभावात् सर्वनियन्तृत्वेन क्लृप्तमीश्वरं प्रत्येव मूर्द्धत्वादिव्यपदेशसंभवे अग्निदेवतायामपूर्वस्य द्युलोकादिनियन्तृत्वस्य कल्पनाऽयोगात् । को न आत्मा किं ब्रह्मेति विमर्शो ऽस्माभिरन्योन्यविरोधेनात्मब्रह्मबुद्ध्योपास्यमानेषु द्युप्रभृतिषु वस्तुतः किं तथाभूतं ब्रह्म किमेतेषामन्यतममन्यद्वेति* वस्तुतत्त्वविषयो न तु तेषु किं तथाभूतब्रह्मदृष्टिमारोप्योपास्यमित्यारोपितरूपविशिष्टविषयः । अन्नं ब्रह्म मनो ब्रह्मेत्यादिवदनेकत्र प्रतीके ब्रह्मदृष्ट्यारोपसंभवाद्विरोधाभावेनास्मदुपास्यानां द्युप्रभृतीनां मध्ये किं तथाभूतब्रह्मदृष्ट्योपास्यमिति निर्द्धारणाऽनपेक्षणात् । अत एव दिवमेव भगवो राजन्नित्यादिवाक्यैः स्वस्वभ्रम एवोद्घाटितः । सम्भवति ह्यद्यापि शङ्करसूर्यादिषु केषां चिद् ब्रह्मत्वभ्रमवद् द्युप्रभृतिषु तेषां तद्भ्रमः । अतस्तत्र नात्मब्रह्मश्रुती गौण्यौ† तदुपक्रमस्य च न‡ वैश्वानरोपक्रमेण प्रतिरोधः । इदन्तया निर्णेतुमशक्यस्याद्यापि बहुधा संदिह्यमानस्य ब्रह्मण इव जठरादिरूपस्याग्नेर्द्युसूर्यवायुगगनजलपृथिवीषु तादात्म्यभ्रमाऽसंभवेन पृथिव्यादितादात्म्यभ्रमविषयपरस्य प्राचीनशालादिवाक्यगतवैश्वानरशब्दस्यैव तद्वाक्यगतात्मब्रह्मशब्दानुवर्तितया वाच्यत्वात् । पुरुषशब्दस्य पुरुषविधशब्दोक्तशरीरवत्त्वसादृश्यपरतया गौणत्वे तेन पौनरुक्त्यापत्तेः । चेतनवाचित्वेन तस्यापि जाठरव्यावृत्तश्रुतित्वमुपपद्यते । सर्वलोकाद्याश्रयं फलं केवलान्नाद्यफलविलक्षणमिति सर्वेषु लोकेषु कामचारो भवतीति निर्दिष्टदहरविद्याफलवत्तदपि ब्रह्मविद्यासाध्यं ब्रह्मलिङ्गमेव । तथा सर्वपापप्रदाहोऽपि ब्रह्मलिङ्गप्रश्नोत्तराभ्यां प्राधान्येन प्रतिपिपादयिषिततयोपक्रान्तस्योपासनस्य फलाकाङ्क्षया रात्रिसत्रन्यायेनाऽर्थवादिकफलविपरिणामे कर्तव्ये प्रधानार्थवादइवाङ्गार्थवादे श्रुतस्यापि फलस्य ग्रहणौचित्यात् । इहोपासनाराध्यस्य वैश्वानरस्यैव प्राणाग्निहोत्रेण§ाराध्यत्वाच्च । तस्य ह वा एतस्यात्मनो वैश्वानरस्येति षष्ठ्या हृदयं गार्हपत्य इत्यादिवाक्येष्वप्यन्वयान्न वैश्वानरमग्निमभिप्रेत्य हृदयादीनां तदायतनत्वं विवक्षितं किं तु तं वक्ष्यमाणाग्निहोत्रहोमोद्देश्यमभिप्रेत्य तेषां होमाधिकरणाग्नित्वकल्पनमेव विवक्षितम् । गार्हपत्यादिव-

---

* अन्यतमान्यद्वेति २ पु० । † श्रुतिर्गौणीति २ पु० पा० । ‡ नेति नास्ति २ पु० ।
§ जै० सू० अ० ४ पा० ३ सू० १७–१९ । ‖ अग्निहोत्रेणापीति २ पु० पा० ।

च्दानामग्निष्येव मुख्यार्थलाभेन स्वारस्याद् हृदयाद्धि मनः प्रणीतमितीति प्राचीनाचार्यवाक्येनाचार्याणामप्यन्यर्थत्वाभिप्रायोन्नयनाच्च । एवंविद् यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि ह वा ऽस्य तद्वैश्वानरे हुतं स्यादिति सप्तमी तु समब्राह्मणे दानमितिवत् चतुर्थ्यर्था चण्डालायेति चतुर्थ्युपक्रमात् । य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवतीति सप्तमीनां स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यतीत्यादिप्राचीनखण्डेषु प्राणाद्याहुतिभिस्तृप्तिभाक्त्वेनोक्तलोकभूतात्मविषयतया चतुर्थ्यर्थस्य क्लृप्तत्वाच्च । न च प्राणाय स्वाहेत्यादिमन्त्रवर्णविरोधाद्वैश्वानरस्य देवतात्वाऽसंभवः । प्रश्नोपनिषद्वाक्यानुसारेण सर्वप्राणसमष्ट्यात्मकहिरण्यगर्भावच्छिन्नस्य त्रैलोक्यशरीरस्य वैश्वानरस्य परमात्मनो ऽत्र होमोद्देश्यतायां मन्त्रवर्णविरोधाभावाद् नैरुक्तनिर्वचनानुसारेणोदाहृतप्रश्नोपनिषद्वाक्ये दृष्टत्वेन चाग्निवैश्वानरशब्दयोरिहापि यौगिकत्वस्यैव न्यायतः प्राप्त्या तथा दृष्ट्युपदेशादिति रूढिपरित्यागेन निर्वाहस्य प्रौढिवादत्वाद्वैश्वानरएव त्रेताग्नित्वकल्पनप्राणाहुत्याधारत्वकीर्तनयोस्तत्पक्षावलम्बनेनोपन्यस्ततया तद्विरोधाभावाच्चेति* ॥

कल्पतरुकठिनवाक्यप्रकरविमर्दोत्थिते परिमले ऽस्मिन् ।
पूर्णो ऽजनि सविशेषप्रायः पादो मनोहरो† विदुषाम् ॥

इति श्रीवेदान्तकल्पतरुपरिमले प्रथमाध्यायस्य द्वितीयः पादः ॥



* अत्र सप्तमम् वैश्वानराधिकरणं संपूर्णम् । † मनोहरे इति ञ पु० पा० ।

अथ प्रथमाध्यायस्य तृतीयः पादः ॥

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥ १४९ ।

निर्विशेषेति । पूर्वस्मिन् पादे मनोमयो ऽत्ता पाययिता ऽक्षि-पुरुषो ऽन्तर्य्यामी वैश्वानर इत्येषां सविशेषत्वे ऽपि यथा ऽक्षरं निर्विशेषम् एवमस्मिन् पादे द्युभ्वाद्यायतनभूमाचरेचतिकर्मादीनां निर्विशेषत्वे ऽपि दहरः सविशेष इति प्रायिकत्वमत्रापि विशेषणं द्रष्टव्यम् । **अमृतत्वाभावे हेतुमाहेति** । यद्यपि पूर्वपक्षिणा साधनीये ब्रह्मत्वाभावएव द्वितीयहेतुरपि योजयितुं युक्तः तथापि संग्रहश्लोके नामृतं न ब्रह्मेति* साध्यद्वयमभिप्रेत्य तत्र यथासंख्यं हेतुद्वयं योजितम् । इयाँस्तु विशेषः । टीकायां कल्पतरौ चामृतब्रह्माभेदोक्तिर्द्वितीयहेतोरमृत्वाभावसाधकत्वे तत्साधनस्य साक्षात्सा-धनीयब्रह्मत्वाभावसिद्धावुपयोगप्रदर्शनार्था तस्य ब्रह्मत्वाभावसाधकत्वे ऽमृताद्भेदस्य कथं ब्रह्मत्वाभावसाधकत्वमित्याकाङ्क्षायां तस्य तत्साधक-तोपपादनार्थेति । **न त्विति** । ननु तथापि जलबन्धनहेतुस्तदर्थः स्यात् । न च घटोदरनिस्सरज्जलबन्धनहेतुमधूच्छिष्टादावतिप्रसङ्गः । पारावारमध्यवर्तित्वेनापि विशेषणात् । तथा सति तदेवालमिति वाच्यम् । नद्यामतिप्रसङ्गात् । अतो विशिष्टवाचकस्य तदेकदेशबन्धकत्वलक्षणया ब्रह्मणि वृत्तिः संभवतीति चेन्नैवम् । सेतुशब्दस्य आजानसिद्धाऽविनाभूतपारवत्त्वेन गौणत्वे संभवति कादाचित्केन बन्धनहेतुत्वेन तदयोगादिति भावः । **अमृतान्तरसंबन्धीति** । क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सो ऽन्य इति मन्त्रे जीवे ऽपि अमृतशब्दप्रयोगादिति भावः । **अतो ऽन्यदार्त्तमिति श्रुतेरिति** । निरुपाधिकामृतत्वं न ब्रह्मणो ,, । १२
ऽन्यत्रेति भावः ।

नन्वेवं सत्यमृतस्य सेतुरित्यनन्वितं स्याद् न ह्यमृतस्य पारया-नित्यन्वयः संगच्छते । नैव दोषः । अमृतस्यैव इत्यन्वयाभ्युपगमात्तव-

* श्लोके नामृतं ब्रह्मेति २ पु पा० ।

न्मात्रेण च तस्येदमिति सूत्रे इव षष्ठ्यन्तपदवाच्यसंबन्धित्वनिर्वाहात् । सेतुशब्देन त्वमृतपदानन्वितेनैव पारवत्त्वं लक्ष्यते । पुरुषं यावदगच्छदित्यस्य पुरुषपर्यन्तं व्याप्नुवदिति देशपरिच्छेदार्थकत्वं* न युक्तमवध्यर्थकयावच्छब्दयोगे द्वितीयानुशासनाभावाद् नदीप्रवाहो वृक्षवाटपर्यन्तं न व्याप्नोतीत्युक्त्या वृक्षवाटस्येव तेन पुरुषस्यापि देशपरिच्छेदप्रतीतिप्रसङ्गाच्चेत्यभिप्रेत्य
४९ । १३ तं ग्रन्थं साध्याहारं वस्तुपरिच्छेदार्थकतया व्याचष्टे **पुरुषं प्रति यावत्तादात्म्यं तावदगच्छदिति** । यावच्छब्द इह नावध्यर्थः किं तु परिमाणार्थः । तस्य परिमेयविशेषाकाङ्क्षया तादात्म्यशब्दस्तत्प्रतिनिर्देशाकाङ्क्षया तावच्छब्दश्च द्वितीयोपपत्त्यर्थं प्रतिशब्दश्चाध्याहार्यः । प्रतियोगे च बुभुक्षितं न प्रतिभाति किं चिदित्यत्रेव पुरुषस्येति षष्ठ्यर्थो लभ्यते तेन पुरुषस्य यावत्तादात्म्यं तावदप्राप्नुवदित्यर्थलाभाद् वस्तुपरिच्छेद उक्तो भवतीत्याशयः । यद्यप्युक्तार्थविवक्षायां पुरुषतादात्म्यमगच्छदित्येतावद्वक्तव्यं तथापि सर्वस्य प्रपञ्चस्याधिष्ठानसदात्मना पुरुषतादात्म्यसत्त्वादसिद्धिः स्यादिति *यावत्तावच्छब्दावुक्तौ* । ततश्च चिदात्मना ऽऽनन्दात्मना च पुरुषतादात्म्याभावाद्वस्तुपरिच्छेदो लभ्यतइति तात्पर्यम् । यावत्पदस्य साकल्यार्थकत्वे तु कार्त्स्न्येन पुरुषमव्याप्नुवदित्यर्थलाभाद् विनैवाध्याहारं देशपरिच्छेदार्थकत्वमपि टीकायां वक्तुं शक्यम् । अस्मिन्नर्थे स्वकार्योपहितमर्यादतयेत्यस्य स्वकार्यमात्रव्याप्तिमत्तयेत्यर्थः । पूर्वस्मिन्नर्थे अस्य स्वकार्यमात्रतादात्म्यवत्तयेत्यर्थ इति विशेषः ।

ननु साक्षात् श्रुत्युक्तत्वमव्यक्तात् पुरुषः पर इत्यव्याकृतस्याप्यस्ति आयतनत्वेन श्रुत्युक्तत्वमपि तस्याकाशएव तदोतं च प्रोतं चेत्यस्तीत्याशङ्क्य
,, । १४ व्याचष्टे **साक्षादिति** । साक्षात्त्वमन्योपाधित्वाभावरूपं प्राधान्यमिह विवक्षितमिति भावः । ननु भावप्राधान्यविवरणं किमर्थम् । सेतुशब्दलक्षणीयधारकत्वनिर्वाहार्थमिति चेत् । न । तद्विवरणेन लभ्यममृतत्वमपि हि निरतिशयानन्दरूपो मोक्ष एव स च ब्रह्मणो न भिद्यते ब्रह्म चामृतशब्देनैवोक्तम् । तथा च भावप्राधान्यविवरणे ऽप्यवर्जनीये ब्रह्मणि पर्यवसाने व्यर्थो ऽयं

* परिच्छेदार्थकत्वमितिर पु. पा. ।

बकबन्धविधिप्रयास इत्याशङ्क्य निराकरोति यद्यपीति । ब्रह्मैवामृतमित्येतदनन्तरं तदेव चामृतत्वमिति शेषो ऽध्याहर्त्तव्यः । ज्ञायमानदशामभिप्रेत्य तममृतत्वशब्दार्थं कृत्वा धारयितृत्वं निर्वाह्यमित्यध्याहारेण वाक्यं पूरणीयम् । नन्वेवमपि भावप्राधान्यविवक्षणं व्यर्थं सेतुर्यथा परपारस्य प्रापक एवमयं द्युभ्वाद्यायनमात्मा ऽमृतस्य ब्रह्मणः प्रापक इति प्रापकत्वलक्षणया निर्वाहादिति चेदुच्यते । द्युभ्वाद्यायतनममृतस्य सेतुरित्युक्त्या राजा ऽयं धर्म्मस्य सेतुरित्युक्त्या राजधर्मयोरिव द्युभ्वाद्यायतनामृतयोर्भेदप्रतीतेरमृतशब्दोक्ताद् ब्रह्मणो ऽन्यद् द्युभ्वाद्यायतनं ग्राह्यमिति शङ्का स्याद् न चैतच्छङ्कावारणार्थममृतत्वशब्दविवक्षणीयमोक्षपर एवायममृतशब्दो ऽस्तु मोक्षे ऽपि तत्प्रयोगसत्त्वादिति वक्तुं शक्यम् । इह तदेतत्सत्यममृतमानन्दरूपममृतं यद्विभातीति पूर्वापरमन्त्रगतप्रयोगाभ्याममृतशब्दस्य ब्रह्मवाचित्वावश्यम्भावात् ।

पिञ्धात्वर्थयोगादित्यर्थ इति । धारणमपि बन्धनविशेष १४९ इत्यभिप्रेत्यैवमुक्तम् । यदि तु बन्धनं प्रवहतो जलस्यागतिनिरोधनं निरुद्धगतिके जले प्रभूते साधिते तद्द्वारणं बन्धनस्य फलं न तु बन्धनमेव धारणमित्याश्रीयते तदा तस्य शब्दार्थैकदेशत्वाभावे ऽपि सहजत्वाभावे ऽपि तदवलम्बनैव गौणी वृत्तिर्युक्ता न पारवत्त्वावलम्बना । अत्रधिकरणन्यायेना*-न्तरङ्गसादृश्यग्रहणादपि समभिव्याहृतपदान्तरस्वारस्यानुरोधिसादृश्यग्रहणस्य प्रबलत्वात् । इह च पारवत्त्वलक्षणायामात्मश्रुत्यादीनाममृतशब्दस्य सेतुपर्य्यन्तान्वितताश्च स्वारस्यहानेः स्पष्टत्वादिति समाधेयम् । योगाद् बलिनीति । अत एव प्रेतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणामिति मन्त्रे बहुवचनानुरोधाद् उद्गातृशब्दस्य बहुषु ऋत्विक्षु वृत्तौ वक्तव्यायामुच्चैर्गायन्तीति योगं परित्यज्य प्रथमप्रतीतरूढ्यपरित्यागार्थं सुब्रह्मण्ये† ससुब्रह्मण्ये वोद्गातृगणे रूढिपूर्वकलक्षणा‡ ऽभ्युपगता । ननु साधनत्वलक्षणा न युक्ता । अमृतशब्दोक्तस्य ब्रह्मणो हेत्वभावाद् भावप्राधान्यविवक्षणे ऽपि तस्य ज्ञायमानदशापर्य्यवसायित्वाद् ज्ञायमानत्वस्य च चरमवृत्तिविषयत्वरूपतायां मोक्ष-

---

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ६ । मन्त्राधिकरणन्यायेनेति २ पु॰ पा ।

† सुब्रह्मण्ये इति कुण्डलितं १ पु॰ । ‡ एतदपि सुब्रह्मण्येति बहिर्लिखितम् १ पु॰ ।

स्याऽस्थिरपुरुषार्थत्वापत्त्या प्रकाशमानत्वरूपतया वक्तव्यत्वात्स्वतःसिद्धस्य च ब्रह्मप्रकाशस्य हेत्वनपेक्षत्वादित्याशङ्कानिवारणार्थं स्वतःसिद्धप्रकाशावरणनिवृत्तिरमृतत्वशब्दार्थ इतितात्पर्यकत्वेनामृतशब्दश्च भावप्रधान इति

१४९ । २३ टीकां व्याचष्टे अमृतस्येति । ननु सैवावरणाविद्यानिवृत्तिर्द्वारयितृत्वलक्षणायामप्यमृतत्वशब्दार्थः किं न स्यात् । न चाविद्याया जीवत्वोपहितचैतन्याश्रयत्वात्तन्निवृत्तिरपि तदाश्रयैव न तु शुद्धब्रह्माश्रितेति शङ्क्यम् । अविद्यायां निवर्तमानायां जीवत्वोपाधेरपि सह निवृत्त्या पटनाशसमकालतद्रूपनाशस्य पटावस्थापन्नतन्त्वाद्याश्रितत्ववदविद्यानिवृत्तेर्जीवत्वाऽनुपहितशुद्धचैतन्याश्रितत्वोपपत्तेरिति चेत् । सत्यम् । तथापि निवृत्तिवदविद्यापि जीवत्वानुपहिततदाश्रिता ऽस्त्विति मन्दशङ्कावारणार्थमविद्यानिवृत्तिर्द्वारणपदे न स्पृष्टा । गुणकर्मत्वाभावादिति । अपो ऽश्नाति त*न्नेवाशितं तन्नेवाऽनशितमित्यत्र द्वितीयासंयोगे ऽपि गुणकर्मत्वाभावादशनस्य सर्वनाम्ना परामर्शः प्राधान्याद् दृश्यतइति भावः ।

१५० । ११ तसइति । यथा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेत्यत्र पयसः सप्तमीनिर्देशाद् बर्हिषि हवींष्यासादयतीत्यत्र बर्हिष इव क्रियोपसर्जनत्वप्रतीतावपि क्रियाया हविर्वाच्याऽऽमिक्षापदसमानाधिकरणतत्पदपरामर्शनीयत्वाऽयोगादुपसर्जनस्यापि पयसस्तत्पदेन परामर्शः । तत्र च स्त्रीलिङ्गमामिक्षापदसामानाधिकरण्यप्रयुक्तम् । आमिक्षापदं च न संस्कारकदधिसंपर्कघनीभूतस्य पयसो वाचकं न तज्जन्यस्य द्रव्यान्तरस्य न दध्नो नापि संसृष्टयोर्दधिपयसोर्वाचकम् । अतो दध्यानयनं पयोरूपामिक्षाप्रयुक्तमित्यामिक्षापचारइव वाजिनापचारे न पुनस्तदर्थं पयोन्तरे दध्यानयनं कार्यं वाजिनस्यानुनिष्पादितत्वाद् आमिक्षायाः पयस्त्वात्तस्यां पयस एव धर्मा न दध्नो नापि दधिपयसोरित्यङ्गीक्रियते एवमिहापि योग्यतया स्नानस्यैव इत्यनेन परामर्शो ऽङ्गीकार्य इति भावः । ननु क्रियाया अयोग्यत्वे ऽपि दध्नो ऽस्ति योग्यत्वं तच्च क्रियां प्रति कर्मतया प्रधानमिति दध्नस्तत्पदेन परामर्शः किं न स्यात् । यद्युच्येत नयतेर्द्विकर्मकत्वेन कर्मान्तरापेक्षायां पयः कर्मा-

---

* तदिति नास्ति २ पु० ।

न्तरं तत्र च सप्तमीनिर्देशः प्रधानकर्मत्वज्ञापनार्थः । अन्यथा दधिपयसोरुभयोरपि द्वितीयायां पयसि दध्यानयनं कार्य्यं दधि वा पयआनयनमिति संदेहः स्यादतः प्रधानं पयः सर्वनाम्ना परामृश्यतइति । एवं तर्ह्यप्रधानस्य सर्वनाम्ना परामर्शे नेदमुदाहरणं स्यादित्याशङ्क्य शब्दत इति विशेषितम् । अर्थतः प्रधानस्यापि शब्दतो ऽप्रधानस्य सर्वनाम्ना परामर्शे इदमुदाहरणं कृतम् । एवं च ज्ञानस्य* विधेयत्वेनार्थगत्या प्राधान्ये ऽपि शब्दगत्या† ज्ञेयोपसर्जनत्वाद्राजपुरुषादावार्थप्राधान्यतः शाब्दप्राधान्यस्यैव बलवत्त्वदर्शनात् शब्दतो ऽप्रधानसर्वनामपरामर्शनीयतेति शङ्कायां गुणकर्मत्वाभावादपो ऽश्नातीतिवत् जानयेत्यत्रा ऽनीप्सितकर्मणि द्वितीयेति शब्दतो ऽपि प्राधान्ये समर्थयितुं शक्ये ऽपि शब्दतो ऽप्राधान्यमभ्युपेत्य न चेदमैकान्तिकमित्यादिटीकाग्रन्थः प्रवृत्त इति दर्शितं भवति । एवमिह ज्ञेयस्य शाब्दप्राधान्योक्तिरभ्युपेत्यवाद इत्येतत्सत्यपि ज्ञेयप्राधान्यनिर्देशइति प्राचीनग्रन्थगतापिशब्देन ध्वनितम् । एतेन स एषो ऽन्तश्चरते बहुधा जायमानः दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठित इत्याद्यनन्तरमन्त्राम्नातैतच्छब्दानामात्मपरत्वदर्शनादस्यापि तत्परत्वं युक्तमिति शङ्कापि निरस्ता । तेषां ज्ञानपरत्वा ऽसंभवेन तद्विषयात्मपरत्वकल्पने ऽप्यस्य तस्मिन्नेव मन्त्रे विधेयत्वेन प्रधाने समभिव्याहृतसेतुपदपर्य्यन्तस्वारसिकान्वययोग्ये ज्ञाने वृत्तिसंभवे तदुल्लङ्घनेन तद्विषयपरत्वकल्पना ऽयोगात् ।

ननु भिद्यते हृदयग्रन्थिरिति मन्त्रस्य टीकाकृतं व्याख्यानमयुक्तम् । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभातीति पूर्वमन्त्रे आनन्दरूपब्रह्मदर्शने वर्णिते तद्दर्शनेन हृदयग्रन्थिभेदादिरूपा ऽनर्थनिवृत्तिरपि भवतीति वर्णयितुं तदनन्तरस्य मन्त्रस्य प्रवृत्तिरिति प्रतीतेस्तदनुसारेण तस्मिन् ब्रह्मणि दृष्टे सति हृदयग्रन्थिः स्वयमेव भिद्यतइत्याद्यर्थवर्णनौचित्यादित्याशङ्क्याह भाष्ये सूत्रोपात्तेति । भाष्ये सेोचयेर्मुक्तोपसृप्य १५० । पदयोर्विवरणार्थमित्युक्त्वा ब्रवीतीति क्त्वाप्रत्ययेनास्य मन्त्रस्य तथा विद्वानिति मन्त्रेण सबन्धस्योक्ततया तं संबन्धं हृदयग्रन्थिभेदनादिरूपमहाप्रय

* इदं ज्ञानस्येति २ पु॰ पा॰ ।   † शब्दगत्येति २ पु॰ पा॰ ।

त्मसाध्यं तद्विज्ञानेन परिपश्यन्तीति पूर्वमन्त्रप्रस्तुतं ब्रह्मदर्शनं तत्फलमविद्यानिवृत्तिपूर्वकब्रह्मप्राप्तिरित्येवंरूपं दर्शयितुं तस्मिन् दृष्टइति व्यधिकरणसप्तम्यो दृष्टइति निमित्तसप्तमी भिद्यन्तइत्यादयः कर्मणि लकारा इति टीकाकृतं व्याख्यानं युक्तमेवेत्याशयः । **कर्मसंयोगइति** । निमित्तात्कर्मणः संयोगे सप्तमी वक्तव्येति वार्तिकान्निमित्तार्थे सप्तमी । **दर्शनार्थश्चेति** । एवं च हृदयग्रन्थिभेदनादिकं फलमेवात्र निमित्ततया विवक्षितम्। फलस्याप्यसंधीयमानस्य स्वोद्देश्यकपुरुषव्यापारप्रयोजकतया वैवक्षिकं निमित्तत्वम् । चर्मणि द्वीपिनमित्युदाहरणे ऽप्येवमेव। **नामरूपशब्दार्थमिति** । कारणे कार्यवाचकशब्दप्रयोगः कार्यसहितकारणमुक्तत्वप्रत्यायनार्थ इति भावः। अव्याकृतग्रहणं वाय्वादीनामप्युपलक्षणमित्याह **अव्याकृतेति** । (यावतेत्येतत्पदं यत इत्याशङ्क्येत्यनेन विवृतम्)* । ननु जीवात्मनः प्रसिद्धत्वे तदधिगमाय ब्रह्मावबोध्यतइत्ययुक्तं प्रसिद्धस्याऽनधिगमनीयत्वादित्याशङ्क्य व्याचष्टे **प्रसिद्धमिति** ।

१५१ । ६ **कृत्वाचिन्तोद्घाटनत्वादिति** । यद्यपि लिङ्गेन प्रकरणमुपमृद्य पूर्वपक्षः कर्तुं शक्यः अन्यविषयत्वे ऽपि प्रकरणविरोधित्वमपि श्वेताश्वतरपठिताऽऽम्नानवदेव मुण्डके तयोरन्यः पिप्पलं स्वाद्वत्ति समाने वृक्षे पुरुषो निमग्न इत्यादिवच्च समर्थयितुं शक्यं तथाप्यत्राऽन्यविषयत्वोपपादकं बलवल्लिङ्गमेव नास्ति निश्चितब्रह्मतात्पर्ये ऽन्यविषयत्वपूर्वपक्षशङ्काऽनास्पदे

> निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
> अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥
> यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
> तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥

इति श्वेताश्वतरमन्त्रे ब्रह्मण्यमृतसेतुत्वव्यपदेशदर्शनेन तस्य ब्रह्मधर्मताया एव प्रतीतेः ब्रह्मण्यमृतसेतुत्वश्रवणेनैव अमृतस्यैष सेतुरित्येतदर्थत्वेन कल्पितयोः ब्रह्मभिन्नत्वपारक्त्वयोरलिङ्गत्वमभिप्रेत्य नानुमानं‡मिति सूत्रे प्रधानजीवादिपूर्वपक्षगमकशब्दाभावोक्तेश्च तथात्वे ऽपि न्यायतः

* ( ) एतन्मध्यगो ग्रन्थो नास्ति २ पु० ५ पु० कुण्डलितः । † पठितेतीति १-३ पु० पा० ।
‡ व्या० सू० अ० १ पा० ३ सू० ३ ।

श्वेताश्वतरसाधारणतद्व्यपदेशगतिप्रदर्शनार्थमिह तद्व्यपदेशस्य ज्ञानान्वयेऽपि संभवतीति न्यायान्तरप्रदर्शनार्थं चाधिकरणारम्भात् । अतः प्रकरणानुसन्धानेन बलवताऽनन्यथासिद्धेन प्रकरणेन प्राकरणिकब्रह्म*परामर्शियच्छब्दरूपसर्वनामश्रुत्या च मन्त्रस्य ब्रह्मपरत्वं स्पष्टं भवेदिति कृत्वाचिन्तारूपत्वमधिकरणस्योक्तम् । नन्वस्य मन्त्रस्य प्रकरणे पाठो नास्तीति कृत्वाचिन्ता चेत् कथं ब्रह्मैवेदममृतं पुरस्तात् तथा विद्वान् नामरूपाद्विमुक्तः यः सर्वज्ञः सर्वविदिति प्राकरणिकश्रुतिलिङ्गोपन्यासः । उच्यते । पूर्वसूत्रे ऽप्यात्मश्रुतिर्वाग्विमुक्तज्ञेयत्वं प्रधानादिपरत्वगमकशब्दाभावश्चेत्येतन्मन्त्रपर्यालोचनामात्रलभ्या सर्वार्थाः सूचिताः । प्राकरणिकश्रुतिलिङ्गान्तरपरतया स्वशब्दादिव्याख्यानात्†न्तरं तु प्रकरणोद्घाटनानन्तरं प्राकरणिकान्यपि श्रुतिलिङ्गान्यत्र प्रवर्तिष्यन्त इति हृदयेन प्रागेव सूत्रार्थतयोपन्यस्तानि । स्थित्यदनसूत्रस्य‡ प्रकरणोद्घाटनानपेक्षो नास्त्यर्थ इति मत्वा तत्सूत्रमेकं प्रकरणं सूत्रानन्तरं कृतम् ।

पुरुष एवेति निर्दिष्टं पुरुषं यस्मिन् द्यौरित्यादिमन्त्रोक्तेन विशेषणेन विशिंषन्नोतशब्दस्यार्थमाह यस्मिन्निति । किं तदिति । किं तदिदं १५१ विश्वमित्यनेनोक्तमित्यर्थः । ननु कर्मतपोभ्यामन्यदपि विश्वशब्दक्रोडीकार्य§मस्तीत्याशङ्क्याह अर्थात्तत्फलं वेति । अत्रात्मश्रुतिस्तावदस्पष्टा आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीत्यभिधानकोशानुसारेण य आत्मनि तिष्ठन्नित्यादिप्रयोगानुसारेण चानेकसाधारण्यात् तस्य ब्रह्मपरतायामाप्लृ व्याप्ताविति धातोर्मनिन्प्रत्यये बाहुलके तकारे च सति तन्निष्पत्तेर्योगरूढ्युभयानुपपत्तेर्भवतीति युक्त्या सोन्मेषणीया । द्युभ्वाद्यायतनत्वं चानेकसाधारणं सदायतनाः सत्प्रतिष्ठा इति श्रुत्यन्तरपर्यालोचनयोन्मेषणीयम् । वाग्विमुक्तज्ञेयत्वं च ब्रह्मधर्मत्वेनाप्रसिद्धं तमेव धीर इत्यादिश्रुत्यन्तरपर्यालोचनयोन्मेषणीयम्|| । कर्मकर्तृभेदव्यपदेशस्त्वभ्युच्चयमात्रं मनःप्राणाद्याश्रयमेव युष्माकं स्वभावं स्वरूपं जानीध्वं न तु मनःप्राणादिकमित्युपदेशो-

* प्रकरणिब्रह्मेति १ पु॰ पा॰ ।
† स्वशब्दव्याख्यानेति २ पु पा ।
‡ व्या सू अ १ पा ३ सू॰ ७ ।
§ विश्वशब्दस्यार्थे क्रोडीकार्यमिति २ पु पा ।
|| अन्वेषणीयमिति २ पु पा ।

पपत्तेः । एवंविधोपदेशानां बहुलमुपलम्भात् । यच्च विवक्षितं मुमुक्षुवेद्यत्वं सांसारिके जीवस्वरूपे न संभवतीति ततो भेदव्यपदेशः समर्थ्यते तर्हि तदप्यस्पष्टमित्यस्पष्टब्रह्मलिङ्गता* ॥

१५१ । ९ **भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥**

वायुरपि ग्राह्य इति । अग्नेर्वाय्वाकाशानां क्रमेणोत्तरोत्तरकारणत्वादिति भावः । अपां तेज इति पाठः । अपां नभ इति तु प्रामादिकः पाठः । केषु चिद्ग्रन्थेष्वपामिति वाक्यमेव नास्ति । **एवमाकाशपर्यन्तमिति ।** तेजसो वायुर्वायोराकाश इति क्रमेणेति यावत् । **आकाशस्य भोग्यत्वइति ।** संमर्दावस्थानक्लिष्टस्यासंबाधावस्थानसौख्यहेत्ववकाशात्मना अन्यैरप्येतादृशैः प्रकारैराकाशस्य भोग्यता । **भावभवित्रोरितीति† ।** स य एषो ऽणिमा धातुः प्रसादान्महिमानमीशमित्यादाविवेति भावः । **न प्राणादन्यस्येति ।** न प्राणान्यधर्मिक इत्यर्थः । **आर्त्तिमात्रस्येति ।** यस्योभयं हविरार्तिमार्च्छेत्यैन्द्रं पञ्चशरावमोदनं निर्वपेदिति वाक्यइति शेषः ।

१५२ । २० **आत्मशब्दश्चेति ।** ननु प्राक् सङ्गतिग्रन्थे प्राण एवेहात्मा विवक्षित इति भाष्यानुसारेणात्मशब्दः प्राणपरतया व्याख्यातः कथमिह स यो नाम ब्रह्मेत्युपास्तइत्यादिवाक्यप्रतिपन्ननामादिप्रतीकारोप्यब्रह्मपरतया व्याख्यायते । नैष दोषः । तत्र ब्रह्मशब्दो ऽपि सर्वात्मत्वसर्वप्रतिष्ठात्वरूपब्रह्मलिङ्गवत्तया वर्णिते प्राणएव पर्य्यवस्यतीति तात्पर्यात् । यद्यपि नामादिषु परब्रह्मदृष्टिविध्यङ्गीकारे ऽपि दृष्टिविशेषणतयोपसर्जनस्य तस्य न प्राकरणिकत्वं किं तु तद्दृष्ट्योः‡पासनीयतया प्रधानभूतानां नामादीनामेव सन्निधानमात्रं तु तस्येति सिद्ध्यति तथाप्यग्रे ब्रह्मगुणसर्वात्मत्वादिविशिष्टत्वेन प्राणसंकीर्तनस्यावैयर्थ्यार्थं ब्रह्मगुणविशिष्टप्राणदृष्टिविधानार्थं नामादिषु ब्रह्मसंकीर्तनमिति कल्प्यते । अन्यथा नामादिष्विव प्राणे उपासनातत्फलयोरनुक्त्या तद्वैयर्थ्यप्रसङ्गादित्यभिप्रायः । नन्वात्मविषयोपक्रमोपसंहारानुसारेण शोकरूपसंसारतरणोपायप्रार्थनोपक्रमतदुपायकीर्तनोपसंहारानुसारेण च परं ब्रह्मैव महाप्रकरणीत्यङ्गीकृत्य

* अत्र प्रथमं द्युभ्वाद्यधिकरणं पूर्णम् ।

† भावभविषोरिति इत्येव प्रतीकाकारः ३ पु० । ‡ किं तु द्रष्टेति ३ पु० पा०

दुर्बलेनापि सन्निधानेन भूय: प्रश्नप्रतिवचनाभावातिवादित्वाख्यप्राणव्रतानुकर्षणरूपलिङ्गद्वयानुगृहीतेन बाधो वक्तुं शक्यः ।

दुर्वलस्य प्रमाणस्य बलवानाश्रयो यदा ।
तदापि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥

इति न्यायसाम्यात् । अथ वा प्राणो वा आशाया भूयानित्यारभ्य अथातो ऽहङ्कारादेश इत्येतत्पर्यन्तं प्राणस्यावान्तरप्रकरणमङ्गीकृत्य तेन महाप्रकरणस्य बाधो वक्तुं शक्यः । अत एव दार्शपौर्णमासिके महाप्रकरणे ऽनुवर्तमाने ऽपि अभिक्रामं जुहोत्यभिजित्या इति विधीयमानस्याभिक्रमणस्य प्रयाजावान्तरप्रकरणेन प्रयाजहोमाङ्गता । यद्यपि

येनाभिक्रमणादूर्ध्वं पुरस्तान्नु गुणो ऽपरः ।
विधीयते प्रयाजानां तस्मात् प्रकरणास्तिता ॥

इत्युक्तरीत्या अभिक्रमणविधानात् पश्चादपि प्रयाजानिष्ट्वा हवींष्यभिघारयतीति प्रयाजकीर्तनयुक्तगुणविधानेनेवात्र भूमनिरूपणानन्तरं प्राणकीर्तनयुक्ततद्गुणविधानेन संदंशन्यायो नास्ति तथापि संदंशवत् प्राणव्रतानुकर्षणादिलिङ्गमपि तदवान्तरप्रकरणानुवृत्तिगमकमिति वक्तुं शक्यमिति चेत् । उच्यते । अनेन प्रकारेण पूर्वपक्षान्तरं प्रकरणान्ते परमात्मविवक्षा भविष्यति भूमा तु प्राण एवेति चेदिति भाष्यगतशङ्कान्येन दर्शयिष्यत इतीह नोद्घाटितम् ।

सन्निधिमात्रमात्मशब्दस्येति । आत्मशब्दः पूर्वपक्षे प्राणपर १५२
इत्याशयेनात्मनो ऽर्थस्य सन्निधानमनुक्त्वा शब्दमात्रस्य तदुक्तम् । तत्त्व- **इति ।** नामाद्युत्तरोत्तरोत्कृष्टवस्तूपदेशः परमोत्कृष्टब्रह्मप्रतीत्यर्थ इत्यर्थः* । सत्यश्रुत्या प्राणातिवादिनो ऽन्यत्वेन प्रतीयमानः सत्यातिवादी तत उत्कृष्टः प्रतीयते तत एतस्योत्कर्षश्च तदतिवदननिमित्तात्प्राणादेतदतिवदननिमित्तस्य सत्यस्योत्कर्षमादाय पर्य्यवस्यतीति भावः । **सर्वप्रकरण†समाप्ताविति ।** कृत्स्नेयं भूमविद्या प्राणस्यैव प्रकरणं नामादिष्वारोप्योपास्यस्यापि प्राणस्योद्गीथादिषु समारोप्योपास्यानां हिरण्मयपुरुषाकाशप्राणादीनामिव प्राधान्येन प्रतिपाद्यत्वोपपत्तेरिति प्राणस्य सन्निधिस्थाने महाप्रकरणं

---

* इत्यर्थ इति नास्ति २ पु·   † प्राणप्रकरणेति ३–५ पु· पा ।

निवेश्य पूर्वपक्षान्तर(मात्मतः प्राण इति लिङ्गविरोधेन निराकृत्यात्मन एव
महाप्रकरणे अहंकारादेशपर्यन्तं प्राणस्यावान्तरप्रकरणमिति पूर्वपक्षान्तर)*मा-
शङ्क्यतइति भावः । **आ प्रकरणसमाप्तेरिति ।** अवान्तरप्रकरणसमाप्तिपर्य-
२५३ । ११ न्तमित्यर्थः । **स एव प्राणः किं न स्यादिति ।** भूमा प्राण एवेति हि
पूर्वपक्ष इति भावः । **पुरस्तादिति ।** यः सत्येनातिवदतीति पुरस्तान्नि-
र्देशः । तत्र निर्दिष्टस्यैव हि सत्यस्य विज्ञानादिसाधनपरंपरोपदेशक्रमेण
भूमरूपतयोपदेशः कृतः स भगव इत्युपरिष्टान्निर्देशः । ननु प्राणस्यान्याय-
त्ततोक्तिः प्राणाऽवान्तरप्रकरणबलात् तन्मध्यपतितो भूमा प्राण इति शङ्का-
या न निवर्तिकेत्याशङ्क्याह **सत्यशब्दश्रुत्या चेति ।** तुशब्दश्रुतेरप्युपलक्ष-
णमेतत् । तथा च तुशब्दसत्यशब्दश्रुतिविरोधात्तत एव प्राणातिवादित्वा-
नुवृत्तिलिङ्गस्यासिद्धेः प्रश्नप्रतिवचनान्तराभाव†लिङ्गस्यान्यथासिद्धेश्च न
प्राणसन्निधेर्बलवत्त्वं नाप्यवान्तरप्रकरणलाभ इत्याशयः । सौषुप्तिकसुखभवनं
न विधेयं सुखमहमस्वाप्समित्यनुभवसिद्धत्वात् किं तु तस्य सुषुप्तशरीरा-
वच्छेदेन तदभिव्यक्तिरेव विधेया तेन प्राणाग्नय एवैतस्मिन् पुरे जाग्रतीत्य-
वधारणाद् जीवस्य मृताविव सुप्तावपि शरीरान्निष्क्रमणमस्तीति शङ्काव्या-
वृत्तिर्लभ्यतइत्यभिप्रेत्य तथा श्रुतिं योजयति **तदस्मिन् शरीरे इति ।** प्राणो
भूमेति पूर्वपक्षे शोकतरणादीनां भूमाऽनन्वयात् संप्रसादादध्युपदेशस्य सोप-
हेतोः प्राणतानुकर्षणप्रश्नोत्तराभावलिङ्गाभिभूतत्वादस्पष्टब्रह्मलिङ्गता‡ ॥

,, । २२ **अक्षरमम्बरान्तधृतेः ॥ १० ॥**

रूढिनिरूढिभ्यामिति । नन्वक्षरं न क्षरं विद्यादश्नोतेर्वा सरो
ऽक्षरमिति महाभाष्ये वर्णे ऽपि योगप्रदर्शनान्निरूढिरेवेति चेन्न । वर्णानां नित्य-
विभुत्वपक्ष तत्प्रदर्शनात् । तत्पक्षे ऽप्योमित्येतदक्षरमित्यादिष्वक्षरशब्दनि-
र्दिष्टे द्विचादिक्रमिकवर्णसमुदाये समारोपितक्रमविशेषविशिष्टत्वेनाऽनित्ये परि-
च्छिन्ने च तस्य रूढेराश्रयणीयत्वादिति भावः ।

ननु लिपिषु ककारो ऽयमित्यादिः शब्दात्मत्वानुभवस्तद्वन्यत्रकृतो
दृष्ट इत्याशङ्कानिवारकमपि चेति ग्रन्थमवतारयति **अर्थे शब्दात्मकत्वा-**

* ( ) एतन्मध्यस्थो ग्रन्थो नास्ति ५ पु । † प्रतिवचनोत्तराभावेति १ पु पा॰ ।
‡ अत्र द्वितीयं भूमाधिकरणं पूर्णम् ।

नुभव* इति । ननु गौरयमित्यादिशब्दानुविद्धप्रत्ययाः शब्देष्वर्थानां तादात्म्येनोतप्रोतत्वालम्बनाश्चेद् ब्रह्मविषया अपि शब्दानुविद्धप्रत्ययाः तथा स्युरिति चेत् कस्तत्र संदेहः । यदूर्ध्वं गार्गि दिव इत्यादिना सकललोकवर्तिवस्तुजाताश्रयत्वेन भूतभविष्यद्वर्तमानाकारपरिणामिमूलप्रकृत्यव्याकृताश्रयत्वेन च प्रतिपाद्यमान आकाशो ब्रह्मैव ब्रह्मातिरिक्तस्य तावदाश्रयत्वाभावात् । एवं गार्गि†ब्राह्मणे पृथिव्यादिब्रह्मलोकान्तसकललोकाधारे पृष्टे प्रश्नो ऽयं ब्रह्मविषयः पर्यवसन्नः ब्रह्म च‡ गुरुशिष्यमर्यादामतिक्रम्यान्यायेन जल्पकथायां न प्रष्टुमुचितमित्याशयवता याज्ञवल्क्येन गार्गि मातिप्राक्षीर्मा ते मूर्द्धा व्यपतदनतिप्रश्न्यां वै देवतामतिपृच्छसीति सक्रोधं निवारितस्यैव प्रश्नस्य गार्ग्या सर्वथैव पराजयो मा भूदिति ब्राह्मणानामनुज्ञां लब्ध्वा पुनरवतारणे कृते याज्ञवल्क्येनाकाशएव सदोतं च प्रोतं चेत्युक्तस्य तदुत्तरस्य ब्रह्मविषयत्वावश्यंभावात्तु तदप्यक्षराश्रितत्वेन प्रतिपादितं कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति प्रश्नोत्तराभ्याम् । एवं च प्रशासितृत्वद्रष्टृत्वश्रोतृत्वादिबहुलिङ्गविरोधादक्षरश्रुतिर्दुर्बलेति शङ्कापि निरस्ता । ब्रह्माश्रयस्य ब्रह्मत्वायोगेन ब्रह्मणि जीवधर्माणामिवाक्षरे ब्रह्मधर्माणां तादात्म्याद् व्यपदेश इति कल्पनोपपत्तेः ।

धारयितुमर्हतीत्यनुषङ्ग इति । ननु परमात्मा वा कथमाकाशा- १५४
न्तानि धारयितुमर्हति परमात्मैव ह्यत्राऽऽकाशशब्देन निर्दिष्टः न च स एव तद्धारयितुमर्हतीति चेत् । उच्यते । यदि यदूर्ध्वं गार्गि दिव इत्यादिना ऽनुक्रान्तस्य सर्वस्य प्रपञ्चस्य परमात्मनो ऽन्यदाधारीभवितुं नार्हतीत्याकाशो ऽत्र स एवेष्यते तर्हि सकलप्रपञ्चविशिष्टस्य तस्याधारभूतं किं चिदन्यद्वस्तु भवितुमर्हतीति का प्रत्याशा । न ह्येतावद्धान्यं वोढुमिह कुसूलादन्यद् भाजनं नास्तीति निश्चयवतः तेन धान्येन विशिष्टं कुसूलं वोढुमन्यद् भाजनमस्तीति संभावना ऽपि हृदयमधिरोहति । नामधेयसंभिन्नं सर्वे शब्दवाच्यमिति प्रक्रिया तु टीकायामनुपदमेव स्वरूपप्रमाणार्थक्रियाभे-

---

* सर्वस्य शब्दात्मत्वानुभव इति १-४ पु॰ पा॰ । † पूर्वगार्गीति ३ पु॰ पा॰ ।
‡ ब्रह्मापि चेति ३ पु॰ पा॰ । § चत्रेति नास्ति ३ पु॰ ।

करिष्यते । तत्र घटमृत्पिण्डपटतन्त्वादिवत्स्वरूपार्थभेदस्यो*पपादनसमर्थे ऽपि प्रमाणभेदो† न शक्योपपादनः । श्रोत्रग्राह्यस्य शब्दस्य गौरयमिति चक्षुर्ग्राह्यत्वासंभवात् । ब्राह्मणो ऽयं गौरो दण्डी कुण्डली कमण्डलुमानित्यादिषु सर्वेषां पदानां स्वस्वरूपसमर्पणमात्रार्थत्वेन जातिगुणविशेषाद्यनवगत्या तत्संदेहाऽनिवृत्ति‡प्रसङ्गात् । सर्वस्यापि शब्दवाच्यस्य स्वस्वनामधेयद्वाराकाशाश्रितत्वाभ्युपगमे तस्यापि प्रणवोङ्कारादिशब्दवाच्यस्य तदाश्रितत्वस्य वक्तव्यत्वेनाक्षरशब्दस्य व्यवस्थितार्थालाभप्रसङ्गाच्च । तस्माद्यद्भूतं भवच्चेत्यादिवाक्ये यद्भूतं यद्भवद् यच्च भविष्यत्तावदाधारत्वं विवक्षितं न तु भूतभवद्भविष्यदात्मकाव्याकृताधारत्वम् । गार्गिब्राह्मणे सकललोकाधारप्रश्ननिवारणं साक्षात्तदुत्तरस्यान्यविषयत्वे ऽपि पुनस्तदाधारस्य प्रश्नः परमात्मविषयो भविष्यतीति स मा भूदिति दूरदृष्ट्या कृतमित्याशयं वर्णयित्वा अवकाशात्मना सकलप्रपञ्चाधारस्य भूताकाशस्योपादानात्मना तदाधारस्याव्याकृतस्य वा ऽवकाशशब्देन ग्रहणमिति योजनीयम् । अतोऽम्बरान्तधृतेः परमात्मन्येव संभव इत्युक्तं युक्तमेव । नन्वम्बरान्तधृतिरिह न श्रुता । ओतप्रोतत्ववचनस्याधेयत्वपरत्वाभावात् । पूर्वमन्तरिक्षलोकाः कस्मिन्नोताश्च प्रोताश्च गन्धर्वलोकेषु गार्गीत्यादिप्रश्नोत्तरेष्वन्तरिक्षलोकगन्धर्वलोकादीनां§ ब्रह्मलोकान्तानां पूर्वपूर्वस्य तत्तदूर्ध्वदेशवर्तिन्युत्तरोत्तरस्मिन्नोतप्रोतत्ववचनानां यथा पटे दीर्घतिर्यक्तन्तव ओतप्रोतास्तदेकदेशा एवं गन्धर्वलोकानां विभूतौ दृश्यमानायामन्तरिक्षलोकास्तदेकदेशप्राया इत्युत्तरो व्यायान् भवत्येवमेव हीमे लोका इति श्रुत्यन्तरसिद्धात् सादृश्याद् गौणताया वक्तव्यत्वेन तत्प्रायपाठात्तदुपरितनप्रश्नोत्तरसंदर्भरूपाक्षरब्राह्मणगतोतप्रोतत्ववचनस्यापि तथैवार्थप्रतीतेरिति चेत् । मैवम् । ओत मनः सह प्राणैश्च सर्वैः मयि सर्वमिदं प्रोतमित्यादिश्रुतिस्मृतिष्वाधेये दृष्टप्रयोगाभ्यामोतप्रोतशब्दाभ्यामिहापि प्रकरणे धृतेरेव प्रतिपादयितुमुचितत्वाद् वचनबलादूर्ध्ववर्तिनामपि गन्धर्वलोकादीनामन्तरिक्षलोकादिधारकत्वस्य पर्वतानां क्षितिधारकत्वस्येव ध्रुवस्य ज्यो-

* स्वरूपार्थक्रियाभेदस्येति २ पु॰ पा॰ । † प्रमाणाभेद इति २ पु॰ ।

‡ संदेहानुवृत्तीति २ पु पा॰ । § अन्तरिक्षगन्धर्वलोकादीनामिति २ पु पा ।

त्तिश्चक्रधारकत्वस्येव कल्पनीयत्वात् । आध्यानाधिकरणे*ऽऽरीत्येन्द्रियेभ्यः परा ह्यर्था इत्यादिश्रुताविन्द्रियादिशरीरान्तानामुत्तरोत्तरपरत्ववचनजातस्य पुरुषः सर्वतः पर इत्यत्रैवान्तरिक्षलोकाद्योतप्रोतत्ववचनजातस्याऽक्षरे सर्वं जगदोतप्रोतमित्यत्रैव तात्पर्यस्यैकवाक्यतानुरोधात्कल्पनीयत्वेन तात्पर्याऽविषयोत†प्रोतत्ववचनानां तथाभूतपरत्ववचनानामिव‡ यथाकथं चिन्नयनेऽपि प्रतिपिपादयिषितोतप्रोतत्ववचनस्य श्रुत्यन्तरप्रसिद्धार्थताया एव युक्तत्वाच्च ।

अव्याकृतस्य प्रशासितृत्वायोगादिति युक्तः पाठः । शासेः सेट्त्वाद्
ग्रसितस्कभितेत्यादिसूत्रे शास्तृनिपातनस्य छन्दोविषयत्वात् । अभग्ना- १५४
यामपि रूढाविति । प्रधाननिराकरणार्थमम्बरान्तधृतिहेतुमुक्त्वा तस्य
पुनः प्रधानसाधारण्यनिरासार्थमाकाशशब्दस्य रूढिभङ्गेनाव्याकृतपरत्वोपपादकतया प्रशासितृत्वहेतुः किमर्थं वक्तव्यः । प्रथममेवाक्षरं प्रशासनादिति हेतुना प्रधानपूर्वपक्षनिरासोपपत्त्या तदर्थं रूढिभङ्गस्याकर्तव्यत्वादिति भावः । इदं च भास्कराद्युक्तरीत्या नाकाशपदस्याऽव्याकृतपरत्वं रूढ्यभङ्गेनापि तन्निर्वाहादित्येतदभिप्रायं न त्वत्राऽऽकाशपद भूताकाशपरमेवेत्येतदभिप्रायम् । सकलकल्पानुयायिसमस्तविकारजाताधारत्वस्य प्रतिकल्पं भिन्ने भूताकाशेऽनुपपन्नत्वेनात्राकाशशब्दस्याव्याकृतपरत्वावश्यंभावात् । अत एवाऽऽनुमानिकाधिकरणे‖ भाष्यकारैरस्याकाशशब्दस्याव्याकृतपरत्वं वक्ष्यते ।

प्रौढ्यैव वाद इति । हिरण्यं निधायाग्निश्चेतव्य इति विधिस्तुत्यर्थेन पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीत्यर्थवाद इवेहाप्यप्राप्तनिषेधः संभवतीत्ययमप्राप्तिमभ्युपेत्य वाद इत्यर्थः । प्रकृतिविकाराऽनन्यत्वेनेति ।
अभिधानाभिधेयानां प्रकृतिविकारभावः स्फोटवाद्यभिमतः । स्फोटस्तु सोपपादनं देवताधिकरणे¶ प्रदर्श्य निराकरिष्यते । प्रकृतिविकारानन्यत्वेनार्थधर्माः
स्थौल्यादयः शब्देष्वप्युक्ता एवेति कथं तत्प्रतिषेध इत्याशङ्क्य प्रधानस्येव का-
र्यावस्थानापत्तिदशायामपि तेषु तत्प्रसक्त्या प्रतिषेध इत्याह प्रलयावस्थेति । १५५

* व्या॰ सू॰ अ॰ ३ पा॰ ३ सू १४ ।
† विषये चोतेत्यादिपाठः २ पु ।
‡ तथाभूतेत्यादिर्ग्रन्थो न दृश्यते २ पु॰ ।
§ अत्रेति नास्ति २ पु॰ ।
‖ व्यासमू॰ अ॰ १ पा॰ ४ सू १ ।
¶ व्या॰ सू॰ अ १ पा॰ ३ सू ३३ ।

प्रपञ्चाधिष्ठानेति । कृत्स्नस्यापि कार्यस्य मिथ्यात्वेनाऽविद्यापरिणामतया तदभिन्नत्वेन प्रशासितृत्वस्यापि तथात्वात् तद्वाचस्पतिमते जीवाश्रितमेव स्याद् न ब्रह्माश्रितमविद्यायास्तन्मते जीवाश्रितत्वात् । न च तथापि तन्मते ब्रह्मणः सर्वप्रपञ्चाधिष्ठानत्वमस्तीत्येतावता तस्य तादृग्धर्मलाभः* । जीवाश्रयदुःखदैवपादिसाधारणेनाधिष्ठानतामात्रेण तदलाभादिति भावः । **रज्ज्वामिति** । जीवाज्ञातब्रह्मविवर्तरूपं प्रशासितृत्वं ब्रह्मधर्मतयैवारोप्यते रज्ज्वदमंशतादात्म्येनेव भुजङ्ग इति (ब्रह्मणः प्रशासितृत्वमुपपद्यत)† इति भावः । आरोपितं प्रशासितृत्वं प्रधाने ऽपि वक्तुं शक्यमिति शङ्कामनूद्य श्रुतिवशात्कल्पनीय आरोपः सदृशएव कल्पयितुमुचितः तत्र लोकदृष्ट्यतिक्रमे कारणाभावादिति परिहरति **हन्तेत्यादिना** । प्रधाने ऽपि तदारोपे तदपि प्रशासितृ किं न स्यादिति पाठः । तमारोप्येति पाठश्चेत् पूर्वकालत्वमेव क्त्वार्थः न समानकर्तृकत्वमपि । सेतुं दृष्ट्वा समुद्रस्य मुच्यते ब्रह्महत्ययेत्यादिदर्शनादिति पक्षमाश्रित्य निर्वाह्यः । अम्बरान्तधृतिः सैषो हेतुरम्बरं ब्रह्मेति धृतिर्न श्रुतेति च शङ्काभिभूतत्वादस्पष्ट इत्यस्पष्टब्रह्मलिङ्गता‡ ॥

१५५ । ११ **ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥**

पर्युदासित इति । णिजर्थो न विवक्षितः पर्युदस्त इत्यर्थः । तारकादेराकृतिगणत्वेन संजातपर्युदास इति वा तदर्थो वर्णनीयः । **ततो हैनोरपरं ब्रह्म ध्येयमिति** । यद्यपि परविषयाणामहंग्रहोपासनानामप्यर्चिरादिप्राप्याऽपरलोकप्राप्तिफलकत्वमविशिष्टं तथाप्येतद्वै सत्यकामेत्याद्युपक्रमे परवेदनात् परप्राप्तिरपरवेदनादपरप्राप्तिरिति विभज्य कथनादिहापरप्राप्तिरपरं ध्यातव्यमित्यत्र लिङ्गं भवेदेव । न चैवं सत्युपक्रमप्रतिज्ञातपरवेदनफलं न प्रदर्शितं स्यादिति शङ्कनीयम् । ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्कवयो वेदयन्ते तमोङ्कारेणान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं चेति तदनन्तरमन्त्रे स सामभिरुन्नीयते ब्रह्मलोकमित्युक्तमपरवेदनफलमुपसंहृत्य परवेदनस्य शान्तत्वादिविशिष्टपरब्रह्मप्राप्तिः फलमिति प्रदर्शयि-

* तद्धर्मलाभ इति २ पु० पा० । † ( ) एतन्मध्यगो ग्रन्थो नास्ति २ पु० ।
‡ अत्र तृतीयम् अक्षराधिकरणं पूर्णम् ।

प्यमाणत्वात् । अङ्गीकृत्येति । ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामित्यत्र ध्यानं ब्रह्मविषयम् ईक्षणमविद्याशक्तिविषयमतस्त-त्रेक्षणं तत्त्वविषयमिति नियमस्य ध्यानेक्षणयोरेकविषयत्वनिमस्य च भङ्ग इति भावः । ईक्षणध्यानयोरिति । अदृष्टाद्वारकस्तयोः कार्य्यकारणभाव एकविषयत्वनियत इति भावः ।

तत्त्वविषयत्वमौत्सर्गिकमिति । यद्यपि प्रायिकत्वमौत्सर्गिक- १५६
त्वमिति विवक्षायामीक्षणस्यातत्त्वविषयत्वमेवौत्सर्गिकं परब्रह्मसाक्षात्कारमेकं विना प्रपञ्चान्तर्गतवस्तुजातविषयस्य सर्वस्येक्षणस्याऽतत्त्वविषयत्वात् । तथा-प्यपवादाभावे अत्यन्ताबाध्यविषयत्वं ग्राह्यं मुख्यत्वादित्येवंरूपमौत्सर्गि-कत्वमिह विवक्षितम् । किं चात्रेक्षणं परब्रह्मविषयमित्यवश्यं वाच्यम् । हिरण्यगर्भविषयत्वे वाक्यवैयर्थ्यात् । तल्लोकं प्राप्तस्तदुपासकस्तमीक्षतइत्य-स्यार्थसिद्धत्वात् । न च परब्रह्मविषयत्वे ऽपि वाक्यवैयर्थ्यं तुल्यं हिरण्य-गर्भप्राप्तेरपुनरावृत्तिश्रुत्या क्रममुक्तिफलनियतत्वेन तल्लोकप्राप्तौ परब्रह्मसाक्षा-त्कारस्यार्थतः सिद्धत्वादिति वाच्यम् । इमं मानवमावर्त्तमिति श्रुताविम-मिति विशेषणेनावर्त्तान्तरे पुनरावृत्तेरप्यभ्यनुज्ञानेन तत्प्राप्तेः क्रममुक्तिनियत-त्वाभावात् । नन्वीक्षणध्यानयोरेकविषयत्वमीक्षणस्य तत्त्वविषयत्वमित्युभयं परस्परविरुद्धं निर्विशेषस्य त्रिकालाबाध्यस्य समन्वयसूत्र*भाष्ये तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासतइति श्रुत्यनुरोधेन ध्येयत्वस्य निषिद्धतया ध्यानं सर्वत्र कल्पितगुणविशिष्टविषयमिति वक्तव्यत्वाद् विशिष्य चात्र ब्रह्माभेददृ-ष्टिविशिष्टप्रणवोपासनस्य कल्पितविषयत्वा†ऽनिवारणादिति चेत् । उच्यते । भावनाप्रचयस्य साक्षात्कारजनकत्वे तद्विषयविषयत्वं तन्त्रं न तु तदन्या-ऽविषयत्वमपि गौरवात् । अस्ति चात्र विधेयस्य ध्यानस्य प्रणवरूपकल्पित-वस्तुविषयत्वे ऽपीक्षणीयब्रह्मविषयत्वमपि । अतो न दोषः । यद्यप्येवं सति ध्यानस्य हिरण्यगर्भरूपजीवविषयत्वे ऽपि तत्त्वविषयत्वं नापैति तत्र जीवत्वोपाधेः कल्पितत्वे ऽपि स्वरूपस्याबाध्यत्वात् । तथापि ध्यानेक्षण-योरवश्यकल्पनीयं विषयैक्यं निर्दोषब्रह्मविषयत्वेनैव कल्पयितुमुचितं न तु सदोषनिर्दोष‡जीवब्रह्मविषयत्वेनेति तात्पर्यम् ।

---

* व्यासू अ १पा १सू ४। † कल्पितविषयत्वेति १पु पा॰। ‡ निर्दोषेति त्रुटित २पु ।

स्यादेतत् । ईक्षणध्यानयोर्नात्र कार्यकारणभावो विवक्षितः । यतः परापरवेदनयोस्तत्प्राप्तिफलकत्वेनोपक्रमप्रतिज्ञातयोरपरवेदनमोङ्कारप्रतीकविषयापरध्यानरूपं तल्लोकप्राप्तिफलं ब्रह्मलोकमित्यन्तेनोक्तं स एतस्मादित्यादिना तु परवेदनमोङ्कारसाधनं साक्षात्काररूपतत्प्राप्तिफलमुक्तमित्यवश्यं व्याख्येयम्। ऋग्भिरेतमिति मन्त्रश्चोक्तार्थद्वयसम्मतित्वेनोदाहृत इति योजनीयम् । ध्यानतत्फलकथनयोरपरविषयत्वाभावे प्रतिज्ञातार्थानिर्वाहात् । एवं च स एतस्मादिति वाक्ये तत्पदं तस्माद्विद्वानिति व्यवहितप्रस्तुतपरवेदितृपरम् । तच्च वाक्यमपरध्यानविषयपूर्ववाक्यानन्वयि ततो भिन्नं सर्वनाम्नामव्यवहितपरत्वासम्भवे व्यवहितपरत्वस्यैकवाक्यत्वासम्भवे वाक्यभेदस्य च न्याय्यत्वादिति शङ्कानिराकरणार्थमपि चेति ग्रन्थमवतारयति **प्रकारान्तरेणेति** ।

१५६ । ७ **प्रमाणद्वयानुरोधेनेति** । स एतस्मादित्यत्र तत्पदस्य पूर्वतत्पदयोरिवाव्यवहितप्रस्तुत*ध्यातृपरत्वं परपुरुषप्रत्यभिज्ञानं च ध्यानेक्षणवाक्ययोरेकवाक्यत्वापादकमिह प्रमाणद्वयं प्रतिज्ञातमपरब्रह्मवेदनतत्फलकथनं तु टीकोक्तप्रकारेणैकमात्रद्विमात्रोपासनतत्फलकथनमेवेति नेतव्यम् । यद्यप्येकमात्रप्रणवोपासनस्य तत्प्रथममात्रात्मकऋग्वेदप्रापणीयमनुष्यलोकप्राप्तिः द्विमात्रप्रणवोपासनस्य तद्द्वितीयमात्रात्मकान्तरिक्षलोकप्राप्तिश्च फलम् पृथिव्यन्तरिक्षलोक†प्राप्तिश्च न हिरण्यगर्भरूपापरब्रह्मप्राप्तिः तथापि तयोरुपासनयोर्न्यूनप्रणवविषययोर्न्यूनमपरं ब्रह्मैवौचित्यात् प्रणवारोप्यम् अपरं‡ ब्रह्म पर्य्यवस्यतीति तयोः फलमेव । तस्माद्विद्वानेकतरमन्वेतीति प्रतिज्ञातापरब्रह्मप्राप्तितया विवक्षितं भवति । न चाऽतथाभूतस्य तथात्वविवक्षया ऽत्र कश्चिद्दोषः स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति सत्यकामप्रश्नोत्तरस्य कृत्स्नस्याप्येतद्वै सत्यकामेत्यारभ्य प्रवृत्तस्य प्रकरणस्य परब्रह्माऽभेददृष्टिविशिष्टत्रिमात्रोपासनाविध्यर्थत्वेनैकार्थपरतया तदन्तर्गतयोरेकमात्रद्विमात्रोपासनातत्फलवचनयोरोङ्कारस्यायं महिमा यन्मात्रावैगुण्येनापरब्रह्मदृष्ट्योपास्यमानो ऽपि कस्मैचित्फलाय भवति तस्मादेवंभूतमहिमा ऽयमोङ्कारो हेयमल्पफलमपरं

* परेति २ पु॰ पा॰। † लोकेति २ पु॰ नास्ति। ‡ अपरमिति २ पु॰ नास्ति।

ब्रह्म विहाय परब्रह्मदृष्ट्या चिमात्र एवोपासनीय इत्येवं चिमात्रोपासनास्तुत्यर्थत्वात् स्तुतेश्च यथाकथं चिदालम्बनमात्रेण चारितार्थ्यात् । सत्यकामेनोङ्कारालम्बनध्यानफलस्यैव पृष्टत्वेनैषणवाक्यस्य ध्यानाऽकार्योङ्कारसाधनकब्रह्मवेदनफलपरतायामपृष्ट*तरत्वापत्त्या परध्यानफलसमर्पकतया तद्ध्यानवाक्यैकवाक्यताया वक्तव्यत्वेन परिशेषादेकमात्रद्विमात्रोपासनातत्फलवचनयोरेवापरोपासनातत्फलवचनतया ऽवश्यं व्याख्येयत्वाच्च । न चैवमपीक्षणवाक्यस्यापृष्टेतरत्वमनिवार्यं ध्यानप्राप्यस्य लोकस्यैव पृष्टत्वादिति वाच्यम् । प्राप्यलोकानुबन्धित्वेन तत्प्रशंसार्थे पाप्मनिर्मोकसूर्य्यसंपत्तिवदीक्षणस्यापि वर्णनोपपत्तेः ।

अभ्योङ्काराभेदोपक्रमादिति । नन्वेवं प्रतीकोपासनेयं कथं ब्रह्मलोकप्राप्तिफला । वचनबलादिति ब्रूमः । अत एवात्र ब्रह्मलोकप्राप्तिवचनमर्थवत् । अहंग्रहोपासनत्वे तद्यइत्थं विदुरित्यादिसामान्यवचनादेव तत्प्राप्तिफलसिद्धेः । सूर्य्यान्तः†स्थमिति सूर्य्यसंपत्तिवचनानुरोधादित्यर्थ्यं व्याख्यातस्य वचनस्य प्रशंसार्थमर्चिरादिमार्गभाविसूर्यप्राप्त्यनुवादत्वे ध्येयः सूर्यान्तःस्थत्वगुणो न सिध्यति किं त्वीक्षणवाक्यगतः पुरिशयत्वगुण एव तदेकवाक्यतयात्र ध्यानविध्यपेक्षितत्वेन ध्येयगुणः सिध्यति सो ऽपि वा न ध्येयगुणः । आचार्य्यैः परं निर्विशेषमिति प्राक् प्रणवे ध्येयस्य परस्य निर्विशेषतोक्तेः किं तु पुरिशयमित्येतत्तत्त्वमसीयमहावाक्यार्थजीवाभेदसमर्पणार्थम् । प्राप्यते इति प्रापयतेः कर्मणि लकारः । णेरनिटीति णिलोपः । प्रापयत इति पाठस्तु लेखकप्रमादायातः । ईक्षतिकर्मत्वहेतोर्ब्रह्मैकान्त्यमस्पष्टब्रह्मलिङ्गता‡॥

दहर उत्तरेभ्यः ॥ १४ ॥ १५६

दहरवाक्यशेषगतेति । ननूत्तमपुरुषशब्दः प्रजापतिवाक्यशेषे न तु दहरवाक्यशेषे । सत्यम् । सिद्धान्ते सगुणनिर्गुणब्रह्मविषयतया भिन्नयोरपि दहरप्रजापतिविद्ययोरपहतपाप्मत्वादिगुणकजीवैकविषयत्वं वदन् पूर्वपक्षी पौर्वापर्येणाम्नातयोस्तयोरेकविद्यात्वं मन्यतइति तदीये पूर्वाधिकरणाक्षेप-

---

* आप्तेति २ पु॰ पा॰ । † तरेति ३ पु॰ पा॰ ।

‡ अत्र चतुर्थम् ईक्षतिकर्माधिकरणं पूर्णम् ।

वाक्ये तदभिमानानुसारेण दहरवाक्ये शेषगतेत्युक्तम् । अत एव टीकायाम-प्युत्तराच्चे*दिति सूत्रोपन्यस्तपूर्वपक्षविवरणारम्भे दहराकाशमेव प्रकृत्य श्रूयत इति दहरविद्यैकप्रकरणतया प्रजापतिविद्या ऽवतारयिष्यते । ननु तथाप्युक्तविधया पूर्वाधिकरणाक्षेपो न युज्यते उत्तमपुरुषशब्दवत् परपुरुषशब्दस्य जीवविषयत्वसम्भवे ऽपि ततः परपुरुषशब्दप्रत्यभिज्ञया ध्यानेक्षणवाक्ययोरेकविषयत्वसिद्धावीक्षणस्य तत्त्वविषयत्वनियमाद् ध्यानमपि तात्त्विकपरब्रह्मविषयमिति सिद्धान्तसिद्धेस्खलनाभावादिति चेत् । उच्यते । एष सम्प्रसाद इत्याद्युत्तमपुरुषशब्दघटितवाक्योपात्ताभिनिष्पत्तिशब्दोक्तमीक्षणं पूर्वपक्षे जीवविषयमिति तद्वत्स एतस्मादिति वाक्योक्तमपीक्षणं हिरण्यगर्भजीवविषयं भविष्यतीति प्रथममिहाक्षेपो विवक्षितः । ततश्च तदेकविषयस्य ध्यानस्यापि तद्विषयत्वसिद्धौ कथं ध्यानेक्षणवाक्ययोरपरब्रह्मणि परपुरुषशब्द इत्याकाङ्क्षायामिह जीवमात्रे ऽप्युत्तमपुरुषशब्दो दृश्यते हिरण्यगर्भे परपुरुषशब्दस्य का ऽनुपपत्तिरित्येवमाशयेयमाचार्योक्तिः । इयमाक्षेपसङ्गत्युक्तिरुपलक्षणम् । तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोक इति दहरोपासनस्य ब्रह्मलोकफलश्रवणं त्रिमात्रप्रणवप्रतीकालम्बनोपासनस्येव वचनबलादुपपद्यतइति दृष्टान्तसङ्गतिरपि द्रष्टव्या ।

५६ । १९ श्रवणमनननिदिध्यासनेभ्य† इति । यद्यपि टीकायां श्रवणं मननं चान्वेषणमिति व्याख्यातत्वाद्विज्ञानं ध्यानं तस्य वैशिष्ट्यं श्रुत्युपात्तश्रवणमननापेक्षमिति वक्तुं शक्यम् । आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेत्यादिश्रुतिषु विज्ञानशब्दस्य ध्याने बहुशः प्रयोगदर्शनादुपासनारूपं ध्यानमेव चात्रानुष्ठानाय विधातव्यं न तु तत्फलरूपः सगुणसाक्षात्कारः । तथापि सन्प्रत्यययोगात्फलरूपतया निरुपाधीच्छाविषयः साक्षात्कार एव ग्राह्य इत्यभिप्रायेण टीकाकृता स्वयं साक्षात्कारहेतुतया ध्यानमुपन्यस्य त्रिभ्यो ऽपि वैशिष्ट्यं साक्षात्कारस्य विवक्षितमिति पूर्वेभ्य इत्यनेन दर्शितत्वात् श्रवणमननध्यानेभ्य इत्युक्तम् । एवं च फलसाक्षात्कारे विधिसरूपो ऽयमर्थवाद उपासनाविधिस्त्वथ च इहात्मानमित्यादिफलवाक्येष्वेवेति तात्पर्यम् । यद्यपि दहरविद्याफलब्रह्मलोकावाप्त्यर्थिनः

* व्या० सू० अ० १ पा० ३ सू० १९ । † श्रवणमननध्यानेभ्य इति १-५ पु० पा० ।

स्वयमेतच्छास्त्रविचाराधीने श्रवणमनने न सम्भवतः सर्वतो विरक्तस्य मुमुक्षोरेवैतच्छास्त्राधिकारात् तथापि विचारितैतच्छास्त्राचार्योपदेशाधीने दहरोपासनापेक्षितवाक्यार्थमात्रविषये ते विवक्षिते इति द्रष्टव्यम् ।

ननु पुरेणाधिकरणेन सहाधेयेन सता ब्रह्मणा सम्बद्धव्यमिति टीकोक्तमयुक्तम् । *षष्ठ्या अधिकरणवाचित्वाभावात् सप्तम्या वेश्माधिकरणवाचि*त्वात् । न च पुरमध्यगतवेश्माधेयस्य जीवस्य पुराधेयत्वमर्थत. सिध्यति प्रासादमध्यगते पर्यङ्के शयानस्येव प्रासादे शयनं तदर्थतः सिध्यदुदाहृतटीकयोक्तमिति वाच्यम् । वेश्माधेयो जीव इतीदानीमसिद्धेः । आधेयत्वविशेषहेतुभ्यां ब्रह्मात्र जीव इति निश्चयमुपजीव्य खलु अनिर्दिष्टाधेयस्य वेश्मनः सन्निहितः स एवाधेयतया ऽन्वेतीत्यये टीकाकृद्वक्ष्यतीत्याशङ्क्य तत्तात्पर्यमाह **समासेति** । समासे षष्ठ्यभिधेयं सम्बन्धसामान्यं सप्तम्यर्थतया बुद्धिसन्निहिते आधाराधेयभावे पर्य्यवस्यतीत्यर्थः । यद्यपि यथाभाष्यं स्वस्वामिभाव षष्ठ्यर्थमङ्गीकृत्याधेयत्वहेतुमनपेक्ष्य विशेषहेतुनैव लभ्यं पुरस्वामिभूतं ब्रह्म जीव इति निश्चयमुपजीव्य सन्निहितस्य तस्य वेश्माधेयत्वेनान्वय उपपादयितु शक्यः षष्ठ्याः स्वस्वामिभावार्थकत्वं च विशेषहेतूपपादनार्थं टीकाकृतो ऽप्यपेक्षणीयमेव । तथाप्याधेयत्वहेतुरपि यः* टीकायामुपन्यस्त इति तदुपपादनप्रकारो ऽयं दर्शितः । एव च विकल्पमुखेन षष्ठ्या अर्थद्वयमवतार्य्य आधेयत्वविशेषहेत्वो†र्योजनं कार्य्यम् ।

आकाशस्य संदिग्धत्वादिति । ननु महदिदं साहसवचनं १५७
यत् स्वनामश्रुतिसमर्पितो भूताकाशः सदिग्धो निरूढिविषयः परमात्मा च संदिग्धः षष्ठीस्वरसोपनेयवैशेषिकसम्बन्धिलिङ्गवशाद् ब्रह्मशब्देन लक्षणीयो जीवो निश्चितः । स च भिन्नवाक्योपात्तः समानवाक्योपात्तभूताकाशं परमात्मानं च निरस्य स्वयं वेश्माधेय‡तया ऽन्वेतीति । नैष दोषः । दहरो ऽस्मिन्नन्तराकाश इत्यत्र वेश्मावच्छेदोपाधिकस्य दहरत्वस्यार्थलभ्यत्वे ऽपि सावाद् दहरत्ववचनमर्थवत्त्वार्थमाजान-

---

* य इति नास्ति । २ पु । † हेतोरिति २ पु पा ।
‡ वेश्माधारेति २ पु पा ।

सिद्धं दहरत्वमुपस्थापयति आकाशश्रुतिर्भूताकाशं परमात्मानं वा* तयोः कतरस्य ग्रहणं कार्य्यमित्यनिर्णये सन्निधिवशाद् जीवस्य ग्रहणं नियम्यते ।

५७ । ८ युद्धे इति गगनसागरयोरप्युपलक्षणं तदभिप्रायेणारोपग्रहणमप्यर्थवत् । गगनं गगनाकारमित्यत्रोपमालंकार इति मतमनुरुध्येत्युक्तम् । यदि तु गगनं गगनाकारमिति श्लोके नोपमालंकारः किं तु भेदकल्पनमनपेक्ष्य अत्यन्ताभेदे निबध्यमानमौपम्यं नान्वेतीत्यन्वर्थनामा ऽनन्वयालङ्कारः । अनन्वयिनो ऽप्यौपम्यस्य निबन्धनमनुपमत्वद्योतनाय यथा स्वमहिमप्रतिष्ठितत्ववचनमनाधारत्वद्योतनाय यथा वा स्वयंदासत्ववचनं दासरहितत्वद्योतनायेति मतमनुरुध्यते† तदापि नाचानन्वयेन निर्वाहप्रत्याशा‡ । अयमित्येषो ऽन्तर्हृदयइति चोपमानोपमेयरूपयोः परस्परव्यावर्तकविशेषणनिवेशनेन

उपाददे तस्य सहस्ररश्मिस्त्वष्टा नवं निर्मितमातपत्रम् ।
स तद्दुकूलाऽदविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे॥ ॥

इत्यत्रेव कल्पितभेदोपाधिकोपमाप्रभेदस्यैव वक्तव्यत्वात् । न च सो ऽपि प्रकारो ऽत्र वक्तुं शक्य इत्याह अस्तु वेति ।

,, । १५ मुख्याधेयत्यागइति । ननु ब्रह्मशब्दमुख्यार्थलाभो न मुख्याधेयत्वत्यागहेतुः । वक्ष्यमाणवत्सराजपुरदृष्टान्तेन ब्रह्मपुरे जीवस्य वेश्मसम्भवात् । वेश्मस्यस्य च मुख्यपुराधेयत्वोपपत्तेः । न च ब्रह्मपुरइत्यत्र जीवसन्निध्यभावे जीवो वेश्माधेयो न सिध्येदिति वाच्यम् । अनन्यथासिद्धस्वाभाविकदहरत्वलिङ्गेन ब्रह्मपरत्वपक्षे ऽप्यवश्यकल्पनीयवृत्त्यन्तरतया ऽन्यथासिद्धाया आकाशश्रुतेः प्रबलेन तस्य वेश्माधेयत्वसिद्धेरिति चेत् । मैवम् । जीवस्वामिकत्वेन प्रसिद्धजीवसम्बन्धस्य अप्रसिद्धपरब्रह्मपुरत्वोक्तेः तदुपासनाविधित्साभावे वैयर्थ्यप्रसङ्गात् । न हि मैत्रः क्व देशे वर्ततइति मैत्रान्वेषिणं प्रति वत्सराजपुरे वसतीति वाक्ये वत्सराजपुरत्वोक्तिः पुरान्तरव्यावर्तनेनेवात्र ब्रह्मपुरत्वोक्तिः प्रकारान्तरेण साफल्यमश्नुवीत दहरत्ववचनं तु जीवगतस्वाभाविकदहरत्वविषयत्वाभावे ऽपि दहरपुण्डरीकावच्छेदेन ब्रह्मणो यावद्दहरत्वं भवति तावदपेक्षया ऽधिकं तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितमिति श्रुत्यन्त-

* चेति २ पु० पा० । † मनुरुध्येतेति २ पु० पा० । ‡ निर्वाहे,प्रत्याशेति २ पु० ।
§ सपद्युकूर्मिरिति । २ पु० पा । ॥ पतन् गाङ्गमिव प्रवाहमिति २ पु पा० ।

राम्नातहृदयपुण्डरीकावसुषिरावच्छेदोपाधिकमत्यन्तसौक्ष्म्यं लम्भयितुमिति साफल्यं नेतुं शक्यम् । तस्माद्युक्तमुक्तं ब्रह्मशब्दमुख्यार्थानुसरणं मुख्यार्थेष-त्वत्यागहेतुरिति ।

नैकवचनपरामृश्यतेति । ननु मा भूद् द्यावापृथिवीशब्दो ब्रह्म-लक्षकः । उभे अस्मिन् द्यावापृथिवी इत्यादिके यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमित्यन्ते द्यावापृथिव्यादिसमाधानवाक्ये उक्तानुक्तस-कलवस्तुसंग्रहार्थो यः सर्वशब्दः स सर्वात्मकब्रह्मप्रतिपादको ऽस्तु । तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितमिति तैत्तिरीयके सर्वशब्देनैव दहरपुण्डरी-कोध्र्वसुषिरवर्त्युपास्यप्रतिपादनदर्शनात् । ततश्चैकवचनान्तेन सर्वशब्देन प्रकृतं दहराकाशान्तर्वर्त्युपास्यमिहैकवचनान्तेन परामृष्टुं योग्यमिति चेत्तथा सति तदनन्तरं तं चेद् ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे चेव*कामा यदैतदेवाप्नोति प्रध्वंसते वा किं ततो ऽतिशिष्य-तइति वर्णिते शिष्याणामाक्षेपे स ब्रूयात् तस्य जरयैतद् जीर्य्यति न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन्कामास्समाहिता इत्याचार्य्यकर्त्त-व्यपरिहारोक्तौ कामादिसर्वसमाधानाधारस्य सत्यब्रह्माख्यपुरतया देहरूप-वितथब्रह्मपुरजराप्रध्वंसानुविधायिनो जराप्रध्वंसौ न स्त इत्युक्तिर्न सङ्ग-च्छते । समाधानाधारस्य त्वया भूताकाशतया एव वक्तव्यत्वात् तस्य च सत्यत्वब्रह्मत्वाधारान्तरनिरपेक्षधारकत्वोक्त्ययोगादिति भावः । १५५

यदि दहराकाशस्य विज्ञेयत्वमिति । ननु तस्मिन्यदन्तरित्यादौ नास्त्युपास्यत्वरूपविज्ञेयत्वोपदेशो येन दहरस्य विज्ञेयत्वोपदेशालाभ-दोषः शङ्क्येत किं त्वविधेयश्रवणमननसाक्षात्कारेच्छाविषयत्वानुवादमात्रं तथैव टीकायां व्याख्यातत्वात् । तदनुवादश्च फलवाक्यविधित्सितं-गुणगुणिविषयोपासनास्तुत्यर्थः पर्य्यवस्यति स्तुतिवाक्यस्य नास्ति यावदु-पास्यविषयत्वनियमः । दहरगुणजातमपि श्रवणमननाभ्यामन्वेष्टव्यं साक्षा-त्कर्तुमेष्टव्यं चेति उपास्यैकदेशप्रशंसया गुणगुण्युभयविषयोपासनास्तुति-लाभात् । द्रव्यदेवताविशिष्टयागविधीनां यदष्टाकपालो भवतीत्यादिषु द्रव्य-मात्रविषयया वायुर्वै क्षेपिष्ठा देवतेत्यादिषु देवतामात्रविषयया च प्रशंसया १५६

* चेवेति २ पु नास्ति । इष्टं चेति २ पु· पा· ।

स्तुतिदर्शनात्। अतो दहराधेयविषयान्वेष्टव्यत्वादिकथनस्य न का चि*दनुपपत्तिः । छान्दोग्यविवरणे च भाष्यकारैरिदं वाक्यं दहराधेयविषयतयैव व्याख्यातम् । तस्मिन्नाकाशाख्ये ब्रह्मणि यदन्तर्मध्ये तद्वाव तदेव विशेषेण जिज्ञासितव्यं ज्ञातुमेष्टव्य† गुर्वाश्रयश्रवणाद्युपायैरन्विष्य साक्षात्करणीयमित्यर्थ इति। तस्मादस्थानइयमाशङ्का। परिहारोऽप्ययुक्तः। तस्मिन्नित्यस्याव्यवहिते दहराकाशे स्थिते व्यवहितपुण्डरीकपरामर्शित्वकल्पनाऽयोगात्। तस्मिन्यदित्यादिनपुंसकलिङ्गानां प्राक् पुँल्लिङ्गनिर्दिष्टदहराकाशेनन्वयाच्च । दहराकाशस्य हृत्पुण्डरीकस्थतायाः दहरोऽस्मिन्नन्तराकाश इत्युक्ततया पुनस्तत्कीर्तनवैयर्थ्याच्च । न चेद् ब्रूयुरित्यादिशिष्यप्रश्नवाक्ये दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यमित्याद्युक्त्या पूर्वमाचार्य्येण दहराकाशान्तर्वर्तिन एवान्वेष्टव्यत्वादिकमुक्तमिति स्पष्टप्रतीयमानतया तद्विरोधाच्चेति चेत्। उच्यते। विजिज्ञासितव्यमित्यत्रैवोपासनाविधिरित्यपि टीकायां व्याख्यानान्तरं दर्शितम्। वाक्यशेषो हि दहराकाशात्मवेदनस्य फलवत्त्वं ब्रूते । यच्च फलवत्कर्तव्यतया चोद्यते यत्कर्तव्यं तदिच्छतीति तदन्वेष्टव्य तद्वाव विजिज्ञासितव्यमिति दहराकाशविषयमेवावतिष्ठतइति । एवं चात्र विधेयस्योपासनस्य साधनत्वप्राप्तेच्छानुवाद इत्युक्तं भवति । अयमेव पक्षो भाष्याभिमत इत्यनुपदमेव दर्शयिष्यते तदवलम्बनेनात्र शङ्केयम्। परिहारोऽपि नायुक्तः। यतस्तस्मिन् यदन्तरित्यत्र यत्पदं वक्ष्यमाणद्यावापृथिव्यादिसकलविशेषणविशिष्टदहराकाशपरम् । अन्यथा फलवाक्ये एतांश्च सत्यान्कामानिति केषांचिद्गुणानां विशिष्य ग्रहणस्येतरपरिसंख्यार्थत्वादितराणि द्यावापृथिव्यादीन्यपहतपाप्मत्वादीनि च केवलं स्तुत्यर्थं वर्णितानि न तूपास्यकोटिप्रविष्टानीति शङ्कया तेषामुपासना न सिध्येत्। न च वाच्यम् एतांश्च सत्यान् कामानिति संकल्पजाः पित्रादयो गृहीताः संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादि प्रकृत्य तइमे सत्याः कामा इति निर्दिष्टत्वात् तेषां च फलरूपाणामुपास्यगुणत्वाभावादुपासनस्याप्राप्तौ तत्प्राप्त्यर्थं तत्कीर्तनं स्यादिति अस्मिन्कामाः समाहिता इत्यादिवाक्ये फलानामप्युपास्यगुणत्वस्य प्रतिपादितत्वेन तत्र एव तेषामप्युपास्यत्वप्राप्तेः । अतः सकलविशेषणविशिष्टस्य दहराकाशस्यो-

* कदा चिदिति २ पु० पा० । † ज्ञातुमेष्टव्यमिति २ पु० नास्ति ।

पासनानुप्रवेशसिद्धये तस्मिन्यदन्तरिति पुनः कीर्तनमिति न तद्वैयर्थ्यम् । अत एव किं तदत्र विद्यतइत्येतदप्युपपद्यते । तस्य दहराकाशे किं विशेषणजातं वर्ततइत्येतत्परत्वात् । अव्यवहितपरामर्शासंभवे तस्य द्वादशशतं दक्षिणेत्यादाविव व्यवहितपरामर्शः शक्यमञ्जलिभिः पातुं वाताः केतकगन्धय इत्यत्रेव लिङ्गसामान्यविवक्षया नपुंसकलिङ्गं चोपपद्यते । एवं तस्मिन् यदन्तरित्यस्य सकलविशेषणविशिष्टोपासनासिद्धये तावद्विशिष्टपरामर्शित्वं भाष्यकारैः स्पष्टं प्रतिपादितम् । तस्माद्वाक्योपक्रमे ऽपि दहर एवाकाशो हृदयपुण्डरीकाधिष्ठानः सहान्तः समाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्विज्ञेय इति गम्यतइति । तस्मादाशङ्का परिहारश्चेत्युभयमप्युपपद्यतएव । एवमुत्पत्तिवाक्यत एव सर्वेषां दहरगुणानामुपास्यत्वे सिद्धे फलवाक्ये सत्यकामशब्देन केषां चिद् गुणानां प्रशंसार्थो ऽवयुत्या ऽनुवादः । तद्यएवैतावरं च एयं चार्णवौ ब्रह्मलोके ब्रह्मचर्य्येणानुविन्दन्ति* तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवतीति वाक्ये ब्रह्मलोकगतार्णवयोरिवेति तात्पर्यम् । छान्दोग्यविवरणे तस्मिन् तदन्तरित्यादेर्व्याख्यानं त्वेवमपि व्याख्यातुं शक्यमिति वैभवाभिप्रायम् । तदनुसृत्य च टीकायां साक्षात्कारेच्छाविषयतया 'व्याख्यानान्तरमिति न विरोधः ।

अभ्युच्चयार्थत्वेनेति । नरपतिराजकुमारादिशब्दइव ब्रह्मलोकशब्दे लोकवेदयोः सत्यलोकपरतया षष्ठीसमासः प्रसिद्धतरः । शीघ्रोपस्थितिकप्रसिद्धतरसमासग्रहणे च न निषादस्थपतिन्यायावतार† इति अधिकशङ्कानिराकरणार्थमभ्युच्चयापेक्षेति भावः । **अग्निविद्यावत्त्वेन समर्थत्वादिति ।** नन्वनयोक्तिभङ्ग्या निषादस्याग्निविद्याराहित्येनासामर्थ्यमुक्तं भवति । नैतदुपपद्यते । ब्राह्मण‡कर्तृकाऽऽधानानिष्पाद्यस्याहवनीयादेर्निषादेन संपादयितुमशक्यतया पावमानेष्ट्याग्निहोत्रहवणीवन्निषादकर्तृकायामिष्टावतिदेशाभावेन तदुपसंहारसामर्थ्याऽनपेक्षणात् । विद्यावत्त्वेन सामर्थ्ये तु विद्याप्रयुक्तिकल्पनयोपपद्यते । त्रैवर्णिकानामपि स्वस्वशाखाध्ययनस्यैव विहितत्वेन शाखान्तरवेदान्तराम्नाताङ्गमन्त्रोपसंहारार्थे विद्याप्रयुक्तिकल्पनावश्यभावेन तत्कल्पनागौरवाऽविशेषादिति चेत् । उच्यते । षष्ठीसमासाश्रयणेनाग्न्यतिदेशबा-

१५८

* विन्दतीति पु॰ पा । † जै॰ सू॰ अ॰ ६ पा॰ १ सू॰ ५१ । ‡ ब्राह्मणादीति २ पु ।

धसंभवे तद्बाधकः कर्मधारयो नाश्रयणीयः । त्रैवर्णिकानां तु शाखान्तराद्याम्नात*विद्याप्रयुक्तिर्नानयेष्ट्या ऽपेक्षणीया† किं त्वावश्यकनित्यनैमित्तिककर्मानुष्ठानतदुपयोगिकृत्स्नन्यायविचारार्थत्वेनाधिप्रेवास्तीति तात्पर्यम् ।

५८ । २४ **निषाद एव स्थपतिः स्यादिति ।** नन्वत्र कर्मधारयबलीयस्त्वे का युक्तिः यतः षष्ठीसमासे लक्षणा न प्रसज्यते । एकस्य कर्मधारयवत्सम्बन्धस्य षष्ठीसमासे संसर्गमर्यादया प्रतीतिसंभवात् । न च विग्रहवाक्ये विभक्त्यर्थस्य सम्बन्धस्य समासे ऽपि प्रकारत्वनियमात्तन्निर्वाहार्थं तत्र लक्षणापेक्षा ऽस्तीति शङ्कनीयम् । पर्वतो वह्निमानित्यत्र मतुबर्थस्य पक्षसाध्यसम्बन्धस्येव विभक्त्यर्थसम्बन्धस्यापि संसर्गमर्यादया प्रतीत्युपपत्तेः । तस्माल्लक्षणादोषोक्तिरयुक्ता । द्वितीयायाः प्रत्येकसम्बन्धोक्तिरप्ययुक्ता । समासान्तर्वर्त्तिन्या विभक्तेः सुपो धातुप्रातिपदिकयोरिति लोपानुशासनेन समासोत्तरविभक्त्युपसर्जनान्वयानङ्गीकारात् । न च षष्ठ्या द्वितीयाया वा लोपो ऽङ्गीकार्य इति विषये बुद्धिसन्निहिताया द्वितीयाया एवाङ्गीकार्य्य इत्यत्र तात्पर्य्यं वर्णनीयं तथापि निषादस्थपतेरित्यादिषष्ठीप्रयोगे बुद्धिसन्निहितषष्ठीलोपाङ्गीकारे ऽपि नियमतः सामानाधिकरण्याऽलाभेन सर्वत्र षष्ठीसमासतः कर्मधारयबलीयस्त्वस्य ततः सिद्ध्यभावादिति चेत् । उच्यते । ऐक्ये लाघवं संबन्धे भेदकल्पनागौरवमिति सार्वत्रिकः कर्मधारयबलीयस्त्वे हेतुर्विवक्षितः । राज. पुरुष इत्यादौ भेदनियतसम्बन्धाद्यर्थैकविभक्तिविरोधादैक्यत्यागः । घटो न पट इत्यादौ विरुद्धविभक्त्यभावे ऽपि घटपटतद्भेदानामैक्यासम्भवात्त्यागः । यत्र तु शब्दतो ऽर्थतो वा नास्ति विरोधस्तत्र लाघवादैक्यं ग्राह्यमित्ययमौत्सर्गिको न्यायः । लक्षणादोषस्तु षष्ठ्यर्थो लक्षणीय इति मतानुसारेणोद्घाटितः । सन्निहिता द्वितीयैव लुप्ता ऽङ्गीकार्य्येति युक्तिस्तु प्रकृताभिप्रायेणोक्तेति न कश्चिद्दोषः । सोऽयं शब्दसामर्थ्यादिति पदमौत्सर्गिकन्यायपरतायां निषादस्थपतिशब्दयोरैकार्थपर्यवसानसामर्थ्यादिति व्याख्येयम् । तदप्युक्तं सूत्रकारेणेति वाक्यस्य अपिशब्दात्कर्मधारयबलीयस्त्वमुक्तमेव । लिङ्गमप्युक्तमित्यर्थः प्रतिभासमानो न युक्तः । कर्मधारयबलीयस्त्वस्य सूत्रानुक्तत्वादित्याशङ्क्य सोऽयं सूत्रकारेण लिङ्गस्य हृदयस्थि-

---

* शाखान्तराम्नातेति २ पु॰ पा॰ । † अपेक्षणीयेति २ पु॰ पा॰ ।

तात्कर्मधारयबलीयस्त्वादाधिक्यमतिरक्तत्वं द्योतितमित्येतत्परतया तद्वाक्यं व्याचष्टे तदप्याधिक्यमिति । १५९

विपचादसम्भवादिति पञ्चम्योः सामानाधिकरण्यभ्रान्तिं वारयति विपत्त्वादिति । असम्भवादितीति मूलप्रतीकग्रहणानन्तरं केषु चित्कोशेषु षष्ठीसमासो विपचेति वाक्यं दृश्यते । तदनन्वितं प्रक्षिप्तमिव भाति टीकायां विपचादित्यस्य कमलासनलोकप्राप्तिविशेषणत्वेन षष्ठीसमासविषयत्वाभावात् । यदि तत्प्रक्षिप्तं न भवति तदानीमेवं तस्यार्थो वाच्यः । अहरहर्ब्रह्मलोकप्राप्त्यभिधानं विपचात्कमलासनलोकप्राप्तेर्व्यावर्ततां दहराकाशे च व्यवतिष्ठतां तथापि षष्ठीसमासस्तेन न व्यावर्तनीयः । यतो लोक्यतइति लोको विद्वदनुभवविषयो ब्रह्मानन्दः तस्यानन्दं ब्रह्मणो विद्वानिति श्रुताविव भेदव्यपदेश औपचारिक इति कल्पयितुं शक्यमित्याशङ्क्य षष्ठीसमासपरिग्रहे तन्मुख्यत्वानुरोधेन षष्ठीसमासतः सत्यलोके प्रसिद्धतिशयानुसारेण च ब्रह्मलोकप्रत्यायकतया तस्य निर्दिष्टलिङ्गविरुद्धत्वमनेन वाक्येनोच्यतइति योगाद्रूढिपूर्वकलक्षणायाः प्रथमप्रतीतमुख्यार्थात्यागेन बलीयस्त्वमाह तत्रेति । वृत्तो भविष्यतीति । वर्ततइत्यात्मनेपदिधातोर्वृद्भ्यः स्यसनोरिति सूत्रेण स्ये परतः परस्मैपदे सति वर्त्स्यतीति रूपम् । स्यान्तेन सम्बन्धस्येत्यन्तेन ।

न तु गङ्गाया इति लक्ष्यसंबन्धं पृथगुक्त्वेति । अनेन न हि भवति गङ्गायाः कूलमिति विवक्षिते गङ्गाया गङ्गेति प्रयोग इति टीकापाठः साधुः न तु गङ्गाकूलयोः गङ्गेति टीकापाठ इति दर्शितं भवति । १६० एवमाकाशशब्दस्य गैाणतायामाकाशवत्सर्वगत इति श्रुत्यन्तरप्रसिद्धं व्यापकत्वरूपं भूताकाशसादृश्यं निमित्ततया ऽवतिष्ठते । तथा चोपमेयनिर्देशकेनाकाशशब्देनैव भूताकाशसादृश्ये प्रतिपादिते वाक्येन प्रतिपाद्यमानं तत्सादृश्यं नान्वेति यद्भूताकाशवद्व्यापकं ब्रह्म तद्भूताकाशवद्व्यापकमिति वाक्यस्य गङ्गायां गङ्गायाः कूले घोष* इति वाक्यस्येवाऽसामञ्जस्यादिति शङ्किते यद्यपि व्यापकत्वमपहाय नित्यनिर्लेपत्वादिना भूताकाशसादृश्येनाच गैाणता

* गङ्गायां घोष इति २ पु॰ पा॰ ।

कुतः छान्दोग्ये षष्ठाध्याये नवस्वपि तत्त्वमसिखण्डेषु स यो *ऽणिमेत्यणुत्वेन सप्तमाध्याये स एवाधस्तादित्यादिना व्यापकत्वेन च वर्णिते ब्रह्मणि कथमणुत्वव्यापकत्वयोरविरोधनमित्याकाङ्क्षायां दहरपुण्डरीकायसुषिरावच्छेदोपाधिकमणुत्वं स्वाभाविकव्यापकत्वमित्यविरोधं तत्प्रसङ्गादौपाधिकब्रह्मोपासनं च विधातुमष्टमो ऽध्याय आरब्धः। तत्र प्रथमं ब्रह्मणो दहरशब्देनाणुत्वमुक्त्वा तस्यौपाधिकमणुत्वं स्वाभाविकं तु व्यापकत्वमिति निरूपणाय तत्र शिष्याणामाकाङ्क्षामुद्भावयितुं वक्ष्यमाणद्यावापृथिव्यादिसकलवस्तुविशिष्टस्य तस्यैवाकाशस्य दहरपुण्डरीकान्तर्वर्तित्वं† पुनः प्रतिपाद्य तत्प्रसङ्गात् तदुपासनां विधाय तदन्तर्वर्तिवस्त्वसम्भवे शिष्यैः शङ्किते सूक्ष्मोपाध्यवच्छेदकृताणुभावस्य स्वाभाविकं व्यापकत्वं नानुपपन्नं सूचिपाशाद्यवच्छेदकृताणुभावस्य भूताकाशस्येवेत्येवमपि प्रायेण यावान्वा इत्यादिवाक्यं प्रवृत्तम्। तत्र ब्रह्मणः स्वाभाविकं व्यापकत्वमिति निर्द्धारणमिहेत्येतद्वाक्यार्थज्ञानकारणीभूतपदार्थज्ञानकाले ऽनिर्द्धारितस्य व्यापकत्वस्य गौणवृत्तिनिमित्तत्वायोगादिति परिहर्तुं शक्यं तथापि व्यापकत्वमेव तन्निमित्तमभ्युपेत्य दृष्टा-
१६० । ३ न्तमुखेन समाधत्तइत्याह **परिहरतीति।**

दृष्टान्ते तावदित्यमनन्वयः समाधेयः। आग्नेयादीनां षण्णां यागाना स्वरूपेण पौर्णमास्यमावास्याकालत्व तत्तदुत्पत्तिवाक्यविहिते तेषु गौणाभ्यां पौर्णमास्यमावास्यापदाभ्या बोध्यमाने ऽपि तेषां त्रिशस्त्रिशः प्राच्योदीच्यसकलाङ्गसाहित्येन तत्तत्कालकर्तव्यत्वं प्रतिपादयितुं तद्वाक्यम्‡। तद्वाक्यद्वयाभावे दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येकफलसाधनत्वेन बोधितानां षण्णां यागानां प्रयोगैक्यस्योत्सर्गिकत्वात्। पौर्णमास्यां प्राच्याङ्गानुष्ठानपूर्वकं पौर्णमासत्रिकमनुष्ठायाऽमावास्यायां प्राप्तायाममावास्यात्रिकमनुष्ठायोदीच्याङ्गसमापनं§ कर्तव्यमिति वा यागषट्कमपि स्वस्वकाले क्रमेण पृथक् प्राच्योदीच्याङ्गसहितं कर्तव्यमिति वा प्रसज्येतेति। दार्ष्टान्तिके तु कथमनन्वयः समाधेय इति चेद् उच्यते। उपमेयपरेणाकाशशब्देन गौणेन स्वरूपेण व्यापकत्वे लब्धे ऽपि हृदयपुण्डरीकावच्छेदेन स्थितस्य तस्य तेनापि स्वरूपेण भूताकाशवद्व्यापकत्वं

* स या एष इति १ पु० पा०।
† अन्तर्वर्तित्वमिति १ पु०।
‡ तद्वाक्यद्वयमिति २ पु० पा०।
§ उदीच्याङ्गं समापनमिति १ पु० पा०।

प्रतिपादयितुमिदं वाक्यं हृदयपुण्डरीकावच्छिन्नएव दहराकाशे वक्ष्यमाणया-षापृथिव्यादिसकलसमाधानसिद्धये । अत एवोमे अस्मिन्निति वाक्ये दहरपुण्डरीकस्यान्तरेवेत्येतदभिप्रायमन्तरेवेति वचनं दृश्यते अत एव च यच्चास्येहास्ति यच्च नास्ति सर्वं तस्मिन् समाहितमित्युक्त्यनन्तरं प्राग् ब्रह्मपुरशब्दोक्ते देहएव सर्वस्य समाधानमुक्तं सिद्धं कृत्वा देहे जीर्णे नष्टे वा कुसूलादौ जीर्णे धारणाक्षमे तदन्तर्निहितं व्रीह्यादिकमिव नष्टे घटे तदन्तर्निहितं दध्यादिकमिव, च तत्किमपि नावतिष्ठतेत्यन्तेवासिनामाक्षेपवचनं निबद्धं दृश्यते तं चेद् ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरा चाप्नोति प्रध्वंसते वा किं ततो ऽतिशिष्यतइति । ननु श्रूयमाणमपि दहराकाशस्य दहरपुण्डरीकवेष्टितस्य तेन रूपेण व्यापकत्वं तत्र सर्वसमाधानं चासम्भावितं कथं श्रद्धेयमिति चेत् । उच्यते । दहरोपासकस्य ब्रह्मलोकप्राप्त्यनन्तरमुपयोगिभोगस्थान*भोगोपकरणभोग्यजातमुभे अस्मिन्नित्यादिनोच्यते । तच्च ब्राह्मलौकिकं द्विविधम् । उपासकस्य ब्रह्मलोकं प्राप्तस्य शरीरविरहावस्थायां स्वप्नपदार्थजाततुल्यमेकं तस्य शरीरवत्त्वावस्थायां जाग्रत्पदार्थतुल्यमपरम् । तदुभयं सूत्रकार एव विवेचयिष्यति तन्वभावे सन्ध्यवदुपपत्तेः† भावे जाग्रद्वदिति‡ । तत्राद्यं स्वाप्नपदार्थजातवदेव मानसं सूक्ष्मे ऽपि मातुमर्हति । स्वाप्ने§ ह्यपवरके ऽनुभूयमाने तदन्तर्गिरिनदीसमुद्रादिकमप्यनुभूयते । भाष्यकारैस्तु छान्दोग्यविवरणे मनोमयानि ब्रह्मलोके शरीरादीनीति पुराणवचनं मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोकइति मनोमात्रभोग्यत्वश्रुतिं चावलम्ब्य ब्राह्मलौकिकं विदेहसदेहावस्थोपयोगि सकलं सङ्कल्पजपित्रादिभोग्यजातं स्वप्नदृष्टस्त्रीपुरुषादिवन्मनोविकारात्मकमेव न तु स्थूलपार्थिवाप्यादिरूपमिति विमर्शपूर्वं व्यवस्थापितम् । एवं च यद्यपि स्वाप्नवन्मानसं द्यावापृथिव्यादिकं सूक्ष्मे ऽपि वर्तितुमर्हतीति दहराकाशस्य व्यापकत्वं न वक्तव्यम् । अत एव तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितमिति सूक्ष्मएव दहराकाशे सर्वसमाधानमुक्तं तथाप्यत्यल्पीयसो दहराकाशस्यान्तः सूक्ष्ममपि

* भोगभोगस्थानेति २ पु॰ पा॰ । † व्या॰ सू॰ अ॰ ४ पा॰ ४ सू॰ १३ । ‡ व्या॰ सू॰ अ॰ ४ पा॰ ४ सू॰ १४ । § स्वप्ने इति १ पु॰ पा॰ ।

यस्तूपास्यं न सम्भवतीत्याविप्रवतां शिष्याणां हृद्यातिविपुलं द्यावापृथिव्यादिकं तदन्तः समाहितमित्युत्तरं न प्रविशेदिति मत्वा यथानुरूपबलिन्यायेन मनोविकाररूपद्यावापृथिव्यादिसमाधानोचितं मनोविकाररूपमेव स्वापवरका*न्तः स्वप्नदृष्टगिरिनदीसमुद्रादिसमाधानोचितस्वप्नापवरकवैपुल्यसमानं दर्शितमित्युपपद्यते । ननु ब्रह्मलोकप्राप्त्यनन्तरभाविभोगोपयोगिसङ्कल्पजपित्रादिकमुपासनाकाले ऽपि दहराकाशवर्ति किमर्थं कल्पनीयमिति चेदुपास्यदहराकाशान्तर्वर्तित्वेन तदनुचिन्तनस्यालम्बनसिद्ध्यर्थं तत्सर्वमुपासनाकाले ऽपि दहराकाशवर्त्यभ्युपगन्तव्यमिति श्रुतेरभिप्रायः । अत एव सङ्कल्पजपित्रादीन् प्रकृत्य तइमे सत्याः कामा अनृतापिधानास्तेषां सत्यानामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते अथ ये वा ऽस्य जीवा ये च प्रेता: यच्चान्यदिच्छन्न लभते† सर्वं तदत्र गत्वा विन्दतइति प्राचीनानन्तजन्मसंबन्धिदिदृक्षितपितृमातृभ्रातृपुत्रकलत्रादिकमन्यच्च दुर्लभं भोग्यजातं दहराकाशएवोपास्यमाने क्रमेण पश्यतीत्युक्त्वा कथं तावद्विशिष्टो दहराकाशः तथा सर्वैर्नोपलभ्यतइत्याकाङ्क्षायां यदयापि हिरण्यनिधिं निहितमित्यादिदृष्टान्त उक्तः । यद्युपमेयपराकाशशब्दो निर्लेपत्वादिना लक्षकः स्वरूपेण व्यापकत्वं दृष्टान्तमुखेन प्रतिपाद्यमिति जीवे व्यापकत्वासम्भवप्रतिपादकभाष्यानुसारेणोच्यते तदा द्यावापृथिव्यादीनां मानसत्वेन संकोचो न कल्प्यः बाह्यानामपि तेषामनवच्छिन्ने ब्रह्मणि वृत्तेः । अन्तरेवेत्यन्तःशब्दो यस्यान्तःस्थानि भूतानीतिवदवधारणमाधारान्तरव्यवच्छेदार्थं शिष्याणामाक्षेपस्त्वन्तराकाशएव समाधानमुक्तमिति भ्रान्त्येत्युपपादनीयमित्यलं प्रपञ्चेन ।

१६० । ८ अधिकरणबाध इति । न चाग्नेयादिषु मुख्यार्थत्वे ऽप्यपराह्णशब्दसमभिव्याहारात् पितृयज्ञवाक्ये कालपरत्वं स्यादिति वाच्यम् । आग्नेयादिषु मुख्यत्वे हि काले तत्सम्बन्धाल्लक्षणा ऽङ्गीकार्या तथापि शक्तिकल्पने गौरवात् । ततश्च कालवाच्यपराह्णशब्दसन्निधाने सत्यपि नाऽमावास्याश्रुतेः कर्मवाचिन्याः सन्निधिवशाद्बाधो युक्तः । कर्माङ्गत्वेनापराह्णकाले पितृयज्ञविधिर्भविष्यति समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोतीत्यादिवाक्येषु कर्माङ्गत्वेन कालविशेषे स्तोत्रविशेषोपाकरणादिविधानदर्शनादिति भावः ।

---

* स्वाप्नापवरकेति २ पु पा । † इच्छन्नलभते इति २ पु पा॰ ।

अपरं रूढिकारणमिति । अप्रयोजकमेव वैधर्म्यं प्रयोजकत्वेन तदु-
क्तमनैकान्त्येन दूषयितुमाशङ्कतइत्यर्थः । अप्रयोजकत्वं च तस्माद्यत् किं
चिदेतदिति टीकाग्रन्थेन विभावितम् । ननु न चात्र कस्य चिल्लाक्षणिकत्व-
मिति टीकाग्रन्थो न युक्तः । सोमद्रव्यविशिष्टयागविधिसिद्ध्यर्थं सोमवता
यागेनेष्टं भावयेदिति सोमपदे मत्वर्थलक्षणाङ्गीकारादित्याशङ्क्य तस्य द्रव्य-
विषये लक्षणा नास्तीत्येतदर्थत्वेन व्याचष्टे **सोमशब्दो हीति ।** यद्यपि १६०
सोमलतायाः शुक्लप्रतिपदमारभ्यैकैकं पत्रं वर्द्धते कृष्णप्रतिपदमारभ्यैकैकं पत्रं
क्षीयतइति प्रसिद्धेः पक्षद्वयनियतवृद्धिक्षयसादृश्यात् चन्द्रवाचिन एव सोम-
शब्दस्य लतायां लक्षणा वक्तुं शक्या । एवं च पवमानायेन्दवइत्यादौ चन्द्र-
वाचित्वइन्दुशब्दस्य ताः सोमाय राज्ञे ददातीति राजानं यक्ष्म आरदिति
च सोमोपपदत्वेन स्वतन्त्रत्वेन च चन्द्रप्रयुक्तस्य राजशब्दस्य तथैव लता-
यामपि यत्ते ग्राव्णा चिच्छिदुः सोम राजन् अरिष्ट राजन्नगदः परे हीति
प्रयोगदर्शनं चोपपद्यते । अन्यथा बहूनां चन्द्रवाचिशब्दानां लतायां शक्ति-
कल्पनागौरवप्रसङ्गात् तथापि प्रसिद्ध्यतिशयाद् लतायामसाधारणवाचकान्त-
राप्रसिद्धेश्च तस्यामपि मुख्यत्वमुक्तम् ।

यागषट्कइति । यागानां षड्वान्तरसङ्ख्यायुक्तसमुदायइत्यर्थः ।
तदस्य परिमाणमित्यस्मिन्नर्थे कन्प्रत्ययः । **देहाद्यागमापायसाक्षीत्यर्थ**
इति आचार्याभिप्रायतोऽर्थ उक्तः न तु शिष्याद्यवगतस्तयोस्ततः पर-
मपि भ्रमानुवृत्तेः । **अद्युपलक्षितइति ।** नेत्रस्थं जाग्रतं विद्यादिति श्रुत्य-
न्तरात् । **जाग्रति** जागरे । **अभिप्रतीतवानिति ।** गत्यर्थाकर्मकेत्यादिसू-
त्रेण कर्तरि क्त इति भावः ।

चतुर्थपर्य्यायं प्रतीकत आदत्तइति । शङ्काविशेषनिवारणार्थमिति १६१
भावः । शङ्का चैवं यदुक्तमक्षिस्थानादिकं परस्य न संभवतीति तदयुक्तम् ।
उपकोसलविद्योपास्यवत्सगुणोपास्यस्याक्षिस्थानसंभवात् । स्वप्नेन शारीरमभि-
प्रहत्य असुप्तः सुप्तानभिचाकशीतीति ब्रह्मणः स्वप्नसंबन्धश्रवणात् सुप्त*वा-
क्यस्य यत्र यस्मिन्नाधारे समस्तोऽपि जन्तुः सुषुप्तो भवतीति सुषुप्ताधारब्र-
ह्मपरत्वोपपत्तेश्च । न चैवं सति स्वप्नावस्थस्य भयशोकादिदर्शनं सुषुप्ताव-

* सुषुप्तीति २ पु॰ पा॰ ।

स्यस्य विनष्टप्रायत्वदर्शने चेदमनुपपन्नं स्यादिति वाच्यम्। यथा ऽक्षिपर्याये छायापुरुष उपदिष्ट इति इन्द्रविरोचनयोर्भ्रान्तिः यथा च प्रतिबिम्बावेक्षणे विरोचनस्य देह उपदिष्ट इति भ्रान्तिः तथा स्वप्नसुषुप्तिपर्याययोर्जीव उपदिष्ट इतीन्द्रस्य भ्रान्त्युपपत्तेरिति। एतच्छङ्कावारणं च समुत्थानवाक्योपन्यासेनेत्थं कृतम्। यदि स्वप्नसुषुप्तिपर्याययोर्ब्रह्मैवोपदिष्टं जीव उपदिष्ट इतीन्द्रस्य भ्रान्तिमात्रमिति कल्प्येत तदा पर्यायद्वये भयशोकविनष्टप्रायत्वदोषयुक्तो जीव उपदिष्ट इतीन्द्रस्य भ्रान्तिरेव वारणीया स्याद् न तु जीवस्यैव भयशोकादीनां शरीरसम्बन्धोपाधिकाध्यासिकत्ववर्णनपूर्वकं शरीरात्समुत्थितस्य* निर्दोषस्वरूपावस्थानवर्णनम्। अतः सर्वमिदं प्रकरणं जीवविषयमेव न तु ब्रह्मविषयमिति।

१६१। ४ **पाप्मादेरपूर्वस्येति।** अपूर्वं पूर्वशब्दोदितकारणप्रतिद्वन्द्वि कार्यं तेनादिशब्दगृहीतस्य जरादेरप्यपूर्वत्वम्। यद्वा पाप्मादिशब्दः समानाधिकरणबहुव्रीहिसमासरूपो द्विविधस्तन्त्रेणोच्चारितः। तत्राद्येनापूर्वस्येत्यस्यान्वयः। टीकायां निष्प्रपञ्चस्य ब्रह्मणः सकलोपनिषत्तात्पर्यविषयत्ववर्णनं प्रकृतानुपयुक्तमस्थानविजृम्भितमित्याशङ्क्य विकल्पोत्तरत्वेनावतारयति† **जीववादी प्रष्टव्य इति। श्रुत्या प्रजापतिवाक्यउक्तमिति।** ननु श्रुत्यापि निरुपाधेः कथं कामसंकल्पावुक्तौ। उच्यते। मुक्तो यावत्सर्वमुक्ति बिम्बभूतेश्वरभावमापद्यते बहुषु दर्पणेषु मुखप्रतिबिम्बे सत्येकदर्पणापाये तत्प्रतिबिम्बइव यावत्सकलदर्पणापायं बिम्बमुखभावं तावत्पर्यन्तं दर्पणान्तरगतप्रतिबिम्बप्रतियोगित्वरूपबिम्बभावाऽनिवृत्तेः ततश्च मुक्तस्य परमेश्वरभावापत्त्या तद्रूपेण कामसंकल्पौ स्वतो निरुपाधिकस्यापि बद्धपुरुषदृष्ट्या संभवत एव। तदभिप्रायेणोक्तं भाष्ये ऽपहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपद्यतइति। सूत्रकारो ऽपि ब्राह्मेण जैमिनिः‡रिति चतुर्थाध्यायाधिकरणे मुक्तस्य परमेश्वरभावापत्त्याशयेनैव वर्णितगुणाष्टकमुपपादयिष्यति। तस्मादुपपन्नो कामसंकल्पौ परमेश्वराभेदेन मुक्तस्य प्रत्युत तद्भेद एव जीवस्य शरीरावस्थायामपि तौ न सम्भवतः। न हि तदानीममनस्कस्य तावुपपद्येते।

---

* समुत्थानस्येति २ पु॰ पा॰। † विकल्पान्तरत्वेनेति। ‡ व्या॰ सू॰ अ॰ ४ पा॰ ४ सू॰ ५।

कथं व्युत्क्रमेणेति । ननूपसम्पत्तिः साक्षात्कारः अभिनिष्पत्तिः प्राप्ति- १६१
रित्यर्थः क्रमाविरोधाय किमिति नादृतः । यथैतान्यमुष्मादाकाशात्समु-
त्थाय परं ज्योतिरुपसंपद्य स्वेन स्वेन रूपेणाभिनिष्पद्यन्तइति दृष्टान्तसङ्गत्य-
नुरोधात् । दृष्टान्तवाक्यस्य ह्ययमर्थः । यथा पूर्वप्रकृतानि वायुरभ्रं विद्युत्
स्तनयित्नुरित्येतानि प्रावृषि वर्षणादिप्रयोजनानन्तरं स्थूलरूपं विहाय सूक्ष्म-
रूपेणाकाशे तदविविक्ततया स्थितानि पुनः प्रावृडारम्भे किं चिदुच्छ्वसितानि
भूत्वा ततो विविक्तानि सन्ति परं ग्रीष्मप्रभृतं सौरं ज्योतिः सहकारि प्राप्य
स्वेन स्वेन पुरोवातादिरूपेणाभिव्यज्यन्तइति । एवं च दार्ष्टान्तिकेऽप्युपस-
म्पत्तिः प्राप्तिरेव वाच्येति । तत्फलं साक्षात्कार इति । अस्मिन्पक्षे उप-
सम्पत्तिरेवाभिनिष्पत्तिर्वाच्या । तथैवाचार्यैः सम्पद्याविर्भाव* इत्यधिकरणे
परं ज्योतिरुपसम्पत्तिविवरणरूपतया स्वरूपाभिनिष्पत्तिवाक्यं व्याख्यास्यते ।
अहंशब्दगोचरमित्यहंकारास्पदमित्यस्य व्याख्या । ननु प्राजापत्यवाक्या-
लोचनया जीवपराभेदसिद्धेः समनन्तरपूर्वग्रन्थप्रतिपादितायाः प्रतिद्वन्द्वितया
जीवब्रह्मभेदाविरोध्यर्थान्तरप्रदर्शकमाचार्यदेशीयमतमुपन्यस्यतइति भाष्या-
र्जवेन प्रतिभाति तत्तात्पर्यप्रदर्शके यदि ह्येतमित्यादिटीकाग्रन्थे अक्षिस्था-
नस्य छायापुरुषत्वासम्भवनिरासोऽनुपयोगीत्याशङ्क्य तदुपयोगसिद्धये दहरो
जीव इति पूर्वपक्षिण एवाचार्यदेशीयऋजुक्रममवलम्ब्य विधान्तरेण प्रत्यवस्था-
नपरमिदं भाष्यमिति योजनार्थतया यदीत्यादिग्रन्थमवतारयति एकदे-
शीति । यदि के चिदित्यादिभाष्यं पूर्वभाष्यप्रतिपादितप्राजापत्यवाक्यार्थ- १६२
प्रतिद्वन्द्विजीवब्रह्मभेदाविरोधितदर्थान्तरप्रदर्शकमतान्तरोपन्यासमात्रपरं भ-
वेत् तदा तदाशयवर्णनार्थे यदि ह्येतमित्यादिटीकाग्रन्थे ततो न भवेत्
छायापुरुष इति स्थाने ततो न भवेज्जीवब्रह्मभेद इति वक्तव्यं स्याद्
न तथोक्तम् । तस्मादक्षिस्थानस्य छायात्मत्वमङ्गीकृत्य पूर्वपक्षान्तरप्रवर्तने
टीकायास्तात्पर्यं गम्यतइति भावः । प्राचीनपूर्वपक्षादस्य पूर्वपक्षस्य विशेषं
पक्षसाधारणांशं दर्शयति उक्तं हीति । तस्यैवापहतपाप्मत्वादि दर्शयत्ये-
तदमृतमभयमेतद् ब्रह्मेति पूर्वपक्षभाष्ये वाग्बुद्धिशरीरारम्भसम्भवोऽस्य

* व्या॰ सू॰ अ॰ ४ पा॰ ४ सू॰ १ । अभिसम्पद्येत्यसूत्रानुमतः पाठः २ पु॰ ।
† अहमिति शब्देति २ पु॰ ।

पाप्मादिः शरीराभावे न भवतीति तट्टीकायां चेति शेषः । यद्यपि छायाद्वारोपेयेति पक्षो नोक्तः प्रथमपूर्वपक्षे चाक्षिस्थानो न छायापुरुष उक्तः । तथा तदभिप्रायकल्पने त्वेतमित्यक्षिस्थपुरुषानुकर्षेणाङ्गीकारोक्तिविरोधः । तथापि स छायापुरुषश्चेदमृतत्वाद्यारोपो वाच्यः । तदारोपो जीवत्वपक्षेऽपि वक्तुं शक्य इत्युपकोसलविद्यागताक्षिवाक्यविषयपूर्वपक्षच्छाययोक्तप्रायमिति भावः ।

नन्वेतमिति* । ननु तत्प्रथमपूर्वपक्षवचनमेतं त्वेवेत्यत्राक्षिस्थानपुरुषानुकर्षणमङ्गीकृत्येति इदानीं द्वितीयपूर्वपक्षे एतमिति† परामर्शस्यान्यविषयत्वमङ्गीकृत्येति च विशेषो ऽस्तु नाम तेन प्रथमपूर्वपक्षनिराकरणयुक्तिमनादृत्य द्वितीयपूर्वपक्षोत्थानहेतुः को विशेषो दर्शितः स्यादिति चेदुच्यते । अक्षिस्थानपुरुषाननुकर्षविशेष एव प्रदर्शयिष्यमाणाविनिगमनपूर्वपक्षोत्थानहेतुः । एतमित्यनेनाक्षिस्थानाननुकर्षे ह्यक्षिस्थानश्छायापुरुषो भवेदिति तद्वचनं स्वातन्त्र्येणोपास्यत्वपरमतो ऽनन्तरपर्य्यायद्वये जीववचनमपि तद्वदेव स्वातन्त्र्येणोपास्यत्वपरं न तु चतुर्थपर्य्यायवक्ष्यमाणब्रह्माऽभेदबोधनार्थमित्यन्यार्थश्च परामर्श‡ इति प्रदर्शयिष्यमाणन्यायविषयत्वाभावादुत्तरत्र प्रजापतिविद्यायामपहतपाप्मत्वादियुक्तत्वेनोपास्यत्वेन च स्वतन्त्रतया निर्दिष्टयोर्ब्रह्मजीवयोर्मध्ये दहरो ब्रह्मैवेति नियन्तुं न शक्यते । अपहतपाप्मत्वादिगुणवचनेन ब्रह्मपक्षस्येव सुषुप्त्यवस्थापन्नस्वतन्त्रजीवोपन्यासेन जीवपक्षस्याप्युत्थानात् । प्रजापतिविद्यायां सुषुप्तजीवोपन्यासस्य स्वातन्त्र्ये दहरविद्यायामथ एष सम्प्रसाद इति तदुपन्यासस्यापि तद्वदेव स्वातन्त्र्यापत्त्या तत्रान्यार्थश्च परामर्श इति वक्ष्यमाणन्यायाऽप्रसरात् ।

१९ तदिहापि सूत्रे ऽनुसन्धेयमिति । इतरपरामर्शात्स इति चे§दिति शङ्काभागरूपपूर्वसूत्रोपक्रमे जीवलिङ्गमात्रोपन्यासात् तत्पूर्वसूत्रप्रदर्शितब्रह्मलिङ्गानाम् अन्यथासिद्धवचनादविनिगमेन पूर्वपक्ष इति भाष्यटीकयोर्वर्णितं तदुत्तराच्चे‖दिति सूत्रे ऽप्याचार्यदेशीयमतोपन्यासव्याजेन प्रवर्तमाने ऽस्मिन् पूर्वपक्षे समानमित्यर्थः ।

* एतं त्वेव त इति २ पु॰ पा॰ ।
† एतद्वितीति २ पु॰ पा॰ ।
‡ ब्र॰ सू॰ अ॰ १ पा॰ ३ सू॰ २० ।
§ ब्र॰ सू॰ अ॰ १ पा॰ ३ सू॰ १८ ।
‖ ब्र॰ सू॰ अ॰ १ पा॰ ३ सू॰ १९ ।

प्रथमपूर्वपक्षस्तु नाविनिगमेन प्रवृत्तः । प्रजापतिविद्यायामपहतपा मत्वादिर्जीवस्यैव धर्म इति निश्चयेन तत एव लिङ्गाद्दहरो जीव इति निश्चित्य तत्प्रवृत्तेः । यद्वा प्रथमपूर्वपक्षोऽप्यविनिगमेन प्रवृत्त इति तात्पर्यम्, अत्रापि बाह्याकाशोपमानगतिशब्दधृतीनामन्यथासिद्ध्यनुक्तेः । ननु वाक्योपक्रमगतस्य परमात्मनः परामर्शादित्येतदनन्तरवाक्योपक्रमगतस्य परामर्शः किं न स्यादिति शङ्कानिराकरणार्थत्वेन न खलु जीवात्मन* इत्यादिटीकाग्रन्थः प्रवृत्त इति प्रतिभाति तस्य च तादर्थ्यं न सम्भवति अक्षिस्थानो जीव इति पक्षं विहाय छायापुरुष इत्यङ्गीकृत्य पूर्वपक्षान्तरप्रवर्तनार्थत्वेन यदो-त्यादिटीकाग्रन्थस्यावतारणादित्याशङ्क्य परमात्मनः परामर्शादिति वाक्योपक्रमे जीवपरामर्शप्रत्याख्यानमयुक्तं तयोरभेदादिति शङ्कानिराकरणार्थत्वेन न खल्विति ग्रन्थमवतारयति **नन्विति । दृष्टे सम्भवतीति** । ननु पर- १६२
मात्मनि धीविशेषायोपास्त्यर्थत्वे ऽपि दृष्टार्थत्वं न हीयतइति चेन्न । उपास्तिविध्यङ्गीकारे परमात्मनि चित्तैकाग्र्यमनयैवोपासनया सम्पादनीयमिति नियमविधित्वस्याङ्गीकर्तव्यत्वेन नियमादृष्टकल्पनागौरवसत्त्वादिति भावः । ननु मतान्तरमाहेत्ययुक्तं मतद्वये ऽपि जीवब्रह्मभेदाविशेषाद् विशेषकान्तराऽनुक्तेश्चेत्याशङ्क्याह **अस्य चेति । औपाधिकस्तात्त्विकोपाध्यवच्छिन्नः** । यत्तदिति क्रियाविशेषणमित्यस्य विवरणम् **एतत्स्वप्नमिति** । स्वप्नं यथा भवति तथा स्वपितीत्यभेदे ऽपि क्रियाविशेषणतया कर्मता पाकं पचतीतिवत् । अथ ब्रह्मलिङ्गानां प्रजापतिविद्यानुसारेण जीवलिङ्गत्वशङ्काकलुषितत्वाद् ब्रह्मलिङ्गत्वमस्पष्टं तस्य स्पष्टत्वे ऽपि अन्तर्वर्त्यन्वयावभासाद्दहराकाशान्वयित्वं न स्पष्टमित्यस्पष्टब्रह्मलिङ्गता† ॥

अनुकृतेस्तस्य च ॥ २२ ॥ १६३

सति विषये च साधारण्यादिति । ननु साधारण्यमसिद्धं वैषयिकाधिकरणकारकविभक्तेर्यस्य च भावेन भावलक्षणमित्युपपदविभक्तितो बलीयस्त्वादिति चेन्मैवम् । णिजर्थाध्याहारसापेक्षकारकविभक्तेरुपपदविभक्तेश्च बलाऽबलनिर्द्धारणाशयेन साधारण्योक्तिः पूर्वपक्षावतारिकया तथा तदाशयविवरणात् ।

* जीवात्मक इति ग पु० पा । † अत्र पञ्चमं दहराधिकरणम् उत्तराधिकरणं वा पूर्णम् ।

६३ । १० पूर्वमिति । ननु प्रथमपूर्वपक्षे तावदेतमित्यस्य प्रकृतार्थत्वं दहरो जीव इति शङ्कानिरासे न हेतुः तत्र तस्य प्रकृतार्थत्वहेतुनैव तथा शङ्कोत्थानात् । न च तस्याप्रकृतार्थत्वसम्भवस्तथाशङ्कानिरासासम्भवे हेतुः । ततो जीवे ऽपहतपाप्मत्वादिसद्भावमूलशङ्कानिरासस्यैव सिद्धः । द्वितीयपूर्वपक्षे ऽपि तदुक्तशङ्कानिरासे न हेतुः । तत्राप्येतमित्यस्य वाक्योपक्रमप्रकृतापहतपाप्मत्वादिगुणकात्मार्थत्वावलम्बनेनैव तथा शङ्कोत्थानात् । तत्रापि तस्याप्रकृतार्थत्वसम्भवस्तथाशङ्कानिरसनासम्भवे न हेतुः । स्वप्नादिपर्य्यायेष्वेतमित्यस्य प्रकृतमसंस्पृश्य स्वस्ववक्ष्यमाणार्थमात्रपरामर्शित्वे ऽक्षिस्यच्छायात्मा स्वप्नसुषुप्तिपर्यायोरुक्तो जीवश्च तया तयोपास्यश्चतुर्थपर्यायोक्तं ब्रह्म ज्ञेयमिति कल्पने प्रकृतस्याऽपहतपाप्मत्वादिगुणकस्येन्द्रविरोचनाभ्यां पृष्टस्यात्मनः क्व चिदप्युक्तिर्न लभ्येतेति दोषापत्त्या तत्परिहारार्थमक्षिपर्यायस्तद्विषय इति तत्रापहतपाप्मत्वाद्यसम्भवेनापरितोषात् पुनः पुनरागतमिन्द्रं प्रति स एवोपदिष्ट इति च वक्तव्यत्वेन स्वतन्त्रजीवोपास्तिविधानरूपदृष्टान्ताऽसम्प्रतिपत्त्या तन्मूलाया जीवो दहर इति शङ्कायाः सर्वनाम्नः प्रकृतार्थत्वनियमाभावेन हेतुना प्रतिष्ठापनालाभात् । अक्षिपर्यायस्य छायात्मोपास्तिपरत्व हि तत्रापरितोषादागतमिन्द्रं प्रति ततो ऽन्यस्य जीवस्योपास्त्युपदेश इति वक्तुं शक्यम् । तस्य प्रकृतात्मोपदेशपरत्वे तु छायापुरुषस्यापहतपाप्मत्वादिकं न सम्भवतीत्यपरितोषादागतं प्रति तदीयभ्रान्त्यपनयनेन प्रकृत एवात्मा प्रकारान्तरेणोपदेष्टव्यः । अतः प्रकृतार्थत्वादिति शङ्कानिरासे प्रकृतार्थत्वनियमाभावादिति शङ्कानिरासासम्भवे च हेतुत्वेनोक्तिर्न युक्तेति चेत् । उच्यते । प्रथमपूर्वपक्षे तावद् एतमित्यस्य प्रकृतार्थत्वहेतुनोत्थितो जीवो दहर इति शङ्का तस्य पूर्वपक्ष्यभिमतं प्रकृतार्थत्वमेव जीवब्रह्माभेदासिद्धिप्रत्याशया समाश्रित्य जीवस्यावस्थात्रयोत्तीर्णस्य तुर्य्यपर्य्याये ब्रह्मभावोक्तेरपेतजीवभावं ब्रह्मैवापहतपाप्मत्वादिगुणकं न जीव इत्युपपादनेन निरासि । तदसाधु । तस्याप्रकृतार्थत्वसम्भवे ततो जीवब्रह्माऽभेदाऽसिद्धेरित्याक्षेपः । तत्र प्रकृतार्थत्वादिति शङ्कान्वये हेतुपञ्चमी शङ्कानिरासान्वये ल्यब्लोपे कर्मण्युपसंख्यानमिति पञ्चमीति भेदः । तथा द्वितीयपूर्वपक्षे

द्वितीयादिपर्यायगतस्य एतमित्यस्य* वाक्योपक्रमप्रकृतापहतपाप्मत्वादिगुणकात्मार्थत्वाद्दहरो जीव इति शङ्का तस्य प्रकृतार्थत्वात्सन्निहितार्थत्वाद् निरासि । तदसाधु । द्वितीयादिपर्यायगतस्यैतमित्यस्याप्रकृतार्थत्वसम्भवेनाक्षिस्थपरामर्शित्वासिद्ध्या तन्मूलकजीवब्रह्माऽभेदासिद्धेरित्याक्षेपः । अस्यां योजनायां प्रकृतार्थत्वादिति शङ्कान्वये तन्निरासान्वये च हेतुपञ्चम्येव शङ्कानिरासान्वये सन्निहितार्थत्वादिति तदर्थ इति विशेषः । यद्यपि सन्निधिः प्रकरणाद्दुर्बलः तथापि वाक्योपक्रमप्रकृत एवात्माऽक्ष्युपदेश्य इति प्रकरणानुगुणसन्निधिर्न तेन बाध्यः । ननु सर्वनाम्नः प्रकृतार्थत्वनियमाभावेऽपि भूय इति नो एवान्यच्चेत्येताभ्याम् एतमित्यस्य प्रकृतार्थत्वं भवेदिति नाक्षेपसिद्धिरिति चेत् । मैवम् । तथा नियमाभावे भूय इत्यस्य पुनरपि किं चिदन्यद्व्याख्यामीत्याशयेनोपपत्तेः । नो एवान्यदित्यस्य इतोऽन्यत्किं चित्पञ्चमपर्यायमुपक्रम्य न वक्ष्यामि अस्मिन् चतुर्थपर्याये वक्ष्यमाणेनैव समापयिष्यामीत्यर्थोपपत्तेः ।

भासकत्वे सतीति । तेजोभासकत्वे सतीत्यर्थः । तथैवोत्तरत्र १६:
शङ्कापरिहाराभ्यां तदर्थं स्पष्टीकरिष्यति । इदं च तेजोविशेषणं घनकुड्यादौ विषयतया स्वभानहेतौ व्यभिचारवारणाय स्यादिति शङ्कापरिहारार्थम् । यद्यपि घनकुड्यादेः सूर्यदीपाद्यभिभावकत्वं नास्ति घनकुड्याद्यावरणे सति चक्षुःसन्निकर्षाभावात् सूर्यदीपाद्यग्रहणोपपत्तेः । तथापि सुवर्णतेजः तदुपष्टम्भकपार्थिवभागाभिभूतं सह स्वकीयेन शुक्लभास्वररूपेण न स्पष्टमुपलभ्यत इति मतानुसारेण तत्र व्यभिचारवारणार्थं तद्विशेषणम् । सूर्यादिकं न भातीत्यस्यापि बलवता तेजसाऽभिभूतं न स्पष्टं भातीत्येवार्थो न तु सर्वथैव न भातीति प्रत्यक्षविरोधात्पूर्वापरविरोधाच्च । न हि यस्मिन्सति यत्सर्वथैव न भाति ततमनुभातीति युक्तम् । न खलु यस्मिन् गच्छति यो न गच्छति स तमनुगच्छति । अतो हेतौ विशेष्यभागस्य† स्पष्टतेजोभानविरोधित्वमेवार्थ इति युक्तमुपष्टम्भकपार्थिवभागे व्यभिचारवारणार्थं विशेषणमिति ।

यदि तेजोन्तराऽदृष्टमपि सूर्यादिप्रकाशकत्वं क्व चित्तेजसि कल्प्यते तर्ह्येतेजसैव ब्रह्मणा सूर्यादीनामभिभवस्तदनुकरणं च कल्प्यतां मन्यस्य

* एतमित्यस्येति नास्ति २ पु० ।   † विशेष्यभागस्येति ३ पु० पा० ।

प्रकरणाद् ब्रह्मपरत्वावश्यंभावेन श्रुतिवशात्किंचिदसिद्धार्थाश्रयणे प्रकरणानु-
६३ । २१ रोध्यर्थाश्रयणस्यैवोचितत्वादित्याशङ्क्याह **अभिभवानुकारयोरिति** । ननु ब्रह्मपक्षे द्वयमप्रसिद्धं कल्पनीयं तेजःपक्षे त्वेकमेवेति नायं विशेषः । तेजःपक्षे तथाभूतस्य धर्मिणः तेजसोऽप्यप्रसिद्धस्य कल्पनीयत्वादित्याशङ्क्याह **इति पूर्ववाद्याशय इति** । अयमिह तस्याशयो विवक्षितः । तेजसस्तेजःप्रकाशकत्वं नादृष्टचरं लाघवेन तेजोविरोधिभिन्नचाक्षुषत्वावच्छिन्ने तेजोपेक्षाङ्गीकारात् । दीपे तत्संयुक्तस्यालोकस्यालोके परस्परसंयुक्तानेककिरणात्मके तत्तत्संयुक्तकिरणस्य च तेजसः सत्त्वाद् अन्ततः सर्वत्र तत्तदवयवावयवसत्त्वाच्च तद्रहितस्य त्रसरेणोर्जालान्तरागतालोकएव भानात् । एवं चाभिभवानुकारलिङ्गद्वयबलात् तेजसस्तेजःप्रकाशकत्वाविरोधाच्च तेज एव किञ्चिन्मन्त्रप्रतिपाद्यमिति निश्चये सति भूतयोनिब्रह्मप्रकरणं नादरणीयं लिङ्गाभ्यां तस्य बाधादिति । **तस्य सर्वज्ञत्वइति** । ननु सर्वज्ञत्वं तस्य भासेत्यस्यार्थो मा भूत्कल्पनीयस्य तेजसः सर्वप्रकाशकत्वं तदर्थोऽस्तु श्रुतिवशात्तस्य तथात्वाङ्गीकारोपपत्तेरिति चेन्न । तथा सति तेजोन्तरस्य चाक्षुषाऽचाक्षुषसाधारण्येन तस्य सर्वप्रकाशकतया च* कल्पनीयत्वेन सिद्धान्ते समारोपितस्य गौरवस्य पूर्वपक्षे प्रसरापत्तेरिति भावः । प्रस्तुतसूर्यादिपरामर्शीदशब्दसमभिव्याहारात् सर्वशब्दः सङ्कुचितवृत्तिरिति परिहाराभिप्रायः । **उपरिष्टादिति** । अग्रे स्वेन स्वेन बोधयिष्यमाणएवार्थे वर्तिष्यन्तइत्यर्थे न त्वग्रिमवाक्यान्तरेण तत्तद्वाक्यगतपदान्तरेण वा बोधयिष्यमाणे एवार्थे वर्तिष्यन्तइति । तत्र तं तस्येति तत्पदघटितवाक्यत्रयव्यतिरेकेण तत्परामर्शनीयालौकिकतेजोविषयस्य वाक्यान्तरस्य पदान्तरस्य चादर्शनात् प्रदर्शनीयमेवेति टीकाया अपि स्वस्वप्रदर्शनीयएव स्वारस्याच्च । ननु तच्छब्दस्य प्रकृते प्रकरिष्यमाणे प्रत्यक्षादिसन्निधापिते प्रसिद्धे चार्थे वृत्तिर्व्युत्पत्तिसिद्धा न क्व चिदपि स्वपरामर्शनीयएवार्थे पर्यवसानं दृष्टमित्याशङ्क्य तदपि दृष्ट-
। ४ मिति दर्शयितुमुदाहृतं पाणिनिसूत्रद्वयं व्याचष्टे **रागवाचिन इति** । न प्रकृतार्थावित्युपलक्षणं नापि प्रकरिष्यमाणार्थौ न मानान्तरसन्निधापितार्थौ न च प्रसिद्धार्थावित्यपि द्रष्टव्यम् । नन्वनुमानं ब्रह्मण्येव लिङ्गम् । ब्रह्मणि

---

* प्रकाशकतया चेति ख पु. पा. ।

मासमाने तदध्यस्तसूर्यादेस्तदनुमानसम्भवादित्येतदयुक्तम् । सूर्यादिषु ब्रह्म-
भानान्यभानाभावात् । गच्छन्तमनुगच्छतीत्यत्र गमनभेदे सत्येव ह्यनुशब्दो
दृष्टः । उच्यते । गच्छन्तमनुगच्छतीत्यत्र तद्गमनानुकारिगमनान्तरमिवात्र
तद्भानानुकारिभानान्तरं नोक्तं* तमेव भान्तमिति तस्यैव भानवत्त्वोक्तेः । न हि
यत्र क्रियाभेदो ऽस्ति तत्रैवमवधारणं युज्यते । युज्यते तु क्रियाभेदाभावस्थले
वह्निमेव दहन्तं तप्तायःपिण्डो ऽनुदहतीति । तथा च भारूपे† ब्रह्मणि
अध्यस्तानां सूर्यादीनां तत्सत्तयैव सत्त्ववत्तद्भानेनैव भानवत्त्वे ऽप्याश्रयभेदेन
क्रियाभेदं कल्पयित्वा अनुभातीति व्यपदेशः । अपि च तेजःपक्षइति । १६४
तस्मिन् पक्षे प्रसिद्धविलक्षणं किं चित्तेजस्तावत्कल्पनीयम् । तत्प्रतिपादनवै-
यर्थ्याय तदुपासनविधिस्तत्फलं च कल्पनीयमित्यतिगौरवं ब्रह्मप्रकर-
णबाधश्चेत्येते दोषाः स्युरित्यर्थः । भासमानतेजसेति । प्रभान्तर्गतकि-
रणानां तत्संवलितकिरणान्तरसंयोगेन भानं चेद्यत्र संयोगस्तत्रैव भानं
स्याद् घटादिष्वालोकसंयुक्तप्रदेशएव भानदर्शनात् । न चैतदस्ति ।
आलोकावयवान्तरासंयुक्तस्य तमःसंनिकृष्टस्य दीपालोकावध्यवयवभागस्यापि
भानात् । तस्माद् भासमानतेजसा न सूर्यादितेजो भाति किं तु स्वत
एवेति भावः । क्रियासाम्याभावो ऽसिद्ध इति । वराहं गावो ऽनुधा-
वन्तीत्यत्र त्वनुधावन्तीत्यनेन बाधितस्वार्थेन मुख चन्द्रमनुकरोतीत्यत्रा-
नुकरोतीत्यनेनैव स्वरूपसाम्यमुक्तमिति सूक्तार्थग्रहणम् । इहानुभातीति
क्रियासाम्योक्तौ तन्निर्वाहायानपेक्षितं स्वरूपसाम्यं नादरणीयमिति भावः ।
रूपैकार्थसमवायिनः चक्षुर्योग्याः संख्यादयः । संकुचेदिति । सिद्धान्ते
तु न सङ्कोचः । इदंशब्दस्याप्यसङ्कोचेन प्रत्यक्षादिसन्निधापितसकलवस्तु-
परत्वोपपत्तेरिति भावः । रूपादिष्विति । पक्षेष्विति शेषः ।

प्रकृतेः पर इति । ननु सूत्रव्याख्यानस्य पाश्चात्यत्वेन ततः १६५ ।
प्रकृत्यर्थविशेषलाभस्य नास्ति पूर्वप्रवृत्तत्वं तथात्वे वा ऽभिभवादिलिङ्गमालोच्य
सूर्याद्यभिभावकमलौकिकं तेजोन्तरमस्य मन्त्रस्य प्रतिपाद्यमिति व्याख्याने
तेजसः प्रकृतत्वमस्तीति स्यात् । मैवम् । तेन रक्तं रागादित्यादिसूत्रैः सिद्ध-

---

* भानानुकारि भानोन्तरमिति १ पु॰ पा॰ । † भारूपे इति २ पु॰ पा॰ ।

शब्दान्वाख्यानं कुर्वतः पाणिनेः कौसुम्भमौपमन्यव इत्यादिसिद्धशब्दरूपाण्युदाहरणानि तद्व्याख्यानरूपाणि विग्रहवाक्यानि च मनसि विपरिवर्तन्त इति विग्रहवाक्यस्थैः कुसुम्भादिशब्दैस्तत्तदर्थस्य प्रस्तुतत्वमस्तीति तात्पर्यात् । यद्वा तेन रक्तमिति सूत्रे रञ्जकद्रव्यवाचिना प्रकृतिसमर्पकेण रागशब्देन रञ्जकद्रव्यविशेषवाचकाः कुसुम्भहरिद्रादिशब्दा लक्षणीया इति तैः प्रकृत्यर्थविशेषलाभः तस्यापत्यमिति सूत्रे ङ्याप्प्रातिपदिकादिति सूत्रानुवृत्तस्य प्रकृतिसमर्पकस्य प्रातिपदिकशब्दस्याऽपत्यार्थप्रत्ययप्रकृतित्वयोग्योपमन्य्वादिप्रातिपदिकविशेषपर्य्यवसानात् तैः प्रकृत्यर्थलाभः । रागप्रातिपदिकशब्दयोः समानवाक्योपात्तत्वे ऽप्यर्थगत्या पूर्ववृत्तत्वं विवक्षितम् । वस्तुतस्तु द्विविधाः सर्वनामशब्दाः समभिव्याहृतपराः व्यवस्थितैकार्थपराश्च ।

यस्य यस्य हि यो भावस्तेन तेन हि तं नरम् ।
अनुप्रविश्य मेधावी क्षिप्रमेव वशं नयेत् ॥

तद्वृत्ति तत्प्रकारकज्ञानं प्रमेत्यादिषु ये व्यवस्थितैकार्थशून्यास्ते तत्तदभिमतार्थपरव्याख्यानशब्दसमर्पितानर्थविशेषानासाद्य निर्वृणवन्ति । तेन रक्तमित्यादिशब्दा अपि तथाभूता इति न तेषां पूर्वप्रकृताद्यपेक्षा । इह तु मन्त्रे तच्छब्दाः स तेषां प्रतिशुश्रावेत्यादिश्लोकगता इव व्यवस्थितैकार्थपरा इति तेषां प्रकृताद्यपेक्षा ऽवश्यभाविनीति तात्पर्यम् । ननु दहरविद्यायां तं चेद्ब्रूयुर्यदिदमस्मिन् ब्रह्मपुर इत्यादिवाक्ये तमित्यस्याचार्यरूपव्यवस्थितैकार्थपरस्यापि प्रकृताद्यपेक्षा न दृष्टा । नैष दोषः । तथाच य एष संप्रसाद इत्यादिवाक्ये एष आत्मेति होवाचेत्यत्रोवाचेत्यस्य कर्तृविशेषाकाङ्क्षायामौचित्यादाचार्य्य इत्यध्याहरणीयम् । तस्य चोवाचेत्यस्य ब्रूयादित्यर्थो वाच्यः । यथा तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्याद्याथर्वणमन्त्रसंदर्भे

तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ इत्यत्र ।

एतदत्र तं चेद्ब्रूयुरित्याक्षेपवाक्योपक्रमे स ब्रूयादिति समाधानवाक्योपक्रमे च स शब्दाचार्यः परामर्शनीयो भविष्यति ।

णिजध्याहारं परिजिहीर्षता कथं प्रकाशकत्वेनेत्यध्याहृतमिति शङ्कां
वारयति **विषये इति ।** विषयनिर्देशसामर्थ्याद्विषयित्वेन न भातीति लभ्य- १६५
त इत्यर्थः । ननु विषयित्वेन न भातीति विशिष्टनिषेधस्य शाब्दत्वसिद्ध्यर्थे
विषयित्वेनेति शब्दो ऽध्याहर्तव्यः । सत्यम् । विशेष्यमात्रनिषेधे प्रत्यक्षवि-
रोधः स्यादिति किं चिद्विशेषणाध्याहारावश्यम्भावे कारकसम्प्रत्ययार्थविषयत्वा-
क्षिप्ततया विषयित्वस्य बुद्धिस्थत्वात् तद्वाचक एवाध्याहर्तुमुचितो न स्पष्ट-
त्वादिवाचकः । न चाप्रसक्तप्रतिषेधदोषः । रूपादिमत्त्वभ्रान्त्या प्रसक्तस्य
सूर्यादिप्रकाश्यत्वस्य न चक्षुषा पश्यति कश्चिदेनमिति चाक्षुषत्वस्येव निषे-
धोपपत्तेः । ननु कुतो ऽयमग्निरिति कैमुतिकन्यायानन्वयः* । यदतिसूक्ष्मं
वस्तु सूर्यादयो ऽपि प्रकाशयितुं नेशते तद्दीपः प्रकाशयिष्यतीति का प्रत्या-
शेत्येवं सौक्ष्म्यातिशयस्तुत्यर्थतया ऽन्वयोपपत्तेः । प्रत्युताभिभावकत्वपक्षएव
तस्य भासेत्यादेरनन्वयः स्यादभिभावकस्य प्रकाशकत्वायोगात् । तदलौ-
किकं सर्वप्रकाशनसमर्थं तेजोन्तरं सर्वदा सर्वत्र स्थितं चेत् चन्द्रसूर्यदीपा-
दीनामभावे ऽपि घटादिस्फुरणं स्यात् । तस्य चन्द्रादिप्रभानुविधायित्वा-
ङ्गीकारे चन्द्रसूर्यदीपादिप्रभासु घटादीनां तुल्यरूपः स्पष्टः प्रकाशः स्यात् ।
तस्य चन्द्रप्रभाद्यनुविधायिप्रकाशतारतम्यस्याप्यङ्गीकारे चन्द्रप्रभाद्यतिरेके-
णानुपलभ्यमानस्य तस्य पर्यायान्तरेणाभाव एवोक्तः स्यादिति दोषाः
स्युरिति द्रष्टव्यम् । अथानुमानस्य तेजोलिङ्गत्वं निरस्य ब्रह्मलिङ्गत्वं समर्थ-
नीयमाणोदित्यस्पष्टता† ॥

शब्दादेव प्रमितः ॥ २४ ॥

परिमाणविशेषवन्मात्रवाचीति । परिमाणविशेषवानङ्गुष्ठपरि- ,, । १४
माणवान् । अङ्गुष्ठमात्र इत्यत्र मात्रशब्दः प्रमाणवाची । प्रत्ययः प्रमाणे द्वयस-
ज्दघ्नञ्मात्रच इति सूत्रेणानुशिष्टः । तन्मात्रवाची तत्सामान्यवाची ।
तद्विशेषे श्रुतिरेवेति । ननु दहरशब्दवदङ्गुष्ठमात्रशब्दो ऽल्पपरिमाणरूपे
जीवलिङ्ग एव श्रुतो न तु तद्वति जीवरूपे धर्मिविशेषे । यद्येवं भूतभव्य-
शब्दसमभिव्याहृत ईशानशब्दो ऽपि भूतभव्येशितृत्वरूपब्रह्मलिङ्ग एव श्रुतिर्न

---

* न्यायोपन्यासानन्वय इति ३ पु. पा. ।

† अत्र षष्ठं (सप्तम वा) अनुकृत्यधिकरणं पूर्णम् ।

ब्रह्मणीति तुल्यं योगरूढिमतः शब्दस्य यौगिकार्थसम्बन्धिनिर्देशे रूढ्यनुन्मेषस्य पद्मानि यस्यायसरोरुहाणीत्यादिषु दर्शनादिति भावः । यदि त्वीशानशब्दः श्रुतिरेवाङ्गुष्ठमात्र इति लिङ्गं तदा प्राथमिकलिङ्गस्य पाश्चात्त्यश्रुतेश्च बलाऽबलानवधारणात्संशय इत्याशयेनाह यद्यत्रेति । शङ्कानिरास इति । अङ्गुष्ठमात्रश्रुत्या सह जीवग्रहणे युक्त्यन्तरमपि चेत्यनेन समुच्चेयं न भवति तत्र युक्त्यन्तराऽकथनात् किं त्वङ्गुष्ठमात्रश्रुतेरेव ब्रह्मणि संभवशङ्कानिरासः समुच्चेय इत्यर्थः । परमात्मनो हृत्पुण्डरीकस्थानत्वस्य युक्तत्वोपन्यासः प्रकृतानुपयोगीत्याशङ्क्य तत्परमात्मनोऽल्पत्वे कारणमित्येतद्युक्तमित्यध्याहृत्य व्याचष्टे परमात्मन इति ।

हृत्पुण्डरीकोपाध्यवच्छेदकारणकमल्पत्वं ब्रह्मणो युक्तं चेतदेवेहाप्य-
१६५-१-२५ ङ्गुष्ठमात्रशब्देनोच्यतामित्याशङ्क्याह उपाधिं संकीर्त्येति । उपाधिसंकीर्तनपूर्वकमुच्यमानमल्पत्वं स्वाभाविकाऽनन्तत्वाऽपारत्वाऽविरोधि भवति इह तु तत्कीर्तनं विनैवाल्पत्वमुच्यतइत्यस्य ब्रह्मविषयतायामिदं स्वाभाविकानन्तत्वादिना विरुध्येतेति भावः । नन्वप्रयोजकमिदं यदुपाधिसंकीर्तनएवौपाधिकं सिध्यतीति तदभावे ऽप्यनन्तत्वादिश्रुत्यनुसारेणौपाधिकत्वसिद्ध्युपपत्तेः । अन्यथा अणोरणीयान्महतो महीयानित्यादिश्रुतिषु का गतिः । किं चैवं सत्यनियतपरिमाणान्तःकरणोपाधिकजीवविषयत्वमप्यस्याङ्गुष्ठमात्रत्वश्रवणस्य न सिद्ध्येद् हृदयोपाधिसंकीर्तनाभावात् । यदि तस्य स्वोपाध्यन्तःकरणद्वारा प्रायिकं हृदयस्थत्वं प्रसिद्धं न वक्तव्य तर्हीश्वरस्य नियतहृदयस्थत्वं श्रौतहृदयशब्दनिरुक्त्या ईश्वरः सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठतीति स्मृत्या च प्रतिपादितं प्रसिद्धतरमिति सुतरां न वक्तव्यम् । न च वाच्यं ब्रह्मणो हृदये अतिसूक्ष्मत्वस्य दहरशाण्डिल्यविद्ययोरुक्तत्वात्तस्य तदुपाधिकमङ्गुष्ठमात्रत्वं न संभवतीति तर्हि जीवस्याप्याराग्रमात्रत्वेन वालाग्रशतभागशतांशमितत्वेन च श्रुतस्य तन्न संभवति । अथोच्येत श्वेताश्वतरे प्राणाधिपः संचरते स्वकर्मभिरिति जीवं प्रकृत्य अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो य इत्याहत्य तस्याङ्गुष्ठमात्रत्वं श्रुतं भारते पि दृष्टम् अतस्तस्याराग्रमात्रत्वादिश्रवणं सूक्ष्मसूक्ष्मतरनाडीसंचाराद्युपाधिक कल्प्यमिति तर्हीश्वरस्याप्यङ्गुष्ठमात्रः पुरुषो ऽङ्गुष्ठं च समाश्रितः ईशः सर्वस्य जगतः प्रभुः प्रीणाति

विश्वभुगिति तैत्तिरीयमन्त्रे अङ्गुष्ठमात्रः पुरुषो ऽन्तरात्मा सदा जनानां हृदि संनिविष्टः हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्तीति श्वेताश्वतरमन्त्रे चाङ्गुष्ठमात्रत्वमाहत्य श्रुतमिति दहरशाण्डिल्यविद्ययोरुक्तमिति सौक्ष्म्यं हृदयायसुषिरोपाधिकं कल्प्यमिति तुल्यं तस्मादुक्तव्यमिद केन विशेषेणाङ्गुष्ठमात्रत्वश्रवणस्य ब्रह्मविषयत्वे सति उपाधिसंकीर्तनापेक्षा न जीवविषयत्वइत्यभ्युपगतमिति । उच्यते । ब्रह्मविषयमङ्गुष्ठमात्रत्वश्रवणमुपाधिसंकीर्तननियतं दृष्टं जीवविषयं तु तत्संकीर्तनरहितमपि* । अत उपाधिसंकीर्तनरहितमिदं जीवविषयमेव भवितुमर्हतीत्यभ्युपगतम् ।

स्वस्य भवितुरनिर्देशे तदनिर्णयस्य स्वभावाऽनिर्णयपर्यवसानेन प्रकृतोपयोगमाह **स्वो यो भवितेति । उदासीने स्वरूपे इति ।** उदासी- १६६
नस्वभावो भवतीत्यर्थः । **सकनिष्ठिक इति ।** मुक्तकनिष्ठिक इत्यर्थः । नन्वेतद्वै तदिति तच्छब्दो† ऽन्यत्र धर्मादिति प्रकृतं ब्रह्म परामृशेदित्याशङ्क्य पूर्वपक्षे तत्संगमयति **एतदिति । अन्यत्र धर्मादिति प्रस्तुतेति ।** येयं प्रेते इति प्रश्नस्य अन्यत्र धर्मादिति पुनः प्रवर्तने परमात्मविषयतया विवृतत्वात्तदुत्तरगतस्याङ्गुष्ठवाक्यस्य प्रतिपिपादयिषितजीवाभिन्नपरमात्मविषयत्वे सम्भवति केवलजीवपर्यवसानकल्पनं न युक्तमिति भावः । ननु सर्वगतस्यापि ब्रह्मण इत्यादिभाष्यवाक्यं यदि जीवाभिप्रायं तर्हि भाष्यगतस्य ब्रह्मशब्दस्य किं जीवे लक्षणा नेत्याह **जीवभावापन्नेति ।** ब्रह्मैव जीवभावेन वर्ततइत्यभिप्रायो भाष्ये ब्रह्मशब्द इत्यर्थः । **कस्य चिन्मुमुक्षोः** असंन्यासिनः । एतेन काम्यग्रहणं मोक्षमात्रमात्रान्वयीति दर्शितम् । **स्वकीयस्येति ।** आत्मनो दीयमानस्य स्वत्वनिवृत्त्यसंभवादिति भावः । **ऋष्यन्तराभावादिति ।** वसिष्ठादीनामार्षेयवरणे वरणीयवसिष्ठान्तराद्यभावादित्यर्थः । अत्र ऋषिदेवताधिकारविचारे वक्तव्यं देवताधिकरणे‡ वक्ष्यते ।

सिद्धान्तिनापीति । ननु यदि सिद्धान्तिना ऽप्यङ्गुष्ठमात्रः पुरुष इत्येतदनुवाद्यजीवविषयमभ्युपगम्यते कथं तर्हि संशयप्रदर्शनग्रन्थे मन्त्रस्य ”

* अपि दृष्टमिति २ पु॰ पा॰ । † नन्वेतद्वैति तच्छब्द इति २ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ २६–३३ ।

परमात्मपरत्वं पक्षे परिमाणविशेषो न मुख्य इत्युक्तं कथं च परिमाणं जैवं पारमेश्वरं वेति संशय इत्युक्तम्। उच्यते। अस्य मन्त्रस्याङ्गुष्ठमात्रः पुरुषो ऽन्तरात्मेत्यनन्तरमन्त्रवदङ्गुष्ठमात्रजीवानुवादेन तस्य ब्रह्माऽभेदबोधनपरत्वे श्रुतस्याङ्गुष्ठपरिमाणस्योपमर्दो भवति यो ऽयमन्तःकरणोपाधिको ऽङ्गुष्ठमात्रः प्राप्तो जीवः स न तथा मन्तव्यः किं त्वसंकुचितसकलभूतभविष्यद्वर्तमानवस्तुनियन्तृत्वप्राप्तसकलान्तरावस्थानतया व्यापकः परमात्मैव मन्तव्य इति। एवं च यथा ऽप्यग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थे याह्य इति राजन्यनिमित्तषोडशिग्रहयागाभ्यासविधौ राजन्यस्योक्थ्यसंस्थो ऽग्निष्टोमसंस्थो वा यः क्रतुः प्राप्तः स न तथा कर्तव्यः किं तु षोडशिसंस्थः कर्तव्य इति विधीयमानया षोडशिसंस्थयोक्थ्याग्निष्टोमसंस्थोपमर्दः एवमिह भूतभव्यनियन्तृपरमेश्वराभेदबोधनेन जीवस्याङ्गुष्ठपरिमाणोपमर्द एव तस्या मुख्यता विवक्षिता। एवं तर्हि मन्त्रस्य परमात्माभेदपरत्वपक्षे भूतभव्यनियन्तृत्वस्याप्युपमर्दो ऽस्तीति तस्मिन् पक्षे कथं विशिष्य परिमाणविशेषस्यामुख्यतोक्तिः। सत्यम्। तदुपमर्दो न जीवलिङ्गकृतः किं तु ब्रह्माभेदरूपवाक्यार्थविरोधकृतः। जीवलिङ्गोपमर्दस्तु ब्रह्मलिङ्गादिकृतः ब्रह्मश्रुतिलिङ्गप्रकरणपरामर्शेनैव कृत्स्नस्य मन्त्रस्य जीवपरत्वमपोद्य जीवानुवादेन ब्रह्माभेदपरत्वपक्षस्योन्मेषणीयत्वात्। अनेन विशेषेण सिद्धान्तपक्षे परिमाणविशेषस्यैवामुख्यत्वमुक्तं पारमेश्वरं वेत्येतत् श्रुत्याद्यापादितपरमेश्वरपर्यवसानाभिप्रायम्। श्रुतिरिहेशानशब्दरूपा परमेश्वराभिधानश्रुतियोगेन लिङ्गसमर्पकस्यापि तस्य रूढ्या परमेश्वरबोधकत्वाऽनिवारणात्। काव्येषु तु व्यङ्ग्यार्थप्रधानेषु यस्य शब्दस्य यौगिको ऽर्थो व्यञ्जनव्यापारानुकूलस्तं शब्दं यौगिकार्थएवोपक्षीणं कृत्वा तदीयरूढ्यर्थसमर्पणार्थं क्व चित्क्व चित्पदान्तरमप्युपाददते तत्पदान्तरोपादानं न यौगिकार्थसंबन्ध्युपादानस्य रूढ्युन्मेषविरोधित्वप्रयुक्तम्। तदनुपादानेपि ऽपि कुर्या हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनो ऽन्ये इत्यत्र तद्दर्शनात्। अत्र सिद्धान्ते ऽप्यप्रत्याख्येयेन जीवलिङ्गेनाभिभूतं ब्रह्मलिङ्गं ब्रह्मलिङ्गनिर्वाहकमहावाक्यतारूपोपायकथनात् प्राङ् नोन्मिषतीत्यस्पष्टब्रह्मलिङ्गता* ॥

* अत्र सप्तमम् (अष्टमं वा) प्रमिताधिकरणं पूर्णम्।

तदुपर्यपि बादरायणः संभवात् ॥ २६ ॥ १६१

ननु देवाधिकारचिन्ता नास्मदादीनां प्रवृत्तावुपयुक्ता नापि देवानां तेषां स्वकीयविग्रहवत्त्वे तत्प्रयुक्तसामर्थ्यादिमत्त्वे च सिद्धान्तन्यायनिरपेक्षावगतिसद्भावादित्याशङ्क्याह **अधिकारेति** । क्रममुक्तिफला देवतापदप्राप्तिद्वारा मुक्तिपर्यन्ता उपास्तयः । एतदुपलक्षणं देवतानां सिद्धावन्तरादित्यविद्यादिष्वादित्यदेवताद्यन्तर्वर्तित्वेन ब्रह्मोपासनं न तु ज्योतिर्मण्डलाद्यन्तर्वर्तित्वेन उपकोसलपञ्चाग्निविद्ययोरर्चिराद्यभिमानिदेवतानां मार्गपर्वत्वेन चिन्तनं न त्वर्चिरादीनामचेतनानामित्युपासनायां विशेषसिद्धिः तं देवा भक्षयन्तीत्यादिश्रवणेन वैराग्यसिद्धिः मन्त्रार्थवादाः प्राप्तिविरोधयोरसतोः प्रतीयमाने ऽर्थे प्रामाण्यं न जहति देवताविग्रहप्रसाधनोपयोगिन्यायव्युत्पन्नस्य प्लवा ह्येते अदृढा यज्ञरूपाः जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमित्यादिवाक्यश्रवणेन विवेकवैराग्यादिसिद्धिरित्यादिकमपि देवताधिकरणप्रवर्तनस्य फलं द्रष्टव्यम् । विद्वतोपयोगादाह **आगमादेरिति** । आदिशब्देन आगमार्थनिर्णायकन्यायग्रहणम् ।

स्मर्यमाण इति । यद्यपि देवानामुपनीताधिकारिकवेदाध्ययना- ” । संभवे ऽपि काव्यानामिव लौकिकमध्ययनं वक्तुं शक्यं वेदाध्ययननियमस्य स्वशाखाविषयत्वाद् देवानां शाखानियमाभावात् तथापि स्वयंभातवेदतदर्थानां तेषामध्ययनं न कल्पनीयमिति तात्पर्य्यम् । ननूपनयनं न केवलमध्ययनाधिकारार्थं किं तु सर्वकर्माधिकारार्थम् । अत एव समर्थस्यापि संध्यावन्दनादिकमुपनयनादूर्ध्वमिष्यते । मूकबधिरादीनाम् अध्ययनाभावे ऽपि शक्यनित्यकर्मानुष्ठानार्थमुपनयनमिष्यते । तस्मिँस्तु शिष्यमाणानि जननेन प्रवर्तेरन्निति* पूर्वतन्त्राधिकरणे ऽपि तथैव निर्णीतम् । सत्यम् । त्रैवर्णिकानामेव तत्कर्माधिकारहेतुस्तान्प्रति विहितत्वादत एव शूद्राणामुपनयनाभावे ऽपि स्वधर्मेषु सामान्यधर्मेषु वा ऽधिकारः ।

चतुर्थ्यन्तशब्दप्रतीतमात्रमिति । आखण्डलादिः प्रसिद्धार्थ ” इत्यर्थः† । ननु देवताया विग्रहवत्त्वे दर्शिते क्रतुदेशेषु सन्निधानाभावेन

* जै॰ सू॰ अ॰ ६ पा॰ ८ सू॰ २१ ।

† मण्डलादिः प्रसिद्धार्थ इति च पु ।

कर्मविरोध* इहापि तुल्यः असंभवत्परिहारश्चेति विशेषः । न हि विग्रहवत्या देवताया इवाचेतनदेवताया विग्रहभेदैरनेकत्र क्रतुदेशे सन्निधानमुपपादयितुं शक्यम् । न च विग्रहवतोऽङ्गस्य सन्निधाननियमः विग्रहरहितस्यापि स्रुगादेः सन्निधाननियमदर्शनेन विशेषणवैयर्थ्यात् । उक्तनियमस्य प्रवसद्यजमाने व्यभिचारेण विग्रहरहितस्यैवाङ्गस्य सन्निधाननियमदर्शनाच्च । न च प्रवसद्यजमानकर्तृकविष्णुक्रमादौ व्यभिचारः । मूर्तस्येति विशेषयितुं शक्यत्वादिति शङ्कानिवारणाय गृहीतमर्थोपहितपक्षं व्याचष्टे **तादृगिति ।** नन्वेवमर्थस्याङ्गभूतशब्दोपलक्षणताया विग्रहवत्त्वपक्षे ऽपि वक्तुं शक्यत्वान्न तस्मिन् पक्षे कर्मणि विरोधो दूषणमिति चेत् । सत्यम् । असारमपीदं दूषणं देवताविग्रहद्वेषान्धैरुद्भावितमिति पूर्वपक्ष्युपहसनार्थमिन्द्रादीनां वस्तुतः क्रतुदेशे सन्निधानमस्तीति तात्त्विकार्थप्रदर्शनार्थं चानूदितम् ।

१६७ । १३ **इच्छामात्रमिति ।** इन्द्रागच्छेत्याद्याह्वानलिङ्गादिन्द्रादीनामागमनं स्वेच्छाधीनं वाच्यमित्यनेकक्रतुदेशागमननिर्वाहार्थमनेकशरीरसृष्टिरपि तदिच्छाधीना पर्यवस्येदित्येवं तदिच्छायाः शरीरसृष्टिकारणत्वसिद्धौ तदतिरिक्तकारणमेलनाभावाच्छरीरसृष्ट्याक्षेप इति भावः । **अधिष्ठात्रभावादिति ।** ईश्वरस्याधिष्ठातुः सत्त्वे ऽपीन्द्रादीनामिच्छया सृष्टौ तेषामप्यधिष्ठातृत्वं वाच्यं तन्न संभवतीत्याशयः । **एवकारदर्शनादिति ।** एतयैव निविदेत्येवकारेण यस्यां निविदि देवतासंख्या पृष्टा तयैव निविदोत्तरमाहेत्यर्थलाभादित्यर्थः । **द्वितीयामिति ।** देवतानामङ्गत्वे ऽपि नमस्कार्यत्ववत्केवलमुद्देश्यत्वे कर्तृकरणकर्माधिकरणादिवन्न संनिधानापेक्षेत्युपपादनार्था द्वितीया व्याख्या । **अत एवोपाध्यभाव इति ।** उपाधेरपि नरपतित्वादिवत् किंचिद्घटकपदार्थगतजात्यवच्छेदेनानुगतीकर्तव्यत्वाद् घटकपदार्थेष्वप्यलौकिकेषु प्रत्यभिज्ञाभावेनानुगतजात्यसिद्धेरित्यर्थः । **मन्त्रसिद्ध इति ।** आदित्यादिशब्दानामचेतनमण्डलादिवाचित्वपक्षे ऽपि तत्प्रवृत्तिनिमित्तभूता जातिर्लौकिकप्रत्यभिज्ञानेन न सिद्ध्यति । इदानीन्तनमण्डलादेर्दृश्यमानत्वे ऽपि प्राचीनमण्डलादेरतीतस्यैतद्द्रष्टृदृष्टिगोचरत्वात् । अतः

* कर्मणि विरोध इति २ पु० पा० ।

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयद् इत्यादिमन्त्रसिद्धे प्राचीने इदानीन्तने च प्रत्यभिज्ञानमपेक्ष्यते चेद् वेदाधीनमेव तदन्वेष्यं तदिहापि सुलभमिति भावः । इन्द्रादीनां पूर्वोत्तरविग्रहयोः संस्थानविशेषैक्ये जातिपक्षस्तदभावे स्वर्गाधिपत्याद्युपाधिपक्षः ।

शब्दं प्रतीति । शब्दप्रभवत्वहेतुं प्रसञ्जकं कृत्वा शब्दस्वरूपनिर्णिनीषया नायं प्रश्नः तथा सति स्फोटवादिना देवादीनां वर्णप्रभवत्वानुपपत्तेः स्फोटप्रभवत्वोपपत्तेश्चावक्तव्यत्वात् । तस्मादुक्तप्रकारेणाक्षेपो ऽयमित्यर्थः । मन्विन्द्रादिशब्दानां लौकिकपितृकृतपुत्रनामवद् व्यक्तिशब्दत्वे तेषां व्यक्तिवाचित्वं तत्तत्संकेतयितृपुरुषबुद्ध्यधीनं भवेदितीन्द्रादिपदघटितानां विधिवाक्यानां सकेतयितृस्वतन्त्रपुरुषबुद्ध्यधीनार्थप्रतिपादकत्वेन तत्सापेक्षत्वलक्षणाऽप्रामाण्यापत्त्या तच्चोदितकर्मणामननुष्ठानं स्यादिति कर्मणि विरोधापादने तेषां जातिशब्दत्वेन परिहर्तव्ये शब्दप्रभवत्वादिति हेतुः क्वोपयुज्यते शब्देनार्थस्मृतिसापेक्षा सृष्टिः स्रष्टव्यार्थस्य स्मर्यमाणार्थसमानजातीयत्वएव लोके घटादिषु दृष्टेति शब्दप्रभवत्वं जातिवाचित्वहेतु*सिद्ध्यर्थो हेतुरिति चेद् न । लोके दृष्टान्ताऽसंप्रतिपत्तेः । घटादिस्रष्टृर्थमपेक्षितस्य घटत्वादिजात्यभिव्यञ्जकाकृतिविशेषानुसन्धानस्य प्राक्तनतदनुभवादेव संभवेन घटादिशब्दानपेक्षणादनुष्ठेयार्थस्मृतावुपायान्तरसंभवे ऽपि मन्त्रेणैव संस्मर्तव्य इतिवत् स्रष्टव्यो घटादिर्वाचकशब्देनैव स्मर्तव्य इति नियमहेत्वभावात् । अत एव केचिदुपकरणैः कं चिदर्थं निर्मिमाणं दृष्ट्वा तद्वाचकानभिज्ञा अपि नानाशिल्पनिपुणास्तैरुपकरणैस्तथाभूतं व्यक्त्यन्तरं निर्मिमाणा दृश्यन्ते। उच्यते। शिल्पी शिल्पशास्त्रेभ्यो देवादीनां नामरूपाणि विज्ञाय प्रतिमादिकं निर्मिमातीति लोके दृष्टं तथैव हिरण्यगर्भो वेदेभ्यस्तानि विज्ञाय देवादीन् सृजति तस्य देवसृष्ट्युपयोगिनामरूपज्ञानार्थमेव हि स्रष्टाय तस्मै वेदप्रदानमपि श्रूयते यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति । भाष्योदाहृतश्रुतिस्मृतयो ऽप्यत्र प्रमाणम् । १६८

गृहीतस्येत्यस्य बधिरेणान्वयादध्याहरति अवधिरेणेति । तथा च बधिरेणागृहीतस्य गृहीतस्य वेति टीकायां बधिरेणेति श्रुतस्याऽगृहीतेना- १६९

---

* वाचित्वे हेत्विति २ पु॰ पा॰ ।

न्वय: अवधिरेवेत्यध्याहृतस्य गृहीतेनान्वय: इति विभाग: । टीकाया-
मङ्गत इत्यनेनैव संगतेरपि संग्रहादविदितसंगतिरिति पृथङ् न वक्तव्यमि-
त्याशङ्कायां हेतुनिर्देशार्थत्वेन तदुक्तिसाफल्यमुक्त्वा तदपेक्षहेतुकमनुमानं दर्श-
६९ । ३ यति शब्द इति । अङ्गेनेत्येतद्यावदङ्गपरं तेन योग्यतादिमत्किंचिदङ्गज्ञा-
नसाहित्यसंप्रति*पत्त्या न सिद्धसाधनम् । अङ्गत्वं मानविभाजकोपाध्यवच्छिन्नं
प्रति सहकारित्वं तेनादृष्टरूपाज्ञातस्य† सहकारित्वे ऽपि पक्षदृष्टान्तयोर्न वा-
धसाध्यवैकल्ये सिद्ध्यभावादेरज्ञातस्यानुमानमात्रे सहकारित्वाभ्युपगमे तु
दृष्टान्ते साध्यलाभाय भावरूपसहकारित्वं विवक्षणीयम् । हेतौ मानविभा-
जकोपाध्यवच्छेदेन संबन्धग्रहणापेक्षा विवक्षिता तेन कपिसंयुक्तो वृक्ष इति
ज्ञानजनके चक्षुषि न व्यभिचार: । **नार्थधीहेतुत्वइति** । अपूर्वावधार-
णात् प्रागर्थधियो जननाऽसंभवादर्थधीहेतुत्वम् अमानकमिति तदन्यथानु-
पपत्तिर्नोदेतीत्याशय: । **नानावर्णेति** । यथा खलु संध्यक्षरान्तर्गताकारे-
काराद्यतिरिक्तैकसंध्यक्षरावगतेस्तदतिरिक्त एकारादि: यथा वैकत्वसमुदाया-
तिरिक्तशतादिसंख्यावगतेस्तदतिरिक्ता शतादिसंख्या तथेति भाव: । तद्धे-
तुत्वेन साहित्यकल्पनायामित्यनुक्तेरुपालम्भ: । एकार्थधीहेतुत्वस्यैकत्वोपा-
धिताया एवोक्तत्वादित्याशङ्क्य व्याचष्टे **साहित्यमेकत्वमिति** । तथा च
बहुषु क्रमिकेषु वर्णेषु तद्धेतुत्वे ऽप्यसिद्धे यदि तद्धेतुत्वाधीनं तेष्वेकत्वं
संपाद्यते न तद्धेतुत्वं समर्थ्यते तदानीमन्योन्याश्रय इति भाव: ।

ननु तं च ध्वनय इति प्रत्येकव्यञ्जकत्वपक्षोपपादनमस्थाने ध्वनीनां
स्फोटव्यञ्जकत्वस्य प्रागनुक्ततया तत्र प्रत्येकसमुदायविकल्पानुत्थानादित्याशङ्क्य
१६९ । १७ तत: प्राक् टीकायां विवक्षितौ शङ्कापरिहारौ दर्शयति **नन्वज्ञातेष्विति** ।
ननु वर्णव्यङ्ग्यत्वोपपत्तेरिति कथ स्फोटस्य ध्वानव्यङ्ग्यत्वं हि टीकायामुक्तम् ।
सत्यम् । नित्यवर्णवादिमते वर्णाभिव्यञ्जकत्वाभिमता उदात्तानुदात्तह्रस्वदी-
र्घसानुनासिकनिरनुनासिकत्वादिधर्माश्रया ये ध्वनयस्तएव स्फोटवादिमते
स्फोटाभिव्यञ्जका: कत्वाद्याश्रया वर्णा ध्वनिस्फोटमध्ये नित्यानामनित्यानां वा
वर्णानामङ्गीकारे गौरवात् । वर्णवादिमते ऽखण्डेष्वेकारादिषु वास्तवाकाराद्यव-

---

* साहित्यसंप्रतीत्यसंगत: पाठ: २ पु० । † अदृष्टस्याज्ञातस्येति ५ पु पा० ।

यथाभावेन तदभिव्यञ्जककमिकध्वनिविशेषाणामेवाकारेकारादिरूपतया वक्तव्यत्वाच्च । सो ऽयं गकारः सो ऽयमुदात्तः सो ऽयं ह्रस्व इत्यादिप्रत्यभिज्ञानाङ्गत्वाद्यधिकरणध्वन्यभिव्यक्तेषु दर्पणमुखवदभिव्यञ्जकधर्मरूपितत्तया प्रतीयमानेषु वर्णस्फोटेष्विव तदेवेदं घटपदं तदेवेदं घटमानयेति वाक्यमित्यादिप्रत्यभिज्ञानां पदवाक्यस्फोटेष्वेव विश्रान्तेरिति स्फोटवादिमतम् । अतो न विरोधः ।

ज्वालादिप्रत्यभिज्ञानबाधोपलम्भाद्व्याप्त्यनुपपत्तिमाशङ्क्य व्याचष्टे **प्रत्यभिज्ञानस्येति । यो ऽनुभव इति ।** गकारेषु परस्परभेदानुभव इत्यर्थः । उरस्ताडनोक्त्या गकारादिभेदोपलम्भस्य शङ्काबीजस्यालाभमाशङ्क्य अतितारत्वं तेन लक्ष्यमित्याह **सार इति । न पूर्वहेत्वर्थमिति ।** न पूर्वप्रस्तुते हेतुसमर्पकमित्यर्थः । **तद्धेतुत्वे चेति ।** पूर्वप्रस्तुतार्थहेतुत्वे केन चिदुभयसिद्धेन हेतुना भेद एव निषेध्यो न त्वेकत्वं सिद्धं कृत्वा तेन हेतुना ऽनेकरूपत्वं निषेध्यं वर्णानां ध्वनिरूपाणामेकत्वस्य प्रतिवाद्यनङ्गीकृतत्वादित्यर्थः । **प्रकृतासंगतेरिति**[*] । यद्यपि भेदाभेदयोरेकत्र वास्तवत्वेनोभयप्रमाणयोरुपपत्तौ किमिति भेदज्ञानप्रत्यभिज्ञानयोर्बाध्यबाधकत्वकल्पनमित्याशङ्कानिराकरणार्थत्वेन प्रकृते कथं चित्सङ्गमयितुं शक्यं तथापि भेदाभेदपक्षस्य स्फोटवाद्यनङ्गीकृतत्वात् प्रकृतासंगतिरुक्ता । **उक्तमपि बाधकमिति ।** ननु वर्णा अपीत्यादिभाष्येणोक्तमप्यभेदबाधकमित्यर्थः । **अनेनावृत्त्येति ।** शङ्कापरत्वे एक एव सन्नित्यस्य एकश्चेदित्यर्थः । परिहारपरत्वे प्रत्यभिज्ञावधृतैकभाव[†] इत्यर्थ इति अर्थभेदो विवेचितः । १७०

अशब्दात्मक इति । ननु अशब्दात्मकः श्रावणो ध्वनिः पदार्थान्तरमिति भाष्यानुक्तानुवादः । गगनादिपञ्चभूतगुणः शब्दो ध्वनिरिति सिद्धान्तविरुद्धश्च वर्णविशेषाप्रतीतौ प्रतीतेरवर्णात्मक इत्यनुवादस्तु वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरतीति भाष्यानुवादो भवति किं त्वयुक्तानुवादः दूरे जनसंघकोलाहलप्रत्ययस्य दूरत्वदोषागृहीतकत्वादिकवर्णविषयत्वोपपत्तेः तत्र वर्णातिरिक्तस्य ध्वनेः कल्पने ऽपि समीपे तदग्रहणस्य सामीप्यदोषप्रयुक्ततया वक्तव्यत्वात् । एवं च तस्य वर्णत्वजातिविषयत्वस- १७१

* प्रकृतासङ्गतिरितीति २ पु॰ पा॰ । † प्रत्यभिज्ञावधृतैकभाव इति २ पु॰ पा॰ ।

ल्पनानिराकरणमप्यस्थानविजृम्भितं शब्दत्वादिसामान्यालिङ्गितवर्णव्यक्तिविषयत्वोपपत्तेः । न च तथाभूतवर्णविषयत्वाशङ्कापि ध्वनेर्भिन्नत्वाद् न प्रत्यभिज्ञानमस्तीति प्रत्यभिज्ञाभावोक्त्यैव निराकृतेति वाच्यम् । वर्णेषु सो ऽयं गकार इत्यादिवत्त्वया ध्वनित्वेनाभ्युपगते कोलाहले ऽपि स एव कोलाहलः पुनरुत्थित इति प्रत्यभिज्ञानसत्त्वाविशेषात् । ध्वनौ प्रत्यभिज्ञानं तज्जातीयविषयमिति तत्र वर्णे इव व्यक्त्यैक्यप्रत्यभिज्ञानाभाव उक्त इति चेद् न । तुल्यरूपयोः प्रत्यभिज्ञानयोरेकं तज्जातीयविषयम् अन्यद् व्यक्त्यैक्यविषयमिति कल्पनायां विनिगमनाविरहात् प्रत्यभिज्ञानावगतव्यक्त्यैक्येन जात्यसंप्रतिपत्तेर्वर्णे इव ध्वनावपि वक्तुं शक्यत्वात् । तस्मात्सर्वमिदमनुपपन्नमिति चेत् । उच्यते । अशब्दात्मक इति वर्णव्यतिरिक्तत्वमुक्तं पदार्थान्तरमिति प्रक्लृप्तप्रस्तुतवायुव्यतिरिक्तत्वं न प्रत्यभिज्ञानमस्तीत्येतद् व्यक्त्यैक्यप्रत्यभिज्ञानाभावपरम् । यद्यपि ध्वनौ वर्णे च प्रत्यभिज्ञानस्य व्यक्त्यैक्यविषयत्वमौत्सर्गिकं तथापि भेर्यादिध्वन्युत्थितौ वर्णोत्पत्त्यभावात् क्व चिट्टैदिकवाक्याद्यनुकारिवीणावेणवादिध्वन्युत्पत्तौ कोलाहलवचनवदस्फुटवर्णाकारप्रतीतिसत्त्वे ऽपि वर्णोत्पत्तिकारणस्थानकरणाभावेन तेषां वर्णच्छायानुकारिध्वनिमात्रतया वर्णत्वाभावात् तदसार्वत्रिकत्वाच्च भेर्यादिध्वनिषु श्रूयमाणतारत्वमन्दत्वादिभेदकधर्माणां वर्णाश्रयत्वस्य कल्पयितुमशक्यत्वादनन्यथासिद्धभेदप्रत्ययानुरोधेन ध्वनौ प्रत्यभिज्ञानं तज्जातीयविषयं पर्यवस्यति वर्णोच्चारणे तु हसितरुदितपशुपक्षिरुतानुकरणशङ्खाध्मानादिस्थले ध्वनिकारणत्वेन क्लृप्तस्य कण्ठादिवाय्वभिघातविशेषस्य सत्त्वात् । तारत्वप्राच्यत्वप्रतीच्यत्वादिश्रूयमाणधर्माणां ध्वनिधर्मत्वस्य क्लृप्तत्वात् कोलाहलप्रत्ययस्य हसितरुदितादिकोलाहलस्थले ध्वनिविषयत्वस्य क्लृप्तत्वेन जनसंघालापकोलाहलप्रत्ययस्यापि ध्वनिविषयत्वकल्पनौचित्याच्च वर्णाभिव्यक्तिकारणैर्ध्वन्युत्पत्तेरपि कल्पनोपपत्तेर्वर्णेषु तत्प्रतीतिस्तदुपाधिकेति बाधकाभावात् तत्र प्रत्यभिज्ञानमप्यौत्सर्गिक*व्यक्त्यैक्यविषयभावमवतिष्ठते । एवं च भिन्नत्वहेतुसाधितेन प्रत्यभिज्ञानाभावेन शब्दत्वादिसामान्यालिङ्गितवर्णाविषयत्वमिह साध्यते न

---

* ज्ञानमनपेतौत्सर्गिकेति २ पु० पा० ।

तु शब्दत्वादिसामान्याविषयत्वमेव । श्रावणत्वाद्वायुव्यतिरिक्तो ध्वनिरवर्णात्मकः गत्वादिवर्णविशेषाप्रतीतौ प्रतीयमानत्वादिति पूर्वमुक्तौ वर्णविशेषाऽप्रतीतावपि कोलाहलप्रत्ययः सामान्यधर्मालिङ्गितवर्णविषयो ऽस्त्विति शङ्काया एवावसरप्राप्ताया निराकर्तुमुचितत्वात् ।

नानेवेत्यवयवीति । स्फोटे वर्णभेदभानमवयवित्वभेद*भानम् । एकाराद्येकैकवर्णावयवेकाराकारादिभानमवयवभानम् । विसदृशपदव्यञ्जका इति । पदानि स्फोटाः ।

एकविधेति । यद्यपि नानापापालालाहाहादिशब्देष्वेकविधप्रयत्न- १७१
जन्यानेकाक्षररूपध्वनीनां तत्तत्स्फोटे अनेकाक्षररूपत्वावगाहिभेदभ्रमहेतुता दृष्टा तथापि प्रायोभिप्रायेणैतदुक्तम् । ननु पदतत्त्वमेकमित्यादिटीकाग्रन्थं पदबुद्धावित्यादिना गकारादिसादृश्यमित्यर्थ इत्यन्तेन ग्रन्थेन गङ्गौघ्यादिवर्णसमुदायान्तर्गतगकारौकारादिसदृशगकारौकारादिव्यङ्ग्ये गोपदस्फोटे परस्परभिन्नगङ्गौघ्यादिपदस्फोटसादृश्येन भेदभ्रमोपपादकं व्याख्याय तथा भिन्नत्वेन भ्रमकल्पितेषु व्यङ्ग्यभागेषु व्यञ्जकवर्णात्मकतारोपोपपादकतयैवं चेत्यादिटीकाग्रन्थः किमर्थं व्याख्यातः । न हि स्फोटे संनिहितवर्णसमुदायरूपत्वभ्रमस्तद्वर्णारोपाधिष्ठानतया भागभेदभ्रममपेक्षते तदभावे ऽप्येकस्मिन् दर्पणे व्याप्तानेकमुखादिप्रतिबिम्बयुक्ते तावन्मुखादिसमुदायरूपताभ्रमवद्व्यञ्जकानेकसमुदायरूपताभ्रमस्योपपत्तेः । विविधमणिकृतहारप्रतिबिम्बव्याप्ते तनुदीर्घकाचफलकादौ क्रमिकसजातीयविजातीयानेकमणिरूपताभ्रमवत्क्रमिकानेकसजातीयविजातीयानेकवर्णरूपताभ्रमस्योपपत्तेश्च । पदतत्त्वमेकमित्यादिटीकाग्रन्थस्त्वित्थं व्याख्यातुं शक्यः । यावन्तो गवादिपर्यायास्तैः सर्वैरप्येक एव स्फोटो ऽभिव्यज्यते । एकार्थप्रत्ययहेतोस्तस्य प्रतिपर्यायं भेदकल्पने गौरवात् प्रमाणाभावाच्चेति स्फोटवादिमतम् । एवं सत्येव लोकवेदप्रसिद्धानेकपर्यायाणां घटादीनां देवादीनां च केन वाचकेनोत्पत्तिमाश्रित्य शब्दप्रभवत्वं समर्थनीयमित्यवशिष्टनिगमाध्यवस्ययोरपि परिहारो भवति । एवं च गवादिपर्याया एकमेव स्फोटमभिव्यञ्जयन्तो ऽन्योन्यविसदृशघटकुम्भादिपद-

* अवयवत्वभेदेति १ पु॰ पा॰ ।

स्फोटव्यञ्जकघटकुम्भादिवर्णसमुदायसादृश्येन परस्परवैलक्षण्येन स्वव्यङ्ग्यस्य स्फोटस्य मिथो विसदृशघट*कुम्भादिपदस्फोटसादृश्यमापादयन्तस्तेन सादृश्येन हेतुनैकमपि स्फोटं नानेवावभासयन्तीति । अस्मिन् व्याख्याने प्रत्येकमभिव्यञ्जयन्त इत्येतद्गोशृङ्गिण्यादिवर्णसमुदायरूपध्वनयः प्रत्येकं स्फोटमभिव्यञ्जयन्तीत्येतत्परम् । तुल्यस्थानकरणनिष्पाद्यतयेत्यादि च तुल्यस्थानकरणनिष्पाद्यतया ये ऽन्योन्यसदृशास्तेभ्यो विलक्षणास्तत्तत्पदव्यञ्जका घटकुम्भादिध्वनयः तत्सादृश्येनेत्येतत्परम् । अभागमपि भागवदिति दृष्टान्तार्थम् । यथा संध्यक्षरमेकारादिकमखण्डमकारादिभागवदिव भाति एवमेकमपि स्फोटं पर्यायभेदा नानेवावभासयन्तीति । एवं व्याख्यानसंभवे ऽप्येकत्र स्फोटे गकारादिवर्णसमुदायरूपताप्रतीतिरेवोपपादनीयत्वेन प्रकृतत्वात् तदनुसारेण व्याख्यातम् । अनेकवर्णरूपत्वकल्पनायां भागकल्पनानपेक्षणे ऽपि तदपेक्षामङ्गीकृत्य तत्संभवो ऽप्युपपादितः ।

१७२ । २ **औपाधिकत्वस्वाभाविकत्वाभ्यामिति** । अन्यतरस्यौपाधिकत्वे ऽवश्यकल्पनीये एकत्वस्यैवौपाधिकत्वं कल्प्यम् । अन्यथा स्फोटरूपधर्म्यन्तरकल्पनागौरवप्रसङ्गादिति भावः । ननु विपरीतं गौरवं स्फोटपक्षे पर्याये ऽपि तदभिव्यङ्ग्यस्फोटैक्यादेकस्यैव स्फोटे घटादिशक्तेः कल्प्यत्वाद् वर्णपक्षे प्रतिपर्यायं शक्तिभेदकल्पनापत्तेरिति चेद् मैवम् । धर्म्यन्तरतद्गतशक्तिकल्पनापेक्षया क्लृप्तेषु वर्णेषु भेदेनापि शक्तिकल्पनस्य लघुत्वात् । अन्यथा घटकलशादिपर्यायाभिव्यक्ते स्फोटे गृहीतशक्तिकस्य पुंसो ऽप्रसिद्धपर्यायश्रवणे ऽपि प्रागगृहीतशक्तिकस्यैव स्फोटस्य तेनाभिव्यक्त्या ऽर्थप्रतीत्यापत्तेः । न च तत्पर्याया†भिव्यक्ते स्फोटे शक्तिग्रहस्तत्तत्पर्यायश्रवणे अर्थधीहेतुरिति वाच्यम् । एवं प्रतिपर्यायं शक्तिग्रहावश्यम्भावे तत्तत्पर्यायगतशक्तिग्रहो ऽर्थधीहेतुरिति कल्पनस्यैव लघुत्वात् । तदा हि शक्तिग्रहत्वेनैव कारणता न तु तत्तत्पर्यायाभिव्यक्तिगतशक्तिग्रहत्वेनेत्यवच्छेदकलाघवं लभ्यते । अवच्छेदकलाघवे च तन्निर्वाहाय तत्तत्पर्यायगतशक्तिभेदकल्पनागौरवं फलमुखत्वान्न दोषः । न चैवं वर्णसमुदायस्यैवैकत्वप्रत्ययविषयत्वे संध्यक्षराणामप्यकारादिवर्णसमुदायत्वापत्तिरिष्टत्वात् । अत एव मीमांसकैः ऋत्तु संध्य-

* घटेति नास्ति २ पु. ।   † तत्तत्पर्यायेति २ पु. पा. ।

स्वराणां सतां गीतिकाले वृद्धत्व प्राप्तानां ये आइभावा आउभावा न ते स्तो-
भवद्वर्णान्तरागमरूपाः किं तु वृद्धेषु संध्यक्षरेषु संश्लिष्टतया स्थिताना-
मवर्णेवर्णोवर्णानां गानकाले विश्लेषमात्रम् अगीतसंध्यक्षराभिव्यञ्जकमित्यु-
क्तम् । आश्वलायनेनापि विविच्य संध्यक्षराणामकारमिति याज्यान्ते प्लुतानां
संध्यक्षराणामकारं विश्लेष्य तं श्रावयेदिति विहितम् । पाणिनिनापि
प्लुतावैच इदुतौविति सूत्रेण ऐतिकायन औपगवेत्याद्युदाहरणेषु गुरोरनृतो
ऽनन्त्यस्येत्यादिसूत्रैरैचः प्लुतप्रसङ्गे तस्यान्त्यावयवाविकारोकारौ प्लवेते न तु
तदाद्यावयवो ऽकारो ऽपीति नियमितम् । श्रुतावपि तानेकधा समभरत्त-
देतदोमिति प्रणवस्य मात्रात्रयरूपत्वमुक्तम् । एवं संध्यक्षराणां वर्णसमुदाय-
रूपत्वे ऽपि तेषां मातृकासु पृथक् परिगणनं लृकारपृथक्परिगणनवत्प्रत्या-
हारसूत्रेषु हकारस्य द्विरुपादानवत्कार्यविशेषार्थतयोपपद्यते । एतेन शता-
दिसंख्या एकत्वादिसमुदायातिरिक्ता एवं सति न सिद्ध्येदित्यपि शङ्का निरस्ता
इष्टापत्ते*रेव । अत एव भाष्यं संभवत्यनेकस्यापि एकबुद्धिविषयत्वं पङ्क्तिर्वनं
सेना शतं सहस्रमित्यादिदर्शनादिति । यदि त्वेकत्वसमुदायातिरिक्तशतादि-
संख्यानङ्गीकारे कियतामेकत्वानां समुदायः शतसंख्या कियतां च सहस्र-
संख्येत्याद्यनवधारणादव्यवस्था स्यात् । शतस्यैकत्वानां समुदायः शतसं-
ख्येत्यादिव्यवस्थाकल्पने संख्यागततया शतादिसंख्याकल्पनं वक्तव्यम् ।
अत एकत्वादिसमुदायातिरिक्तशतादिसंख्याङ्गीकरणमनिवार्य्यम् । शतं
सहस्रमिति भाष्यं तु घटादिरूपसंख्येयाभिप्रायमिति समर्थ्येत तर्ह्युपन्यस्त-
कल्पकप्रमाणवशादतिरिक्तशतादिसंख्याकल्पने ऽपि वर्णसमुदायातिरिक्तस्फोटो
न कल्पनीयः कल्पकप्रमाणाभावादिति द्रष्टव्यम् ।

नन्वेकस्मृतिविषयत्वमेकत्वोपाधिश्चेत् तथाभूतेषु भिन्नदेशस्थेषु
वृक्षादिष्वतिप्रसङ्ग इत्याशङ्क्याह उपचारे हीति । न ह्येकदेशावस्थितेषु १७२
वृक्षेषु वनमित्येकत्वोपचारनिमित्तासंभवमात्रेण घटादिष्वपि तस्यास्तन्नि-
मित्तता प्रसज्यतइति भावः । एतेन समुदितानामिति । व्यस्तसमस्त-
प्रकारद्वयासंभवे स्फोटवादिनोक्ते समस्तपक्ष आश्रितः । एकस्मृतिविषय-
त्वेन समुदितत्वोक्तेरित्यर्थः । एकार्थधीहेतुतामिति । एकार्थधीहेतु-

* इष्टापत्तिरिति ख पु पा० ।

त्वरूपवाचकस्यावगत्यैव स्फोटवादिना ऽप्येकपदाध्यवसानं वक्तव्यम् । अन्यथा काव्यश्लोकादिश्रवणे तदन्तर्गतपदानां तत्तदर्थेष्वगृहीतशक्तिकस्यापि पुंस इदमेकं पदमिदमेकं पदमित्यादिक्रमेणैतावन्त्यत्र श्लोके पदानीत्यवधारणापत्तेः । प्रजापतेर्हृदयादिशब्दानां सामविशेषादिषु रूढिमजानतो ऽप्येतदेकं पदमित्यवधारणापत्तेश्च । अतः स्फोटवादिना ऽपि गकारादिवर्णसमुदाये एकस्मृत्यारूढे तत्तदर्थवाचकत्वेनानुसंगृहीते सति तेन स्फोटरूपस्य पदस्याभिव्यक्तिरङ्गीकरणीया एकस्फोटव्यञ्जकतया ऽनुसंहितेन वा तदभिव्यक्तिरङ्गीकरणीयेति तेनाप्युक्तरीत्या अन्योन्याश्रयपरिहार उपपादनीय एव ।

१७२ । १६ **समानाधिकरणश्रुतिगम्यमिति ।** उद्भिदा यागेन पशून् भावयेदिति करणभूतयागसामानाधिकरण्यम् । यदि सामानाधिकरण्यं समभिव्याहाररूपं वाक्यमिष्यते तदा सर्वाणि छन्दांस्यनुब्रूयाद्बहुयाजिन इत्यादिषु बहुयाजिशब्दार्थादिनिर्णयोपायभूता यो ब्राह्मणो बहुयाजी तस्य कुम्भ्या नाम गृह्णीयात् स हि गृहीतवसतीवरीक इत्यादिश्रुतिरुदाहर्तव्या । अत्र हि बहुयाजी सोमयाजी न तु बहुभिर्यागैरिष्टवानिति निर्णयोपायभूता तस्य गृहीतवसतीवरीकत्वप्रतिपादनी श्रुतिरिति निरूपितं संकर्षे* । युगपत्क्रमिकसर्ववर्णविषया स्मृतिर्न पृथक् पदावधारणोपायत्वेन परिगणिता किं तु सर्वोपायानुग्राहकत्वेन साधारण्युक्ता । असाधारण्यपि राजशब्दार्थादिनिर्णयोपायभूता पाणिन्यादिस्मृतिर्द्रष्टव्या । न च नित्यविभुषु वर्णेषु स्वतः क्रमाभावादुच्चारणक्रमो वाच्यः स च नास्ति मौनिश्लोके अनुसंधानक्रमो ऽपि मौनिलिखितलिप्यक्षरैर्युगपद्वर्णानुमितिस्थले नास्तीति वाच्यम् । तथापि क्रमिकलिपिभिर्लेखकानुसंधानक्रमविशेषितवर्णानुमित्युपपत्तेः । अवश्यञ्चैवं क्रमिकवर्णानुसंधानं स्फोटवादिना ऽप्युपपादनीयम् । शब्दानामर्थविशेषवाचकत्वस्यैकस्फोटव्यञ्जकत्वस्य वा ऽनुसंधानाभावे स्फोटाभिव्यञ्जकत्वासंभवस्योक्तत्वात् तदनुसंधानस्य च वर्णक्रमविशेषावगतिसापेक्षत्वात् । एतेन गकारादयः प्रत्येकं स्फोटमभिव्यञ्जयन्तीति मतान्तरं निरस्तम् । क्रमिकतावद्वर्णानुसंधाने ऽपि तदीयमर्थविशेषवाचकत्वमेकस्फोटव्यञ्जकत्वं

† संकर्ष=संकर्षकाण्डे, मीमांसाचिन्ते इत्यर्थः ।

वा अजानता स्फोटव्यक्तेरेकैकवर्णसाध्यत्वस्य शङ्कितुमप्यशक्यत्वात् । रत्नतत्त्वदृष्टान्तो ऽप्ययुक्तः । प्रतिसन्निकर्षं रत्नप्रत्यक्षवत्प्रतिवर्णं स्फोटप्रत्यक्षस्यानुभवसिद्धत्वाभावात् । रत्नतत्त्वप्रत्यक्षेषु स्पष्टाऽस्पष्टविशेषस्य रत्नजातिव्यञ्जकतल्लक्षणरूपसूक्ष्मविशेषविषयत्वाऽविषयत्वरूपस्यैवानुभवसिद्धत्वेन तद्वद् स्फोटे पूर्वपूर्वाभिव्यक्त्यविषयाणामुत्तरोत्तराभिव्यक्तिविषयाणां च विशेषाणामभावाच्च । तस्मात् क्रमविशेषविशिष्टवर्णसमुदायानुसंधानस्य स्फोटवादिना ऽप्युपपादनीयत्वात् तदुपपादने च तत एव पदैक्यानुभवस्यार्थप्रतीतिश्चोपपत्तेर्व्यर्था स्फोटकल्पना । तदेतत्सर्वं वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति स स्फोटो ऽर्थं व्यनक्तीति गरीयसी कल्पना स्यादिति भाष्येण दर्शितं स्पष्टमेवेति टीकाकल्पतरुग्रन्थयोर्न विवृतम् ।

ननु प्रत्यभिज्ञया वर्णानां नित्यविभुत्वाभ्युपगमे ध्वनीनामपि तथा तदुभयमभ्युपगन्तव्यं स्यात् । तारत्वादयस्तदुभयव्यञ्जकवायुधर्मा इत्यपि कल्पयितुं शक्यत्वात् । किं च वर्णा नित्यविभवस्तदभिव्यञ्जकध्वनयस्तारत्वाद्याश्रया इति कल्पने ध्वनय एव कत्वगत्वादीनामप्याश्रया इत्यपि कल्पनासंभवाद्वर्णा एवात्मानं न लभेरन् तैर्ध्वनिभिः पर्यायभेदेनाभिन्नस्यैकस्यैव स्फोटस्याभिव्यक्तया ततो ऽर्थप्रतीत्युपपत्तेरित्याशङ्कमानानां तुष्ट्यै भाष्यटीकयोर्वर्णानित्यत्वपक्षो ऽपि समाश्रितः स स्फुटत्वान्न व्याख्यातः ।

अवान्तरप्रलयस्थत्वमिति । यत्किञ्चित्प्रलयस्थत्वसाधने सौषुप्तिकप्रलयस्थत्वेनार्थान्तरं यावत्प्रलयस्थत्वसाधने महाप्रलयस्थत्वाभावेन बाध इत्यतो ऽवान्तरेति विशेषितम् ।

दृढीकृतमिति । मन्त्रार्थवादानां प्रतीयमाने ऽर्थे प्रामाण्यमङ्गीकृत्य १७३
चैन्द्रादीनां विग्रहः समर्थ्यते । तथा सति मन्त्रकृतो वृणीते संहिताकारपदकारसूत्रकारब्राह्मणकाराणां विश्वामित्रस्य सूक्तं भवतीत्यादिप्रामाण्याद्वेदस्य पौरुषेयत्वमङ्गीकार्यमित्याशङ्कानिराकरणेन दृढीकृतमित्यर्थः । तन्निराकरणमपि देवर्षिप्रभृतीनां वेदशब्दप्रभवत्वहेतोरत एवेति परामर्शादेव चतुर्मुखो हि वैदिकाच्छब्दात्तेषामसाधारणनामरूपकृत्यविशेषाननुसंधाय तथैव सृजति ततश्च विश्वामित्रादीनामपि वेदशब्देभ्यः पूर्वकल्पस्थितविश्वामित्रादिनामरूपकृत्यविशेषाननुसंधाय तथैव सृष्टत्वलाभे सत्यतीतवर्तमानकल्पगताः

सर्वे ऽपि विश्वामित्रादयो विश्वामित्रादिपदप्रापकपूर्वकल्पानुष्ठितपुण्यवशाद्विश्वामित्रसूक्तादीननधीत्यैव पश्यन्तीति तत्तत्सूक्तादिद्रष्टृत्वमेव तत्तत्कर्तृत्वं न तु सूक्तान्तरादिकर्तृत्वमिति पर्य्यवस्यति । विश्वामित्रस्य सूक्तमित्यादिवाक्यैर्विशिष्य विश्वामित्रादिसूक्तत्वेन यद्यन्निर्दिष्टं तत्तदेव* सूक्तं तैस्तैर्वाक्यैर्विश्वामित्रादिसूक्तत्वेनानुसंधाय तत्तत्सूक्तकर्तृत्वेन कल्पान्तरे विश्वामित्रादयः स्वयंभुवा सृज्यन्तइति वक्तव्यत्वात् । अन्यथा वेदशब्देभ्यस्तत्तत्कृत्यविशेषाननुसंधाय तेषामृषीणां स्रष्टृत्वा†नुपपत्तेरिति ।

१७२ । २४ महाप्रलये इति । नन्विन्द्रादीनां विग्रहवत्त्वप्रयुक्ता शङ्का ऽत्र निराकार्या । न चेयं शङ्का तत्प्रयुक्ता तेषां विग्रहानङ्गीकारे ऽपि यः कश्चिदिन्द्रादिप्रातिपदिकार्थः कल्प्यते यश्च गवादिशब्दार्थस्तस्य सर्वस्यापि महाप्रलये विनाशेन निराश्रयजात्यवस्थानायोगशङ्कायास्तुल्यत्वात् । उच्यते । पूर्वसूत्रदृढीकृतस्य वेदनित्यत्वस्य प्रकृतिमात्रावशेषे महाप्रलये वेदविच्छेदावश्यम्भावेन शैथिल्यशङ्कायां तन्निराकरणार्थमिदं सूत्रम् । तेन तदा जात्यभावप्रयुक्तशब्दविरोधशङ्कानिराकरणमप्यानुषङ्गिकतया लभ्यते महाप्रलयावृत्तावपीन्द्रादीनां समानरूपनामत्वात् तथात्वे च पूर्वकल्पे यैर्वेदवाक्यैरिन्द्रादिरूपं ज्ञात्वा तद्भावप्रेप्सया कैश्चित्कर्म्माण्यनुष्ठितानि तैरेव तत्कल्पितेन्द्रादिनामरूपाणि स्मृत्वा पुनः सृष्टौ तत्समाननामरूपैन्द्रादिभावेन तेषां सृष्टवाच्यत्वाद् वेदनित्यत्वसिद्धिः । तत्सृष्ट्यर्थं पूर्वकल्पवेदानुसंधानावश्यम्भावेन पुनः शब्दार्थानुपूर्वीभिन्न‡वेदान्तरसृष्टिकल्पकाभावादिति समाननामरूपत्वेन वेदनित्यत्वे साध्यमाने तत एव पूर्वोत्तरेन्द्राद्यनुगतजातेरपि सिद्धि§रिति देवताविग्रहाभावपक्षसाधारण्ये ऽपि सा शङ्का कण्ठत उपन्यस्ता । भाष्यटीकयोर्जात्यभावशङ्कासमाधानमस्फुटमपि सूत्रमात्रस्यास्त्वीत्या सूचितमिति प्रदर्शनार्थं मुख्यतया तत्र निराकरणीया|| तु शङ्का पूर्वसूत्र¶लिखिता ऽनुमानसाध्यस्य विशिष्यावान्तरप्रलय**स्थत्वरूपतया विवरणेनैवोन्मिषन्ती स्पष्टेति नोपन्यस्ता । शङ्काद्वयोपन्यासस्तु टीकायां स्पष्ट एव ।

* तदेवेति २ पु॰ पा॰ ।
† स्रष्टत्वेति २ पु॰ पा॰ । १ पु॰ उपरितनपाठो बहिः शोधितः ।
‡ आनुपूर्व्यभिन्नेति २ पु॰ पा॰ । § सिद्धेरिति १ पु॰ पा॰ ।
|| मुख्यनिराकरणीयेति २ पु॰ पा॰ । ¶ पूर्वसूत्रे इति २ पु॰ पा॰ । ** विप्रलयेति २ पु॰ पा॰ ।

नन्वाधुनिककृतकाव्याद्यध्यापकपरम्पराविच्छेदे ऽपि तदन्तर्गतवर्णानां
नित्यत्वं दृष्टं तथा वेदस्यापि स्यादित्याशङ्क्य व्याचष्टे **वाक्यरूपस्येति ।** १७२
प्रमाणानाश्रयत्वादिति । प्रमाणापेक्षज्ञानानामविद्यावतामेव प्रमाणाश्रयत्वं
निरविद्यस्य तु सर्वप्रपञ्चाधिष्ठानतया प्रमाणाधिष्ठानत्वे ऽपि न प्रमाणवत्त्व-
रूपं तदाश्रय*त्वम् । न हि कालस्य सर्वाधारस्य रूपाधारत्वे ऽपि घटादि-
वद् रूपवत्त्वमिति भावः । ननु सृष्टिसहकारिभूतवासनानपेक्षत्वं ब्रह्मणो
न युज्यतइति तस्यैव यथा कथं चिद्वासनाश्रयत्वं प्रशासितृत्वाद्याश्रयत्वव-
दङ्गीकार्य्यं वासनामात्रावशेषतया जीवानां वा स्थितिरङ्गीकार्य्या । अन्यथा
पूर्ववासनानुवृत्त्यभावे महासर्गादिकालसृष्टानां तत्प्रसूतानां च मनुष्यपशुपक्षि-
सरीसृपादीनां हिंस्राऽहिंस्रत्वादिविशेषतज्जात्यन्तरविषयविरोधादिप्रतिपत्तेः
स्तनपानादिप्रवृत्तेश्चासंभवादिति शङ्कानिराकरणार्थत्वेन ब्रह्मणश्चेति ग्रन्थम-
वतारयति **अथानपेक्ष्येति ।** नकाररहितः पाठश्चेत् सृजेदित्येतत्काक्वा
योजनीयम् । सृजेत्किं न सृजेदित्यर्थः । यस्मात्सकलकार्यप्रपञ्चविलयकाले अन्तः-
करणोपहितानां जीवानां तद्वासनानां व्यवस्थानमुपपादयितुमशक्यं तस्मात्स्व-
प्नदृष्टमनुष्यादिष्विव प्राग्वासनारहितेषु नवनवेष्वेव जीवेषु हिंस्राऽहिंस्रादिरूपा
सर्वा ऽपि व्यवस्थोपपादनीया महाप्रलयोत्तरादिभिरिति शङ्काभिप्रायः । **तासां
वासनाभिरिति ।** पूर्ववासनाभावे हिंस्राऽहिंस्रत्वादिव्यवस्थानुपपत्तेरवश्यं
वासनाऽवशेषः स्वीकार्यः । स्वप्नदृष्टमनुष्यादीनां प्राचीनवासनाभावे ऽपि स्वप्नद्र-
ष्टुर्व्यवस्थितत्वात्तज्जातिस्वभावानुभवजन्यवासनया तथा तथा ऽध्यास उपप-
द्यते । अत्र सर्वेषां जीवानां विलीनानां वासनाश्रयत्वाभावे कस्य वासनया
व्यवस्थोपपद्येत ब्रह्मणः पूर्ववासनातत्प्रयुक्तभ्रमवत्त्वाभावादिति भावः ।
सांसिद्धस्येति । सदा साक्षिण्यध्यस्ततया भासमाने ऽज्ञाने नागमस्य १७३ । १
प्रामाण्यं तस्य अप्राप्तार्थविषयत्वात् । नानुमानस्य सिद्धसाधनात् । चक्षुराद्य-
प्रवृत्तिः स्पष्टा । तत्रागमानुमानार्थापत्त्युपन्यासस्तु साक्षिसिद्धस्य तस्याभावरू-
पत्वशङ्कानिवृत्तये इत्यर्थापत्तिरूपप्रमाण‡पर्यवसायि भवति । तथापि जीवब्रह्म-
भेदं प्रपञ्चसत्यत्वं च मन्यमानं परं प्रत्यन्यत्प्रमाणमुपन्यसनीयमित्याकाङ्क्षाया-

---

* सदाश्रयेति २ पु. पा. ।
† वासनास्ताभिरिति २ पु. पा. ।
‡ प्रमाणपर्येति २ पु. पा. ।

माह प्रमाणं त्विति । डित्थगतत्वविशेषितप्रमाभावत्वानधिकरणत्वमनादेर्विशेषणदृष्टान्ते डित्थगतत्वविशेषणानधिकरण*रूपतया पर्यवस्यतीति दृष्टान्तसिद्धिः पक्षे प्रमाभावत्व†रूपविशेष्यानधिकरणत्वरूपतया पर्यवस्यतीति डित्थप्रमानिवर्त्यानादिभावरूपाऽज्ञानसिद्धिः । अन्यगतप्रमाभावस्य डित्थगतसुखादाभावस्य च डित्थप्रमाविरोधित्वाभावेन तन्निवर्तकतया पक्षे साध्यपर्यवसानासम्भवात् ।

१७३ । २० एतत् सुखादीनामिति । न च साध्ये प्रमाविशेषणं व्यर्थं न देयम् । अतः साध्यमेतत्सुखादिषु नास्तीति नोपाधेः साध्यव्यापकत्वभङ्ग इति वाच्यम् । एवं सोपाधिकत्वनिवारणेन व्याप्तिग्रहौपयिकतयैव प्रमाविशेषणस्य सप्रयोजनत्वात् । नन्वेवं डित्थगतत्वविशेषितप्रमाविरोधित्वानधिकरणानादिनिवर्तकत्वमप्युक्तहेतुना साधयितुं शक्यं तेन डित्थप्रमायाः स्वभावस्वसमानविषयातिरिक्ताऽनादिनिवर्तकत्वमपि सिद्ध्येदित्याभाससमानयोगक्षेमत्वपरिहारार्थमनुमानानुग्राहिकामर्थापत्तिमुपन्यस्यति त्वदुक्तमिति । यद्यपि त्वदुक्तमर्थं न जानामीति प्रत्यक्षमप्यज्ञाने ऽस्ति तथापि तस्य स्वमते साक्षिरूपत्वेन प्रमाणत्वाभावात् साक्षिसिद्धाज्ञाने‡ ऽभावत्वशङ्काव्यावृत्त्यर्थं प्रमाणोपन्यासस्य प्रस्तुतत्वाद् विवदमानस्य परस्य प्रत्यक्षेण तुष्ट्यभावाच्च तथाभूतव्यवहारान्यथानुपपत्तिरूपमर्थापत्तिप्रमाणमुदाहृतम् । सम्भाविताभावविषयत्वशङ्कानिरासप्रकारस्तु प्रत्यक्षार्थापत्त्योरुभयोरपि समानः ।

१७४ । १ सविषयस्येति । नन्वज्ञानविषयस्य साक्षिणा ऽवभासे ऽपि को मदुक्तो ऽर्थ इति पृष्टस्तमनुवदेदिति दूषणं समानम् । अज्ञानसुखदुःखादिवत्साक्षिभास्यव्यवहारयोग्यत्वात् । न च सामान्याकार एवाज्ञानविषयः साक्षिभास्यश्च न विशेषाकार इति सांप्रतमवगताऽनवगताकारयोरज्ञानविषयाऽविषयत्वोक्तेर्विरुद्धत्वात् प्रमाणावगतो हि सामान्याकारः तदनवगतश्च विशेषाकारः । अस्ति कश्चिद्वक्तृवाक्यस्यार्थ इति सामान्याकारस्यानवगमे ऽपि त्वदुक्तमर्थं न जानामीत्यनुभवव्यवहाराङ्गीकारे वक्तृवाक्यमश्रुतवतः श्रुतवतो ऽपि तदर्थवत्तामजानतश्च तत्प्रसङ्गाद् विशेषाकारस्य प्रमाणतो

---

* अनधिकरणत्वेति २ पु॰ पा॰ । † प्रभावत्वेति २ पु॰ पा॰ ।
‡ साक्षिसिद्धज्ञाने इति १ पु॰ ।

ऽवगते चोपन्यस्ताऽज्ञानानुभवव्यवहाराऽनुदयात् । तस्मात्प्रमाणाऽनवगत*विशेषाकारविषयमेवाज्ञानं तदवगतसामान्याकारावच्छेदेनानुभूयते व्यवह्रियते च । न चान्यविषयाज्ञानस्यान्यावच्छेदेनानुभवे ऽतिप्रसङ्गः सामान्यविशेषभावस्य नियामकत्वादित्यनुभवसिद्धं प्रकारमास्थायोपपादनीयं तज्ज्ञानाभावाऽज्ञानवादे ऽपि तुल्यम्। शास्त्रार्थजिज्ञासेति सकलानुभवसिद्धजिज्ञासानुभवो ऽप्येवमेवोपपादनीयः । अस्ति कश्चित्फलवान्वेदान्तशास्त्रस्यार्थ इति सामान्यनिश्चयरहितस्यायमेव तदर्थ इति विशेषनिश्चयवतश्च तज्जिज्ञासाऽनुदयेनाऽनवगतविशेषाकारजिज्ञासैवावगतसामान्याकारावच्छेदेनानुभूयते व्यवह्रियते चेति निर्वाहमन्तरेण गत्यन्तराभावात् । अतस्त्वदुक्तमर्थं न जानामीत्यनुभवस्य क्लृप्ताभावविषयत्वोपपत्तेर्न वस्त्वन्तरकल्पनं युक्तमिति चेत् । उच्यते । अभावत्वप्रकारकाधिकरणविशेषवृत्त्यभावज्ञाने तदधिकरणवृत्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिज्ञानापेक्षानियमोऽस्ति घटवति भूतले स घटो नास्तीति घटान्तराभावप्रतीतेरिव घटो नास्तीति तत्प्रतीतेः कदाप्यनुदयात्। तथाभूतप्रतियोगिज्ञानं तु ज्ञानाभावज्ञानापेक्षितं तदा संभावयितुं न शक्यम् । शास्त्रार्थज्ञानत्वस्य तदानीं तस्मिन्सति सामान्यज्ञाने सत्त्वात् । तस्मिन्नसतस्तद्विशेषज्ञानत्वस्य प्राग्विशेषानवगत्या ज्ञातुमशक्यत्वात् । अतः कारणाभावान्न तस्याभावज्ञानत्वमुपपादयितुं शक्यम् । विषयिज्ञाने तु न विषयतावच्छेदकावच्छिन्नविषयज्ञानापेक्षानियमो ऽस्ति जिज्ञासाज्ञानेन व्यभिचारा†दनवगतशास्त्रार्थविशेषज्ञानेच्छायाः शास्त्रार्थे जिज्ञासा इत्यवगतसामान्याकारावच्छेदेनानुभवदर्शनादतः कारणसंभवादज्ञानविषयमेव तदङ्गीकर्तुं युक्तम् । एतदभिप्रेत्य सविषयस्येति विशेषितम् । एवं च मम शास्त्रार्थज्ञानं नास्तीति ज्ञानमप्यज्ञानविषयमेव ज्ञानाभावस्य तु विशेषज्ञानानन्तरमेतावन्तं कालमित्यमिमं विशेषं नाज्ञासिषमित्यनुभव इति द्रष्टव्यम् ।

न च मानाभाव एवेति स्वयूथ्याशङ्का। इच्छा ईक्षणमिति। १७४ ।
तदैक्षतेति स्थाने सो ऽकामयतेति श्रुत्यन्तरदर्शनादिति भावः । वाचस्पतिना प्रपञ्चाकारपरिणाम्यविद्याश्रयत्वं जीवस्याभ्युपगतमिति तत्परिणाम-

---

* प्रमाणाऽनवगतेति २ पु॰ पा॰ । † ज्ञाने व्यभिचारादिति ४ पु॰ पा॰ ।

भूतज्ञानेच्छादिमत्त्वमपि जीवस्यैव युज्यते नेश्वरस्य अत ईश्वरसद्भावं व्यवहरन्नपि तत्र सर्वज्ञत्वाद्यनुपपत्तिहेतुमाश्रयन्वाचस्पतिः पर्य्यायेण परमे-
१७४ । ७ श्वरमपललापेति केषां चिद् दूषणं प्रत्याचष्टे **ईक्षितुरिति।** जीवज्ञाते परमेश्वरे शुक्तिशकले रजतस्येवारोप उपपद्यतइति परिहाराभिप्रायः । **घनाघना निविडा मेघा इति।** वर्षुकाब्दा घनाघना इति कोशकारः । घनश-ब्दस्य चलाचलपतापतादिवद् द्विर्वचनमागागमश्च । वर्षुकाब्दाः प्रायेण निबिडा भवन्तीत्यर्थतो निबिडा इति व्याख्यातम् । केषु चित्कोशेषु घना-निविडा घना मेघा इति पाठो दृश्यते स पाठो घनघनेति दीर्घरहितं मूलपाठमाश्रित्य । नन्वासेकसुहितानीत्ययुक्तो निर्देशः पूरणगुणसुहितार्थस-दव्ययतव्यसमानाधिकरणेनेति समासनिषेधादित्याशङ्क्य व्याचष्टे **बृंहिता-नीत्यर्थ इति।** तृप्त्यर्थानां सुहितादिशब्दानां षष्ठीसमासप्राप्तौ तन्निषेधपरं तत्र सुहितार्थग्रहणम् । इह तु बृंहितार्थोन्य एव सुहितशब्द इति तस्या-सेकशब्देन तृतीयासमासो युक्त इति भावः । न ह्यग्नेर्दैवतान्तरमग्निरस्तीति टीकाग्रन्थो ऽनुपपन्नः । अतीतकल्पाग्निसत्त्वात् तस्येदानीमग्निपदतन्नामनि-वृत्तावपि पित्रादीनां श्राद्धे इव पूर्वनाम्नोद्देशसम्भवाद् यष्टरीव भाविनी वृत्तिः यष्टव्ये वा भूता वृत्तिरित्यत्र नियामकाभावादित्याशङ्क्याह **सत्त्वे वेति।** अतीतानन्तकल्पाग्निषु को यष्टव्य इत्यत्र श्राद्धे तज्जन्मपित्रादयस्तद्रूपेण वसुरुद्रादयश्च यष्टव्या इत्यत्रेव व्यवस्थितनियामकाभावादविनिगमपरीहारार्थं यष्टव्यदेवतावाहनलिङ्गानुरोधार्थं वा ऽग्निना यष्टव्यस्याग्नेस्तदिष्टिकाले सत्त्वम-भ्युपेयम् । तथा चास्माभिरेको ऽग्निर्यष्टव्यस्तेनान्यो ऽग्निरिति व्यवस्थायां प्रमाणाभावात्स एवाग्निरस्माभिरपि यष्टव्यः स एवाग्न्यधिकारिकसर्वकर्मनि-र्वहणक्षम इति प्राचीनवैयर्थ्यमित्याशयः । तस्य ये प्राञ्चो रश्मय इति श्रुतौ
१७५ । ३ तस्येत्यस्य व्याख्यानम् **आदित्यस्येति।** पुष्पाश्रया अपः समादाय मधुकरैर्मधु निर्वर्त्यते अत्र कास्ता आपः याः समादाय मन्त्रभ्रमरैर्मधु निर्व-र्त्यते इत्याकाङ्क्षायां श्रुतावुक्तं ता अमृता आप इति । अत्र का आपः श्रुत्यु-क्ता* इति न ज्ञायते तच्छब्दश्च कथं प्रकृतपरामर्शी अपां च कथममृत-त्वमित्याकाङ्क्षायां तत्सर्वं विशदयितुं व्याचष्टे इत्याह **ता अमृता इति।**

* श्रुता इति २ पु॰ पा॰ ।

यादृङ् मधुकरैरिति । ऋच एव मधुकृत इत्यत्र मधुकरैर्निर्वर्त्यं मधु
तदुपसर्जनतया प्रस्तुतं तच्छब्देन परामृश्यते तच्छब्दस्य च स्त्रीलिङ्गबहु-
वचनान्तत्वम् अप्शब्दसामानाधिकरण्यात् । अप्शब्दश्च पुष्पानुप्रविष्टद्रवां-
शतुल्यकर्मानुप्रविष्टसोमादिद्रव्यपर इत्यौचित्यादेव लभ्यतइति भावः ।
टीकायां तु यानि चेत्यादिना सोमाद्याहुतिद्रव्यपरामर्शित्वमप्शब्दस्योक्तं तत्तु
ताः कर्मणि प्रयुक्ताः सोमाज्यपयोरूपा इति छान्दोग्यविवरणानुसारि । तस्मिन्
पक्षे श्रुतौ यद्वसूनां प्रातःसवनमित्यादिपूर्वोध्यायावसानखण्डे सवनद्वारा
सोमादीनां बुद्धिस्थत्वात् तत्परामर्शित्वमुपपादनीयम् ।

अमृतसाधनत्वादिति । पाकद्वारेणामृतीभावसाधनत्वादित्यर्थः ।
ऋङ्मन्त्रैः प्रयुक्तमिति । ननु यथा हि भ्रमरा इत्यादिटीकावाक्येन १७५
कर्मपुष्पेभ्यो रसस्यादित्यमधुरूपस्वस्थानानयनं भ्रमरसाम्यमुक्तं कथं तस्य
तस्य वाक्यस्य तात्पर्यं वक्तुमुपक्रम्य कर्मपुष्पेभ्यः फलरसस्रावणं तत्साम्य-
मित्युच्यते । नैष दोषः । टीकोक्तं साम्यं स्पष्टं मत्वा ता वाएता ऋच
इत्यादिश्रुत्युक्तसाम्ये ऽपि टीकायन्यस्य तात्पर्यमिति दर्शयितुं तथोक्तेः ।
तस्याः श्रुतेरयमर्थः । ता एताः कर्मसु प्रयुक्ता ऋचः एतदृग्वेदविहितं
कर्मौद्दिश्यातपन् आलोचनमकुर्वन् । तप आलोचने इति धातुः । आलोचन-
पूर्वकं व्यापारमकुर्वन्निति यावत् । भ्रमरा हि यथा पुष्पाणि स्वानुप्रविष्टद्रवां-
शरूपं रसं मुञ्चन्ति तथा मनस्यालोचनपूर्वकं चूषणव्यापारं कुर्वन्ति
तद्व्यापारेण च मधुरसो जायते एवं मन्त्राः प्रयोगसमवेतार्थस्मृतिरूपं स्वव्या-
पारमकुर्वन् तेन यशःप्रभृतिफलरूपरसस्रुतिरजायतेति । इदमेव भ्रमरसाम्यं
श्रुतावुक्तं मधुनः स्वस्थाननयनरूपमपि तत्साम्यमर्थाल्लभ्यतइति टीकायां
तदुक्तम् । **कर्मकुसुमेभ्य आहृत्याग्नौ हुतमिति ।** यद्यप्यग्नौ होमः
कर्मकुसुममेव तथापि होमशरीरानुप्रविष्टद्रव्यम् अग्नौ पाकेन रसात्मना
परिणमय्य नयनार्थं तस्य यो निष्कर्षः सो ऽयाहृत्येत्यनेन विवक्षितः ।
अग्नौ हुतमित्यनेन आनायपाङ्क्त्यानि* सुरभीणि कृत्वेति मन्त्रोक्तपाकवि-
शेषो विवक्षित इति द्रष्टव्यम् । यद्वा यजतिचोदनाचोदितेषु सोमादिषु

* अपदष्यानीति २ पु॰ पा॰ ।

देवतोद्देश्यकद्रव्यत्यागात्मकयागरूपात्प्रधानकर्मणो ऽन्यद् यागविनियुक्तद्रव्यसंस्काररूपं होमकर्मेत्याचार्यपक्षमनुसृत्य क्त्वाप्रत्ययेन पृथग् निर्देशः ।

१७५ । २५ विकल्पेनेति । नन्वष्टदोषदुष्टो विकल्पः किमर्थमाश्रीयते ऋच एव पुष्पमित्यादिप्राचीनपर्यायवचश्शरूप्यार्थमथर्वाङ्गिरस एव मधुकृत इति प्रथमश्रुतरूपकानुसाराद् इतिहासपुराणशब्दस्य आथर्वणं चतुर्थमितिहासपुराणं पञ्चममिति श्रुत्यन्तरावगतपौर्वापर्यसंबन्धेन लक्षणा ऽङ्गीकर्तुमुचिता । एवं च श्रुतमधुकृतां पुष्पाध्याहारः श्रुतपुष्पस्य मधुकृदध्याहारश्चेति क्लेशश्च परिहृतो भवति । न च इतिहासपुराणमन्त्रप्रयोज्यं कर्म वाचः स्तोम इत्यपि युज्यते । वाचः स्तोमे सर्वाण्याख्यानानि पारिप्लवं* शंसतीति वाक्यस्य तद्वाक्यशेषाम्नातमन्वाद्याख्यानपरतायाः† पारिप्लवाधिकरणे‡ वक्ष्यमाणत्वेतिहासपुराणगतोपाख्यानानां तत्र प्रयोगाऽप्रसक्तेः तेषां ऋगादिवन्मन्त्रत्वाभावाच्चेति चेत् सत्यम् । इतिहासपुराणं पुष्पमित्यस्य मुख्यार्थानुरोधेन पारिप्लवशब्दस्य वैदिकमैतिहासिकं पौराणिकं वा यदेव किंचिदाख्यानं मनसि परिप्लवते तादर्थ्यं परिकल्प्य कर्मप्रयोज्यत्वेनोपाख्यानानां मन्त्रत्वमुपचर्यार्थान्तरमपि वक्तुं शक्यमिति प्रौढ्येद व्याख्यानान्तरं कृतम् ।

आदेशा उपासनानीति । उपासनान्यत्र प्रथमाध्यायनिरूपितानि कर्माङ्गद्वान्युद्गीथोपासनानि प्रणवालम्बनानि विवक्षितानि न तु स्वतन्त्राणि प्रणवालम्बनोपासनानि तेषु ता अमृता आप इत्याद्यनन्वयात् । ज्ञातृज्ञेयभावश्चेति टीका अनुपपन्ना मधुविद्यायामुपास्योपासकभावातिरेकेण ज्ञातृज्ञेयभावाऽनुपदेशादित्याशङ्क्य वस्वादिगतस्योपासकभावपरतया व्याचष्टे वस्वादौ तु स चेति । देवान् प्रीणयतीति । प्रीणातेरेव सकर्मकत्वे ऽपि तत्स्फुटीकरणार्थं णिजध्याहारेण व्याख्यातम् ।

१७७ । १२ उत्सर्गप्राप्तमपीति । नन्वौत्सर्गिकदेवताविग्रहसमर्थक§मन्त्रपदानामर्थपरत्वं कथमनपेक्षामात्रेणापोद्यते । न ह्यनपेक्षामात्रेण रथ्यापतिततृणादिज्ञानप्रामाण्यमौत्सर्गिकं त्यज्यते कथं चाथानपेक्षा उद्दिश्य त्यागार्थे

---

* पारिप्लवे इति २ पु० पा० । † आख्यानसामान्यपरताया इति २ पु० पा० ।
‡ व्या० सू० अ० ३ पा० ४ सू० २३ । § समर्थकेति २ पु० पा० ।

ह्यवश्यं देवतापदैः कश्चिदर्थः समर्पणीयः स तु समभिव्याहृतपदान्तरसामर्थ्यप्राप्तो विग्रहवानेवास्तु तमुपेत्यार्थान्तरान्वेषणे को हेतुरिति चेदुच्यते । लोके तावदादित्यश्चन्द्रः कुजो बुधः कृत्तिका रोहिणीत्येवमादि*पदानामचेतनेषु ज्योतिर्विशेषेषु व्युत्पत्तिर्गृहीता इन्द्रो मित्र इत्यादिपदानामप्यनूराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवतेत्यादिश्रौतसामानाधिकरण्येन ज्योतिर्विशेषेषु वृत्तिरवगम्यते । पृथिव्यादिशब्दानां मृदादिषु वृत्तिः सुप्रसिद्धैव । न चैते ज्योतिरादिवचना अप्यादित्यादिशब्दाः समभिव्याहृतपदान्तरस्वारस्यानुरोधेन ज्योतिरभिमानिविग्रहवद्देवतापर्यन्ताः कल्पनीयाः । तथा सति सर्वेषामपि जुह्वादीनां यज्ञाङ्गानां जुहूरसि घृताचीनाम्ना शृणोत ग्रावाणः उच्छ्रयस्व वनस्पते इत्यादिमन्त्रलिङ्गैश्चेतनत्वकल्पनाप्रसङ्गात् । तस्मान्मन्त्रगतदेवतापदैरचेतनानां ज्योतिरादीनां समर्पणेन तत एवोद्देशाकाङ्क्षाशान्त्या पदान्तरसमर्पिततद्विग्रहाद्यामनपेक्षिततया प्रथमगृहीताचेतनव्युत्पत्तिविरोधेन च त्यागो युक्त इति भावः ।

साध्याविशिष्टत्वादिति । हेतोरसिद्धत्वेन साध्यतुल्यत्वादि- १११
त्यर्थः । **यथा प्रमाणान्तराविरोध इति ।** यत्र विधिशेषे ऽर्थवादे प्रमाणान्तरविरुद्धो यथाश्रुतार्थः तत्र गुणवादः परिग्राह्य इत्यर्थवादाधिकरणे† सामान्यतो व्युत्पादितम् । तत्र यजमानः प्रस्तर इत्यादिषु के गुणा इत्याकाङ्क्षायां तत्सिद्ध्यादयो गुणा इति तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रया इति तत्सिद्ध्यधिकरण‡सूत्रेणोक्तमित्यर्थः । सूत्रे गुणाश्रया इत्यस्य गुणशब्दप्रवृत्तिनिमित्तानीत्यर्थः । प्रस्तरे यजमानशब्दवृत्तौ यजमानस्य यत्कार्यं क्रतुनिर्वर्तनं तस्य सिद्धिः प्रस्तरेणापि भवतीति तत्सिद्धिर्निमित्तम् । आदित्यशब्दस्य यूपे वृत्तौ प्रत्यक्षदृश्यं तेजस्वित्वं निमित्तम् । एवं जात्यादिष्वप्युदाहार्यम् । तात्पर्याविषयस्य विशेषणस्याप्रमि-

* रोहिणी विद्युन्नक्षत्रमित्येवमादीति २ पु॰ पा॰ ।

† जै॰ सू॰ अ॰ १ पा॰ २ सू॰ ९-१८ ।

‡ जै॰ सू॰ अ॰ १ पा॰ ४ सू॰ २३ अत्र जातिः २४ सारूप्यात् २५ प्रशंसा २६ भूमा २७ लिङ्गसमवायात् २८ इति यथाक्रमं सूत्राणि पृथक् पृथग् दृश्यन्ते आनन्दाश्रममु॰ अ॰ र॰ मा॰ पुस्तके कलकत्तास्थएशियाटिक्सोसाइटीमुद्रितशाबरभाष्यपुस्तके च । परमेकसूत्रत्वमेवास्योचितम् । उपरितनसूत्राकारपठनाद्गुणाश्रया इति पदार्थप्रदर्शनात्तेषु च गुणाश्रया इति पदस्यानुपलम्भात् । सन्न्यासिकपुस्तके एकमेव सूत्रं दृश्यते । अपि प्रतीकरूपेण पृथक् ।

त्वे विशिष्टे ऽप्यप्रामाण्यापात इत्युक्ते तेन विशेषणाविधाने विशिष्टविध्यप्रवृत्तिरुक्तेति मन्यमानः शङ्कते **ननु विशिष्टविधिरिति**। विशेषणाप्रसिद्ध्यभिप्रायोद्घाटने कृते तदप्रसिद्धिरसिद्धा दध्ना जुहोति सोमेन यजेतेत्यादिषु दधिसोमादिविशेषणानां लोकप्रसिद्धत्वादिति पुनः शङ्कते **नन्विति**।

१८० । ४ **यथैतस्यैवेति**। अश्वं न त्वा वारवन्तमित्यस्यामृचि गीतं साम वारवन्तीयं तस्य रेवतीर्णः सधमाद इत्यादितृचसंबन्धः कवतीषु रथन्तरं गायेदिति वाक्येन कवतीरथन्तरसंबन्ध इव वाक्यान्तरेण न प्रसिद्ध इत्यनेनैव विधिवाक्येनावगम्यः। अस्य तत्र तात्पर्याभावेनाप्रामाण्ये तत्सिद्धिर्न स्यादित्यर्थः। नन्वप्रसिद्धविशेषणविशिष्टविधिरपर्य्यवस्यन् विशेषणविधिमिवाप्रसिद्धविशेषणस्वरूपमपि कल्पयेदेव तदभावे ऽपि विशिष्टविध्यपर्यवसानाविशेषात्। वस्तुतस्त्वत्र सर्वविशिष्टविधिसाधारण्येन कल्प्यो विशेषणविधिरेव तात्पर्येण विशेषणस्वरूपप्रसिद्ध्यर्थो भवतीति न तत्प्रसिद्ध्यर्थं शब्दान्तरकल्पनमपेक्ष्यते एवं खलु मीमांसकमर्य्यादा। चत्वारः साहस्रा इत्येकशब्दोपादानलक्षणसंघाताख्या निकायिन उपक्रम्य त्रिवृदग्निष्टुदग्निष्टोम इति प्रथममग्निष्टुतं विधाय वारवन्तीयमग्निष्टोमसाम कार्य्यमिति तस्य वैशेषिकगुणविधानानन्तरमेतस्यैव रेवतीष्विति श्रूयते निकायिनां च पूर्वस्योत्तरे*-ष्वित्यष्टमाध्यायाधिकरणे निकायिपूर्वरेषां प्रथमविकारत्वस्य स्थापितत्वादेतद्विधिविधेयः क्रतुः प्रथमाग्निष्टुद्विकारो भवति। ततश्चात्र रेवत्याधारवारवन्तीयसामसाध्याग्निष्टोमस्तोत्रभावनाविशिष्टक्रतुभावनाविधिना कल्प्यो विशेषणविधिर्नाग्निष्टोमस्तोत्रस्य न वा तद्गुणस्य वारवन्तीयस्य प्राप्त्यर्थः द्वयोरप्यतिदेशतः प्राप्तेः किं तु तदप्राप्तरेवतीवारवन्तीयसम्बन्धप्राप्त्यर्थं इति तत एव तत्सिद्धेर्न तत्सिद्ध्यर्थं कल्पनान्तरमपेक्षणीयम्। अतो विशिष्टविधितात्पर्या ऽविषयस्यापि विशेषणस्यात्र कल्प्यविशेषणविधितात्पर्यविषयत्वान्नाप्रामाणिकत्वप्रसक्तिरिति चेन्नैवम्। विशिष्टविधिरूपेणैव प्रमाणेन रेवतीवारवन्तीयसम्बन्धरूपविशेषणस्याप्यप्रमितौ तद्विशिष्टविषयस्य विधेः कल्पकस्य प्रमाणसिद्धत्वाभावापत्त्या ततो विशेषणविधिकल्पनस्यासम्भवेन तत्कल्पकस्य विशिष्टविधेरेव विशेषणस्वरूपे ऽपि प्रामाण्यस्यावश्यवक्तव्यत्वात्। यदाग्नेयो

* मी. सू. अ. ८ पा. १ सू. १६।

ऽष्टाकपालः सप्तदश प्राजापत्यान् पशूनित्यादीनां प्रथमप्रतीतद्रव्यदेवतासंबन्धकल्पिततद्विशिष्टयागविधीनां यागकल्पके द्रव्यदेवतासंबन्धरूपविशेषणे ऽपि प्रामाण्याभावे कल्पकप्रमित्यभावेन यागकल्पनाऽनुपपत्त्या तद्विशिष्टयागविधेरेवाप्रवृत्तिप्रसङ्गेन तस्यैवाप्रसिद्धविशेषणस्वरूपे तात्पर्याविषये ऽपि प्रामाण्यकल्पनावश्यम्भावाच्च । तद्वदर्थवादानां* तात्पर्याविषये ऽपि स्वार्थे प्रामाण्यं युज्यतएव । न च तात्पर्याभावमात्रेण शब्दसामर्थ्याज्जायमानं ज्ञानं तस्य ज्ञानस्यौत्सर्गिकं बाधकाभावेनानपोदितं प्रामाण्यं च निवारयितुं शक्यम् । न चादित्यादिपदानां ज्योतिरादिषु व्युत्पत्तिग्रहो बाधको ऽस्तीति शङ्कनीयम् । यथा स्रक्चन्दनवनिताहिमोष्णादिषु सुखजनकत्वतदजनकत्वदशयोः स्वर्गशब्दप्रयोगाऽप्रयोगदर्शनेनान्वयव्यतिरेकाभ्यामैहिकसाधारण्येन सुखमात्रवाचकत्वेनावगतस्य स्वर्गशब्दस्य यन्न दुःखेन संभिन्नमित्याद्यर्थवादावगताऽलौकिकसुखविशेषवाचकत्वावधारणादैहिकसुखेषु तत्प्रयोगो लाक्षणिकः कल्प्यते । एवं मन्त्रार्थवादावगतदेवताविशेषवाचिनां शब्दानां तत्तदभिमानविषयेषु ज्योतिरादिषु प्रयोगो लाक्षणिक इति कल्पनोपपत्तेः । यदि स्वर्गफलकर्मविध्यपेक्षितत्वादर्थवादावगते ऽपि सुखविशेषे स्वर्गशब्दस्य शक्तिकल्पनं तथाभूतसुखभोगोपयोगिभोगस्थानभोगोपकरणादिरूपलोकविशेषादिप्रतिपादकार्थवादानां तत्तल्लोकादिषु प्रामाण्यं चाभ्युपगम्येत तर्हि तच्छन्दोगब्राह्मणाद्याम्नातदेवतादर्शनसम्भाषणवशीकरणसालोक्यसायुज्यादिप्राप्तिफलककर्मोपासनाविध्यपेक्षितत्वान्नानाविधमहिमयुक्तदेवतातत्प्रतिपादकार्थवादानामपि तत्र तत्र प्रामाण्यमभ्युपगन्तव्यमिति समानम् । एवं च रोहिणी नक्षत्रमिन्द्रो देवतेत्यादिनक्षत्रदेवतावाक्येषु तस्यपदमध्याहर्तव्यमिति रोहिणीनक्षत्रस्येन्द्रो देवतेत्यादिरर्थो ग्राह्यः । अत एव नक्षत्रेष्टियाज्यानुवाक्यास्विन्द्रो ज्येष्ठामनुनक्षत्रमेतीत्यादिभेदनिर्देश इत्यलं विस्तरेण ।

समुदायस्येति । यदि लोकसिद्धानुभवानपलापार्थं पदार्थसंसर्गो वाक्यार्थ १८० । इष्यते तथापि तत्तत्पदार्थसंसर्गस्वरूपस्य वाक्यार्थस्य प्रतियोगिभेदेन भेदाद्वाक्यभेदो दुर्वारः । तस्मादेकार्थे विभागे साकाङ्क्षं पदकदम्बकं वाक्यमिति लक्षणेन देवस्य त्वेत्यत्र वाक्यैक्यं न सिद्ध्येदिति भावः । **एकप्रयोजनेति ।**

* तदर्थवादानामिति.२ पु॰ पा॰ ।

स्यादयं दोषो यदि लक्षणे ऽर्थशब्दः प्रतिपाद्यवाची स्यात् । प्रयोजनवाची त्वयम् । तथा चानुष्ठेयत्वेनोपयोगी मुख्यः प्रयोजनरूपो यो विशिष्टो ऽर्थो निर्वापरूपः तस्य सकलविशेषणविशिष्टस्यैकत्वादुक्तलक्षणेन देवस्य त्वेत्याद्येकं वाक्यमिति युज्यतएव । न च तथापि निर्वपामीत्यस्य देवस्य त्वा सवितुः प्रसवे निर्वपामीत्यादिप्रकारेण प्रत्येकमन्वयाद् वाक्यचतुष्टयं स्याद् भगो वां विभजत्वित्यादाविवार्थैक्ये ऽपि गुणानुसारेण प्रधानावृत्त्ययोगात् । चित्पतिस्त्वा पुनात्वित्यादिवाक्यचये गुणभूतस्यैवाच्छिद्रेणेत्यादिकस्याप्यावृत्तेश्चित्पत्यधिकरणे* वक्तव्यत्वादिति भावः । एवमधिकशङ्कापरिहारौ न च द्वाभ्यां द्वाभ्यामित्यादिटीकातद्व्याख्यानयोः स्पष्टीभविष्यत इति इहाधिकरणं सङ्क्षेपेण लिखितम् ।

१८१ । १ स्तुतिप्रतिपत्तिद्वारमिति । न चात्रापि प्रयाजवाक्यवदवान्तरतात्पर्यमिष्यतामिति शङ्कनीयम् । अर्थवादवृन्दस्य तल्लक्षणीयायां प्रयाजादिवद्विध्यन्वितायां स्तुतौ अवान्तरतात्पर्ये अवश्यवक्तव्ये सत्यत्वासत्यत्वौदासीन्येन प्रतीतमात्रतया स्तुत्युपकारिणि तद्द्वारभूते ऽप्यर्थे ऽवान्तरतात्पर्यकल्पनस्यायुक्तत्वात् तदभावे ऽपि मानान्तरप्राप्तिबाधरूपापवादराहित्यप्रतिष्ठितौत्सर्गिकप्रामाण्यबलाद् देवताविग्रहादिसिद्धौ तत एव देवताध्यानविधेर्देवतासायुज्यादिफलनिर्देशस्य चापेक्षाशान्त्या तदपेक्षाशान्त्यर्थमपि देवताविग्रहादितात्पर्यवद्वाक्यान्तरकल्पनस्यार्थवादपदवृन्दस्यैवावान्तरतात्पर्यकल्पनस्य चानपेक्षितत्वात् । व्युत्पत्तिविरोधस्य च फलनिर्देशापेक्षितदेवताविग्रहादिवाक्यप्रामाण्यस्यावश्याभ्युपगन्तव्यत्वेन तद्बलेनैव निरसनोपपत्तेः व्युत्पत्तिविरुद्धे तात्पर्यं न कल्पनीयमिति शङ्कायां तद्विरोधपरिहारार्थमस्यैव न्यायस्यापेक्षणीयत्वात् । देवताविग्रहाणामुद्देशोपयोगप्रदर्शनं फलनिर्देशोपयोगप्रदर्शनस्याप्युपलक्षणम् । तेन इन्द्रादिशब्दविषयो भविष्यत्युद्देशः । ऐन्द्रं दधीत्यादौ प्रथमोपस्थितस्येन्द्रादिशब्दस्य देवतात्वेनान्वयसंभवे तदधीनचरमोपस्थितिकस्यार्थस्य तथात्वेनान्वयकल्पनायोगात् शब्दे कार्यासंभवएवार्थे कार्यविज्ञानात् प्रसिद्धज्योतिरादिविषयो भविष्यत्युद्देशः । न ह्यश्वमेधे यन्मेहसि तस्मै स्वाहा यच्छकृत्करोषि तस्मै स्वाहेत्यादिमन्त्रानुष्ठेयहोमानां प्रसिद्धमेध्याश्रयमूत्रपुरीषादिकमन्तरेणोद्देश्यमस्तीति शङ्कानिरासो लभ्यते शब्दस्याचेत-

---

* जैमिनिसू० अ० ४ पा० १ सू० ४८ ।

नस्य वा देवतात्वे तदत्र देवतादर्शनसंभाषणादिफलकर्मोपासनाविधीनामप्रामाण्यप्रसङ्गेन सङ्कर्षादिषु तथोक्तेरन्वाहृद्यवादत्वात् प्रथमोपस्थिते शब्दे कार्यान्वयस्यौत्सर्गिकत्वे च ऋचि प्रणवं दधातीत्यत्रापि प्रणवशब्दस्यैवानुवाक्यान्ते निधानापत्त्या तदर्थस्योंकारस्य निधानमिति व्यवस्थापयता संकर्षगतेनैवाधिकरणान्तरेण विरोधापत्तेश्च यत्नसाध्ययागभावनां यत्नरूपां प्रति स्वरूपेण यागस्य करणत्वासंभवात् फलशिरस्कभावनाकरणत्वं वाच्यम् तत्तु विवचितविवेकेन स्वर्गादिफलकरणत्वपर्य्यवसन्नमित्यभिप्रेत्य पक्षान्तरमाह तदीयफलांशं वेति ।

तदस्मन्मते ऽप्यविरुद्धमिति । नन्वतिथौ तत्प्रधानत्वं भावः १८२
कर्मणि स्यात्तस्य प्रीतिविधानत्वा*दिति देवताधिकरणगुणसूत्रेण यज्ञस्यातिथ्यवैषम्यम् आतिथ्यमतिथिप्रीत्यर्थं न तु यज्ञो देवताप्रीत्यर्थं इत्येवंरूपं दर्शितं तद्विरोधो यज्ञेन देवताप्रीतिमभ्युपगच्छतां दुर्वार इति चेत् । नैष दोषः । तत्र हि तस्य प्रीतिविधानत्वादिति हेतोरयमर्थः । येन येन यावता ऽतिथिः प्रीयते तेन तेन द्रव्येण तावता स पूजनीय इत्यातिथ्यमतिथिप्रधानम्† । कर्मणि तु नास्ति प्रीतिविधानं येन द्रव्येण यावता या देवता प्रीयते तेन तावता सा पूजनीयेति किं तु देवतैक्येपि तत्तत्कर्मविशेषव्यवस्थितैराज्यचरुपुरोडाशादिभिश्चतुर्गृहीतद्व्यवदानादिपरिमितैः स्वरुप्रस्तरादिभि‡रनदनीयैश्च यष्टव्यमित्येव विधानम् । अतस्तस्य प्रीतिविधानत्वादिति हेतुना ऽपि विरोधः । अस्माभिस्तु एतद्वै देव्यं मधु यद् घृतं यद्वै देवा हविर्जुषन्ते अल्पमप्येकामाहुतिमपि तद्विरिमाचं वर्द्धयन्तइत्याद्यर्थवाददर्शनेन हविषां देवतोचितद्रव्यरूपेण देवताभोजनपर्याप्तपरिमाणेन च विपरिणतिमङ्गीकृत्य देवताप्रीत्यर्थत्वं समर्थ्यते न त्वस्मिन्मते ऽप्यातिथ्यन्यायेन तत्तद्देवताप्रीतिकरद्रव्यपरिमाणविधानमस्तीति न कश्चिद्विरोधः ।

देवादीन् स्मृत्वेति । ननु एते असृग्रमिति मन्त्रस्यायमर्थः । ,, । ४
एते इन्दवः सोमास्तिरःपवित्रं तिर्यग्भूतं दशापवित्रं प्रति आशवः शीघ्रगामिनः विश्वा सौभगा सर्वाणि सौभाग्यानि अभि उद्दिश्यासृग्रमसृज्यन्तेति । एवं प्रतीयमानार्थानुसारेणैव सोमलतादेवत्ये§ विनियोगो ऽस्य

* जै॰ सू॰ अ॰ ८ पा॰ १ सू॰ १०।
† इत्यातिथिप्रधानमिति २ पु॰ पा॰।
‡ स्वरुप्रस्तरादिभिरिति २ पु॰ पा॰।
§ देवत्ये इति २ पु॰ पा॰।

मन्त्रस्य श्रूयते बहिष्पवमानेन वै यज्ञः सृज्यते यदेते असृग्रमिन्दव इति प्रस्तौति यज्ञमेव तत्सृष्टं देवेभ्यः प्राहेति कथमेवमन्यपराणामेतइत्यादीनां देवतास्मारकत्वं कथं च साधारणे रेत इत्यादिभिस्ततद्देवाद्यसाधारणाग्निसूर्यादिपदैरिव ततद्देवादिजातीयव्यक्त्यन्तरसृष्ट्यनुकूलपरस्परव्यावृत्तजातिसंस्थानविशेषावच्छिन्नततद्देवाद्युपस्थितिः । उच्यते । एते असृग्रमिन्दव इति बहुभ्यः प्रतिपदं कुर्यादेतइति सर्वामेवैनां वृद्धे भूत्याभिवदतीति विनियोगानुसारेण सोमविशेषणतया स्थितस्याप्येतइत्यस्य सचादियजमानप्रकाशकत्वं वक्तव्यम् । तद्वदेतइति वै प्रजापतिरित्यादिवाक्यानुसारेण सृष्टारं प्रत्येतइत्यादिपदानां ततद्देवताविशेषरूपादिस्मारकत्वमपि भविष्यतीति न का चिदनुपपत्तिः ।

१८३ । ८ जिते वशीकृते । अणिमादाविति । पार्थिवाद्यैश्वर्योपलक्षणमेतत् । सन्ति हि पार्थिवादीनि प्रत्येकमष्टावष्टावैश्वर्याणि ।

ह्रस्वता स्थूलता बाल्यं वार्द्धकं यौवनं तथा ।
नानाजातिस्वरूपत्वं तथा सुरभिगन्धता ॥
पार्थिवांशं विना भूतैश्चतुर्भिर्देहधारणम् ।
गन्धतन्मात्रतत्त्वोत्थमेतदष्टगुणं महत् ॥

इत्याद्यागमप्रसिद्धानि । शक्तिभिश्च तद्भिस्यैरिति । पृथिव्यादिशक्तयो निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीताख्याः पृथिव्यादिबिम्बाश्चतुरस्रधनुराकारत्रिकोणषट्कोणबिन्दुरूपाणि मण्डलानि । सारूप्यमिति । स्वात्मरूपतोपासनां कृत्वेत्यर्थः* ॥

„ । १४ **शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३४ ॥**

ननु शूद्रस्याध्ययनाभावे विद्यानधिकारशङ्कायामग्न्यभावे ऽपि तदधिकारः संभवतीति समाधानमसंगतमित्याशङ्क्य तत्साङ्गत्याय पूर्वतन्त्राधिकरणेन† न गतार्थत्वशङ्केत्यवतारयति आगन्तुकं शास्त्रीयमिति । पूर्वतन्त्रे शूद्रस्य कर्मण्यनधिकारे ऽग्न्यभावो मूलयुक्तिसत्ता तस्या विद्याया-

* अत्र अष्टमं देवताधिकरणं पूर्णम् । † पूर्वत्राधिकरणेनेति २ पु० पा० ।

मप्रवृत्तेः शूद्रस्य कर्मानधिकारे ऽपि विद्याधिकारः संभवेदित्यधिकपूर्वपक्षसद्भावाद् न गतार्थत्वमिति परिहारग्रन्थाशयं दर्शयति तत्राऽनग्नेरिति ।

नन्ववेद्यत्वमपि तत्र सिद्धान्तयुक्तित्वेनोक्तमतो गतार्थत्वं तदवस्थमि-
त्याशङ्क्याह अवैद्यत्वमिति । नन्वनग्नित्वं तत्र मूलयुक्तिः अवैद्यत्वमभ्युच्चय १८२
इत्युभयमप्ययुक्तम् । चातुर्वर्ण्यमविशेषा*दिति पूर्वतन्त्राधिकरणे निर्देशत्र-
याणां स्यादग्न्याधेये† इति सूत्रेण वसन्ते ब्राह्मणो ऽग्नीनादधीत ग्रीष्मे
राजन्यः शरदि वैश्य इत्याधानविधिवाक्यैस्त्रयाणामेवाधाने निर्देशादनग्नेः
शूद्रस्य नाधिकार इति सिद्धान्तयुक्तिं प्रथमं प्रदर्श्य निमित्तार्थेन बादरि-
स्तस्मात्सर्वाधिकारः स्या‡दित्यादिसूत्रैर्य एवं विद्वानग्निमाधत्तइति वाक्ये-
नाधाने सर्वसाधारणे विहिते वसन्तादिवाक्यानि ब्राह्मणादिनिमित्तेन वस-
न्तादिकालविधायकानि । अतो वसन्तादिवाक्यपर्यालोचनात् शूद्रस्याऽनग्नि-
त्वासिद्धेस्ततः कर्माऽनधिकारो न सिध्यतीति तामुक्तिं दूषयित्वा तदन्त-
रम् अपि वा वेदनिर्देशादपशूद्रं प्रतीयेते§ति सूत्रेण वेदाध्ययनार्थोपनयने
वसन्ते ब्राह्मणमुपनयीतेत्यादिवाक्यैस्त्रयाणामेव निर्देशादुपनयनरहितः
शूद्रो ऽध्ययनाभावात्कर्मसु नाधिकारीति सिद्धान्तयुक्तिं प्रदर्श्य गुणार्थि-
त्वान्नेति चे‖दिति सूत्रेण शूद्रः कर्मानुष्ठानायाध्ययनार्थित्वादुपनयनाभावे
ऽपि स्वयमेव गत्वा ऽध्येष्यतइत्याशङ्कामुद्भाव्य संस्कारस्य तदर्थत्वा¶दिति
सूत्रेणोपनयनसंस्कारस्याध्ययनार्थत्वादुपनयनाभावे स्वयमेव गत्वा ऽध्ययनं
विगुणं स्यादिति तां शङ्कां परिहृत्य विद्यानिर्देशान्नेति चेदि**ति सूत्रेण
कर्मानुष्ठानार्थमवश्यग्राह्यया विद्यया ऽऽक्षेपाल्लौकिकाध्ययनं भविष्यतीत्युपन-
यनपूर्वकवेदाध्ययनाभावेन न किं चिद्वैकल्यमिति शङ्कामुद्भाव्यावैद्यत्वा††दिति
सूत्रेण न शूद्रेणाध्येतव्यमिति शूद्रस्याध्ययनमात्रनिषेधाद्विद्यारहितस्य तस्य
कर्मसु नाधिकार इत्युक्त्वा तथा चान्यार्थदर्शनं‡‡मिति सूत्रेण पद्यु वाएतदित्या-

---

* जैमिनिसू॰ अ॰ ६ पा॰ १ सू २५ ।

† जै॰ सू॰ अ ६ पा १ सू॰ २६ । निर्देशस्त्रयाणामिति २ पु॰ । निर्देशाद्वा त्रयाणामिति सौत्र॰ पाठः ।

‡ जै सू अ॰ ६ पा॰ १ सू॰ २७ । सर्वाधिकारमिति सौत्रः पाठः ।

§ जै सू अ ६ पा॰ १ सू ३३ । अपशूद्राणां प्रतीयेतेति सौत्र॰ पाठः ।

‖ जै सू॰ अ ६ पा १ सू ३४ ।

¶ जै॰ सू अ ६ पा १ सू॰ ३५ ।

** जै सू अ॰ ६ पा॰ १ सू ३६ ।

†† जै सू अ ६ पा॰ १ सू ३७ ।

‡‡ जै सू॰ अ ६ पा॰ १ सू ३८ ।

दिश्रुतेः शूद्रसमीपे ऽध्ययनप्रतिषेधात् शूद्रस्य कथं विद्याध्ययनं न संभवतीति कैमुतिकन्यायदर्शनेनावेद्यत्वादिति सूत्रोक्तयुक्तेर्दृढीकरणात् । न हि सूत्रकृता स्वयमेव निराकृता युक्तिर्मूलयुक्तिः बहुभिराक्षेपसमाधानैरुपपादिता ऽभ्युच्चययुक्तिरिति युज्यतइति चेत् । उच्यते । अनग्नित्वं मूलयुक्तिर्भवत्येव । द्वितीयाधानाधिकरणे* वसन्तादिवाक्यानां निमित्तार्थत्वं निराकृत्य ब्राह्मणादिसंयुक्ताधानविधायकतायाः समर्थितत्वात् । अन्यथा तत्समर्थनार्थमेव प्रवृत्तस्य तस्याधिकरणस्यात्यन्तवैयर्थ्यापत्तेः । अत एव शबरस्वामिभिरस्मिन्नधिकरणे य एवं विद्वानग्निमाधत्तइति वाक्यं संभारविधिशेषार्थवादो न त्वाधानविधायकम् । तद्विधायकानि तु वसन्तादिवाक्यान्येवेति सूत्रकाराभिप्रायवर्णनेनानग्नित्वस्य मूलयुक्तित्वं प्रतिष्ठापितम् । एवमाधानाधिकरणसिद्धानग्नित्वस्य पुनः कीर्तनमाभिप्रायिकपरिहारेण य एवं विद्वानग्निमाधत्तइति वाक्यावलम्बनशङ्कानिरासार्थमेव । अन्यथा महर्षिवरनिर्मितानां सूत्राणां परस्परविरोधापत्तेः । एवमनग्नित्वेन सिद्धे ऽनधिकारे ऽध्ययनाभावो ऽभ्युच्चय इत्येतत् तदुपपादकस्याध्ययनविधिपुरुषार्थत्वनिरासस्याभावादिति मूले एव स्पष्टम् ।

नन्विहापि शास्त्रे ऽध्ययनविधिपुरुषार्थत्वनिरासः सूत्रकृता न कृत
१८४ । २ इत्याशङ्क्याह इह संस्कारेति । ननु संस्कारपरामर्शात्† दिति सूत्रं शूद्रस्य विद्याङ्गोपनयनाभावाद् विद्यानधिकारपरम् । न च तदनन्तरमध्ययनस्य संस्कारकर्मत्वव्यवस्थापकं सूत्रान्तरमस्तीति चेत् । उच्यते । पूर्वतन्त्राधिकरणे ऽनग्नित्वयुक्त्या ऽपि कर्मानधिकारसिद्धेस्तत्रानुपपादितमप्यध्ययनस्य संस्कारकर्मत्वम् इहावेद्यत्वमार्गेणोपपादनीयस्य विद्याऽनधिकारस्य समर्थनार्थमवश्यमुपपादनीयम् । अतस्तदुपपादनमपि संस्कारपरामर्शादित्यनेन स्वाध्यायस्याध्ययनसंस्कारसंबन्धादित्यर्थकेन विवक्षितमिति वक्तव्यमेव । अत एव टीकाकृता तदेव सूत्रं मूलं मनसिकृत्याध्ययनस्य संस्कारकर्मत्वं व्यवस्थापितम् । ततश्चाध्ययनसंस्कारः शूद्रेणापि क्रियतामित्याशङ्कापरिहारार्थे संस्कारपरामर्शादित्येतदेवाध्ययनाङ्गत्वेनोपनयनसंस्कारविधानादित्येतदर्थत्वेनापि योजनीयम् । अस्त्यध्ययनाङ्गोपनयनं शूद्रस्यापि विप्रस्य

* जै. सू. अ. ६ पा. ३ सू. ४ । † ब्र. सू. अ. १ पा. ३ सू. ३६ ।

स्वयमुपगमने ऽप्याचार्यानुमतिरूपं तत्कर्तृकस्वसमीपप्रापणं विना ऽध्येतुमश-
क्यतया ऽर्थप्राप्ते उपनयने वसन्तादिवाक्यानां निमित्तार्थत्वोपपत्तेरिति शङ्कायां
तदभावाभिलापा*च्चेत्येतद् न च संस्कारमर्हतीत्यनेनाध्ययनाङ्गोपनयनाभा-
वस्याप्यभिलापादित्येतत्परमपि योजनीयम् । एवमर्थभेदेन सूत्रभेदमभिप्रेत्य
संस्कारपरामर्शादित्यादिसूत्रैरिति बहुवचननिर्देश इति सर्वमनवद्यम् ।

इदं तु चिन्त्यते । इहत्याधिकरणगतसंस्कारशब्दस्यैव पूर्वतन्त्रा-
पशूद्राधिकरणगतस्य संस्कारस्य तदर्थत्वा†दिति सूत्रस्थितसंस्कारशब्दस्या-
प्यध्ययनसंस्कारार्थत्वमपि परिकल्प्य शक्यमुपपादयितुं तथाप्यध्ययनस्य
संस्कारकर्मत्वं प्रसाधितमिति कर्म वा विलक्षणं‡मिति नावमिकाधिकर-
णेनापि तत् सिद्धम् । तत्र ह्यधिकरणे द्वितीयसप्तमाध्याययोर्गीतिक्रिया-
रूपत्वेनोक्तस्य साम्नो ऽर्थकर्मत्वनिरासेन ऋगक्षराभिव्यञ्जकतया संस्कार-
कर्मत्वं व्यवस्थापितम् । तद्व्यवस्थापनं च स्वरविशेषविशिष्टतया ऋग्वर्णाभि-
व्यञ्जकस्य उच्चारणस्यैव संस्कारकर्मत्वव्यवस्थापनं पर्यवस्यति । सामाध्य-
यनकाले तद्व्यतिरेकेण क्रियान्तराभावात्तदेवोच्चारणं गुरुमुखोच्चारणानन्तरभावि
सदध्ययनमुच्यतइति । तेन सामाध्ययनस्य संस्कारकर्मत्वसिद्धौ न्यायसा-
म्याद् वेदान्तराध्ययनस्यापि तथात्वं सिध्यति । किं बहुना । अथातो
धर्मजिज्ञासेति§ प्रथमाधिकरणेन कृत्स्नस्याप्यध्ययनस्य संस्कारकर्मत्वं
कण्ठत एव प्रसाधितम् । तत्र ह्यतःशब्दोक्तेन वेदस्य विवक्षितार्थत्वेन
सूचितम् अविवक्षितार्थत्वपूर्वपक्षं लिखद्भिर्व्याख्यातृभिस्तदुपपादनार्थम्
अध्ययनस्य स्वर्गार्थत्वोक्त्या पुरुषार्थत्वं स्पष्टमुक्तम् । तत्सिद्धान्ते अक्षरावा-
प्त्यर्थज्ञानान्यतरफलकत्वेन स्वाध्यायसंस्कारत्वं समर्थितम् । किं चात्र प्रसा-
धितेनाध्ययनस्य संस्कारकर्मत्वेन शूद्राधिकारशङ्का नापैतीति व्यर्थमिह
तत्प्रसाधनम् । स्वाध्यायाध्ययनविधेः स्वशाखाध्ययनविषयत्वेन शूद्रस्य
सर्वापि शाखा न स्वशाखेति तदध्येतृभ्यो गृहीत्वा विद्यानुष्ठानोपपत्तेः ।
अन्यथा मैत्रेयीवाचक्नवीप्रभृतीनां स्त्रीणां विद्यानुष्ठाने का गतिः । तस्मान्नेयं
गतार्थत्वशङ्कापरिहाररीतिर्युक्तेति ।

* व्या· सू· अ· १ पा· ३ सू· ३७ ।
† जै· सू· अ ६ पा १ सू· ३५ ।
‡ जै सू अ ६ पा· २ सू· १ ।
§ जै सू· अ १ पा· १ सू· १ ।

अथैदमुत्तरम् । शास्त्रभेदे ऽपि गतार्थत्वं परिहरणीयं चेद् विद्याधिकारिणः शूद्रेत्यामन्त्रणेन लिङ्गेन शूद्रस्य कर्मानधिकारे ऽपि विद्याधिकारो ऽस्तीत्यधिकशङ्कया न गतार्थत्वम् । न च शूद्रशब्दो यौगिक इति युक्तं रूढेर्बलवत्त्वात् । जानश्रुतेर्द्युव्याप्त ज्योतिर्नास्तीति मनुष्याद्यसंभावितगुणभाववचनरूपहंसवाक्यानादरश्रवणेन गगनमयं खादितुं न शक्नोतीति वाक्यश्रवणेनेव न तस्य शोकः किं तु रैक्कोपास्यदेवतोपासकस्य तदन्यस्यापि तदुपासना महाफलेति कथनेन रैक्कस्य महामहिमकीर्तनरूपस्तवनेन सयुग्वानमिति रैक्कचिह्नोपन्यासरूपेण तदुपगमनोपायोपदेशेन च महाफलविद्याग्रहणोपायो लब्ध इति जानश्रुतेर्मुदेवास्य संजातेति कल्पनौचित्येन शुगाद्रवणरूपयौगिकार्थासिद्धेश्च । न चात्र रूढिबाधकमस्ति येन यथा कथं चिद् योगः समाश्रीयेत अध्ययनसंस्काराभावस्य तदबाधकताया: समर्थितत्वात् । कर्मस्विव विद्यासु मन्त्राभावेन श्रवणादिप्रतिषेधस्याप्यबाधकत्वादिति । तदेतत्सूत्रभाष्यपर्यालोचनया स्फुटमिति न विवृतम् । विधान्तरेणागतार्थत्वं तु यथा कथं चिट्टीकोपपादनार्थमुपन्यस्तमित्यलं विस्तरेण ।

१८५ । १ **न हि करणसामान्यमिति ।** कर्मादिभिः करणैः संयोगविभागादिफलेषु जननीयेष्वितिकर्तव्यतापेक्षाभावादिति भावः । **किं तु विहितइति ।** विहितस्य करणविशेषस्य कथमनेन फलापूर्वमुत्पादनीयमिति तत्प्रकारस्यानिर्ज्ञातत्वात् कथंभावापेक्षोदेतीति भावः । **मा भूवन्नध्ययनादयः पुमर्था इति ।** बहुवचनमविवक्षितम् । अध्ययनं स्वाध्यायमात्रपरमर्थज्ञानस्य हितैषिवचनावगम्ययागादिफलसन्निकृष्टतया पुरुषार्थत्वमभ्युपगम्य तत्र नियमाशङ्कनात् । **द्वौ हीह पूर्वपक्षाविति ।** यथा कथं चित्सम्भवमात्रेण द्वितीयपूर्वपक्ष उपन्यस्तः । रैक्केणानुष्ठीयमानां विद्यां संवर्गविद्येत्यविज्ञाय सामान्यतो या तदीया विद्या तां लप्स्ये इति धियोपसन्नस्य धार्मिकस्य विवेकिनो जानश्रुतेः शूद्रेत्यामन्त्रणलिङ्गेन विद्यासामान्याधिकारपूर्वपक्षस्यापि दृढत्वात्* । अध्ययनाभावस्याबाधकताया उक्तत्वात् । ननु टीकाया विध्यपेक्षितत्वमप्यार्थयागादिकार्यसिद्ध्यपेक्ष्यमित्युक्तमिति प्रतिभाति तदयुक्तम् । बाधकाभावमात्रेण तत्सिद्ध्युपपत्तेरित्याशङ्क्य प्रयोजनकथनमात्रपरा तदुक्तिरिति -

* दृढत्वादिति २ पु॰ पा॰ ।

उक्तेत्यनुषङ्गः ।
व्याचष्टे **विधिना चापेक्षतइति** । **सप्रयोजनतेति** । उक्तेत्यनुषङ्गः ।
अवयववृत्तीति । शुचा दुद्रावेत्याद्यर्थेषु शूद्रशब्दस्य रुजं द्रावयतीत्यर्थे १८
रुद्रशब्दस्येव नैरुक्तप्रक्रियया निष्पत्तिः । उकारदैर्घ्यस्यापि तत एव सिद्धिः ।
राज्ञो विशिष्टविद्योपदेष्टृगुरुसद्भावावगमेन मोद इव हंसो यदभावान्मामदूदु-
हत् सा विद्या सत्यपि संनिहिते गुरावपि इयन्तं कालं मया न लब्धा तेन
तत्प्रयुक्तदूषणपात्रमभवमिति शोको ऽपि संभवत्संजिहान एव क्षत्तारमुवा-
चेति वाक्यप्रतीतकालाक्षमत्वलिङ्गाद्यवगमितो ऽस्त्येव मा प्रसाङ्क्षीरिति
विहितस्य सत्यकरणस्य फलवचनतया योजयितुं शक्यमपि मेतत्त्वा धाक्षी-
रित्येतदक्षानात् तत्सत्क्रियाकरणे ऽपि दाहो मा भूदित्याशीर्वचनतया योजयति
यदि करोषीति । धाक्षीरिति प्रथमपुरुषविषये मध्यमपुरुषश्छान्दसः । ननु
वरो वराकः शोच्य इति वरशब्देनैकदेशद्वारोच्यते चेत् प्रथमान्तस्य कथम-
न्वय इत्याकाङ्क्षायां वाक्यभेदेनोद्देश्यसमर्पकपदाध्याहारेण च योजयति
एष तावद्वराक इति । के चिदरे इति हीनसंबोधनार्थतया पदविभागं
कुर्वन्ति । तथा पदविभागे मय उञो वो वेत्युकारस्य वकारादेशेन
भाव्यम् पक्षे निपात एकाजनाङिति प्रगृह्यसंज्ञया प्रकृतिभावे सति कमु
अरइति वा भाव्यम् । अतः कम्वर*इति श्रुतिसंधिसिद्ध्यर्थे वकारोपजन
उकारोपजनो वा छान्दसः समाश्रयणीयः । न वा उ एतन्म्रियसे मरिष्य-
सीत्यादिवत् । **एनमित्थं सन्तं कमिति** । उद्दिश्येत्यध्याहार्यम् । ब्रूचि-
शासिगुणेन चेति संगृहीतमकथितकर्मत्वं वा कथं चित् समर्थनीयम् एतद्व-
चनमिति कर्मान्तरोपादानात् । यद्यप्येतत्सन्तमित्यस्य प्राणिमात्रमिति
टीकाया विवरणादीदृशं सन्तं मनुष्यसामान्यमर्यादामनतिक्रम्य वर्तमानमि-
त्यर्थो विवक्षित इति भाति तथापि छान्दोग्यविवरणानुसारादेतद्वचनमात्ये-
त्यन्वयो दर्शितः । **ब्राह्मणायनमित्यस्य** ब्राह्मणवंश्यमित्यर्थः । नडादिभ्यः
फगिति सूत्रेण नडादिगणपठिताद् ब्राह्मणशब्दाद् गोत्रापत्यार्थे फक्प्रत्यये
फस्यायनादेशे च सति तद्रूपनिष्पत्तेः । इदं ब्राह्मणवंश्यत्वं वेषेण ज्ञातव्यमिति
तज्ज्ञापकमुपन्यस्त **ब्राह्मणवेषमिति** । **निष्कण्याख्या हारमितीति** ।
यद्यपि निष्कं पदकरुचकशब्दाभिधेयं स्वर्णाभरणं हारो मणिमालेत्यस्ति

* कमुवरइति ग पु॰ पा॰ ।

लोके भेदव्यवहारः तथापि निष्कशब्दोक्तस्यार्थे हारे त्वेति हारशब्देन विवरणादेवं व्याख्यातम् । **अश्वतरीभ्यामिति** । अश्वायां गर्दभादुत्पन्ना गर्दभ्यामश्वादुत्पन्ना वा स्त्रीव्यक्तिरश्वतरी । **आ अधिकरणसमाप्तेरिति** । अनेन भाष्ये शूद्राधिकारनिषेधार्थत्वेनावतारितानां संस्कारपरामर्शा*दित्यादिसूत्राणामपि शूद्रामन्त्रणलिङ्गान्यथाकरणार्थत्ववचने तल्लिङ्गावलम्बनेनाधिकाशङ्का ऽत्र निराकरणीया । अन्यत्सर्वं पूर्वतन्त्रएव सिद्धमिह न व्युत्पादनीय-
१८६ । २० मिति सूचितम् । **तथापि द्योतकतयेति** । व्यभिचारमभ्युपेत्य परिहारः । अस्मिन्प्रकरणे संवर्गविद्यान्वयिनो ब्राह्मणस्य द्वितीयः क्षत्रिय इति नियमे तु नास्ति व्यभिचारः ।

ननूपन्यस्तलिङ्गसिद्ध्यर्थं प्रथममभिप्रतारिणः कापेययाज्यत्वं निर्द्धारणीयं तत्कुतो निर्द्धार्यते न हि भोजनार्थं कापेयाभिप्रतारिणौ सहोपविष्टावित्येतावता तयोः किं चित्सबन्धान्तरं सिध्यति । सिध्यद्वा तयोरेकविद्यत्वमेव तत्सिद्ध्येत् । विद्याङ्गोपाख्यानेषु सहप्रस्थितानां प्राचीनशालसत्ययज्ञादीनां तस्यैव संबन्धान्तरस्यान्योन्यस्माद्विद्याङ्गगतविशेषग्रहणार्थत्वेन क्लृप्तत्वात् । तस्य कथं चित्कापेययाज्यत्वसिद्धावपि नामभेदेन चित्ररथादन्यस्य तस्य चैत्ररथित्वं कुतः सिद्ध्यति समानान्वयानां समानान्वया याजका इति नियमाभावात् । कुलक्रमागता ऋत्विजः पितृभूताः कस्य चित्कस्य चिदाधानप्रभृति यावज्जीवमृत्विजो मनुष्यभूतास्तत्र तत्र कर्मणि दैवात् प्राप्ता ऋत्विजो देवभूता इति त्रिविधानामृत्विजां शाट्यायनिशाखायां दर्शितत्वाद् देवभूतऋत्विगभिप्रायेणैव राजसूये प्रतितन्त्रं दक्षिणाभेदेन तदा नेतव्यऋत्विक्क्रमभेदे ऽपि ऋत्विक्प्राधिष्ठानभूताः पुरुषा राजसूयारम्भे यावत्समाप्ति नियता एव ग्राह्या न तु तत्र तन्त्रे भिन्ने ऽभिन्नापेक्षा† कर्तुमुचिता कालविशेषकर्तव्येषु तन्त्रान्तरेषु कदा चिदृत्विङ्मेलनेन कर्मविघ्नप्रसङ्गादित्येकादशे राजसूयान्तर्गतकर्मणां भिन्नतन्त्राणामपि ऋत्विक्तन्त्रत्वमुक्तम्‡ । तथा तस्य चैत्ररथवंश्यत्वसिद्धावपि क्षत्रियत्वं कुतः सिध्यति एतेन वै चित्ररथं कापेया अयाजयन् तमे-

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३६ ।

† भिन्ने भिन्नापेक्षेति २ पु॰ पा॰

‡ तन्त्रमुक्तमिति २ पु॰ पा॰ ।

काकिनमन्नाद्यस्याध्यक्षमकुर्वंस्तस्माच्चैत्ररथो नामैकः क्षत्रपतिर्जायते इति चित्ररथानुष्ठितद्विरात्रक्रतुमहिम्ना तद्वंश्येऽपि क्षत्रपतित्वं लब्धमित्येतावदेव ह्युक्तं न तु तद्वंश्यानां क्षत्रियत्वम् अक्षत्रियस्यापि निषादस्थपत्यधिक-
रण*पूर्वपक्षन्यायेन क्षत्रपतित्वोपपत्तेरित्याशङ्क्याह **सर्वं च वैदिकं लिङ्ग-** १८६
मिति । अभिप्रतारिणा सह पठिते कापेये श्रुत्यन्तरबलात् चित्ररथयाजकत्वेन प्रत्यभिज्ञायमाने कापेययाज्योऽयमभिप्रतारीति बुद्धिर्भवति । अविदितपूर्वस्य हस्तिनो निकटे दृश्यमाने पुरुषे हस्तिपकोऽयमिति प्रत्यभिज्ञायमाने सत्ययमस्य शिक्षणीयो हस्तीति बुद्धिवद् ऋत्विक्षु पितृभूतानां मुख्यत्वात् पूर्वराजचरितेषु बहुशो याज्ययाजककुलव्यवस्थादर्शनाच्च कापेययाज्यत्वेन चित्ररथवंश्यत्वबुद्धिर्भवति । अथ यस्य ज्योतिरुक्थ्यः† पूर्वमहर्भवत्यायुरुत्तरइति द्विरात्रप्रकरणे श्रुतस्यैकाकिनमेवैनमन्नाद्यस्याध्यक्षं करोतीत्यर्थवादस्यैनं द्विरात्रयाजिनमेकमेव भ्रातृवर्गादिज्ञातिमध्ये ऐश्वर्यस्याध्यक्षं करोतीत्यर्थः । ननु सर्वेष्वपि लोकेष्वेनमेकमेवैश्वर्यस्याध्यक्षं करोतीति तदधिकैश्वर्यादीनामिन्द्रादीनां सत्त्वात् ततश्च तदनन्तरश्रुते एतेन वै चित्ररथमित्युपाख्याने फलरूपतया श्रुतं क्षत्रपतित्वं ज्ञातिप्राधान्यरूपमिति ज्ञातीनां क्षत्रियत्वेन फलभागपि क्षत्रिय इति बुद्धिर्भवति । ततश्चोक्तहेत्ववलम्बनबुद्धीनां क्व चित्क्व चिद् बाधकोपनिपातेन प्रमात्वाभावे ऽप्यत्र बाधकाभावेनौत्सर्गिकप्रमात्वबलादुदाहृतलिङ्गसिद्धिरित्यभिप्रायः ।

अमात्यप्रेषणादिनेति‡ ।

वैश्याद् ब्राह्मणकन्यायां क्षत्ता नाम प्रजायते ।
जीविकावृत्तिरेतस्य राजान्तःपुररक्षणम् ॥

इत्युक्तलक्षणस्य क्षत्तुरमा राज्ञः समीपे भावाद्यौगिकममात्यत्वमस्तीत्यमात्यशब्देन निर्देशः । टीकायां रेफयुक्तः प्रष्ठशब्दश्चेत् प्रष्ठोऽग्रगामिनीति वैयाकरणनिपातेन§ तस्याग्रगामित्ववाचित्वात् षष्ठीसमास एव ग्राह्यः । ऋकारयुक्तं पाठं दृष्ट्वा तु क्लिष्टः परसप्तम्यन्तपदबहुव्रीहिराश्रितः । तत् क्षत्रियस्य इष्ट-**मिति** । इदमपि प्रायिकमुख्यत्वाभिप्रायलिङ्गम् । सम्भवति ह्यतिक्रान्तमर्या-

* जै॰ सू॰ अ॰ ६ पा॰ १ सू॰ ५१ ।
† उक्थ्य इति २ पु॰ पा॰ ।
‡ प्रेषणादीति मूले पाठः ।
§ निपातनेनेति पाठान्तरम् ।

दस्य शूद्रस्यापि बलवतो ऽवेष्ट्यधिकरण*दर्शितया रीत्या राज्यपालयितृत्वेन क्षत्रप्रेषणादिकम्। आद्यसूत्रएवेति। न चाध्ययननियमसंस्कारपरामर्शादिति सूचयिष्यतइति प्रथमसूत्रे स्थित्वोक्तमाचार्यैः कथमिह तस्याद्यसूत्रे सूचितत्व†मुच्यते। नैष दोषः। शूद्रशब्दस्य न्यायतो रूढिप्रच्यावनार्थे प्रवृत्ते प्रथमसूत्रे ऽध्ययनाभावं हेतुमुपन्यस्तवतो भाष्यकारस्य तदुपपादको ऽध्ययनसंस्कारनियमो ऽप्याद्यसूत्रएव सूचित इत्यभिप्रायः। अत एवात्र सूत्रे संस्कारशब्दो विद्याङ्गोपनयनपरतयैव भाष्ये व्याख्यात इत्यालोच्य तदभिप्रायानुसारेणात्र पुनरुक्तिशङ्का स्वयं त्वध्ययनसंस्कारनियमः शब्दारूढत्वात्संस्कारसूत्रार्थ एव वक्तुमुचित इत्यभिप्रेत्याद्यसूत्रे तथा ऽवोचत्। कस्तर्हि स्वमते रूढिप्रच्यावकन्यायः सूच्यतइति सूत्रशेषसूचित एव तेन हि शुगाद्रवणस्याख्यायिकया सूचितत्वात्। स बुद्धिस्थे इति अबुद्धिस्थरूढितो बुद्धिस्थयोगो बलीयानिति न्यायः सूचितः।

१८७। ३ उपसदनेति। ननु तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति विहितं शिष्यकर्तृकं गुरुकर्मकमुपसदनं तं होपनिन्यइत्यादिलिङ्गावगतकर्तव्यताकम् आचार्यकर्तृकं शिष्यकर्मकम् उपनयनमिति भेदसत्त्वात् कथं पर्यायतोक्तिः। उच्यते। शिष्येणोपसदने कृते ऽपि तस्याचार्यकर्तृकं शिष्यभावं स्वसमीपावस्थानानुमत्यादिरूपोपनयनं विना विद्योपदेशपर्यवसायित्वासंभवाद्यत्रोपसदनमात्र श्रुतं तत्र तदेवोपनयनस्य गमकमिति व्यञ्जयितुं गमकवाचिशब्दस्य गम्ये पर्यायतोक्तिः पर्यायोक्तालंकारे। ननु शूद्रश्चतुर्थो वर्ण एव जातिरिति स्मृत्या द्वितीयजन्मरूपोपनयनाऽसंभवे ऽपि सच्छूद्राणाममन्त्रकं विद्याङ्गोपनयनं संभवति। मानवधर्मशास्त्रे न च संस्कारमर्हतीत्येतदनन्तरं

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तिमनुव्रताः।
मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥

इत्यमन्त्रकसंस्काराभ्यनुज्ञानात्। तस्य वैशेषिकनिषेधगोचरद्वितीयजन्मरूपोपनयनाऽविषयत्वे ऽपि विद्याङ्गोपनयनाऽविषयत्वस्यापि कल्पने प्रमाणाभावात्। न च सत्यकामस्य शूद्रस्वभावसिद्धात् तत्त्वरहितवचनेन शूद्रत्वाभावनिर्द्धारणे सत्येव विद्याङ्गे सत्यकामोपनयने गौतमप्रवृत्तिलिङ्गेन

* जै॰ सू॰ अ॰ २ पा॰ ३ सू॰ ३। † आद्यसूत्रे तत्त्वमिति ३ पु॰ पा॰।

शूद्रस्य विद्याङ्गोपनयने ऽपि निषेधोन्नयनात्संस्काराभ्यनुज्ञानं तदतिरिक्तविषयमपि कल्प्यमिति वाच्यम् । गोत्रप्रश्नलिङ्गेन सत्यकामोपनयनस्याध्ययनाङ्गोपनयनत्वावगत्या तच्छूद्रत्वाभावनिर्द्धारणस्य तत्रैवोपयोगादिति चेत् । उच्यते । न चास्योपदिशेद्धर्ममित्युदाहरिष्यमाणमानववचनानुसारेण तदीयस्य संस्काराभ्यनुज्ञानस्य शूद्रं प्रति विशिष्य ये ऽभ्यनुज्ञाताः पाकयज्ञादयस्तन्मात्रविषयत्वकल्पनौचित्यात् । विद्याङ्गोपाख्यानश्रुतस्य शूद्रत्वाभावनिर्द्धारणस्य विद्यार्थतायाः अप्युपपत्तावन्यमात्रार्थत्वकल्पनाऽयोगेन तस्य विद्याङ्गोपनयनविद्योपदेशार्थताया अपि कल्पनौचित्याच्च ।

अनृतं चातिवादश्च पैशुन्यमतिलोभता ।
निकृतिश्चाभिमानश्च जन्मतः शूद्रमाविशत् ॥

इति मनूदितं शूद्रभावप्रयोजकम् ।

तान् हेति निषिध्यतइति । ननु समीपप्रापणनिषेधे कथं विद्योपदेशलाभः । नैष दोषः । शिष्यभावतत्कार्यशुश्रूषाद्यनुमतिपूर्वकं वैधमुपनयनं निषिध्यते न तु समीपप्रापणमात्ररूपं लौकिकमपि । अत एव क्षत्रियेणाजातशत्रुणा वा लोके ब्राह्मणस्य ब्रह्मविविदिषयोपसन्नस्य शिष्यभावेनानुव्रजनमननुमत्य तं पाणौ गृहीत्वैव यष्टिघातोत्थापनाय सुप्तपुरुषसकाशं प्रति प्रस्थितमित्याम्नातम् । तत इह* बालाकिः समित्पाणिः प्रतिचक्रामोप त्वा यानीति तं होवाचाजातशत्रुः प्रतिलोममेवं† तत्स्याद्यत् क्षत्रियो ब्राह्मणानुपनयेत्‡देहि व्येव त्वाज्ञापयिष्यामीति तं पाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुषमीयतुरिति । ब्रह्मपराणां पुनः किमर्थं ब्रह्मविविदिषेत्याशङ्क्य व्याचष्टे अपरं ब्रह्मेति । १८७

त्रपुजतुभ्यामिति । ननु शूद्राणां वेदश्रवणादिषु दण्डविधानेन निषेधावगमे ऽपि वेदविद्भ्यो ऽवगत्य वेदाध्ययनरहितानां स्त्रीणामिव विद्यानुष्ठानं किं न स्यात् । तस्मात्

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ।
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥

* तदहेति २ पु॰ पा॰ ।
† प्रतिलोमरूपमेवेति २ पु॰ पा॰ ।
‡ ब्राह्मणमुपनयेदिति २ पु॰ पा॰ ।

यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम् ।
सो ऽसंवृतं नाम तमः सह तेनैव गच्छति ॥

इति शूद्राणां ये वैशेषिकधर्माः ये च सामान्यधर्माः शूद्रसाधारणास्त-द्व्यतिरिक्तवैदिकार्थग्राहयो* सह तेनैव शूद्रेण गुरोर्नरकपातोक्तेः । कथं तर्हि भाष्ये तेषां पुराणेतिहासादिमूलविद्यानुष्ठानाभ्युपगमः । श्रावयेच्चतुरो वर्णा-निति स्मरणात् । तस्य दृष्टार्थत्वाय पुराणेतिहासशैववैष्णवाद्यागमवर्णित-यजमानकर्तृकवैदिकमन्त्राद्युच्चारणाऽनपेक्षव्रतनियमोपासनादि संभवतीति तदभिप्रायः ।

ननु दानस्य द्विजात्यसाधारण्योक्तिः दानं च दद्यात् शूद्रो ऽपि पाकयज्ञैर्यजेत चेति स्मृत्यन्तरविरुद्धेत्याशङ्क्य व्याचष्टे **द्विजातीना-मिति** । द्विजातीनामध्ययनमिज्या दानमित्येतदनन्तरं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहा इति प्रतिग्रहस्य ब्राह्मणाऽसाधारण्यवचनात् पूर्व-वाक्ये दानस्य प्रतिग्रहवैलक्षण्येन त्रैवर्णिकसाधारण्यमात्रं विवक्षितं न तु शूद्रस्य दाननिषेध इति भावः † ॥

१८७ । १४ **कम्पनात् ॥ ३९ ॥**

ननु श्रुतिबलाद् वाक्यभेदाभ्युपगमो न युक्तः । प्राणे बाह्यवायु-भेदे ऽपि तदुभयभेदे विषयविद्याविध्यैक्येन तदप्रसङ्गादित्याशङ्क्य प्रकारान्त-रेण वाक्यभेदप्रसङ्गं दर्शयन्नवतारयति **स्यादेतदिति** । ननु बाह्यवायौ वज्रशब्दः कथं श्रुतिः वायुविकारभूताशनिवाचिनस्तस्य वायावपि लक्षणा-वश्यम्भावादित्याशङ्क्याह **वायुपरिग्रहइति** । अशन्याकारपरिणतस्यैव वायोरुपास्यत्वाङ्गीकारे वज्रशब्दः श्रुतिर्भवतीति भावः । ननु प्राणबाह्य-वायू द्वावुपास्यौ किमित्यभ्युपगम्येते प्राण एक एवोपास्य इत्यभ्युपग-म्यतां तृतीयपादे प्राण इत्यस्यानुषङ्गनिमित्तार्थताङ्गीकारेण‡ तृतीयपाद-स्यापि प्राणविषयत्ववर्णनोपपत्तेरित्याशङ्क्याह **न हि प्राणमात्रस्येति** । न हि कश्चिदपि प्राणो वज्रोद्यमनहेतुरस्ति । यद्यनुपक्तस्य§ प्राणशब्दस्य

---

* ग्रहणे इति १ पु० पा० । † अत्र नवमम् अपशूद्राधिकरणं पूर्णम् ।
‡ ०ङ्गीकारे इति ७ पु० पा० । § आनुषङ्गिकस्येति २ पु० पा० ।

प्राणभेदोपचारेण बाह्ये वायौ वृत्तिराश्रीयते तदापि वज्रोद्यमनहेतुत्वेन बाह्यवायुरेवोपास्यः पर्यवस्येदिति दृष्टापत्तिरेव । तथा सति वज्रशब्दस्य मुख्यार्थत्वं च शङ्काङ्कुरहितं भवतीति भावः । अत एवायमर्थः पूर्वपक्षार्थत्वेन सिद्धान्ते प्रदर्शयिष्यते । ननु सूत्रे पक्षनिर्देशाभावेन न्यूनता*माशङ्क्य शब्दात्प्रमित इत्यनुवृत्त्या तत्परिहारः कृतः । तथानुवृत्तेन शब्दादित्यनेनानौचित्यात् प्राणशब्द एव हि निर्देष्टव्यः ततो न कश्चिदर्थः प्रमितो ऽस्ति सिद्धान्तस्थितेः प्रागित्याशङ्क्याह **शब्दो ऽत्रेति** । तथा च १८८ सर्वशब्दवशात् सर्वजगत्कम्पयितृत्वेन यः प्रमितः सो ऽत्र पक्ष इति भावः । सर्वशब्दस्योपपदानुसारिसंकोचाऽसकोचभेदे सत्यपि साकल्यमर्थ इति निश्चितमेव । **नियन्तृत्वादीनीति** । ननु नियन्तृत्वादिवत् प्राणबाह्यवायूपासनमपि ब्रह्मप्रतिपत्त्यङ्गमिति प्रकरणाऽविरोधो वक्तुं शक्यः । एवं चोपासनस्यामृतत्वफलकीर्तनमपि न विरुद्ध्यते । पञ्चाग्निफलकसोमापौष्णपशवङ्गयूपप्रकृत्युदुम्बरताविध्यर्थवादे ऊर्जं पशूनाप्नोतीति प्रधानफलस्येवाधानाङ्गपूर्णाहुत्यर्थवादे सर्वान्कामानवाप्नोतीति तदुपकर्तव्येष्टिसोमादिफलस्येव च ब्रह्मप्रतिपत्तिफलस्यानुवादोपपत्तिरिति चेन्नैवम् । पूर्वापरमन्त्रप्रतिपाद्यसर्वलोकाश्रयत्वं शासितृत्वादिपदे तन्मन्त्रप्रतिपाद्यस्यापि दृष्टद्वारा प्रतिपत्त्यङ्गत्वे संभवत्यदृष्टद्वारकोपासनाङ्गत्वकल्पनाऽयोगात् ।

एजति चेष्टतइति । न प्राणेन नापानेनेति मन्त्रसिद्धार्थपरत्वेनेदं ,, । व्याख्यानम्† । यद्यपि टीकायामेजतीत्येतत् स्वशासनातिलङ्घने किमयं करिष्यतीति भयात् कम्पतइत्येवंपरं व्याख्यातं ब्रह्मणो हि बिभ्यदित्यादिना तदेव चोत्तरमन्त्रानुगुणं तत्रास्येति पदेनैतन्मन्त्रप्रकृतं भयहेतुं परामृश्य सामान्येन निर्दिष्टस्य तदीयसकलभयहेतुत्वस्याग्निसूर्यादिप्रसिद्धदेवताभयहेतुत्वप्रदर्शनेन स्थैर्यं क्रियतइत्येवमेकवाक्यतासामञ्जस्यात् । तथापि ब्रह्मसद्भावमजानतां मनुष्यपशुपक्षिसरीसृपादीनां तच्छासनातिलङ्घनप्रयुक्तभयाऽभावेन सर्वशब्दस्य तत्सद्भावज्ञातृषु संकोचावश्यम्भावेन पूर्वपक्षे संकोचदोषापादनमलग्नं स्यादित्यभिप्रेत्यैवं व्याख्यातम् । उत्तरमन्त्रस्य तु महद्भयमित्युक्तार्थस्थिरीकरणार्थत्वेनैतदेकवाक्यता सामञ्जस्यमश्नुते ।

* नूतनतामिति २ पु॰ पा॰ । † व्याख्यातमिति २ पु॰ पा॰ ।

तच्च तत एवेति । यद्यपि प्राणे ततो निःसृतं सर्वं जगदेजतीत्यवान्तरवाक्यभेदं विना योजयितुं शक्यं तथापि तथा योजनायां सर्वांन्निमन्त्रितानानयेत्यत्रेव सर्वशब्दस्य संकोचसहिष्णुत्वशङ्का स्यात् सा मा भूदित्येतदर्थमवान्तरवाक्यभेदेन व्याख्यातम् । व्यष्टिरिति । पृथक् पृथक् तत्तत्प्राणादिरूपेण विविधा व्याप्तिर्व्यष्टिः समन्तात्सर्वसाधारणेन सूत्ररूपेण व्याप्तिः समष्टिः । अशू व्याप्ताविति धातोरष्टिशब्दो व्याप्तिवाची । कम्पनस्य प्राणसाधारण्यशङ्काभिभूतत्वादस्पष्टब्रह्मलिङ्गता* ॥

१८८ । २३ **ज्योतिर्दर्शनात् ॥ ४० ॥**

उत्कर्षवाचीति । ननु पूर्वपक्षइव परशब्दयोगे ऽपि फलप्राप्तिपरत्वाभावो ऽस्तु । मैवम् । पूर्वपक्षे प्राक् तयोर्ध्वमायन्निति तावदादित्यं गच्छेदिति चोत्तरयोरुद्गमनादित्यप्राप्त्योरिह प्रत्यभिज्ञानात्तयैतान्यमुष्मादाकाशादित्याद्यव्यवहितपूर्ववाक्ये परं ज्योतिरित्यस्यादित्यतेजःपरत्वस्य क्लृप्तत्वाच्च तदनुरोधेन फलप्राप्तिपरत्वाभावोपपत्तावपि तदुभयमविगणय्य विवेकज्ञानाद्यर्थान्तरं वर्णयतः सिद्धान्तिनः पक्षे परशब्दानुरोधेन फलप्राप्तिपरत्वस्यावश्यवक्तव्यत्वादिति भावः । श्रुतिसंकोचादिति । क्त्वाश्रुतेः पूर्वकालत्वमपहाय समानकर्तृकत्वमात्रे वृत्तिः संकोचः । आदित्यप्रकरणाच्चेति† । यद्यपीह तस्य‡ तदुपासनस्य वा प्राधान्यमिति प्रधानस्याङ्गाकाङ्क्षस्य वचनं प्रकरणमिति पूर्वाधिकरणोक्तलक्षणं प्रकरणमादित्यस्य नास्ति । सन्निधानमात्रमपि बहुव्यवहितत्वान्नास्ति. तथापि मूर्द्धन्यनाड्या निष्क्रम्यादित्यं प्राप्तस्य केन द्वारेण निरुपाधिकाऽमृतत्वप्राप्तिरित्याकाङ्क्षायां परं ज्योतिरित्यादिवाक्येनादित्यस्य समीपे ब्रह्मलोके स्थितस्य तस्य तत्रोत्पन्नज्ञानेन तत्प्राप्तिरिति तदुपपादनस्य कर्त्तव्यत्वात्तदाकाङ्क्षा युक्ता स्यादित्यप्राप्तिवचनं तत्प्रकरणत्वेनोपलक्षितं द्रष्टव्यम् ।

१८९ । १८ **ध्वनितेति** । पूर्ववत् श्रुतिसंकोचाभावादिति टीकया कण्ठोक्ता प्रत्युदाहरणसंगतिः प्रागुपन्यस्ता इदानीं प्रत्युतेति तदनन्तरोक्त्या ध्वनिता दृष्टान्तसंगतिरुपन्यस्तेति विवेकः । **स्वरार्थमिति** । अन्हः खः क्रताविति

---

* अत्र दशमं कम्पनाधिकरणं पूर्णम् । † आदित्यप्रकरणादिति २ पु० पा० ।
‡ यद्यपि देहरस्येति २ पु० पा ।

सूत्रविहितप्रत्ययादेशे आद्युदात्तश्चेति सूत्रेण तदादेरीकारस्योदात्तत्वेनाही-नशब्दस्य मध्योदात्तस्वरलाभार्थमित्यर्थः । **सिद्धान्तितत्वादिति** । १९०
अहीनो वा प्रकरणाद् गौण* इति पूर्वपक्षव्यावर्तनपूर्वकमुत्कर्षस्यासंयोगात्तु मुख्यस्य तस्मादपकृष्येतेति सूत्रे सिद्धान्तितत्वादित्यर्थः । निवीतं गलबेणिकेति के चित् । परिकरबन्ध इत्यन्ये । तदुभयालम्बनेन व्याचष्टे **कण्ठालम्बीति** । इष्टदेवता यागोद्दिष्टदेवता । **आनर्थक्यप्रतिहतानामिति** । अवघातस्य व्रीह्यर्थत्वे तन्नियमो ऽनर्थकः स्याद् व्रीहिषु वैतुष्यस्योपायान्तरतो ऽपि संभवेन व्रीहिस्वरूपे तदन्वयादन्यस्य च तदन्वययोग्यस्याप्रतीतेरित्यानर्थक्यप्रतिहतां व्रीहिश्रुतिं भङ्क्त्वा प्राकरणिकाऽपूर्वीयत्वलक्षणा ऽऽश्रीयत‡ इत्यादिकमिहोदाहरणम् ।

आनर्थक्यस्योक्तत्वादिति । स्तुतिरप्यनर्थकप्रायेति भावः । न च क्रममुक्त्यभिप्रायमिति न च तद्द्वारेण क्रममुक्तिरिति ग्रन्थयोः पौनरुक्त्यमाशङ्क्य दूषणैक्ये ऽपि शङ्कामुखभेदेनापौनरुक्त्यं दर्शयति **तत्र वक्तव्यमिति** । अथ प्रजापतिविद्यायाः सगुणोपासनविषयत्वशङ्कया जीवाभिन्ननिर्विशेषप्रकरणानुवृत्तिः सूत्रे दर्शनादिति हेतुकृता न स्पष्टेत्यस्पष्टब्रह्मलिङ्गता । सा शङ्का तत्परिहारश्चेत्युभयमपि दहराधिकरणे§ स्फुटीकृतमस्माभि || ॥

आकाशो ऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥ १९३

नैवमिहेति । नन्विहापि नामरूपव्याकर्तृत्वं स्पष्टं ब्रह्मलिङ्गमस्ति निर्वहितेत्यस्य निरुपसर्गाभावे वोढृपरत्वे ऽपि तत्सत्त्वेन कर्तृपरत्वादिति चेदुच्यते । वै नामेति निपातद्योतिता प्रसिद्धिरिहोद्देश्यविशेषणमित्याकाशो वै नामेत्यतः प्रसिद्धाकाश इति धर्मिनिर्देशो लभ्यते । अतस्तस्य विशेषणस्याप्रसिद्धाकाशरूपं ब्रह्म व्यावर्त्य पर्यवस्यति । न हि भूतवद् ब्रह्म लोकवेदसाधारण्येनाकाश इति प्रसिद्धम् । सर्वाणि ह वा इमानि भूतानीत्यत्र तु वैशब्दद्योतितप्रसिद्धेर्नाकाशे धर्मिण्यन्वयः किं तु सर्वजगत्का-

* जै सू॰ अ ३ पा ३ सू॰ १५ ।
† जै सू॰ अ ३ पा ३ सू॰ १६ ।
‡ श्रूयतइति २ पु पा ।
§ व्या सू॰ अ॰ १ पा ३ सू॰ १४ ।
|| अत्र एकादश ज्योतिरधिकरणं पूर्णम् ।

रणत्वरूपे धर्मे तस्य धर्मस्य लोके प्रसिद्धिर्नास्तीत्यगत्या केवलवैदिक्येव ग्राह्या । सा च ब्रह्मलिङ्गान्वयिनीति सिद्धान्त एवोपयुज्यते । तस्मादिहेव तत्र न प्रसिद्धिलिङ्गमवलम्ब्य पूर्वपक्षशङ्कावकाश इति विशेषः । अतः प्रसिद्धिलिङ्गानुगृहीतोपक्रमगताकाशश्रुतिविरोधात् सत्यपि निरुपसर्गे यथा कथंचिदवकाशरूपाधिकरणतया वोढृत्वमेव निर्वहितेत्यनेनोच्यतइत्युपपादनीयमिति भावः ।

नामरूपाभ्यामन्यत्वमिति । अन्तराशब्दोक्तमध्यत्वोपलक्षितेन सारत्वेनान्यत्वमाक्षिप्यतइति भावः । **निर्वोढा च आकाश इति ।** यथा देवदत्तश्चैत्रमैत्रयोः प्रेषयिता* यस्तावदन्तरा वर्तते स यज्ञदत्त इत्युक्ते देवदत्तयज्ञदत्तयोर्भेदः प्रतीयते एवमिहाप्याकाशब्रह्मणोरिति भावः । **नियन्तृत्वमिति ।** व्याकर्तृत्वमस्येदं वाच्यमिति नियमनरूपमिति भावः ।

१९३ । १६ **सत्यप्यवकाशदातृत्वइति ।** सकलनामरूपावकाशदातृत्वं भूताकाशस्य वस्तुतो नास्त्येव स्वात्मनि वृत्तिविरोधात् । यथा कथं चित्तदस्तु नाम तथापि तन्निर्वहितेति निरुपसृष्टेन नोच्यते† किं तु तद्व्याकर्तृत्वमेव । न च प्रसिद्धलिङ्गानुरोधेन निर्वहितेत्येतदवकाशदातृत्वपरतया योज्यमिति शङ्कनीयम् । यतो निपातसमुदायो नाकाशशब्दविषयस्य तेन रूपेण प्रसिद्धिद्योतकः किं तु नामरूपनिर्वोढृत्वरूपविधेयवत्त्वेन । तथैव व्युत्पत्तेः । न हि देवदत्तः खलु विद्वानित्युक्ते यः प्रसिद्धो देवदत्तः स विद्वान्न त्वप्रसिद्धस्तदन्यो देवदत्त इति प्रतीयते किं तु विद्वत्त्वेन देवदत्तः प्रसिद्ध इत्येव प्रतीयते । एवं च सकलनामरूपनिर्वोढृत्वेन श्रुत्यन्तरप्रसिद्धं ब्रह्मैवाकाशशब्दोक्तमिति लभ्यते । एवं च यद्यपि नामभेदेन धर्मिनिर्देशाद् भिन्नधर्मिनिर्देशाच्च देवदत्तश्चैत्रमैत्रयोरित्यादिलौकिकवाक्यच्छायापत्त्या तिस्र एव साह्वस्येत्यादिवैदिकवाक्यच्छायापत्त्या चाकाशब्रह्मणोर्भेदः प्रतीयते तथापि नामरूपव्याकर्तृत्वतद्वदन्यत्वयोर्ब्रह्मलिङ्गतया तद्वशादभेदोऽपि प्रतीयते भेदाऽभेदप्रत्यायकोपनिपाते चाऽभेदप्रत्यायकानुरोध एव युक्तः प्रतिपत्तिलाघवात् । एकवाक्यतानुपग्रहात् । ते यदन्तरेति प्रकृतपरामर्शियत्पदानुप-

---

* प्रेषयितेति ख पु॰ पा॰ । † निरुपसर्गेणोच्यतइति ख पु॰ ।

ह्यात् । किं च नामभेदधर्मभेद*रूपभेदलिङ्गावगतिराकाशब्रह्मविषयभागद्वयपरामर्शापेक्षा विलम्बिता नामरूपव्याकर्तृत्वतद्वदन्यत्वरूपब्रह्मलिङ्गावगतिरेकैकभागमात्रपरामर्शापेक्षा शीघ्रा । ततश्च यथा ऽऽग्नावैष्णवमेकादशकपालं निर्वपेत् सरस्वत्याज्यभागा स्याद् बार्हस्पत्यश्चरुरित्यत्र प्रकृताऽऽग्नेयाऽग्नीषोमीयस्थानसाम्याद्वाक्यत्रयपरामर्शापेक्षत्वेन विलम्बितादाग्नावैष्णवबार्हस्पत्ययोर्नाग्नेयाग्नीषोमीयधर्मप्राप्तिः किं तु तत्तद्वाक्यमात्रपरामर्शापेक्षत्वेन शीघ्राद् द्विदेवत्यैकदेवत्यसामान्यादाग्नेयाग्नीषोमीयधर्मप्राप्तिः तथाचापि विलम्बितलिङ्गान्न भेदावगतिः किं तु शीघ्रलिङ्गात् तदभेदावगतिर्भवतीत्येव युक्तम् । एवमर्थान्तरत्वादिव्यपदेशस्याकाशब्रह्मभावसाधकत्वपर्यवसानमस्पष्टमित्यस्पष्टब्रह्मलिङ्गता ।

ननु टीकायां ते यदन्तरेत्यस्य ते नामरूपे अन्तरा यद्वर्ततइति योजनया ब्रह्मणो नामरूपसारत्वमर्थमुक्त्वा ते नामरूपे यदाकाशमन्तरेति यन्त्रेन ते नामरूपे यदन्तरा यस्य ब्रह्मणो ऽन्तरा मध्ये वर्तेते इति छान्दोग्यविवरणदर्शितयोजनान्तरेण नामरूपाधारत्वमर्थान्तरमुच्यतइति व्याख्यातुं शक्यम् । तद्व्याख्यानं श्रुतान्तराशब्दस्याऽव्यवहितान्वयस्वारस्यानुकूलं च भवति । तथा किमिति न व्याख्यातमिति चेत् । उच्यते । अन्तराशब्दयोगे त्वां च मां चान्तरा कमण्डलुरित्यादाववधिद्वयनिर्देशदर्शनेन श्रुतावन्तराशब्दस्य व्यवहितान्वयपक्ष एव युक्तः । उदाहृतटीकावाक्यमपि व्यवहितान्वयेन पूर्वोक्तार्थोपसंहारपरमित्यभिप्रेत्य तस्य तथा व्याख्यानं न कृतम् । तथा व्याख्याने ऽपि न दोषः ।

ततः खड्गं समुद्यम्य रावणः क्रूरविग्रहः ।
वैदेहीमन्तरा क्रुद्धः क्षणमूचे विनिःश्वसन् ॥

इति भट्टिकाव्ये विना ऽप्यवधिद्वयमन्तराशब्ददर्शनात्† ॥

१९ **सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥**

कर्तृस्तुतिरिति । नन्वनन्वागतपुण्येनेति स न साधुना कर्मणा भूयानिति च प्रतिपाद्यस्यात्मनः कर्मास्पर्श उच्यते स कथं कर्माधिकारि-

---

* धर्मभेदेति २ पु पा । † अत्र द्वादशम् अर्थान्तरत्वादिव्यपदेशाधिकरणं पूर्णम् ।

स्तुतिः स्यात् । नैष दोषः । तयोर्वाक्ययोः सुषुप्तौ कर्मफलभोगाभावाभिप्रायत्वात् । स न साधुनेत्याद्यपि सुषुप्तविषयमेव । य एषो ऽन्तर्हृदय आकाशस्तस्मिन् शेत इत्युपक्रमात् सुषुप्तिप्रसङ्गाभावे मृत्वापि कर्मसंबन्ध उक्त एवेति भावः । ननु संसार्यनुवादेन तस्याऽसंसारिब्रह्मरूपताविधानपरमिदं प्रकरणमिति सिद्धान्तस्य सुषुप्त्युत्क्रान्तिसूचा*नुगुणमङ्गुष्ठवाक्य इव सुषुप्त्युत्क्रान्तिवाक्ययोर्जीवब्रह्मपरपदसामानाधिकरण्याभावात् प्रत्युताऽभेदप्रतिकूलस्य भेदव्यपदेशस्य सत्त्वाच्चेत्याशङ्क्य विकल्पोत्तरत्वेन सूत्रद्वयप्रवृत्तिरित्याशयेन टीकायां विकल्पः कृतः । तत्र प्रथमविकल्पस्य निरालम्बनतामाशङ्क्य

१९४ । ७ तदालम्बनं प्रदर्शयन्नवतारयति नन्वसिद्ध इति । जीवातिरिक्त ईश्वर एव नास्ति चेतनविषयसर्वश्रुतीनां क्लृप्तजीवविषयत्वोपपत्तौ तासु कासां चित्तदतिरिक्तविषयत्वकल्पनस्य गौरवपराहतत्वात् । न चानन्दमयादिवाक्यानां जीवाद्व्यतिरिक्तेश्वरविषयत्वं प्राचीनाधिकरणैः प्रसाधितमिति शङ्कनीयम् । जीवातिरिक्तमीश्वरं तदसाधारणानि श्रुतिलिङ्गादीनि च सिद्धवत्कृत्य खलु तैस्तत्प्रसाधितम् । ईश्वर एव नास्तीति मूले कुठारनिधाने तदीयश्रुतिलिङ्गादीनीह निरस्तानीति तैस्तत्प्रसाधितं कथमवतिष्ठेत । एवं च ब्रह्मश्रुतित्वाभिमताः सर्वे शब्दा यथायथं जीवसामान्यस्य जीवविशेषाणां च श्रुतयः । लिङ्गानि च कारणत्वादीन्यदृष्टद्वारकाणि प्रशंसार्थान्यौपचारिकावस्थाभेदकृतभेदावलम्बनानि च सन्ति जीवविषयाण्येव । अत्यन्तभेदव्यपदेशो ऽप्यात्मशब्दस्य स्वरूपपरत्वेनौपचारिकः । अतो न सिद्धान्तसिद्धिरिति प्रथमविकल्पस्य हृदयमित्याशयः । प्राग्विचारितानां वाक्यानामीश्वरमभ्युपगम्याप्यन्यपरत्वमस्त्विति शङ्कानिरासार्थं प्रदर्शिता ये श्रुतिलिङ्गादयस्तैरेव मा भूदीश्वर इति शङ्कापि निरस्ता भवति । न हि लाघवमात्रलोभेन सर्वज्ञं सर्वशक्तिकमनादिसकलप्रपञ्चप्रवाहस्रष्टारं सकलजीवजडविलक्षणमेकमीश्वरं प्रतिपादयतामेतावतामौपनिषदवाक्यानामतिक्लिष्टनयनं युक्तमिति प्रथमविकल्पदूषणाभिप्रायः ।

,, । ८ द्वितीयं विकल्पमिति । इहेश्वरो न संकीर्त्यत इति द्वितीयविकल्पो ऽपि द्वेधा विकल्पनीयः किं संसारिव्यतिरिक्तत्वेनैव न संकीर्तित

* व्या. सू. अ. १ पा. ३ सू. ४२

ऽत्र सत्यपि व्यावहारिकभेदेन संकीर्तने तात्त्विकाऽभेदबोधनानुकूलं तत्संकीर्तनं नास्तीति । तथाद्यकल्पनिरासः प्रथमसूत्रविषयितो न चाचापी-
त्यादिग्रन्थेन प्रदर्श्यतइति भावः । अनुवादमात्रमनर्थकमिति । कर्म- १९४
स्तुतिरप्यनर्थकप्राया सा ऽपि न प्रतीयते । साधुकर्मणि इति तत्प्रयुक्त-
भूयस्त्वावश्यंभावेन तन्निषेधानुपपत्त्या ततः कर्माभावस्यापि सिद्धेः । तद्-
सिद्धौ वा तस्य वाक्यस्य कृतमपि साधु कर्म निष्फलमित्यर्थपर्यवसन्नतया
ततः कर्मनिन्दाया एव प्रतीतेः कर्मविधिसन्निधानाभावादपि सा ऽपि न
संभवतीति भावः । तस्मात् सुषुप्त्युत्क्रान्त्योरित्यादिटीकाग्रन्थेन प्रथमसूत्रा-
र्थानुवादपूर्वकं पत्यादि*सूत्रार्थोपन्यासेन द्वितीयविकल्पनिरासः कृतस्तमाह
अन्ते चेति । स वा एष महानज आत्मा यो ऽयं विज्ञानमय इत्याद्युप-
संहारे अभेदबोधनानुकूलं सामानाधिकरण्यमस्तीति भावः । परमेश्वर एव
नास्तीति प्रथमविकल्पनिरासस्तु सूत्राद् बहिरेवेति द्रष्टव्यम् । यद्वा भावं तु
बादरायण† इति सूत्रादस्तीत्यस्य पूर्वसूत्रा‡दर्थान्तरत्वादिव्यपदेशादित्यस्य
चानुवृत्तिमभिप्रेत्यास्ति जीवातिरिक्तः परमेश्वरः तस्य तद्भिन्नत्वज्ञापकानां
तत्स्रष्टृत्वादिहेतूनां पूर्वोत्तराधिकरणविषयवाक्येषु विशिष्य प्रतिपादनादिति
तदर्थमादाय प्रथमविकल्पनिरासः कृत इति नेतव्यम् । वशः शक्तिरिति ।
वश आयत्ततायां स्याद् वश इच्छाप्रभुत्वयोरित्यभिधानकोशः§ ॥

वेङ्कुण्ठाचार्यवंशाम्बुधिहिमकिरणश्रीमदद्वैतविद्या-
चार्यश्रीरङ्गराजाह्वयविसृतयशोविश्वजिद्याजिसूनोः ।
ग्रन्थे वेदान्तकल्पद्रुवरपरिमले सर्वजिद्याजिनो ऽस्मिन्
पूर्णः पादो ऽजनिष्ट भ्रमरहितहिते निर्विशेषप्रधानः ॥

इति श्रीवेदान्तकल्पतरुपरिमले प्रथमाध्यायस्य
तृतीयः पादः समाप्तः ॥

---

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ४३ ।
† व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३३ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ४१ ।
§ अत्र त्रयोदशं सुषुप्त्युत्क्रान्त्यधिकरणं पूर्णम् अत्र कल्प॰ १८५ पृष्ठे † टि॰ द्रष्टव्या ।

अथ प्रथमाध्यायस्य चतुर्थः पादः ।

१९६।१ **आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥**

परशब्द आहेति । नन्वत्र परशब्दः श्रैष्ठ्यवचनः इन्द्रियेभ्यः परा ह्यर्था इत्यादिपूर्ववाक्येषु श्रुतस्य तस्य तथात्वात् । सांख्यैरप्यव्यक्तात्पुरुषः पर इत्यत्र श्रुतस्य तथैव व्याख्येयत्वात् प्रधानस्याकार्यत्वात् । कठवल्लीषु श्रुते

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥

इति मन्त्रान्तरे परशब्दस्थाने उत्तमशब्ददर्शनाच्चेति चेत् । सत्यम् । इह पूर्वपूर्वस्मादुत्तरोत्तरस्य श्रैष्ठ्यमुच्यमानं यस्य यथा संभवति तस्य तथोपपादनीयम् । अतः स्मार्तक्रमप्रत्यभिज्ञानादिह महदादिपदानां स्मार्तमहदादितत्त्वपरत्वस्थितौ महत्तत्त्वात्प्रधानस्य श्रैष्ठ्यं कारणत्वेनैव भवेदिति पर्यवसितार्थकथनमिदं न तु परशब्दाभिधेयकथनमिति न विरोधः । पूर्वत्र हीति । एवं च टीकायां व्यभिचारशब्दो दोषमात्रपर इति द्वैवत्यधिकरणा*र्थानुवादकवाक्यश्रुतस्य तस्यासंभवे पर्यवसानं प्रवर्तयिष्यमाणाधिकरणार्थानुवादकवाक्यश्रुतस्यातिव्याप्तेरित्याशयः ।

११।१५ **सांख्यानां श्रुतिस्मृत्योरिति ।** इदं न सर्वश्रुतिस्मृत्यभिप्रायम् । यागादिश्रुतितन्मूलस्मृतीनां सांख्यमतेऽप्यनुमानसिद्धार्थानुवादित्वाभावात् । त्रिविधं प्रमाणं तत्सिद्धौ सर्वसिद्धेरिति कपिलसूत्रे† सांख्यसप्तत्यां च शब्दस्य स्वतन्त्रप्रमाणत्वेन परिगणनात् । किं तु महतः परमव्यक्तमित्युदाहृतश्रुत्यव्यक्तविषयसांख्यस्मृत्यभिप्रायम् । उदाहृतश्रुतिर्हीन्द्रियादिपुरुषान्तपरापरभावपरेन्द्रियादीनामिवाव्यक्तस्याप्यन्यत्रापक्रमपेक्षते । अव्यक्तविषयसांख्यस्मृतिः स्मृतित्वादेव मूलमानमपेक्षते । तद्यद्यपि सदेव सोम्येदमित्यादि-

---

* ब्र॰ सू॰ अ॰ ३ पा॰ १ सू॰ ४ । † कपिल (सांख्य) सूत्र॰ अ॰ १ सू॰ ८७–८८ ।

क्रममिति वक्तुं युक्तं कपिलसूत्रवार्तिके प्रथमाध्याये बुद्ध्यादीनां प्रधान-
परत्वस्य व्यवस्थापितत्वात् तथापि इन्द्रियेभ्यः परा इत्यादिकमनुमानसि-
द्धार्थविषयमित्येव तन्मतम् । अत एव स्थूलात्पञ्चतन्मात्रस्योत्पत्त्यादीनि
परार्थत्वात् पुरुषस्ये*त्यन्तानि कपिलसूत्राणि तद्वार्त्तिककृतेन्द्रियेभ्यः परा
इत्यादेरिन्द्रियार्थादिपुरुषान्तानामुत्तरोत्तरोत्कर्षे तात्पर्यं वर्णयितुं प्रवृत्तानीति
प्रतिपादयतोक्तं रूपादिबुद्धिकार्यानुमेयेभ्य इन्द्रियेभ्यः स्थूलभूतकार्यानुमे-
येभ्यः पञ्चतन्मात्रेभ्यश्च परस्तात्कारणत्वेनानुमेयो मनःशब्दोदितो ऽहं-
कारः । उभयेषामहंकारकार्यत्वाविशेषे ऽपि महाभूतप्रकृतित्वेन विशेषेण
तन्मात्राणामिन्द्रियेभ्यः परत्वम् । एवमव्यक्तपर्यन्तानां पूर्वकारणत्वेनानुमे-
यत्वात् परत्वं पुरुषस्य व्यक्तात् परत्वं भोक्तृत्वादिति । अत एव चानु-
मानिकमप्येकेषामिति सूत्रेणानुमानसिद्धमव्यक्तम् एकेषां शाखायामनूद्यत
इत्युक्तमित्यभिप्रेत्य तयोरनुमानसिद्धार्थानुवादित्वमुक्तम् ।

सत्कार्य्यवादे इति । इत्थं सांख्यानां सत्कार्य्यवादः । घटोत्पत्तेः १९६
प्रागपि मृद्यनभिव्यक्ता घटावस्था वर्त्तते तदनभिव्यक्तिः पिण्डावस्थया ऽऽवृ-
तत्वाद् घटसामग्र्या पिण्डावस्थोपमर्द्दे सति खनने कूपजलमिव चालने
पटशौक्ल्यमिव च प्रतीयते । न च तथा सति मुद्गरपातानन्तरमपि घटाव-
स्थाप्रतीतिप्रसङ्गः । इष्टापत्तेः । कपालानि चूर्णीकृत्य जलमृदन्तरसंयोजन-
मर्दनव्यापारैर्मार्दवं प्रापय्य दण्डचक्रादिमेलने घटाभिव्यक्तिदर्शनात् । न च
दग्धपटकारणानां पुनः पटभावो न दृश्यतइति वाच्यम् । तद्भस्मनां क्षिति-
पतितानां कार्पासतरुफलपरिणतिक्रमेण पटभावोपपत्तेः । न च तन्त्ववस्थायाः
पटावस्थावरणत्वे विरलतन्त्वारब्धपटे पटावस्थाऽनभिव्यक्तिप्रसङ्गः । फलब-
लेन संयोगविशेषरहिततन्त्ववस्थायास्तदावरकत्वादिति । अतो मृदादिकम-
व्यक्तघटाद्यवस्थावद् घटाद्यात्मना ऽनभिव्यक्तमित्यव्यक्तशब्दप्रयोग उपपन्न
इति भावः ।

सामान्येनात्र व्याप्तिरिति । यद्यद्रूपानुरक्तं प्रतीयते तदनभि-
व्यक्ततद्रूपानुरक्तकारणमिति सामान्यव्याप्तौ प्रागुक्तरीत्या ऽनभिव्यक्तघटाव-
स्थादिविशिष्टमृदादिकारणको घटादिरेव दृष्टान्तः । पक्षे च सुखदुःखमोह-

* कपिलसू॰ अ॰ १ सू॰ ६२-६६ ।

गुणकवस्तुप्रकृतिकं तद्गुणकत्वाद् घटवदिति घटे। येन प्राप्यते तं प्रति सत्वगुणोद्भवात् सुखरूपो यदीयः सो ऽन्येनापह्रियते तं प्रति रजोगुणोद्भवाद् दुःखरूपो यस्य तस्मिन्नुपेक्षया निरीक्षणाभावः तं प्रति तमोगुणोद्भवान्मुह वैचित्त्यइति धात्वर्थानुगमेनाज्ञानरूपो मोहो भवति । तानि च घटावस्थापेक्षाणि सुखादिरूपाणि मृदवस्थायामप्यनभिव्यक्तानि सन्त्येव ।

कारणगतेति । कारणगतं यदव्यक्तं कार्यं तदेव शक्तिर्न तद्व्यतिरेकेण शक्तिर्नाम किं चिद्वस्त्वस्तीति भावः । नृशृङ्गवत्कारणत्वायोगाद् इत्युपलक्षणम् । तिलेभ्य एव तैलं न सिकताभ्य इत्यादिव्यवस्थित्ययोगादित्यपि द्रष्टव्यम् । अनभिव्यक्तकार्याश्रयो ऽस्तीति । अन्यथा तदनन्तरकल्पे ऽत्यन्ताऽसत उत्पत्तौ नृशृङ्गादेरप्युत्पत्तिप्रसङ्ग इति भावः । ननु किं करणं कश्च परिशेषः कथं च ताभ्यामव्यक्तशब्दस्य शरीरार्थत्वसिद्धिरित्याकाङ्क्षायां तत्सर्वं भाष्ये विवक्षितं संक्षिप्य विशदयति अयं भाव इति ।

१९७ । ११ रथादिरूपितान्येव गृह्यन्तइति । प्रकरणाम्नातत्वेन बुद्धौ विपरिवर्तमानानि पट्संख्यया च समानानि इन्द्रियादीनि गृह्यन्तइत्यर्थः । ननु विष्णुपदशब्दोक्तः पुरुषः स्वरूपेण प्रतिपिपादयिषिततया न प्रधानं किं तु निरतिशयपरत्वेन प्रतिपिपादयिषिततया परमित्युपक्रान्तत्र्यपरस्वस्य सा काष्ठेत्युपपादनादतस्तन्निरतिशयपरत्वप्रतिपादनं कृत्स्नस्य जगतः परत्वावधितया ऽङ्गभावमपेक्षते । न च कृत्स्ने जगत्स्वरूपकवाक्ये गृहीतं शरीरेन्द्रियार्थमनोबुद्धिभोक्तृणामेव तत्र ग्रहणात् । अतस्तदाकाङ्क्षानुसारेण सांख्याभिमतपुरुषाऽवरचतुर्विंशतितत्वात्मकसकलप्रपञ्चसमर्पकत्वमेवाचेन्द्रियाद्यव्यक्तान्तशब्दानां युक्तम् । दश ज्ञानकर्मेन्द्रियाणि दश भूततन्मात्राः मनो ऽन्तःकरणं बुद्धिरहङ्कारः महानात्मा महत्तत्त्वमव्यक्तं प्रधानमिति सांख्याभिमतानां चतुर्विंशतेस्तत्त्वानां* ग्रहणसम्भवात् । यद्यपि सांख्यानां महत्तत्त्वएव बुद्धिशब्द आत्मशब्दश्च न महत्तत्त्वे तथापि परत्वावधितया सकलतत्त्वनिर्देशाकाङ्क्षानुसारेण सांख्यतत्त्वे प्रत्यभिज्ञापकं†

* चतुर्विंशतितत्त्वानामिति २ पु पा ।

† तत्वप्रत्यभिज्ञापकेति २ पु पा ।

भूयस्त्वानुसारेण च कार्ये कारणोपचारादहङ्कारे बुद्धिशब्दः महत्तत्त्वे व्यापकत्वाभिप्रायेणात्मशब्दः । यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञानआत्मनीत्यत्रैवोपरितनमन्त्रे ज्ञाने ऽप्यात्मशब्ददर्शनादिति समर्थयितुं शक्यमित्याशङ्कां निवर्तयितुमेवकारः । न सांख्याभिमतानामपि सर्वेषां तत्त्वानामिह ग्रहणं संभवति अर्थशब्दस्येन्द्रियसमभिव्याहारेणेन्द्रियेभ्यः परत्वलिङ्गेन चेन्द्रियग्राह्यपरत्वात् । इन्द्रियेभ्यो ऽर्थानां परत्वस्येन्द्रियाणां पुरुषवशीकर्तृताया अर्थापहाराधीनतया वशीकृतानामपि तेषामतिसुन्दरार्थसन्निधाने क्षोभदर्शनेन च समर्थनीयत्वात् । यदि साक्षाद् भोग्यानामिन्द्रियग्राह्याणां पुरुषाऽवरत्वोक्तेस्तत्साधनत्वेन परम्परया पुरुषार्थपर्यवसायिनां भूतसूक्ष्माणां तत्कैमुतिकन्यायेन सिध्यतीति सांख्यतत्त्वग्रहणे सर्वतत्त्वव्यापिपरत्वावधिसाप्राप्तिः समर्थ्येत तर्हि संनिहितग्रहणे ऽपि कण्ठोक्त्या कैमुतिकन्यायेन च कृत्स्नस्य जगतस्तत्प्राप्तिः समर्थयितुं शक्येति व्यर्थः प्रकरणाम्नातबुद्धिविपरिवर्तमानवैदिकपरित्यागस्तद्विपरीततत्त्वपरिग्रहश्च । अवश्यं च कठवल्लीष्वेवोत्तरत्राम्नातयोः

> इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
> सत्त्वादधि महानात्मा महतो ऽव्यक्तमुत्तमम् ॥
> अव्यक्तात्तु परः पुरुषो व्यापको लिङ्ग एव च* ।
> यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥

इति मन्त्रयोः कृत्स्नस्य जगतः पुरुषावरत्वसिद्ध्यर्थे कैमुतिकन्यायः समाश्रयणीयः । तत्रार्थानामपाठात् स इहाप्यस्त्विति भावः ।

एवं प्रकरणवशादिहेन्द्रियादयो रूपकवाक्याम्नाता एव ग्राह्या इति सामान्यतः सिद्धाविहाव्यक्तशब्देन शरीरं ग्राह्यमिति विशेषः परिशेषात्सिध्यतीति दर्शयति एवं स्थिते इति । ननु यथोपपादयिष्यमाणपारिशेष्यनि- १९७
मित्तप्रत्यभिज्ञया शरीरोपस्थितिः तथा सांख्यतन्त्रसिद्धमहदव्यक्तपुरुषक्रमप्रत्यभिज्ञया प्रधानोपस्थितिरस्ति किमत्रान्यतरग्रहणे विनिगमकमित्याकाङ्क्षायां तत्र विनिगमकं बलाबलविभागं दर्शयति पौरुषेयेति । प्रधानश-

---

* चेति ५ पु० पा०

रीरप्रत्यभिज्ञाप्राबल्यहेत्वोर्मध्ये प्रकरणाधीतपदार्थाश्रयत्वात् शरीरप्रत्यभिज्ञाहेतुः प्रबल इति तमुपपादयति **रथत्वेनेति ।**

६७ । १५ **इतरथेति ।** ननु नास्ति निष्प्रयोजनत्वम् । न हि परत्वावधित्वेनान्वयार्थमात्मशरीरादयो रथिरथादिभावेन रूपिताः । तत्र रथिरथादिरूपणस्यानुपयोगात् तत्रैव परत्वावधीन्द्रियाद्याम्नानसन्त्वेनेतरत्र इन्द्रियादिग्रहणाऽनपेक्षणाच्च । किं तु निदिध्यासनोपकरणानां तेषां वशीकार्यत्वार्थं वशीकृतानि ह्येतानि तदुपकरणानि भवन्ति । यतस्तत्रैव श्रूयते ।

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥
यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ इति ।

सत्यम् । रथिरथादिरूपेण वशीकार्यत्वज्ञापनार्थमिति तज्ज्ञापनमपि वशीकार्याणां परापरभावविवेचनं विना न प्रयोजनपर्यवसायि । यत्नेन वशीकार्यमुपेक्ष्यान्यवशीकरणप्रवृत्तौ प्रयोजनलाभाऽसंभवात् । अतो वशीकार्यताज्ञापनरूप*स्वप्रयोजनसिद्ध्यर्थमेव रथित्वादिना रूपिताः षडपि इन्द्रियेभ्यः परा ह्यर्था इत्यादिवाक्यान्वयमपेक्षन्तइत्यस्ति शरीरस्यापि तदन्वयापेक्षा । तत्र हीन्द्रियेभ्यस्तोद्भुपयाः वशीकार्यत्वे पराः वश्येन्द्रियस्यापि विषयसन्निधाविन्द्रियविजृम्भणात् । तेभ्यो ऽपि मनः परं मनसि विषयध्यानप्रवृत्ते विषयाऽसंनिधाने ऽपि रागविजृम्भणात् । तस्मादपि बुद्धिः परा इदमित्थं कर्तव्यमित्यध्यवसायाभावे मनसो ऽकिञ्चित्करत्वात् । ततो ऽप्यात्मा परः बुद्धिवृत्तेरप्यात्माधीनत्वात् । तस्मादपि शरीरं परं तदायतनत्वात्सर्वेषामपि तत्तदिन्द्रियार्थमनोबुद्धिप्रयुक्तपुरुषव्यवहाराणाम् । अतो हितमितमेध्याशनादिभिः शरीरवशीकरणे ऽत्यन्तमेव प्रयतितव्यमिति वशीकार्यत्वे परापरभावो विविच्यते । यद्यपीन्द्रियेभ्यः परा इत्यादेः कृत्स्नस्यापि सर्वापेक्षया पुरुषपरत्वे महातात्पर्यमित्याध्यानाधिकरणे† निरूपयिष्यते । तथापि महातात्पर्यविषयस्य तस्यैव प्रमितावुपायत्वेन वर्ण्यमानमुत्तरोत्तरपरत्वं यया कया चिद् विधयोपपादनीयमिति प्राचीनवशीकार्यत्वज्ञापनप्रयोजनपर्यवसा

* ज्ञानरूपेति २ पु॰ पा॰ ।

† व्या सू अ॰ ३ पा ३ सू॰ १४ ।

नार्थे विश्वस्मादिन्द्र उत्तर इतिवत् सर्वस्मात् परः पुरुष इत्येतावदनुक्त्वा क्रमिकपरापरभाववर्णनस्य साफल्यार्थं च प्रदर्शितप्रकारेणेन्द्रियादीनां पराऽपरभावे ऽवान्तरतात्पर्यमपि युज्यतएव । रूपितान्येवेत्येवकारेण प्रकरणाम्नातेन्द्रियादिग्रहणे कस्य चिन्न्यायस्य सूचने कृते ऽपि सर्वसाधारणमेव न्यायान्तरं शरीरे दर्शितमिति द्रष्टव्यम् ।

श्रैष्ठ्यवचन* इत्यर्थ इति । श्रैष्ठ्यं च वशीकार्यतापेक्षं विवक्षितमिति १९८
न तत्प्रयोजकत्वेनापि कारणत्वमपेक्षणीयमिति भावः । **शरीरमेवेति** । ननु रूपकविन्यस्तशरीरगृहीतेरिति वक्तव्यम् विशेषणस्य पूर्वनिपातित्वादिति चेद् न । तथा सति हि रूपकविन्यस्तव्यतिरिक्तमपि शरीरमङ्गीकृत्य तद्व्यावर्तनार्थं विशेषणमिति स्याद् रूपकविन्यस्तेन्द्रियादिव्यावर्तनमिहे।ष्यते तत्तु शरीरविशेषणेनैव लभ्यतइति तल्लाभार्थं विपरीतविशेषणविशेष्यभावविवक्षया शरीरं पूर्वं निवेशितम् । **रूपकेण रथेनेति** । स्वेन रूपेण रथत्वेनोपमेयं रूपवत्करोतीत्यर्थे रूपवच्छब्दात् तत्करोतीति णिचि णाविष्ठवद्भावेन मतुल्लोपे टिलोपे रूपीत्यतो धातोः कर्तरि ण्वुलि णेरनिटीति णिलोपे च सति रूपकशब्दनिष्पत्तिः । **रूपितमिति** । रूपवत्कृतमित्यर्थः । रूपीत्यतः पूर्ववत्सनाद्यन्तधातोः कर्मणि क्तप्रत्यये वलाद्यार्धधातुकनिमित्ते इडागमे निष्ठायां सेटीति णिलोपे च सति रूपितशब्दनिष्पत्तिः । भाष्यटीकयोस्तत्त्वाऽतत्त्वाभ्यामनिर्वाच्यत्वमव्यक्तपदप्रवृत्तिनिमित्तमित्युक्तमयुक्तं न व्यज्यतइति व्युत्पत्तिबलादस्पष्टत्वस्य तत्प्रवृत्तिनिमित्तत्वादित्याशङ्क्य व्याचष्टे **प्रमाणैरिति** । व्युत्पत्तिवाक्यगतस्य व्यज्यतइत्यस्याच निरूप्यतइत्यर्थो ग्राह्यः अविद्यायां प्रत्यक्षादिप्रमाणैः स्पष्टायामस्पष्टत्वरूपप्रवृत्तिनिमित्तत्वाभावादित्याशयः । **अप्रधानेनेति** । परमेश्वरप्रेर्यत्वेनाऽस्वतन्त्रयैवाऽविद्यया ऽन्तःकरणादिरूपेण परिणतयेत्यर्थः । अप्रधानेनेति स्थाने क्व चिदज्ञानेनेति पाठः सुगमः‡ । मायादिकमिति पाठा-
न्तरम्§ । **अविवेकप्रतियोगित्वेनापीत्यपिशब्देन** प्रपञ्चोपादानत्वेनापि १९८

---

* श्रैष्ठ्यपर इति २ पु· पा· ।

† व्यावर्तमानमिष्टेति २ पु पा· ।

‡ पाठः स तु सुगम इति २ पु· पा· ।

§ मायेत्यादि नास्ति २ पु· । मायादिकमिति यद्धिः शोधितम् १ पु· ।

प्रधानं नाभ्युपगन्तव्यम् प्रपञ्चस्याविद्याविषयब्रह्मविवर्तत्वप्रतिपादनादिति
२९९।१ दर्शयति निरवद्यमितीति। निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमिति श्रुतिः। निर्दोषेति। न च दोषवाच्यवद्यशब्दो ऽयमज्ञानमपहाय शोकादिमात्रे संकुचितवृत्तिः कल्पयितुं युक्तः साक्षाच्च निरनिष्टो निरवद्यः शोकं मोहमत्येति नित्यमुक्त इति मोहशब्दिताऽज्ञानाऽनाश्रयत्वं श्रूयते नित्यमुक्त इति बन्धकराहित्योक्त्या च तदेव स्थिरीक्रियते। अज्ञानमेव हि मूलभूतं बन्धकम्। एवं ज्ञाऽज्ञौ द्वावजावीशाऽनीशाविति श्रुतिरपि जीव एवाज्ञानाश्रयो न ब्रह्मेत्यत्र प्रमाणम्। मायिनं तु महेश्वरमिति श्रुताविनिप्रत्ययस्तु गृही धनी रथीत्यादाविव संबन्धान्तरविषयत्वेन चरितार्थः। बिम्बं त्विति। तथा च बिम्बभूतेश्वरविषया निरवद्यत्वादिश्रुतिः जीवस्याऽज्ञत्वश्रुतिस्त्वज्ञानकार्यभयशोकादिभाक्परेति भावः। स्वरूपस्यैवेति। बिम्बस्य स्वरूपाऽनतिरेके बिम्बस्य यन्निरवद्यत्वं तत्स्वरूपस्यैवेति पर्यवसितमिति स्वरूपस्याऽविद्याश्रयत्वं न युक्तं बिम्बप्रतिबिम्बानुगतस्वरूपस्याऽविद्याश्रयत्वे च बिम्बस्य निरवद्यत्ववचो रिक्तमेव स्यादिति भावः। ननु मुखप्रतिमुखानुगतमुखमात्रस्योपाध्याश्रयत्वे ऽपि यथा न बिम्बस्योपाधिसंसर्गः तथेहापि स्यादित्याशङ्क्याह मुखमात्रस्य त्विति। ननु परिच्छिन्नत्वमप्रयोजकमित्यपरितोषाद् वस्तुतस्तत्रापि मुखमात्रस्य नोपाधिसंसर्गः। बिम्बे तत्संसर्गाऽप्रतीतेः किं तूपाधिविषयतामात्रमित्याह अपि चेति। मुखमात्रस्य त्विति प्रागवतारितो ऽधस्तनग्रन्थः केषु चित्कोशेषु अपि चेति ग्रन्थमध्ये न त्वित्यतः प्राक् पठ्यते तस्मिन्पाठे मुखमात्रस्योपाधिसंसर्ग इत्येतदभ्युपेत्यापि प्रकृते तन्न्यायानवतारहेतुं वैषम्यं दर्शयितुमयं ग्रन्थ इति योजनीयम्।

,, । ६ परिच्छिन्नत्वादिति। नन्वप्रयोजकमिदं वैदम्ये परिच्छिन्नवदपरिच्छिन्नस्याप्युपाधिसंसर्गसंभवादित्याशङ्क्याह न त्विति।

अयमाशयः। निर्विशेषे यत्काल्पनिकं विशेषं संपादयति तत्स्वकल्पितविशेषोपहितएव संसृज्यते यथा प्रदेशभेदरहिते नभस्यवकाशात्मके संसृज्यमानो घटः स्वावच्छेदकृतप्रदेशभेदोपहितएव त्वस्मिन् संसृज्यते प्राच्यादिदिग्विभागोपाधयश्चोदयादिदशापन्नतपनादयः स्वावच्छेदकृतविभा-

गोपहितएव प्राच्यादिदिग्विशेषे संसृज्यन्ते कालोपाधयश्च नयनपरिस्पन्दादयः स्वावच्छेदकृतवर्तमानादिभेदोपहितएव कालविशेषे संसृज्यन्ते तएव खल्विह घटो न तत्र प्राच्यां तपनो न प्रतीच्याम् इदानीमयमस्ति न प्रागासीद् इत्यादिव्यवहारः । एवमिहाप्यहमज्ञो न त्वीश्वरः द्वाऽज्ञौ द्वौ द्वावजावित्यादिलौकिकवैदिकव्यवहारदर्शनादज्ञानकृतभेदोपहिते जीवे एवाज्ञानं संसृज्यतइति युक्तम् । न चाज्ञानस्य जीवाश्रयत्वे बन्धमोक्षयोर्वैयधिकरण्यापातः । मोक्षदशायां जीवत्वाभावेन मोक्षस्य स्वरूपाश्रितत्वादिति वाच्यम् । ब्रह्मण्यनतिप्रसङ्गार्थे जीवत्वोपधानमर्यादाभ्युपगमेऽप्यज्ञानस्य तदुपहितस्वरूपाश्रितत्वाऽनपायात् । न हि स्वकृतभेदोपहिताऽऽकाशदिक्कालाश्रया घटादयो नाकाशाद्याश्रयाः । एतेन शाखावच्छिन्ने वृक्षे कपिसंयोगवदन्यावच्छेदकृतभेदएवाश्रये ऽन्यस्यासंकीर्णावस्थितिरुपपादनीया न स्वावच्छिन्ने एवाऽऽत्माश्रयादित्यादिशङ्का दूरनिरस्ता वेदितव्या । किं च कपिसंयोगादिष्वपि स्वावच्छेदकृतभेदोपधानमेवाश्रयितुं युक्तं शाखावच्छेदे ऽपि सैव गतिराश्रयणीया । अन्यथा ऽनवस्थाद्यापत्तेरिति ।

तस्मादीश्वरस्य प्रतिबिम्बधारिणीति । तथा चेश्वरस्य चोपाधिमायापरिणामरूपे कामकृती परिणामश्च प्रपञ्चः सर्वसाधारणः अज्ञातसत्तायोगी चेत्युपपद्यतइति भावः । जीवाविद्याविवर्त्त इति । जीवाविद्याविषयेश्वरविवर्त इत्यर्थः । ब्रह्मविक्रियेति । न ब्रह्मोपाधिमायापरिणाम इत्यर्थः । प्रतिमाणवकेति । वर्णेषु यद् ध्वनिगतोदात्तादिवैषम्यं प्रतिमाणवकवर्त्यविद्याकृतं तद्वैशिष्ट्येन क्रममस्येति वेदविशेषणम् । इदमुपलक्षणं शुक्तिरजतादिसाधारण्यप्रसिद्धेरपि । यदि तत्र युगपद्भ्राम्यद्बहुपुरुषाविद्याकृतमेकमेव रजतं कस्य चिद् भ्रमनिवृत्तौ पुनर्भ्रमानुवृत्तिस्तदा तदितरसकलपुरुषाविद्याकृतं रजतान्तरमिति साधारण्यमुपपाद्यते तदा स एव न्यायः प्रपञ्चे योजनीयः । तदिदमाह अधिष्ठानेति । एवंग्रहणं शुक्त्यादेरप्युपलक्षणम् । नन्वधिष्ठानैक्यं प्रपञ्चे नास्ति वियदाद्यधिष्ठानब्रह्मैक्ये ऽपि तत्तद्देहेन्द्रियाद्यधिष्ठानजीवभेदात् । देहेन्द्रियादिकं हि जीवाधिष्ठानकम् अत एव ज्योतिरधिकरणे* टीका कोऽयं हि ज्योति- १९९

---

* व्या॰ सू॰ अ॰ २ पा॰ ४ सू॰ १४ ।

र्जीवभावेनानुप्रविष्टस्य परमात्मनो विकारो जीवाभावे देहस्य शैत्याज् जीवतश्चौष्ण्याज् ज्ञायतइति । अयं न्यायो देहादावपि तुल्यः । जीवोत्क्रमणे देहादिविशरणदर्शनात् । तस्माटधिष्ठानैक्याभावाद् नेह साधारण्यमुपपद्यतइत्याशङ्क्याह **सर्वप्रत्यक्त्वादिति** । वस्तुतो ऽधिष्ठानैक्यमिहाप्यस्तीति भावः । **स्वेन्द्रियादिवदिति** । न हि मायिकत्वं व्यावहारिकसत्त्वे प्रयोजकत्वेन क्लृप्तमविद्यकत्वं तु तत्रापि तथा क्लृप्तमेवेन्द्रियादाविति भावः ।

१९९ । २१ **न मायाप्रतिबिम्बस्येति** । नन्विदं दूषणं स्वमते ऽपि तुल्यं न हि स्वमते नास्ति सविशेष ईश्वरः न च तस्य मुक्तप्राप्यत्वं तज्ज्ञानात्सर्वविज्ञानं चास्ति अस्ति चेन्मायाप्रतिबिम्बस्यैवास्तु को ऽत्र विशेषः । न चाविद्याप्रतिबिम्बस्य जीवस्याविद्योच्छेदे तत्प्रतिबिम्बभावो गच्छति परं न प्रतिबिम्बान्तरभावो भवति । एकप्रतिबिम्बविज्ञानाच्च न सर्वप्रतिबिम्बतद्धर्मविशेषविज्ञानं भवतीत्यस्ति विशेष इति वाच्यम् । कूपमध्यनिहितघटजलान्तर्गतसवितृकरमण्डलप्रतिबिम्बस्य घटनाशे कूपजलप्रतिबिम्बतापत्तिवद् व्यष्ट्यविद्याप्रतिबिम्बस्याविद्यानाशे व्यापकसमष्टिमायाप्रतिबिम्बतापत्तिसम्भवाद् व्यापकोपाधिप्रतिबिम्बे व्यष्ट्युपाधिप्रतिबिम्बानामन्तर्भूतत्वेन तज्ज्ञानात् सर्वविज्ञानोपपादनसंभवाच्चेति चेत् । उच्यते । मायोपाधिः किमर्थं कल्पनीयः किं मायाप्रतिबिम्ब एव मुक्तप्राप्यत्वसर्वविज्ञानश्रुतिविषयो वाच्य इति तद्विषयलाभार्थमुत जगद्भ्रमोपयोग्यधिष्ठानावरणसिद्ध्यर्थमिति विकल्पद्वयनिरासार्थं श्लोकद्वयम् । निर्विशेषब्रह्मभावप्राप्तिः परममुक्तिरित्यङ्गीकारान्मायाप्रतिबिम्बस्य मुक्तप्राप्यतैव नेष्यते अधिष्ठानज्ञानेन तदध्यस्तसर्वविज्ञानस्योपपादनीयत्वात् । प्रतिबिम्बस्याध्यस्तत्वनियमेन मायाप्रतिबिम्बस्याप्यध्यस्ततया तस्य महाकाशरीत्या ऽनवच्छिन्नस्य ब्रह्मण इवाधिष्ठानत्वायोगात्तज्ज्ञानतः सर्वविज्ञानं न संभवतीति न तदुभयश्रुतिविषयलाभार्थं मायोपाधिः कल्प्य इति प्रथमश्लोकार्थः । अधिष्ठानावरणमन्धकारवद्विषयाश्रितेनैवेति न नियमः नयनपटलवद् ग्रहीतृगतेनापि तदुपपत्तेरिति द्वितीयश्लोकार्थः ।

भ्रमे कर्तृदोषवद्विषयदोषेणापि भाव्यमिति तदर्थं मायावरणकल्पनमित्याशङ्क्य तन्नियमभङ्गमाह **पित्तस्येवेति*** । जीवा ऽविद्ययोः पौर्वापर्या-

* पीतस्येवेति मूले प्रमादान्मुद्रितं तदेवं शोध्यम् ।

भावे ऽपि तदध्यासयोस्तदस्त्वित्याशङ्क्य तन्नियमो नास्ति बीजाङ्कुरवदनादित्वादित्याह पौर्वापर्यं चेति । अप्रसङ्गेनेति च्छेद इति । तथा च प्रकृतहानाऽप्रकृतप्रक्रियाप्रसङ्गपरिहारेणैकवाक्यत्वं संभवतीत्यव्यवहितान्वयो लभ्यतइति भावः । तृतीयान्तस्य न वाक्यभेदो युज्यतइति व्यवहितेनान्वये तु न प्रश्लेषः* ।

अन्नोपघातीति† । सूक्ष्मशरीरएवाव्यक्तपदप्रवृत्तिनिमित्तमस्तीति २००
वदता किं तत्प्रवृत्तिनिमित्तमिष्यते । यदि भाष्याद्युक्तं तत्त्वाऽतत्त्वाभ्यामनिर्वाच्यत्वं तर्हि‡ तत् साक्षाद् अविद्यायामेव । यदि तत्परिणामत्वात् सूक्ष्मशरीरे ऽपि तर्हि तत् स्थूलशरीरे ऽपि स्यादित्यविशिष्टमव्यक्तपदस्य शरीरद्वये ऽपि मुख्यत्वम् । यदि प्रत्यगभिन्नत्वेन तदभिन्नत्वेन वा स्पष्टत्वं तत्प्रवृत्तिनिमित्तमिष्यते तदा स्थूलशरीरएव तन्मुख्यं स्यात् स्थूलो ऽहं मम शरीरमित्युभयथा ऽपि प्रतीत्या तत्रैव प्रत्यग्भेदाभेदाऽस्पष्टतासत्त्वात् । यदि प्रत्यक्षाऽगोचरत्वं तत्प्रवृत्तिनिमित्तमिष्यते तदा टीकातद्व्याख्यानयोरजहल्लक्षणोक्तेति द्रष्टव्यम् । स्नायवः सिराः मज्जा ऽस्थिगतस्नेह इत्यनेनेत्यस्य टीकाप्रतीकस्य व्यवधायकविषयत्वे ऽपि व्यवहितपदार्थमाहेति तदवतारणं यथेत्यादिप्रतिवचनं व्यवहितमित्येतदेव युक्तम् । हन्तेत्याद्यर्थमात्रस्य व्यवधायकत्वोक्तिस्तु न हृदयङ्गमा । येयं प्रेते इति मन्त्रानन्तरमाम्नातं देवैरत्रापि विचिकित्सितं पुरेति मन्त्रमुपक्रम्य प्रश्नस्य यस्मिन्नेतावुपाश्रितावित्यन्तस्य हन्तेत्यतः प्राचीनस्य महतः परमात्मविषयस्य प्रपञ्चस्य व्यवधायकस्य सत्त्वादित्यभिप्रेत्य । एवं च भाष्ये हन्तेत्याद्यर्थे व्यवधायकसमर्पकतया क्लेशेन न योजनीयं किं तु यथेत्यादिवज्जीवविषयान्तर्गततयैव योजनीयम् । यथेत्यादिना जीवं प्रस्तुत्य

तदेव शुक्रं§ तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥

इत्यादिना जीवस्यैव‖ ब्रह्मभावोपदेशेन तस्यापि ब्रह्मवचनप्रतिज्ञासंस्पर्शात् ।

* प्रश्लेष इति २-५ पु॰ पा॰ । उपरितन॰ पाठ शोधितः १ पु॰ ।
† मूले प्रमादादन्नोपघातीति मुद्रितं तदेव शोध्यम् ।
‡ तर्हीति नास्ति २ पु॰ । § शुक्रमिति २ पु॰ पा॰ । ‖ एवकारो नास्ति २ पु॰ ।

२०० । २३ चशब्द एवेति । ननु चशब्दो वृताऽवृतसमुच्चयार्थो न भवति येन वृतानग्निविद्यादीनवृतां सृङ्कां* च ददाविति तदर्थो वर्ण्येत किं तु वृताऽग्निविद्यादिविषयव्यतिरिक्ताऽवृतदेयान्तरसमुच्चयार्थः ।

तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः सृङ्कां चेमामनेकरूपां गृहाण ॥

इति हि श्रूयते । एवं तर्हि तवैव नाम्नेत्यादिदेयद्वये यथा पृथग्वरदानमस्ति नैवमव्यक्ते इति विशेषो द्रष्टव्यः । नन्वेवमव्यक्तपदस्य शरीरार्थकत्वे ऽप्यग्निविद्यादित्रयमात्रविषयप्रश्नोपन्यासविरोधस्तुल्यः पृष्टस्य परमात्मन एव निरतिशयपरत्वेन प्रतिपादनार्थं परत्वावधितया शरीरस्य निर्देश इति चेत् प्रधानस्यैवास्तु को न्वत्र विशेषः । उच्यते । निष्प्रपञ्चजीवब्रह्माऽभेदप्रतिपादनार्थं प्रवृत्तमिदं प्रकरणम् । येयं प्रेते इति प्रश्नो हि मृतजीवास्तित्वनास्तित्वविषयः । तत्र तस्य स्वारस्यात् । नचिकेतःप्रलोभनप्रस्तावे मरणं मा नु प्राक्षीरिति मरणप्रश्नप्रतिषेधदर्शनात् । यथा च मरणं प्राप्येत्यादिमृतजीवास्तित्वनिर्द्धारणविषयप्रतिवचनदर्शनाच्च । यद्यपि स्वर्गसाधनाग्निप्रश्नादिना नचिकेतसः परलोकानुबन्धिजीवास्तित्वनिश्चयवत्त्वमवसीयते तथापि तस्यैव स्थिरीकरणपूर्वकं तदीयपारमार्थिकरूपविविदिषया प्रश्न उपपद्यते । अत एव नचिकेतसो विषयवैराग्यदर्शनानन्तरं विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्तेति वैवस्वतवचनम् । अन्यत्र धर्मादिति प्रश्नः परमात्मविषय इति निर्विवादम् । प्रश्नद्वयस्य चैकविषयत्वं वरचित्त्वबलादविचलम् । अत्र च प्रकरणे योनिमन्ये प्रपद्यन्तइत्यादिषु जीवस्य कर्मोपासनाकर्तृत्वात्फलभोक्तृत्वादयो धर्मा दर्शिताः । तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेत्यादौ परस्य जीवव्यावृताः सर्वप्रपञ्चाश्रयत्वसर्वान्तरत्वादयो धर्मा दर्शिताः । विरुद्धधर्माश्रययोः कथमैक्यमित्याकाङ्क्षायां

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक् पश्यन् तानेवानु विधावति ॥

इत्यभेदविरोधिधर्मव्यवस्थां मन्वानस्तानेव धर्माननुवर्ततेति संसारानुवृत्तिदोषमुक्त्वा यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजा-

* सृङ्कां=रत्नमालाम् ।

नत आत्मा भवति गौतमेत्यध्यस्तसकलविरुद्धधर्मप्रहाण्या जीवपरैक्यं जानन्नेव मुक्तो भवतीति प्रतिपादितम् । एवं चात्र ब्रह्मपरतन्त्राणां शरीरेन्द्रियादीनां तदीयपरत्वावधितयोपन्यासो युज्यते न तु साङ्ख्याभिमतस्य स्वतन्त्रप्रधानस्य प्रकरणप्रतिपाद्यप्रधानार्थविरोधादिति भावः । अत्रास्मान् पृष्ठ इत्यादिपूर्वोत्तरग्रन्थविवरणे क्व चदित एवैक एव जीवप्रश्नः तत्कर्तृप्रशंसा ऽपीति पाठः । अत एकत्वमेव* एवं जीवप्रश्नतत्कर्तृप्रशंसा ऽपीत्यन्यत्र पाठः । अत एकत्वएव जीवप्रश्नतत्कर्तृप्रशंसापीत्यपरत्र पाठः । सर्वे ऽपि तुल्यार्थाः । आद्ये पाठद्वये वाक्यभेदः तृतीये वाक्यैक्यमिति विशेषः ।

अधिकरणादाविति । नन्वधिकरणादौ वैदिकं प्रकरणं पौरुषेयी २०१
रूढिर्वैदिकप्रकरणपरिशेषविरोधादेवानुपयोगिनीत्युक्तम् । तस्मादधिकरणादौ पौरुषेयत्वमात्रेणानुपयोग उक्तः । महद्वच्चे† ति सूत्रे प्रकरणविरोधादिना बाध उच्यतइति भेदकथनमयुक्तमिति चेत् । उच्यते । अधिकरणादौ शरीरगृहीतिहेतुत्वेनात्मानं रथिनं विद्धीत्यादिप्रकरणं शरीरपरिशेषश्चेत्युभयमुपन्यस्तम् । अस्य सिद्धान्तहेतोः प्राबल्यसिद्ध्यर्थं सांख्यरूढेः पौरुषेयत्वेन दौर्बल्यं भाष्यादिषूक्तं प्रबलेन सिद्धान्तहेतुना सांख्यरूढेरर्थात् परं बाधः सिध्यति न तु तद्बाधनार्थत्वेन तदुपन्यस्तम् । इह तु त्रयाणा§मिति सूत्रेण जीवप्रश्नकर्तृप्रशंसाद्यवगमितं ब्रह्मात्मैक्यप्रकरणम् । यत् साक्षादव्यक्तपदरूढेर्बाधकमिति सूचितं तत्र तस्मिन्नेव ब्रह्मात्मैक्यप्रकरणे श्रुतस्य महत्पदस्येवाव्यक्तपदस्यापि सांख्यरूढिर्गृह्यतइत्याशङ्कायां महद्वदिति सूत्रेण तद् ब्रह्मात्मैक्यप्रकरणं न केवलमव्यक्तपदरूढेरेव बाधकं किं तु महत्पदरूढेरपीति दृष्टान्तव्याजेन प्रदर्श्यान्ते ब्रह्मात्मैक्यप्रकरणे भेदवाद्यभिमतस्य महतः प्रधानप्रसक्तिरित्ययमर्थ उच्यते । अतो न पौनरुक्त्यम् । एवं च महद्वदिति समुच्चयोपमा ।

इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रक्षांसि समरोत्थानि सच्छोणितनदीष्विव ॥

इत्यादाविवेति द्रष्टव्यम् ।

---

* अत एव कर्मत्वमेवेति २ पु॰ पा॰ ।
† वैदिकप्रकरणमिति १ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ ७ ।
§ व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ ६ ।

अधिकरणादावित्यादिग्रन्थे इदानीं महच्छब्दस्येव वेदविरोधाद् बाध्याव्यक्तशब्दस्येति क्व चित् पाठः । इदानीं महच्छब्दस्येव विरोधाद्बाध इत्यन्यत्र पाठः । पाठद्वयमप्यर्थतस्तुल्यम्* । एवमन्यत्रापि यत्र पाठभेदस्तुल्यार्थः स्पष्टार्थश्च तत्र सर्वत्राप्येषैव रीतिरिति तत्र पाठभेदो नोदाह्रियते । प्रकरणादीत्यादिशब्देन महान्तं विभुमात्मानमित्यादि भाष्योदाहृतं गृह्यते ।

स्वरूपपर इति ।

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥

इत्यत्र तल्प्रत्ययः स्वार्थिको न तु प्रवृत्तिनिमित्तधर्मवाची । तस्य भावः सत्तेति टीकायामपि भावशब्दः स्वरूपवाचीति भावः । **जीवं चाहेति ।** जीवाभिन्नब्रह्मस्वरूपोपदेशार्थतयेति भावः† ॥

२०२ । ४ **चमसवदविशेषात् ॥ ८ ॥**

त्रिगुणत्वादिनेति । आदिशब्देनैकत्वादिवत् सृजमानामिति कृदुक्तस्वातन्त्र्यस्य जहातीत्युक्तस्य त्यागस्य च संग्रहो ऽपि द्रष्टव्यः । परमेश्वराधीनयोर्मूलाऽवान्तरप्रकृत्योः स्वातन्त्र्याभावाद् मुक्तिदशायामविद्याया निरवशेषोच्छेदाभ्युपगमेनानुवर्तमाने प्रधाने एव त्यागोक्तिसाङ्गत्याच्च । **सांख्यानामप्यस्ति भ्रम इति ।** स गृहीतासंसर्गधर्मधर्मिविषयज्ञानद्वयरूपस्तदुभयसंसर्गविषयकज्ञानरूपो वेत्यन्यदेतत् । यस्य ब्रह्मणो जगदुत्पत्ताविति टीकायामपेक्षितमध्याहरति **साध्यायामिति । ब्रह्मैक्ययोजकत्वाद्** ब्रह्मैक्यप्रापकत्वात् । ननु ध्यानयोगेनात्मानं गता प्राप्ता यदि मुक्ताः तर्हि कथं तेषां पुनरविद्यादर्शनमुच्यत इत्याशङ्क्य व्याचष्टे **आत्मप्राप्तिस्त्वनात्मविरहेण स्थितिरिति ।** अनात्मविरहो ऽनात्मदर्शनविरहः । **जात्यभिप्रायमिति ।** गुणसंघातरूपे प्रधाने ऽप्येकत्वं संघाताभिप्रायं वाच्यमिति तुल्यमेव । सृजमानामिति कर्तृप्रत्ययालम्बनं स्वातन्त्र्यमन्यप्रेर्यत्वे ऽपि न हीयते न हि यन्त्रा प्रेर्यमाणो गजो न गच्छति । कल्पनोपदेशे च ज्ञानेनावि-

---

* तुल्य द्रष्टव्यमिति २ पु० पा० । † अत्र प्रथमम् आनुमानिकाधिकरणं पूर्णम् ।

द्योच्छेदे मुच्यमानकर्तृकत्यागत्वकल्पना न विरुद्धा । ननु छागत्वकल्पनैव नोपपद्यते अजो ह्येकः अजो ऽन्य इत्यजशब्दयोश्चेतनवाचिनोरचेतनवाचिनश्चाऽजाशब्दस्य चाऽज्ञौ द्वावजावीशाऽनीशावजा ह्येका भोक्तृभोगार्थयुक्तेति प्राकरणिकमन्त्रान्तरगतशब्दवद्यौगिकतौचित्यादत्यन्तमेव प्रकृतिसंबन्धविमुक्तस्य परब्रह्मरूपतां प्राप्तस्य पुनः छागासंसर्गयोग्यातिमूढप्राणिप्रथमोदाहरणे छागत्वकल्पनाऽयोगाद् असौ वा आदित्य इत्यादौ मध्वादित्यादिपदद्वयसमभिव्याहारवदुपासनाप्रयोजनवत्त्वाच्च कल्पनोपदेशत्वकल्पकाभावाच्चेति चेद् न । द्वा सुपर्णेत्याद्यनन्तरमन्त्रे प्रथमप्रतीतरूढ्यपरित्यागेन प्रहीणजात्यवलम्बनस्यापि प्रतिपत्तिसौकर्यप्रयोजनस्य कल्पनोपदेशस्य दृष्टत्वेन तथेहाप्युपपत्तेः ।

प्रकरणादविद्यानिश्चयादिति । अनेन मूलप्रकृतिरजेत्येव मुख्यसिद्धान्तः । अजा ह्येका मायां तु प्रकृतिमित्यादिपूर्वापरमन्त्रानुरोधस्य शाखान्तरोक्तरोहितादिशब्दप्रत्यभिज्ञानतो बलवत्त्वादिति सूचितम् । ननु देवात्मशक्तिमित्यत्र दीव्यमानत्ववाचिदेवविशेषणमनावृतज्ञाने परमात्मन्येव युक्तमतस्तच्छक्तित्वोक्तिर्विरुद्धेत्याशङ्क्य व्याचष्टे **देवात्मविषयामिति*** ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ २०

योगरूढ्यविनिगमादिति । रूढियोगयोः स्वतः प्राबल्यदौर्बल्यविशेषे सत्यपि निस्तात्पर्यकत्वप्रसङ्गतत्परिहारलाभाभ्यां समबलत्वापादनेनाविनिगम उक्तः । **रक्तपटन्यायेनेति** । ननु श्रुतविशेषणसजातीये तद्विरोधिनि च नास्ति रक्तपटन्यायः यथा रक्तो रक्तः पट इत्यत्र मृण्मयो हिरण्मयो घट इत्यत्र । सत्यम् । यत्रैकया संख्यया विशेषितानामर्थानां सजातीयेन विजातीयेन वा संख्यान्तरेण विशेषणात्संघट्टनेन महासंख्यालाभस्तत्र रक्तपटन्यायः प्रवर्तत एव । यथा पञ्चभिर्धाता विदधाविदं यदिति मन्त्रे तासां स्वसृरजनयत् पञ्चपञ्चेति । अत्र हि पञ्चविंशतिरूपा संवर्धनसंख्या विवक्षिता विंशत् स्वसार इति वाक्यशेषात् । यथा वा पञ्चपञ्चाशतस्त्रिवृतः संवत्सरा इत्यादौ वाक्यचतुष्टये । अत्र पञ्चाशदुत्तरशतद्वयरूपा महासंख्या

* अत्र द्वितीयं चमसाधिकरणं पूर्णम् ।

विवक्षिता विश्वसृजां सहस्रसंवत्सरमिति वाक्यभेदात् । निस्तात्पर्यमिति पदस्यार्थं कथयन्नेव तद्धेतुवचनमवतारयति **निस्तात्पर्यइति** । अर्थाभावे ऽव्ययीभावः । तृतीयासप्तम्योर्बहुलमित्यम्भावस्य बाहुलकत्वात् । तात्पर्यइति सप्तम्यन्तरूपम् ।

२०३ । २१ **जायन्तइति व्युत्पत्त्येति** । जनिधातोः पचाद्यचि । अयं च संज्ञायामेव संख्यासमासविधाने ऽप्यगत्येह छान्दसत्वेनाऽसंज्ञायां तदुपपादनं कार्यमिति भावः । ननु तथापीत्यादिटीकाग्रन्थेन पञ्चजनशब्दार्थपरिग्रहे संभावितं प्रकारद्वयमुपन्यस्य प्रथमप्रकारं विरोधाद् निरस्य द्वितीयप्रकारः सांख्यतत्त्वग्रहणपर्यवसायी व्यवस्थाप्यतइति भाति । एवं सति तथेति तच्छब्देनाव्यवहितं योगं परामृश्य योगपक्षे प्रकारद्वयोपन्यासो ऽयं योजनीय उत तेन व्यवहितां रूढिं परामृश्य रूढिपक्षे । नाद्यः । मनुष्यसंबन्धिषु प्राणादिषु रूढिपूर्वलक्षणोपपत्तौ योगपरिग्रहाऽनौचित्यात् । न द्वितीयः । योगं विना पञ्चविंशतिसंख्यालाभाऽसंभवे रूढिपक्षे सांख्यतत्त्वग्रहणाऽयोगादित्याशङ्क्यावतारयति **रूढ्यत्यागेनेति** । तदतिरिक्ता एव* के चिदिति द्वितीयप्रकारोपन्यासो न सांख्यतत्त्वविषयः किं तु निषादपञ्चमाश्चत्वारो वर्णा इत्याचार्यकदेशिमतोपन्यासः । तत्र सदेवासुरमानुषसकलप्राण्याधारस्य परमेश्वरस्य तावदाश्रयत्वमात्रोपन्यासे वाक्यं निस्तात्पर्यं स्यादिति प्रागुक्तदोषानुवृत्तिं स्पष्टत्वादनुद्भाव्य प्रकारद्वयमपि विहाय तस्मात्कानि चिदेव तत्त्वानीत्याद्यग्रिमटीकाग्रन्थेन योगमाश्रित्य सांख्यतत्त्वग्रहणं समर्थ्यतइति

,, । २३ तात्पर्यम् । **वाक्यविरोधं व्यनक्तीति** । प्राणादयो न विवक्षणीया इत्यध्याहरणीयसाध्ये हेतुवाक्यविरोधमित्यर्थः । **पञ्चविंशतिस्तत्त्वानीति** । समासान्तर्गतया संख्यया प्रथमं पञ्चधा विभागे कृते पुनरेकैकस्मिन्विभागे पञ्चसंख्यानिवेशे सति पञ्चविंशतिस्तत्त्वानि संपद्यन्तइत्यर्थः । ननु तासां स्वसृजनयत्पञ्चपञ्चेत्यत्र पञ्चपञ्चाशतस्त्रिवृतः संवत्सरा इत्यत्र चैकैकोपाधिक्रोडीकारं विना ऽप्यवान्तरसंख्यानिवेशो दृष्टः तत्र प्रथमं पञ्चधा पञ्चाशद्धा च विभक्तेषु प्रत्येकं पञ्चसंख्यानिवेशेन महासंख्यालाभो न भवति

---

* तदतिरिक्ता अन्ये एवेति २ पु० पा० ।

किं तु पञ्चपदद्वयेन पञ्चपञ्चाशत्पदद्वयेन च महासंख्यालक्षणया । न चेह तथा व्यस्तसमस्तयोः पञ्चपदयोरेकमहासंख्यालक्षकत्वमुपपद्यतइति चेत्-ह्येवापि मा भूत्समासः असमस्तेन पञ्चपदद्वयेन पञ्चविंशतिसंख्या लक्ष्यतामिति पूर्वपक्षान्तरमुद्भावयतीत्यवतारयति **समासार्थ इत्यादिना ।**

वियतएवार्थात्मनेति । अपेक्षाबुद्धिरव्यक्ततया सतामेव द्वित्वादीनां व्यञ्जिका नोत्पादिकेति भावः । भाषिकेण स्वरेणैकपदत्वनिश्चयादिति भाष्यवाक्यस्य ब्राह्मणभवेन स्वरेण समासनिश्चयादित्यर्थः । भाषाशब्दस्य ब्राह्मणभागे प्रवचनशब्दस्य मन्त्रभागे च वैदिकानां निरूढिः । अत एव भाषास्वरोपदेशेष्वैवत्प्रवचनप्रतिषेधः स्या*दिति जैमिनीयं सूत्रम् । तन्मूले चाधिकरणे मन्त्रसमाम्नाये स्वरान्तरेण समाम्नातानां विनियोजकब्राह्मणस्वरान्तरेणोपात्तानां मन्त्राणां मन्त्रसमाम्नायस्वरे प्रावचनिकस्वर इति ब्राह्मणस्वरे भाषिकस्वर इति च मीमांसकानां व्यवहारश्च । एवं चात्राऽन्तानुदात्तरूपेण भाषिकस्वरेण कथं समासनिश्चयः । समासे ह्यन्तोदात्तेन भाव्यमित्याशङ्क्य तदभिप्रायमाह **भाषिकेण स्वरेणेत्यस्यार्थ इति ।** परसंलग्नतयेति टीकाग्रन्थश्च‡ प्रतिष्ठित इत्यर्द्धर्च विरामं विनोच्चार्यस्येत्यर्थः । ननु पञ्चजना इत्यत्राम्नानसिद्धस्यान्तानुदात्तस्वरस्य भाषिकग्रन्थविहितब्राह्मणपठितमन्त्रत्वनिमित्तोदात्तादेशरूपतया तत्स्थानिना अन्तोदात्तस्वरेण समासनिश्चय इत्येतदयुक्तम् । असमासे ऽपि जनशब्दस्य पचाद्यजन्ततया चित इति सूत्रेणान्तोदात्तलाभादिति चेत् । तथा सति नकारोपरितनस्य ब्राह्मणगतोदात्तस्यान्यनुदात्तस्वरसंभवे ऽपि पञ्चशब्दगतयोरकारयोः समासं विना तदसंभवात् । चित्स्वरसूत्रापवादकेन वृषादीनां चेति सूत्रेण वृषादिगणपठितस्य जनशब्दस्याद्युदात्तस्य विहिततया तस्य§ प्राग्विहितसकलपदस्वरापवादार्थं प्रवृत्तेनान्तोदात्तरूपेण समासस्वरेणैवापवदनीयत्वाच्च ।

हे आज्येति । आज्यग्रहणतन्त्रत्वाद् विनियोगानुसारेण संबोधनमध्याहृतम् । कृतइत्यव्ययं तादर्थ्ये । यन्त्राय धर्त्राय गृह्णामीति मन्त्रशे- २०५

---

* जै॰ सू॰ अ १२ पा॰ ३ सू॰ २०। स्वरोपदेशेष्विति ५ पा॰ स्वरोपदेशादिति शोधः पाठः।
† स्वरेणेति तस्यार्थ इति २ पु॰। ‡ आकाशश्चेति शोधित ५ पु॰।
§ विहितस्य तस्येति ३ पु॰ पा॰।

याम्नातयन्त्वधर्वशब्दोक्तशरीरादिनियमनधारणार्थमित्यर्थः । यद्यपि जना यदग्निमयजन्त पञ्चेत्यसमासो ऽपि वेदे दृश्यते तथापि यत्र पञ्चशब्दद्वयं तत्र जनशब्दपूर्वपठितस्य पञ्चशब्दस्य समासनियमो दृष्ट इति तात्पर्यम् ।

२०५ । २१ द्विः पञ्चशब्दप्रयोगेति । अनेन भाष्यटीकयोर्वीप्सापदं स्वतन्त्रस्य पञ्चशब्दस्य द्विःप्रयोगमात्रपरं न तु नित्यवीप्सयोरिति सूत्रोपात्तव्याप्तिविवक्षापरमिति दर्शितम् । ननु सूत्रोक्तायामेव वीप्सायामयं द्विःप्रयोगो ऽस्तु तथा च यथा दश चैकैकं चमसमनुप्रसर्पन्तीत्यत्र न द्वैगुण्येन विंशतिसंख्यालाभः शतं ब्राह्मणाः सोमं भक्षयन्तीति वाक्यशेषाद् एवमिहापि पञ्चविंशतिसंख्यालाभः स्यात् । मैवम् । तत्रानुप्रसर्पणीयानां चमसानां दशसंख्यत्वात्तदनुप्रसर्पकाणां प्रतिचमसं दशसंख्यानां ब्राह्मणानां शतसंख्या निषिध्यते एवमत्र जनानामधिकरणानि यदि पञ्च निर्दिष्टानि स्युः तदा प्रत्यधिकरणं पञ्चसंख्यजनसंबन्धरूपव्याप्तीच्छया पञ्चविंशतिसंख्या निष्पद्येत न त्वत्राधिकरणपञ्चकनिर्देशो ऽस्तीति वैषम्यात् । नन्वेवं सति तासां स्वसृरित्यत्रापि दशानामेव लाभः स्यात् । यदि तत्रैका पञ्चसंख्या पञ्चसंख्यान्तरेण विशेष्यते तर्ह्यत्रापि तथा ऽस्त्वित्याशयवतः शङ्कां निराकरोतीत्याह **असमासपक्षे एवेति ।** तासां स्वसृरित्यत्र वाक्यशेषानुसारेणागत्या विशेषणान्वयस्वीकारेणावयवद्वारा दशसंख्यालक्षणया पञ्चशब्दद्वयोपपादने संभवत्यनन्यगतिकविशेषणसंक्रमकल्पनाऽयोगात् । दशसंख्यया च ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतमित्यादिश्रुत्यन्तरप्रसिद्धसंख्येयग्रहणे संभवत्यप्रामाणिकसांख्यतत्त्वपर्यवसायिपञ्चविंशतिसंख्याग्रहणाऽयोगाच्च नात्र तन्न्यायः प्रवर्ततइति भावः ।

२०५ । २७ दूषितमपीति* । ननु यदि विशेषणस्य भिन्नपदोपात्तविशेषणान्तरान्वयो न संभवति तासां स्वसृरित्यत्र पञ्चपञ्चाशत इत्यत्र का गतिः । यदि तत्र क्रोडीकारकधर्ममनपेक्ष्यैव प्रथमं पञ्चधा पंचाशद्धा च विभक्तेषु पुनः पञ्चसंख्यान्वयात् संवर्द्धनसंख्यालाभस्तर्हि अत्रापि तथा ऽस्त्वित्यनुशयवन्तं प्रथमपूर्वपक्षिणं प्रकारान्तरेण दूषयितुमुत्थापयतीत्याह **नानाभावेनेति ।** ननु व्यस्तपञ्चसंख्यायाः न विशेषान्वयः आकाङ्क्षाविरहाद् नापि विशेष-

---

* दूषितमपीति न दृश्यते १ पु० ।

यान्वयः असामर्थ्यादित्युक्तं दूषणमयुक्तम् । संवर्द्धनसंख्यालाभार्थे सजा-
तीयविजातीयसंख्यान्तराकाङ्क्षोपपत्तेः । तदाकाङ्क्षाविरहे ऽपि संख्यान्तरस्य
शब्दगत्या साक्षाद् विशेषणान्वयमसामर्थ्यपराहतं परित्यज्य विशिष्टान्वयिन
एव तस्य सप्तदशारत्निवाक्ये विधेरेव विशेषणसंख्यासंक्रमकल्पनोपपत्तेः ।
अन्यथा तासां स्वसॄरित्यादौ का गतिरिति चेत् । उच्यते । तत्र वाक्यशे-
षानुसारात्संवर्द्धनसंख्यालम्भकम् आकाङ्क्षोत्थापनं विशेषणसंक्रमणं चाभ्युप-
गम्यते इह तु संवर्धनसंख्याविवक्षागमकवाक्यशेषाभावान्न तदुभयमाश्रयणी-
यमिति भावः ।

कथं चेति भाष्यमयुक्तमिति । ननु कथं चेति भाष्यं नायुक्तं २०६
किं तु तद्भाष्यमयुक्तमित्येतदेव वचनमयुक्तम् । न हि तेन पञ्चविंशति-
संख्याया अलाभ उक्तः किं तु यौगिकेन समस्तपदेन तल्लाभमभ्युपेत्य
तथापि तत्संख्येयानि सांख्यतत्त्वानीति न सिद्ध्यतीत्युक्तम् । अत एव
तत्सिद्धिः किं जनशब्दशक्तिवशादुत पञ्चविंशतिसंख्यायाः संख्येयान्तरा-
भावेन परिशेषादिति विकल्पं मनसि निधाय पक्षद्वयमपि भाष्ये क्रमेण
दूषितम् । तत्र द्वितीयविकल्पदूषणस्यायमर्थः । ज्ञानेन्द्रियाणि कर्मेन्द्रि-
याणि भूतानि तन्मात्राणि मनोबुद्धिभोक्तृस्थूलसूक्ष्मशरीराणि चेतीन्द्रियेभ्यः
परा ह्यर्था इत्यादिश्रुतिप्रसिद्धाः सन्ति । देवाः पितरो गन्धर्वा दैत्या
दानवा राक्षसा भूताः प्रेताः पिशाचाश्चत्वारो वर्णाः षडनुलोमाः षट्
प्रतिलोमाश्चेत्येवमपि पञ्चविंशतिः श्रुतिप्रसिद्धा एव जनशब्दमुख्यार्थाः
सन्ति । एवं श्रुत्यन्तरप्रसिद्धसंख्येयोपसंग्रहे कर्तुं शक्ये नाऽप्रामाणिकसांख्य-
कल्पिततत्त्वोपसंग्रहः कार्यः । एवं च संख्येयानामात्मनि प्रतिष्ठितत्ववर्णन-
मपि सङ्गच्छते । न हि सांख्यतत्त्वोपसंग्रहे तत्सङ्गतिरस्ति प्रधानस्य
स्वतन्त्रत्वादन्येषां प्रधानाश्रितत्वात् । आकाशग्रहणमपीन्द्रियादीनां संख्ये-
यतायामव्याकृताकाशपरतया देवादीनां संख्येयतायां तावतामवकाशात्म-
नोपकारको भूताकाशो महानिति तत्परतयोपपद्यत इति । तस्माद् भाष्या-
ऽयुक्तत्ववचनं तावदयुक्तम् । तथा पञ्चसंख्याद्वयात्पञ्चविंशतिसिद्धेरिति तद-
युक्तत्वहेतुवचनं प्राक्पञ्चविंशतिसंख्यालाभस्य नानाभावाकाङ्क्षाविरहाऽसाम-
र्थ्यहेतुभिर्दूषितत्वादप्ययुक्तम् । न हि दूषितपक्षस्य प्रौढ्या ऽभ्युपगमेन

दूषणान्तरोक्तिवद् दूषितपक्षमेवावलम्ब्य शङ्कोत्थापनं संगच्छते । तस्मात्सर्वमिदमनुपपन्नमिति चेत् ।

अत्रायमाचार्याणामाशयः । कथं चेत्यादिभाष्येण पञ्चविंशतिसंख्यामभ्युपगम्य ततः सांख्यतत्त्वोपसंग्रहस्य वस्तुनः पञ्चविंशतिसंख्यालाभस्य चाक्षेपः प्रतिज्ञातः । प्रथमाक्षेपे जनशब्दस्येत्यादिहेतुद्वयमुक्तम् । द्वितीयाक्षेपानुपपत्तिं कथं तर्हि पञ्च पञ्चजना इतीति भाष्येणोद्भाव्य तदुपपत्तिरुच्यतइत्यादिना दर्शिता । तत्र द्वितीयाक्षेपानुपपत्त्युद्भावनावाक्यस्यायमर्थः । पञ्चजना इत्यस्य क्लृप्ते योगे संभवति न रूढिः कल्पनीया यौगिकत्वे च असमस्तः पञ्चशब्दो न पञ्चसंख्याप्रतिपत्त्यर्थः समस्तपञ्चशब्देन तल्लाभात् । नापि द्वैगुण्यलाभार्थः व्यस्तसमस्तयोः पञ्चशब्दयोरेकार्थलक्षकत्वाऽसंभवात् । एवं चाऽसमस्तं पञ्चपदं पञ्चधा विभक्तेषु प्रत्येकमन्वितां विशेषणसंक्रान्तां वा पञ्चसंख्यां यदि न समर्थयेत् तदा व्यर्थमेव स्यादिति वाक्यभेदाभावे ऽप्यसमस्तपञ्चपदान्तरसमभिव्याहारबलात् पञ्चविंशतिसंख्यासिद्धिरनिवार्या इति कथं तत्सिद्ध्यभावो ऽपि प्रतिज्ञात इति । एवं कथं चेत्यादेः कथं तर्हि पञ्च पञ्चजना इत्यन्तस्य* भाष्यस्यार्थं सिद्धं कृत्वा टीकाकारैरुच्यतइत्यादिभाष्यस्याभिप्रायवर्णनं कथं चेति प्रघट्टकादिप्रतीकग्रहणपूर्वकं दिक्संख्ये इत्यादिग्रन्थेन क्रियतइति । एवमभिप्रेत्य कथ तर्हीत्यादिशङ्काभाष्यार्थः कथं चेत्यादिभाष्यमयुक्तमित्याद्यवतारिकया संगृहीतः । एवं च टीकाकारैः कथं चेति भाष्यप्रतीकमुपादाय कथमुच्यतइत्यादिभाष्याभिप्रायवर्णनं कृतमित्यपि शङ्का निरवकाशा वेदितव्या ।

अथ त्वसौ न धाक्ष्ये संबन्धार्हः पूर्वापरवाक्यविरोधी वेत्यनयोः
२०७ । १ क्रमेणोदाहरणे दर्शयति इह मनुष्येति† । यथा श्येनेनेत्यादिदृष्टान्तवाक्ये रूढिपूर्वकलक्षणोदाहृता तथेत्यादिदार्ष्टान्तिकवाक्ये तु रूढिसमर्थनमात्रं कृतं न तु तत्पूर्वलक्षणासमर्थनम् । अतस्तथेत्यादि दृष्टान्ताऽननुगुणं भवतीति शङ्कामपनयति‡ दार्ष्टान्तिकमाहेति । दृष्टान्ताननुगुणत्वाशङ्कां टीकायन्यापेक्षिताध्याहारेण निरस्यति तत्संबन्धादिति । तत्त्वेषु लाक्ष-

* इत्येतस्येति १ पु० पा० । † इह रूढमनुष्येति २ पु० पा० । मूले ऽप्येवमेव ।
‡ अतस्तथेत्यादि कथ दार्ष्टान्तिकं भवतीति शङ्कामपनयतीति २ पु० पा० ।

णिक इति । तत्त्वानामपि प्राणादिवद् मनुष्यसंबन्धित्वादिति भावः ।
ननु विधिश्रवणमसिद्धं मनसैवेति तृतीयावधारणाभ्यां मनोन्वयव्यतिरेक-
प्रदर्शनपराभ्यां तदन्वयव्यतिरेकानुविधायित्वेनोपासनानुवादप्रतीतेः । सुषुप्त्यु-
त्क्रान्त्यधिकरण*विषयवाक्यभूतनिष्प्रपञ्चप्रत्यगभिन्नब्रह्मप्रकरणमध्यपतितमन-
सैवानुद्रष्टव्यमित्येतदनन्तरं नेह नाना ऽस्ति किं चन मृत्योः स मृत्यु-
माप्नोति य इह नानेव पश्यतीति भेदनिषेधाम्नानेन च विरुद्धस्योपासना-
विधानस्याङ्गीकर्तुमयुक्तत्वाच्चेत्याशङ्क्याह **तत्रान्वयव्यतिरेकेति** । अन्व- २०१
यव्यतिरेकांशे ऽनुवादत्वे ऽपि तव्यप्रत्ययश्रवणादुपासने विधिरङ्गीकर्तुं
शक्यः । अनुवादत्वे ऽपि सत एवानुवाद इति विध्युन्नयनमुपपद्यते विश्व-
जित्सर्वपृष्ठ इति सर्वताविधावनूद्यमानं तदाश्रयपृष्ठविध्युन्नयनवद् अभेदप्र-
करणे ऽपि तत्प्रतिपत्त्युपायतयोपासनाविधिर्युज्यते । तत्रैव प्रकरणे यज्ञादि-
विधेः संन्यासविधेश्च दर्शनादिति भावः । **शेषग्रहणमिति** । तेनान्नम-
यादीनां पञ्चसंख्यानां मनुष्यसंबन्धिनामपि नात्र ग्रहणमसंनिहितत्वादिति
द्योत्यते । ज्योतिःप्राणमन्त्रयोरर्थान्तरपरत्वेन शर्कराञ्जनविध्यर्थवादरीत्या
पञ्चजनवाक्यशेषत्वाभावे ऽपि संनिधानमात्रमस्ति सूत्रे तावदेव विवक्षित-
मित्यपि द्योत्यते । **अपिधायेति** । रूढिव्यवस्थापनावन्तौ नातिदृढावित्यु-
पेक्ष्येत्यर्थः । अत एव विवक्षितोपसर्जनन्यायातिरेकप्रदर्शनस्थले तद्वाक्ये
रूढ्यैव संपादनीयमित्यभिप्रेत्य टीकायामत्र तावद्रूढौ सत्यां न योगः सम-
वतीति वक्ष्यतइति वक्ष्यमाणा रूढिः स्मारिता । **प्रौढ्या तु रूढिमिति** ।
प्राणादिष्विति शेषः । ननूद्भेदनमूर्ध्वविदारणमनेन क्रियतइति योगं प्रदर्श्य
खनित्रादौ प्रसिद्धिः संपादनीया सा पशुफलस्योद्भेदनं प्रकाशनमुत्पादनं वा
कुर्वति यागे ऽपि संपादयितुं शक्येत्याशङ्क्याह **नामत्वे चेति** । **मत्वर्थ-**
लक्षणेति । न च नामत्वपक्षे ऽप्युद्भिन्नामकत्वार्थे लक्षणाया जघन्यत्वा-
दिति भावः । **वैरूप्यापातादिति** । प्रतियोगिभेदेन साध्यत्वसाधनत्व- २८
योरविरोधे ऽप्येकस्य यजेः साध्यसाधनोभयावस्थासमर्पकत्वं न संभवतीति
भावः । अतः स्वरूपेणोपस्थितस्यैव यजेर्यथार्हं तेन तेनान्वयः स्यादित्या-
शङ्क्याह **विध्यावृत्त्येति** । यत्याञ्जन्यया विशेन्द्रे घोषा असृक्षतेत्यद्धस्यार्थः

* व्या· सू· अ· १ पा ३ सू· ४४ ।

कथितस्तेन पञ्चजनसंबन्धिन्याः प्रजाया मनुष्यत्वोक्त्या पञ्चजनशब्देनेह मनुष्याणां ग्रहणमित्युक्तं भवति । तत्र पञ्चसंख्या चतुरो वर्णानन्तरप्रभवत्वेनैकीकृता न तु लोमप्रतिलोमांश्चापेक्ष्य योजनीया । यत्पूर्वार्द्ध इति । यस्मा*दर्वाक् संवत्सरो ऽहोभिः परिवर्तते इति पूर्वार्द्धम् । पञ्चस्वन्तर्ज्योतिषेति । श्रुतौ बहुवचने सत्यप्यत्र सूत्रे चैकवचनं ज्योतिष्ट्वेनैकीकृत्य अन्यथा हि पञ्चसंख्यातिरेकः स्यादिति† ॥

२०६ । ४ **कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥**

परेति । कारणश्रुतीनामिव कार्यश्रुतीनामपि विरोधस्या‡त्रैव समाधेयत्वे ऽपि द्वितीयाध्याये परकर्तृकदोषसाम्यापादनप्रसक्तौ तत्समाधानम् ।

बाधे दृढे ऽन्यसाम्यात् किं दृढे ऽन्यदपि बाध्यताम् ।
क्व ममत्वं मुमुक्षूणामनिर्वचनवादिनाम् ॥

इति खाण्डनिकरीतिमवलम्ब्यानिर्वचनीयवादिभिरपि तत्समाधानप्रक्रियाया नोदासितव्यम् । तथा सति तत्त्वनिर्णयासिद्धिप्रसङ्गादिति शिष्यबोधनार्थमत्रैव तत्समाधाने कृते तद्विषयस्फुटबोधोदयाऽसंभवादित्यर्थः ।

काचित्कस्येति । क्वाचित्कप्रधानवादप्रतिपादनच्छायापन्नवाक्यगतिनिरूपणमेव पादार्थो न भवति किं तु ब्रह्मवादविरोधिवादमूलच्छायापन्नं क्व चित्क चि§दाम्नातं यद्यावद्वाक्यमस्ति तस्य सर्वस्य गतिनिरूपणं पादार्थः । अत एवोत्तराधिकरणद्वये जीववादमूलच्छायापन्नवाक्यगतिनिरूपणमपि क्रियतइति भावः । ननु पूर्वाधिकरणत्रयइवात्र क्वाचित्कवाक्यगतिनिरूपणं न क्रियते किं तु सर्ववेदान्तव्यापिब्रह्मप्रमाणत्वाभावप्रसक्तौ तत्समाधानम् । इदं तु समन्वयाधिकरणसन्निधौ संगतं न त्वत्र । किं चाग्रिमाधिकरणद्वयमपि विवक्षितरीत्या ऽत्र संगमयितुमयुक्तम् प्रधानसमर्पकाभासवाक्यगतिनिरूपणार्थपरः संदर्भः प्रवर्तनइति प्रतिपादयता पादारम्भ-
,, । १६ भाष्येण विरोधादित्याशङ्क्याह अथ चेति । कर्मकर्त्रभिधानादिति । न च कर्मण्ययं लकारः स्यादिति शङ्क्यम् । तथात्वे कर्त्रध्याहारगौरवप्रसङ्गात् ।

* तस्मादिति २ पु पा० ।
† अत्र तृतीय संख्योपसंग्रहाधिकरणं पूर्णम् ।
‡ विरोधस्यैति २ पु पा ।
§ क्व चिदिति खण्डेऽत्र २ पु० ।

न च कर्मकर्तरि लकारे ऽप्येष दोषस्तुल्यः अलूयत केदारः स्वयमेवेत्यत्र सत्येवान्यस्मिन् लवनकर्तरि सौकर्यातिशयेन कर्मणः साध्वसिश्छिनत्तीत्यत्र करणस्येव कर्तृत्वविवक्षणात् ।

क्रियमाणं तु यत् कर्म स्वयमेव प्रसिध्यति ।
मुख्यस्य स्वगुणैर्युक्तं कर्मकर्तेति तं विदुः ॥

इति शब्दाभियुक्तवचनादिति वाच्यम् । कर्मकर्तृविवक्षायां कर्त्रन्तराक्षेपनियमाऽभावात् । महाभाष्ये कर्म्मणः कर्तृत्वरूपस्य स्वातन्त्र्यस्य किं सतो विवक्षा उत विवक्षामात्रमिति विमृश्य सत इति पक्षं परिगृह्य तत्र भिद्यते कुसूलेनेत्युदाहृत्य तत्राप्यन्ये भेदनकर्तारो वातवृष्ट्यादयो* ये ऽकालाः† सन्तीत्याशङ्क्य वातवृष्ट्यभावे चिरकालकृतस्य कुसूलस्य भेदने नान्यः कर्ता ऽस्तीति तत्रैवोक्तत्वाच्च ।

स्वयंकर्तृकत्वान्यकर्तृकत्वाभ्यां सर्गे इति । ननु स्वयंकर्तृकत्वे विगानाऽनुवृत्तौ कथं स्रष्ट्र्यविगानम् । न च स्वयंकर्तृकत्वपक्षे स्वयमेव कर्ता ऽस्तीति तत्राऽविगानसिद्धिः । न हि स्रष्टृमात्रे इहाऽविगानं विवक्षितं किं तु सर्वज्ञत्वसर्वेश्वरत्वादिविशिष्टे स्रष्टरि । अग्रे भाष्यटीकयोस्तत्रैवाऽविगानप्रदर्शनात् । किं च कर्मकर्तरि लकारेण प्रपञ्चस्य स्वव्यापारं भवनं प्रत्येव कर्तृत्वं सिध्यति न तु तत्प्रयोजकव्यापारं भावनरूपं सर्गं प्रतीति न तेन स्रष्टृमात्रे ऽप्यविगानसिद्धिः । लूयते इत्यत्रापि केदारस्य स्वव्यापारं द्विधाभवनं प्रत्येव कर्तृत्वमर्थो न तु प्रयोजकव्यापारं द्विधाभावनं प्रति । यथोक्तं कैयटेन लुनातिस्तावद् द्विधाभावनोपसर्जने द्विधाभवने वर्तते । लुनाति केदारं देवदत्तः द्विधा भवन्तं द्विधा भावयतीत्यर्थः । यदा तु केदारस्य सौकर्यातिशयविवक्षायां देवदत्तव्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्तते अनेकार्थत्वाद् धातूनां भिन्ना एव वा धातवो भिन्नार्थाः सारूप्यात्तु तत्त्वाध्यवसायः तत्र द्विधाभवने केदारस्य कर्तुः कर्मवत् कर्मणा तुल्यक्रिय इति कर्मकार्याण्यतिदिश्यन्ते । तेन लूयते केदारः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्ते इति । एवमन्यकर्तृकत्वपक्षे ऽप्यसत्कर्तृकत्वं सत्कर्तृकत्वं वेत्यान्तरालिकविवादसत्वान्न विवक्षितरूपविशिष्टे स्रष्ट्र्यविगानसिद्धिः । तस्मात् स्वयंकर्तृकत्वान्यकर्तृकत्वविगानानुवृत्तिमभ्युपेत्य स्रष्ट्र्यविगानवचनमयुक्तमिति चेत् । २१०

* वातार्तवृष्ट्यादय इति ५ पु॰ पा॰ । † पुकाला इति ५ पु॰ पा॰ ।

अथायमाचार्याणामाशयः । व्याक्रियतेति कर्मकर्तृलकारेण स्रज्यस्य प्रपञ्चस्य प्रपञ्चात्मना कर्तृत्वमुच्यतइति न पूर्वपक्षः किं तु तदात्मानं स्वयमकुरुत बहु स्यां प्रजायेयेत्यादिश्रवणात्परमेश्वरस्यैव प्रपञ्चभावेन परिणाम इति तदभेदं सिद्धं कृत्वा प्रपञ्चस्य परमेश्वरात्मना स्वकर्तृत्वमुच्यतइति । एवं श्रुत्यन्तरार्थसिद्धवत्कारसूचनार्थमेव पूर्वपक्षे* तन्नामरूपाभ्यां व्याक्रियतेत्यादीनीत्यादिग्रहणं कृतम् । ततश्च स्वयंकर्तृकत्वविगानानुवृत्तावपि सृष्टविगानमस्तीति तद्वचनमुपपन्नम् । अन्यकर्तृकत्वकोटिरसद्वादनिराकरणे प्राक्प्रवृत्तानन्दमयाधिकरणा†दिपर्यालोचनमेवाथापि यथाव्यपदिष्टोक्तेरिति हेतुना पुनः प्रवर्तितया ऽसत्कर्तृकत्वकोटि‡निरस्तेति ब्रह्मपरमेश्वरकर्तृकत्वपर्यवसायिनीति तस्यामपि कोटौ सृष्टविगानवचनमुपपन्नम् । एवमन्यकर्तृकत्वकोटेः सृष्टविगानपर्यवसानमसद्वादनिराकरणसापेक्षमिति तन्निराकरणमिति श्लोके संगृहीतम् । तन्निराकरणं च यथाव्यपदिष्टोक्तिहेतुनैव सिध्यतीत्याविष्कर्तुमेवात्र तन्निराकरणप्रपञ्चनानन्तरं कारणत्वेनेति सूत्रं व्याख्याय स्वयंकर्तृकत्वनिराकरणं समाकर्षसूत्र§तात्पर्यविषयत्वाभिप्रायेण तदनन्तरं कृतम् ।

२११ । २५ कर्मकर्तरि कर्मणि वेति । कर्मणीति पक्ष एव युक्ततरः । अव्याकृत||मासीदिति कर्मण्येव निष्ठान्तस्य प्राक् प्रयोगात् । एकविषययोः प्रागव्याकृतं पश्चाद्व्याक्रियतेति प्रयोगयोः प्रागच्छिन्नं वनमिदानीमच्छिद्यतेति प्रयोगयोरिवैकार्थपरत्वावश्यंभावात् । न ह्यव्याकृतमित्यपि कर्मकर्तरि प्रयोग इति वक्तुं शक्यम् । अनेनाव्याकृतमिति तृतीयाप्रसङ्गात् । कर्मणः कर्तृत्वविवक्षायां हि धातोरकर्मकत्वाद्भावे निष्ठेति कर्तुरनभिधानात् तृतीयैव भाव्यम् । न च कर्मकर्तरि कर्मणि वा लकारेण कर्त्राक्षेपे ऽपि सकर्तृश्रुत्यन्तरानुसारात् प्रपञ्चाभिन्नं स्यादिति स्वकर्तृत्वशङ्का तदवस्थेति वाच्यम् । आरम्भणाधिकरणादिषु¶ परिणामवादस्य निराकरणीयत्वादिति भावः । एवं तह्यानन्दमयाधिकरणा**दिनिर्णीतार्थस्यारम्भणाधिकरणादिनि-

---

* पूर्वेति नास्ति २ पु० ।
† व्या० सू० अ० १ पा० १ सू० १२ ।
‡ असत्कर्तृकत्वकोटिरिति नास्ति ५ पु० ।
§ व्या० सू० अ० १ पा० ४ सू० १५ ।
|| प्रागव्याकृतमिति २ पु० पा० ।
¶ व्या० सू० अ० २ पा० १ सू० १४ ।
** व्या० सू० अ० १ पा० १ सू० १२ ।

र्णीतार्थस्य च पर्यालोचनेनैवासत्कर्तृकत्वपरताशङ्कायाः परिणामवादावलम्बनस्वकर्तृकत्वपरताशङ्कायाश्च निरसनसम्भवान्निरालम्बनपूर्वपक्षमिदमधिकरणमिति चेत् । सत्यम् । तथाप्यसदादिशब्दश्रवणमात्रसंतुष्टः सांख्यः कारणवाक्येषु परस्परविरोधं तेषामनिर्णायकत्वं चोद्घाट्य स्मृतिन्यायाभ्यामेव जगत्कारणं निर्णेतव्यमिति मन्यमानस्तदनुसारेणैव पूर्वापरवाक्ययोजनायां प्रयतते तदनुशयनिराकरणार्थमिदमधिकरणम् । अत एव भाष्ये पूर्वपक्षोपसंहारवाक्यं स्मृतिन्यायप्रसिद्धिभ्यां तु कारणान्तरपरिग्रहो न्याय्य इति । अतो मिथ्याभूतायां सृष्टौ विगाने न दोष इति । अकल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमाने विगानं क्व चिदपि न दोषः । यथा तात्त्विकारुन्धतीप्रतिपत्त्युपायतया नानापुरुषैः कल्प्यमानायां तत्प्राच्योदीच्यादिनक्षत्ररूपायां स्थूलारुन्धत्यां यथा वा रेखागवयन्यायेन नित्यशब्दप्रतिपत्त्युपायतया नानाव्याकरणैः परस्परभिन्नप्रकृतिप्रत्ययविभागेन कृत्रिमशब्द इति भावः* ॥

जगद्वाचित्वात् ॥ १६ ॥

हैरण्यगर्भेति । ननु किमिह हैरण्यगर्भं मतं विवक्षितम् । सत्यलोकादिप्राप्त्यर्थं हिरण्यगर्भ उपास्य इति मतमिति चेद् न । सिद्धान्तेऽपि श्रुतिषु तत्र तत्र तदुपासनस्याङ्गीकृतत्वेन तस्यासाधारण्येन हैरण्यगर्भमतत्वाभावात् । अधिकरणस्य ब्रह्मवादविरोधिकून्मतनिरासार्थत्वाभावे विषयवाक्यस्य हिरण्यगर्भोपासनापरत्वनिरसनमात्रेण विवक्षितपादसंगत्यलाभाच्च । हिरण्यगर्भ एव मुमुक्षुभिरुपास्यं परं ब्रह्मेति मतमिति चेद् न । पूर्वपक्षे तदनुवादस्य सिद्धान्ते तन्निरसनस्य चाप्रदर्शनात् । हिरण्यगर्भस्य परब्रह्मपरत्वमङ्गीकृत्यैव परिच्छिन्नफलकतदुपासनापरत्वस्य पूर्वपक्षावसरे प्रदर्शनादिति चेत् । उच्यते । उपन्यस्तो हिरण्यगर्भपूर्वपक्षोऽयम् । अजासक्षोभ्रान्तत्व†मृषावादित्वदोषपरिहारार्थं हिरण्यगर्भ एवोपक्रान्तं मुमुक्षूपास्यं परं ब्रह्मास्त्विति हैरण्यगर्भमतमादाय परिष्कर्तुं शक्यत इति कथान्तरे तत्पर्यवसायो भवेद् अतस्तन्मतनिरसनमपि कर्मशब्दे योगव्यवस्थापनादिना तन्मतोपस्थापकं लिङ्गमिह नास्तीति प्रदर्शनेन विवक्षितमित्या-

* अत्र चतुर्थं कारणत्वाधिकरणं पूर्णम् ।

† भ्रान्तत्वेत्यसमञ्जसः पाठः १ पु० ।

चार्याणामभिप्रायः । अत एव तस्य मतस्य चोत्यत्यमेवोपन्यस्तं नानुवादत्वम् ।

२१३ । ३ जीवाज्ञज्ञे इति । परकीय उपालम्भकश्लोकः । अध्यारोपापवादाभ्यां यन्निष्प्रपञ्चं वेदान्तानां प्रतिपिपादयिषितं तत्र खलु तेषां समन्वयः । एवं च वाचस्पतिमते जीवएव समन्वयः पर्यवस्यति तन्मते जीवाश्रिताविद्यापरिणामस्य प्रपञ्चस्य जीवे ऽध्यारोपेण तत्रैवापवदनीय*त्वात् । अतो जीवे समन्वयं पूर्वपक्षीकृत्य निरस्यन् वाचस्पतिः कथं न लज्जितवानित्यर्थः । सकारणमिति । कारणशब्दः सूक्ष्मभूतपरः अविद्यापरो वा तस्या अपि प्रवाहाऽनादिभ्रमकल्पितत्वात् । अधिष्ठानं हीति ।

अधिष्ठानं विवर्तानामाश्रयो ब्रह्म शुक्तिवत् ।
जीवाविद्यादिकानां स्यादिति सर्वमनाकुलम् ॥

इति प्रागेवाचार्यैर्वाचस्पतिमते ब्रह्मणः सजीवाविद्यासकलप्रपञ्चाधिष्ठानत्वमुक्तमिहानुसन्धेयम् ।

पूर्वपक्षत्वादिति । नन्वसद्वादवदस्य निराकरणं न दृश्यतइति चेत् । दृश्यतएव मृषा वै खलु मा सवादयिष्ठा इति । तर्हि मृषावादित्वेन बालाकिमपोद्य स्वयमप्यजातशत्रुरब्रह्मोपदिशति चेत् सो ऽपि मृषावादी स्यादिति चेद् न । बालाकिवद् ब्रह्मोपदिशामीत्युपक्रम्य ब्रह्मोपदेशे हि मृषावादित्वं स्यात् तदुपक्रमाभावे कुतो मृषावादित्वप्रसङ्गः । ब्रह्मोपदेशार्थे प्रवृत्तस्य बालाकेरब्रह्मोपदेशाद् मृषावादित्वेन निरसनानन्तरं स्वयमब्रह्मोपदेशे का संगतिरिति चेत् । एषा संगतिः । त्वदुक्तं तावत् किमपि ब्रह्म न भवति अहमपि ब्रह्म न पश्यामि अत इदानीं फलार्थिना त्वया हिरण्यगर्भ एव वेदितव्य इति । दृश्यते हि रसवादिनं ब्रवाणीति प्रतिज्ञातवतो दाहृतान् पुरुषान् विप्रलम्भकत्वादिचततत्स्वरूपोपन्यासेन प्रत्याख्याय ततः परमुदाहरणीयपुरुषाभावात् तूष्णींभूते तस्मिन् प्रतिवक्ता स्वयमपि रसवादिनमपश्यता राजेव धनार्थिनोपसर्पणीय इत्युच्यतइति । न भ्रान्तो ब्रह्मोपक्रम इति । ब्रह्म ते ब्रवाणीति प्रतिज्ञावाक्येन ब्रह्मोपक्रान्तमित्येतद् न

,, । २५

* अव वदनीयेति २ पु पा ।

बाधितमित्यर्थः । तदेवोत्तरवाक्यगतेन लिङ्गेन द्रढयति **सहस्रमिति ।**
दत्तत्वादिति । प्रतिश्रुतं दत्तप्रायम् । यद्वा आशंसायां भूतवत्क्तः । दातु- २१२
माशंसितत्वादित्यर्थः । एवं ब्रह्मोपक्रमसिद्धौ गार्ग्यस्य भ्रान्तत्वे ऽपि यस्य
कस्य चिद् वाक्येनास्मिन् प्रकरणे ब्रह्म निर्णिनीषितमित्यवसीयते अन्यथा
ब्रह्मोपक्रमोपाख्याननिबन्धनस्य प्रकृतविद्यानुपयोगितापाताद् वैश्वानरवि-
द्यादिषु प्राचीनशालादीनां भ्रान्तत्वे ऽपि वैश्वानराद्युपक्रमस्य प्राकरणिकत-
त्तन्निर्णयार्थत्वदर्शनाच्च । तथा च लौकिकरथवादवचनादिदृष्टान्तो ऽत्र न
क्रम इति तात्पर्यम् ।

उपसंहारे इति । अनन्यथासिद्धोपसंहारिकजीवनिर्णयानुसारेण ब्रह्मो-
पक्रमस्तदभेदाभिप्रायेण योजनीय इति भावः । जीवपूर्वपक्षो ऽयं जीवोपा-
सनाविधिविषयो न भवति किं तु परब्रह्मवज् ज्ञेयो जीवः प्रतिपाद्य
इत्येतद्विषयः । अत एवास्मिन् पूर्वपक्षे प्रथमपूर्वपक्षवत्र पादसंगतिर्न प्रद-
र्शिता समनन्तराधिकरणे वक्ष्यमाणैव सा ऽत्राप्युन्नेतुं शक्येत्यभिप्रायात् ।
अन्यथा पूर्वाधिकरणसंगतिवत्पादसंगतिरपि पृथगुच्येत । अत एव च जीवे
समन्वयनिरसनमयुक्तमिति परकीयोपालम्भः प्राग् दर्शितः । जीवोपासनाविधि-
परत्वमात्रेण हि जीवे* समन्वयो न प्रसज्यते अन्यथा पञ्चाग्निविद्यादीनां
तत्समन्वयप्रसङ्गात् । **लाक्षणिक इति ।** धर्माधर्मलक्षणया हि वेदितव्य
स्यादित्यादिपुरुषकर्तृत्वं कीदृशं विवक्षितमित्याकाङ्क्षायामपूर्वद्वारकं विवक्षि-
तमित्याकाङ्क्षितार्थसमर्पकतया प्रकृतोपयोगि भवति न परिस्पन्दपरताया-
मिति लक्षणैव ज्यायसीति भावः ।

सप्तमीप्रथमाभ्यामिति । क्व प्राणे इति सप्तमी क्वैष इति २१
प्रथमा प्रतिवचने प्राणवाक्ये ऽप्यन्वयिनी । तथा च सुषुप्ताधारः प्राणो वेदि-
तव्यः पुरुषो न सुषुप्त इति भावः । जीवपूर्वपक्षे तु प्राकरणिकजीवव्यतिरे-
कनिर्दिष्टं निरस्य वाक्यं योजनीयम् । क्वैष इति प्रश्नस्य प्राणे इति प्रति-
वचनं न संभवति किं तु हिता नाम नाड्य इति नाडीः प्रक्रम्याम्नातं तासु
तदा भवतीति वचनं कदेत्याकाङ्क्षायां यदा सुप्तः स्वप्नं †न कं चन पश्य-

* मात्रेणापि जीवे इति २ पु॰ पा ।   † सुप्तं स्वप्नमिति १ पु॰ ।

तीति तच्छेषः। अथास्मिन् प्राण एवैकधा भवतीति प्राणशब्दनिर्दिष्टे नाडीस्थे जीवे करणमण्डलस्य लय उच्यते तदेनं वाक् सर्वैर्नामभिः सहाप्येतीत्याद्यग्रिमविवरणदर्शनात्। स यदा प्रतिबुध्यतइति प्राणशब्दनिर्दिष्टस्य प्रबोधोपन्यासाच्चेति। तामेतां योजनामभिप्रेत्य भाष्यटीकयोः प्राणभृत्त्वेन जीवस्य प्राणशब्दवाच्यत्वमुपपादितं व्यतिरेकनिर्देशो जीवनाडीविषयः। अतो जीव एव वेदितव्य इति योजना तावदयुक्ता। तथा सति वेदितव्यस्वरूपस्यैव प्रष्टव्यतया तदाधारप्रश्नाऽयोगात्। न च तस्य नाड्याधारत्वेन पापाऽस्पृष्टतया वेदितव्यत्वोपपादनार्थमाधारप्रश्न इति वाच्यम्। तथा सति पापास्पर्शस्यापि वक्तव्यत्वापत्तेः। न च सौषुप्तिकनाडीः प्रविष्टस्य पापाऽस्पर्शः तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवतीति छान्दोग्यप्रसिद्धत्वान्नोक्त इति वाच्यम्। क्वैष एतदिति प्रश्नानन्तरं तदु ह बालाकिर्न विजज्ञावित्युक्तत्वेन सुषुप्तौ* नाडीप्रवेशमेवाऽजानतो बालाकेस्तत्प्रवेशकृतपाप्मास्पर्शप्रसिद्ध्यभावात्। तस्माज्जीवाधारो वेदितव्यः पुरुष इति प्रतिपादनार्थं एव स प्रश्नः। एवं च तासु तदा भवतीत्येतन्न तदुत्तरं नाडीनां वेदितव्यपुरुषत्वाभावात्। ननु ता हि प्रत्यवसृप्य पुरीतति शेते इति श्रुत्यन्तरानुसारेण हृदयावच्छिन्नब्रह्मप्राप्तिमार्गोपदेशपरम्। द्वितीयप्रश्नः करणग्रामाधिकरणविषय इत्यपि न युक्तम्। क्वैष एतद् बालाके †पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति प्रश्नत्रये ऽपि प्रथमप्रश्ननिर्दिष्टस्यैव कर्तुरन्वयप्रतीत्या कर्त्रन्तराध्याहाराऽयोगात्। तथा सति प्रथमद्वितीयप्रश्नयोः पुनरुक्तिः स्यादिति चेद् न। द्वितीयप्रश्नस्य प्राण एवैकधा भवतीत्युत्तरानुसारेण तादात्म्येन भवनविषयत्वाद् निर्देश इति सिद्धवत्कृत्य हिरण्यगर्भपूर्वपक्षे पर्यवसानं कृतम्। कुत एतदागादित्यपादानप्रश्नस्यापि कुतस्तादात्म्यभवनाधिकरणादागत इत्यर्थपरिग्रहे ऽस्यैव साफल्यस्योपपादनीयत्वात्। यत्र धर्मिणि शयितस्तत आगादिति स्वत एव ज्ञातुं शक्यत्वेनापतिता हि तन्नैष्फल्यशङ्का तादात्म्यभवनाधिकरणस्यालौकिकत्वेनाऽसंभावितत्वात्तद्दृढीकरणार्थस्तथाभूताधिकरणादागमनप्रश्न इत्युपपादनेन परिहरणीया।

---

* सुषुप्तिर्वर्तिन १ पु० पा०। † एतद्वा लोके इति २ पु० पा०।

तदेनं वागिति । अत्रैतत्पदं प्राणपरामर्शि तस्य सप्तम्यन्तनिर्दिष्टत्वे २१५
ऽपि प्रतिपिपादयिषितत्वेन प्राधान्यात् । ततश्च वाक्चक्षुःश्रोत्रमनसां सर्वैः स्वस्वविषयैः सहाप्ययोक्तौ जीवस्यापि मनोविषयत्वान्मनउपाधिकत्वाद्वा तस्मिन्नप्यय उक्तो भवतीति शयनप्रश्नोत्तरत्वलाभः । शयनप्रश्नस्योत्तरान्तराऽदर्शनात् तदेनमित्यादेस्तदनुत्तरत्वे भवनापादानोत्तरद्वयमध्याम्नातस्य तस्य वैफल्यप्रसङ्गाच्च । एवमेवैतस्मादात्मन इत्यादेः सामान्यमुखेन जीवोद्गमनापादानप्रश्नोत्तरत्ववत्तदेनं वागित्यादेरपि सामान्यमुखेन जीवशयनाधिकरणत्वस्य प्रबोधे तदुद्गमनापादानत्वस्य चासंभवाच्चेति भावः । **आत्मशब्दादपीति ।** आप्लृ व्याप्ताविति धातुतादात्म्यशब्दादित्यर्थः । **निर्णीतार्थवाक्ये इति ।** रूढिमभ्युपेत्य तद्बाधनार्थमेवमुक्तिः । वस्तुतस्तु परिस्पन्दे विशिष्य शक्तिर्नाभ्युपेया बर्हिराज्यादिशब्दानां संस्कृतेष्विव द्वितीयातृतीयादिशब्दानां तिथिविशेषेष्विव च योगरूढ्या सामान्यशक्त्यैव तत्र प्रयोगनिर्वाहे विशिष्य शक्त्यन्तरकल्पनस्य गौरवपराहतत्वात् । किं च परिस्पन्दे विशिष्य शक्त्यन्तरकल्पने परिस्पन्दाऽनपेक्षयोर्मानसपुण्यपापयोरपि कर्मशब्दप्रयोगसत्त्वेन तत्रापि विशिष्य शक्त्यन्तरस्य कल्पनीयतया रूढिद्वये परस्परं कलहायमाने लब्धोन्मेषेण योगेन कर्ममात्रोपस्थितिः संभवतीत्यपि द्रष्टव्यम् ।

अर्थात्सूचनाज्ञानादिति*। नन्वर्थात् सूत्रेण सूचितमर्थं जानतां २१६
सूक्ष्मधियां वा कथमिदं प्राणपूर्वपक्षनिराकरणसमर्थमिति धीः स्याद् यष्टिघातादिना हि व्यष्टिप्राणान्यत्वं स्याद् न तु समष्टिप्राणाभिमानिदेवताहूपहिरण्यगर्भान्यत्वमपि । न चामन्त्रणे बृहद्विशेषणेन तल्लाभः । व्यष्टेरपि चक्षुराद्यपेक्षमहत्त्वसत्त्वात् सुषुप्तिदशायामुपरतव्यापारेभ्यः शरीरेन्द्रियेभ्यो ऽन्यत्वं सुज्ञानमिति तस्यामपि दशायामनुपरतव्यापाराद् व्यष्टिप्राणादन्यत्वज्ञापनेनैवामन्त्रणादेः साफल्यस्योपपादनीयत्वाच्चेति चेत् । सत्यम् । अभ्युच्चययुक्तिरियम् । अत एव भाष्ये ऽपि तथैवोक्तम् । एवं वाजसनेयशाखायां प्राणशब्दस्थाने आकाशशब्दाम्नानमभ्युच्चयान्तरम् । स हि परमात्मनि प्रसिद्धो न हिरण्यगर्भे । इदमप्याकाशशब्दश्चेति भाष्येण सूचितम्† ॥

---

* आर्थार्थात्सूचनादिति २-४ पु॰ पा॰ ।

† अत्र पञ्चमं जगद्वाचित्वाधिकरणं बालाक्यधिकरणं वा पूर्णम् ।

२१७ । ३ **वाक्यान्वयात् ॥ १९ ॥**

वाक्यसंदर्भं व्याख्यातीति । पतिः प्रियो भवतीत्यादिभिर्वाक्यैः पत्यादीनां प्रेमविषयत्वोक्तिः कथं तेषु वैराग्योत्पादनीत्यादिशङ्कानिरासायेत्यर्थः । पतिजायादिवाक्येषु वैशब्दः प्रसिद्ध्यनुवादकः । प्रसिद्धं ह्येतत्तवापि मैत्रेयि पत्यादयो जायादीनां पत्यादिप्रयोजनाय प्रिया न भवन्ति किं तु स्वप्रयोजनाय । अत एव तेषु स्वेष्टसंपादकत्वदशायामिव स्वानिष्टसंपादकत्वदशायां न प्रेमा । अतः सोपाधिकं प्रियत्वमेतेषामात्मन एव निरुपाधिकमिति पतिजायादिवाक्येषु परिहारप्रक्रिया । टीका स्पष्टेति न विवृता । यद्येवं तर्हि पत्यपेक्षया स्वात्मनः प्रियत्वं मैत्रेय्याः स्वानुभवसाक्षिकं प्रसिद्धं तद्दृष्टान्तेनोत्तरवाक्यानामपि प्रसिद्धार्थविषयतया सिद्धिः इत्येवं निरुपाधिकप्रेमास्पदत्वं जीवलिङ्गमेव पर्य्यवसितम् । एतदनुसारेण श्रवणादिवाक्यगतस्याप्यात्मशब्दस्य जीवविषयत्वं प्राप्नोतीति कथमिद पूर्वपक्षलिङ्गं सिद्धान्तोपपादकतया टीकायां लिखितं जीवलिङ्गमेवेदम् अमृतत्वोपक्रमादिवशात् प्रातर्दनन्यायेन* परमात्मनि पर्य्यवस्यतीत्याशयेनेतदुपन्यस्तम् । अत एव प्रातर्दननयेन गतार्थतामाशङ्कतइत्यवतारिकाग्रन्थः ।

विदितं भवतीति वाक्यशेष इति टीकाग्रन्थेन भवतिमात्रस्याध्याहारो विवक्षितो विदितमित्यस्य श्रुतावाम्नानादित्याह **विदितमित्यस्यानन्तरमिति** । **अनात्मदृष्टाविति** । आत्मव्यतिरिक्तस्तात्त्विकः प्रपञ्च इति दृष्टावित्यर्थः । एवं च यो ऽन्यत्रात्मन इति वाक्येषु प्रथमार्थे त्सल्प्रत्ययो द्रष्टव्यः । सर्वं समाधानमन्यत्राभिनिवेशाद् अन्यत्र भीष्माद्गाङ्गेयादित्यादिलौकिकप्रयोगेष्वपि हि तस्य प्रथमार्थएव स्वारस्यं दृश्यते । एवं प्रथमार्थपरिग्रहएवायिममिदं ब्रह्मेदं क्षत्रमिमे लोका इमे वेदा इमानि भूतानि इद सर्वं यदयमात्मेति सामानाधिकरण्यवाक्यं समञ्जसं भवति ।

११ । १९ **नियोज्यत्वाविर्भावनेनेति** । ब्राह्मणादिजातिभेददर्शनं न साक्षान्मोक्षाद् भ्रंशयति किं तु टीकोक्तं ब्राह्मणो ऽहमित्याद्यभिमानमपेक्ष्य सो ऽपि ब्राह्मणादिकर्मणि नियोज्यत्वाधिकारित्वबुद्धिमपेक्ष्य तया हि बुद्ध्या सांसा-

* व्या. सू. अ १ पा. १ सू. २८ ।

रिकफलकर्मानुष्ठानेन साक्षात्पुरुष: प्रवृत्तो भवतीत्यभिप्रेत्य नियोज्यत्वादिभावनापर्यन्तोक्ति: ।

दुन्दुभिवाक्यमात्मैव प्रपञ्चस्य तत्त्वमित्यत्रोपपत्तिपरतया स्पष्टं न प्रतीयतइत्याशङ्क्य व्याचष्टे यथा* लोके इति । नन्वक्लिष्टमर्थान्तरमस्य वर्णयितुं शक्यम् । दुन्दुभौ हन्यमाने ततो बहिर्नि:सरत: शब्दान् न कश्चिदपि निरोद्धुं शक्नुयात् किं तु दुन्दुभेर्निरोधेन तदाहन्तृपुरुषनिरोधेन वा दुन्दुभिशब्दो निरुद्धो भवतीति । सत्यम् । इतो ऽप्यक्लिष्टतरम् अर्थान्तरं वर्णयितुं शक्यम् । दुन्दुभौ हन्यमाने बाह्यान् दुन्दुभिशब्दव्यतिरिक्तान् मानुषादिशब्दान् दुन्दुभिशब्दाभिभूतान् ग्रहीतुं न शक्नुयाद् दुन्दुभेस्तदाहन्तृपुरुषस्य वा निरोधेन मानुषादिशब्दो गृहीतो भवतीति । अत्र हि बाह्यशब्द: सफल: । बहिर्नि:सरत इत्यर्थवर्णने तु निष्फल: दुन्दुभिशब्दे ततो बहिर्निस्सरणस्य स्वाभाविकत्वेन वाक्याभावात् । न च चोरादेरिव शब्दस्य निरोधो ऽस्ति । उत्पत्त्यभिव्यक्तिप्रतिबन्धस्तु न निरोध इति प्रसिद्ध: । पूर्वापरपरामर्शानुसारेणार्थवर्णने तु प्रकृत: सार्वात्म्योपपादकदार्ष्टान्तिकानुगुण एवार्थो वर्णनीयो न प्रकृतानुपयोग्यर्थान्तरम् । ननु दुन्दुभिहननानुवृत्तौ दुन्दुभिशब्द इवेन्द्रियव्यापारानुवृत्तौ बाह्यार्थप्रत्ययो निरोद्धुं न शक्यते । तस्मादात्मदर्शनार्थिना तद्विरोधी बाह्यार्थप्रत्यय इन्द्रियनिरोधेन तद्विजृम्भणहेतुमनोनिरोधेन वा निरोद्धव्य इत्यक्लिष्टार्थवर्णनस्यापि प्रकृतोपयोगित्वमुपपादयितुं शक्यमिति चेत् । एवमेव दुन्दुभिशब्देन प्रतिबन्धे सति मानुषादिशब्दो ग्रहीतुं न शक्यतइति तद्ग्रहणाय दुन्दुभिनिरोधकं यथा ऽपेक्ष्यते एवं बाह्येन्द्रियव्यापारेण प्रतिबन्धे सत्यात्मस्वरूपं ग्रहीतुं न शक्यतइति तन्निरोधकमपेक्ष्यतइति दार्ष्टान्तिककल्पने प्रकृतोपयोगित्वमक्लिष्टतरार्थवर्णनस्यापि कल्पयितुं शक्यमेव । किं त्विदं सर्वं यदयमात्मेत्यव्यवहितपूर्ववाक्यप्रकृतार्थोपपादकदार्ष्टान्तिककल्पनया तदनुगुणदृष्टान्तपरत्ववर्णनमेव युक्ततममित्यलं विस्तरेण ।

दुन्दुभ्याघातसंज्ञक इति । वीरादिरसंयुक्तो दुन्दुभ्याघात उच्यते इति वार्तिककारा: । धूमग्रहणमिति । एतदुक्तं भवतीत्याद्यग्रिमटीकायां

---

* स यथेति र पु पा० ।

धूमस्थाने विस्फुलिङ्गोपन्यासात् तदुपलक्षणत्वोक्तिः । **अथर्वाङ्गिरसोऽन्त इति** । अथर्वाङ्गिरस इत्येतदन्त इत्यर्थः । **देवयजनविद्येति** । देवविद्या देवताकाण्डविचारिता यद्वाङ्गदेवतास्वरूपसमर्थको* वेदभागः । यजनविद्या इष्टिपशुसोमादिविधिप्रपञ्चः ।

२१८ । ११ **अर्थादर्थसृष्टिरुक्तेति** । यद्यपि षष्ठे मैत्रेयीब्राह्मणे सूत्राण्यनुव्याख्यानानीत्येतदनन्तरमिष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानीति रूपप्रपञ्चसृष्टिरपि कण्ठत एवोक्ता पृथक्कर्मप्रपञ्चसृष्टिरप्यधिकोक्ता । तदनुसारेण केषु चिद् भाष्यकोशेषु नामरूपकर्मप्रपञ्चकारणतां व्याचक्षाण इति कर्मग्रहणमपि दृश्यते । तथापि चतुर्थे मैत्रेयीब्राह्मणे भाष्यकारैर्विषयवाक्यत्वेनोदाहृते इष्टं हुतमित्याद्यनाम्नानादेवमुक्तिः । एवं चतुर्थे मैत्रेयीब्राह्मणे यथार्द्रैधाग्नेरभ्याहितादिति पञ्चम्यन्ताम्नाने सत्यपि टीकायामभ्याहितस्येति षष्ठमैत्रेयीब्राह्मणगतषष्ठ्यन्तपाठलेखनं पञ्चम्यर्थे षष्ठीति तद्व्याख्यानं च षष्ठ्यन्ताम्नातस्यापि प्रसङ्गादेवार्थनिर्णयो भवत्वित्यभिप्रेत्येति द्रष्टव्यम् ।

नन्वधिकरणाऽनारम्भशङ्कावसरे सिद्धान्तभाष्यव्याख्यानस्य का सङ्गतिरित्याकाङ्क्षायामाह **सिद्धान्त एवेति** । सिद्धान्तस्य स्फुटत्वाद् न पूर्वपक्षो ऽस्तीति खल्वत्र शङ्का क्रियते अतः सिद्धान्तस्फुटत्वोपपादनसमये सिद्धान्तभाष्यव्याख्यानस्य प्रासङ्गिकी सङ्गतिरित्यर्थः । **यथा सैन्धवेति** । स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेतेत्यादिचतुर्थमैत्रेयीब्राह्मणगतदृष्टान्तोक्तिपूर्वैकवाक्यत्वेनेत्यर्थः । सैन्धवखिल्यवाक्यात् प्राचीनं स यथा सर्वासामित्याद्येकायनवाक्यजातमप्यात्यन्तिकलये प्राकृतलयं दृष्टान्तीकर्तुं

,, । १४ प्रवृत्तमिति टीकार्थं दर्शयन्नवतारयति **आत्यन्तिक इति** । नन्वात्यन्तिकलये प्राकृतलयो दृष्टान्तश्चेत् सर्वेषां स्पर्शानामित्यादिना दृष्टान्तमुक्त्वेति वक्तव्यं कथं सर्वासामपामित्यादिना दृष्टान्तमुक्त्वेति टीकायन्य इत्याशङ्क्य सर्वासामित्यादिप्राकृतलयदृष्टान्तवचनमप्यात्यन्तिकलयदृष्टान्तोपपादकतया तद्दृष्टान्तकोट्यन्तर्भूतमिति ततः प्रभृति दृष्टान्तवाक्यतया टीकायामुपात्तमित्याशयेनाह **समुद्रे अपां लय इति** ।

---

* स्वरूपसमर्पक इति पाठान्तरम् ।

ननु त्वगादिवाक्यजातं वा कथमात्यन्तिकलयदृष्टान्तवचनं स्यात्
तेन हि सर्वासामपामित्यादिदृष्टान्तोक्तिपूर्वकमिन्द्रियाणां स्वस्वविषयायतन-
त्वमुच्यते न तु ब्रह्मणः प्राकृतप्रपञ्चयाथात्म्यमित्याशङ्क्य व्याचष्टे तत्र २१९
हीति । सर्वासामपामित्यादिदृष्टान्तवचनेन समुद्रस्य नद्यादिसकलजलाधा-
रत्वमुच्यते यथा नद्यः स्यन्दमाना इत्यादिश्रुत्यन्तरेषु तथैव समुद्रस-
लिलदृष्टान्तवर्णनदर्शनात् । ततश्च तदनुसारेण दार्ष्टान्तिकवचने त्वगादि-
शब्दैः स्पर्शादिसामान्यानि लक्षयित्वा तेषु तद्विशेषाणां लयप्रतिपादनद्वारा
क्रमेण परमकारणे ब्रह्मणि स्पर्शादिसामान्यानामपि लयप्रतिपादने तात्पर्यं
वर्णनीयम् प्राकृतस्य लयस्यापि परमकारणपर्यन्ततायाः श्रुत्यन्तरेषु पुरा-
णेषु च प्रतिपन्नत्वादिति भावः । एवं वा अरे इति । इयं श्रुतिरौपाधिक-
खिल्यभावनिवृत्त्या लवणं समुद्रभावमिव जीवो ब्रह्मभावं प्राप्नोतीति धर्म-
विशेषघटितसादृश्यप्रतिपादकयथैवंशब्दयोगात् सैन्धवखिल्यवाक्योक्तदृष्टा-
न्तस्य दार्ष्टान्तिकशब्दाभावादेकायनवाक्यजातोक्तदृष्टान्तस्य दार्ष्टान्तिकं
त्वर्थगत्येति विशेषः । अमृतत्वोपक्रमात् तदुपपादनादिति हेतुद्वयं तद्वि-
षयश्रुत्युदाहरणेन स्फुटीकरोति येनाहमिति । आख्यातप्रतिरूपक-
मिति । अत एव जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवदतीत्यादयः
प्रयोगाः । अनुवाद्यविधेययोरिति । सत्यप्यभेदे भेदेनापि भाव्यम्
अत्यन्ताभेदे अनुवाद्यविधेयभावाऽयोगादित्याश्मरथ्यादिमतमिह मुख्यः
पूर्वपक्ष इत्यर्थः । प्रतिज्ञासिद्धयइति । सर्वविज्ञानप्रतिज्ञा त्वभेदांशे-
नोपपादनीया न तु भेदांशेन इत्यनुपयोगाद् भेदांशोऽत्र न परामृष्ट
इत्याश्मरथ्यमतम् । वृद्धवैशेषिकदृष्ट्येति । गौतमसूत्रे ऽप्यनादेः संसा-
रस्य निवृत्तौ प्रागुत्पत्तेरभावानित्यत्ववदिति प्रागभावनिवृत्तिं दृष्टान्तीकृत्य
प्रागभावाऽसंप्रतिपत्तावनादिभावनिवृत्तौ दृष्टान्तेन भाव्यमित्यनुयोगे पाणु-
श्यामतानित्यत्ववद्वेति परमाणुश्यामतानिवृत्तिदृष्टान्तेनानादिभावनिवृत्तिर-
भ्युपगता । अर्थसाम्यात्त्विति* । यथा नद्य इत्यादिर्मुण्डकोपनिषन्मन्त्रो २२०
यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते
तासां नामरूपे समुद्र इत्येवं प्रोच्यतइति प्रश्नोपनिषद्वाक्यम् । अस्य मन्त्र-

---

* अर्थसाम्यात्त्विति २-३ पु ।

पूर्वार्द्धेनार्थसाम्यादित्यर्थः । आत्मानं जानात्विति* शङ्कायामिति कर्माभावदूषणमात्रोद्धारेण शङ्का । तथापि करणाभावं स्वयमेव प्रकाशमानस्य ज्ञानकर्मताऽनपेक्षां चोद्‌घाट्याथ परिहारः ।

२२० । १७ आत्मैवाभूदिति । इदं दूषणद्वयमुपलक्षणम् । केन कं विजानीयादिति विशेष्यचये ऽप्यन्त्यन्तभिन्नत्वविशेषणाध्याहारगौरवप्रसङ्गाच्चेत्यपि द्रष्टव्यम् । एतेन यत्र यस्यामवस्थायां द्वैतं स्वतन्त्रमिव भवति तदानीं स्वतन्त्र इतरः स्वतन्त्रं वस्त्वन्तरमनुभवति । यदा तु सर्वं ब्रह्मपरतन्त्रं प्रकाशते तदा कश्चेतनः करणेन कं स्वतन्त्रमर्थमनुभवेदिति केषां चिद्यत्र हि द्वैतमिवेत्यादिवाक्यार्थकल्पनमप्यध्याहारगौरवेणैव निरस्तम् । किं च षष्ठे स्वप्नावस्थायां जीवस्य स्वयंज्योतिष्ट्वे सुषुप्त्यवस्थायां तस्य बाह्याभ्यन्तरवेदनराहित्ये चोक्ते कथं ज्योतिःस्वरूपस्य वेदनराहित्यमिति शङ्कायां विषयाभावाद् न तु द्रष्टृस्वरूपाया दृष्टेर्विपरिलोपा†दित्येतत्प्रतिपादनार्थं प्रवृत्तेषु यद्वैतन्न पश्यति पश्यन्वैतन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वाद् न तु तद् द्वितीयमस्ति ततो ऽन्यद्विभक्तं यत् पश्येदित्यादिवाक्येषु श्रुतं द्वैतं तावत् स्वातन्त्र्येण विशेषयितुं न शक्यते सुषुप्तौ स्वतन्त्रस्येव परतन्त्रस्यापि द्वैतस्य प्रतीत्यभावात् । ततश्च तेषु श्रुतं द्वितीयमपि तेन विशेषयितुं न शक्यते द्वैतमात्रप्रतीत्यभावस्य द्वैतविशेषाभावेनोपपादयितुमशक्यत्वात् । एवं च तदनन्तरश्रुते यत्र वा अन्यदिव स्यात् तत्रान्यो ऽन्यत् पश्येदन्यो ऽन्यद् जिघ्रेदित्यादिवाक्ये अन्यदपि स्वातन्त्र्येण विशेषयितुं न शक्यते सुषुप्तौ यस्य विषयस्य व्यतिरेकात्प्रतीत्यभाव उक्तः तस्यैव स्वप्नजागरयोरन्वयात् प्रतीतेर्वक्तुमुपक्रान्तत्वात् । एवं च सुषुप्तावस्थाविषयेोदाहृतवाक्यसमानप्रकारकेषु मुक्तावस्थाविषयेष्वपि वाक्येषु स्वातन्त्र्यविशेषणं विवक्षितुमयुक्तमिति ।

२२१ । ४ बहुप्रमाणदृष्टिरिति । अवश्यम्भावितया अस्मिन्विषये श्रुतिस्मृतिरूपबहुप्रमाणदर्शनं सूचितमिति भावः । विरोधादित्युक्तं हेतुं पक्षान्तरे बाधकोपन्यासेनोपपादयति अविरोधश्चेदिति । यद्यविरोधस्तर्हि

---

* विजानात्विति २ पु. पा. । † विलोपादिति ३ पु. पा. ।

भेदाङ्गीकारे ऽप्यत्यन्ताभेदः प्रकारविशेषानपेक्ष्याभेदः स्याद् विरोधे हि केन चित्प्रकारेण भेद इति भेदोपाधिप्रकारं परिहृत्य तदन्येन प्रकारेणाऽभेद इति वक्तव्यं स्यात् तथा च भेदः कथं निविशताम् । यदुच्येत विरोधाभावाद् भेदाभेदौ गन्धपृथिवीत्ववदसंकरोपपादकप्रकारभेदाऽनपेक्षौ निवेष्टुमर्हत इति तर्ह्येकस्यामेव व्यक्तौ गन्धवती पृथिवीति गन्धपृथिवीत्वबुद्धेरिव घटो भवति घटो न भवतीति बुद्ध्योरपि समावेशः स्यात् तददर्शनात् तयोर्व्यवस्थितघटपटादिविषयत्वस्यैव च दर्शनाद् गन्धपृथिवीत्वयोरिव न भेदाभेदयोरविरोध इत्यर्थः ।

भास्करग्रन्थेषु विरुद्धयोरपि समबलयोरपि भेदाभेदयोरसंकरोपपादनं कृतं भेदो घटशरावादिकार्यात्मना अभेदस्तावदनुवृत्तमृदादिकारणात्मनेति तन्निरस्यति **भेदाऽभेदव्यवस्था चेदिति । भेदवाद एव स्यादिति*** । २२१ भेदाभेदयोराश्रयभेदवाद एव स्यादित्यर्थः । ननु कार्यकारणयोर्नात्यन्तं भेद इष्यते किं त्वत्यन्तभेदे ऽत्यन्ताऽभेदे वा ऽनुपलभ्यमानाद् मृद् घटः हिरण्यं कुण्डलमित्यादिसामानाधिकरण्याद् भेदाऽभेदे इष्येते तथा च कार्याणां भेदः कारणमपि स्पृशति कारणस्याभेदः कार्याण्यपि स्पृशति अतो भेदाऽभेदयोर्नात्यन्तिकाश्रयभेद इति तन्मतमाशङ्क्य निरस्यति **सामानाधिकरण्यमिति । यावत्कार्यमवस्थायेति** प्रकृताऽविद्योपाध्यभिप्रायेणोक्तम् । अलक्तकादौ तु यावत्कार्यमवस्थानं न नियतं बहुषु स्फटिकेषु सत्सु रक्तं स्फटिकमानयेति स्फटिकान्तरव्यावृत्त्यर्थे विशेषिते सत्यानयननियोगकालमात्रे ऽलक्तकसन्निधानेनापि तद्व्यावर्तनफलसिद्धेः । उपाधिपदप्रयोगलभ्यं स्वसंनिहिते स्वधर्मप्रतीत्याधायकत्वमेवोपाधेर्विशेषणोपलक्षणव्यावृत्तं रूपम् । **कादाचित्कतयेति** । कादाचित्कत्वं कार्यकालाऽवस्थाननियमाभावः । तेन काकस्य यावद्गृहगमनकालं कदा चिदवस्थितावप्युपलक्षणत्वमेव । उपाधितस्तूपलक्षणस्य भेदः परत्र स्वधर्मप्रतीत्यनाधायकत्वरूपो द्रष्टव्यः । **त्वया ऽपि लिङ्ग- २०२ शरीरेति** । भास्करमते जीवब्रह्मणोरभेदः स्वाभाविकः भेदस्तु बुद्धीन्द्रियदेहोपाधिकृत इष्यते । तत्र बुद्ध्यादिषु विशेषणत्वादिचोद्यमुपाधित्वेन तत्परिहारवचनं चेत्युभयमपि समानम् । यस्तुतस्तु तन्मते परिहारो न

* व्यवस्थावाद एव स्यादिति ३ पु० पा० । मूले ऽप्येवं पाठद्वैविध्यं दृश्यते ।

लगति उपाधिप्रयुक्तस्य संसारस्य स्फटिकरक्तिमवदारोपितत्वनियमादिति भावः । **नन्वैक्यसिद्धाविति ।** गुहानिहितस्य ब्रह्मणश्चैक्ये खलु यत्नेन भानाऽभानसमर्थनं कार्यम् । जीवभानात् तदभिन्ने ब्रह्मणि भासमाने गुहानिहितमन्यदिष्यतामिति शङ्कार्थः । **व्याघातादिति ।** जीवस्य तदाश्रितमोक्षस्य च कृतकत्वे नित्यत्वं व्याहतमित्यर्थः । **विकत्थनं** निरर्थकं वचः । **भागवत्त्वमात्रमिति ।** भेदकोपाध्यधीनसत्यभागवत्त्वमात्रमित्यर्थः । **संस्थानभेद इति ।** तथा च नद्या अवयवसन्निवेशविशेषरूपेण अवयविरूपेण स्वारम्भकपरमाणुरूपेण वा समुद्राभेदप्राप्त्यभावे ऽपि समुद्रप्राप्तौ नद्यवयवविनाशात्तदीयनामरूपप्रहाणमस्तीत्येतावत्यंशे श्रुतौ नदीसमुद्रदृष्टान्तः । अत एवास्तं गच्छन्तीत्येव दृष्टान्तभागे श्रवणमिति भावः* । शब्दश्रवणाऽयोग्यत्व† विशेषणं सत्यत्वोपपादनार्थमित्याह **शब्देति ।** प्राप्ताऽप्राप्तविवेकेनेत्यादिग्रन्थं व्याचष्टे **नेम्याकारेति ।**

२२४ । ० अनवस्थेति शङ्कां परिहरतीति । एवं च कृत्स्नस्य प्रपञ्चस्य कल्पितत्वे यथा कार्यलिङ्गकपूर्वपूर्वश्रोत्रानुमितिरूपभ्रमतत्संस्कारप्रवाहकल्पितमुत्तरोत्तरश्रोत्रं कार्यजनकम् एवं श्रुतिजन्यसृष्टितत्क्रमादिविषयाऽनादिपूर्वशाब्दज्ञानसंस्कारप्रवाहकल्पितं वियदादिकं तत्तत्सृष्टिवाक्याद्यालम्बनतां विवक्षितमिति द्रष्टव्यम् । अनयैव रीत्या मीमांसकैरपि वक्तृविवक्षारूपतात्पर्यावधारणं वेदार्थनिर्द्धारणोपयोगीति पक्षमुपपादयद्भिर्वेदाभिमानिदेवतानां तत्तन्न्यायसंप्रदायाभिज्ञमीमांसकयाज्ञिकानां च तत्तद्वाक्यार्थनिर्द्धारणाधीनतत्तदर्थप्रतिपादनेच्छारूपं तदिति समर्थितम् । वक्तृविवक्षारूपतात्पर्यज्ञानं वेदार्थनिर्द्धारणे कारणमिति तदाधारतयेश्वरसिद्धिमिच्छतो नैयायिकान् दूषयद्भिरपि तैः तत्तद्वाक्यार्थनिर्द्धारणाधीनपूर्वपूर्वमीमांसकयाज्ञिकविवक्षाप्रवाहेणान्यथासिद्धिरुक्ता । यथाहुः ।

तयर्ग्वेदादयो वेदाः प्रोक्ता ये च पृथक्पृथक् ।
भोग्यत्वेनात्मनां ते ऽपि चैतन्याऽनुगताः सदा ॥

---

* भावस्थमित्यादिमात्रमित्यर्थ इति ग्रन्थ एतदवे दृश्यते २ पु० ।

† श्रवणेयोग्यत्वेति २ पु० ।

तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने ।
विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः ॥

इति न्यायेन संप्रदायेन ये मीमांसकयाज्ञिका वेदं व्याचक्षते तेषामभिप्रायोऽयमुच्यतइति । य एवं विद्वान् साम्ना स्तुवीतेत्यादिविधिषु यच्छब्दानूदिताऽविधीयमानकर्मकर्तृप्रसिद्धिर्यजमानो वा आहवनीय इत्याद्यर्थवादेषु वैशब्दानूदिता स्तुत्यालम्बनतत्तदर्थप्रसिद्धिश्च पूर्वपूर्वतत्तद्वाक्यार्थावगतिमूलैर्जनरीतरतत्तद्वाक्यार्थावगतेरालम्बनमित्युपपादनीयमित्येतादृशान्युदाहरणान्यन्यथानुसंधेयानि ।

अथ नैकैकस्येति । यद्यपि प्रवाहानादित्वनिर्वचनासंभवे ऽपि भ्रमसंस्कारोपाधिकं सत्त्वमित्युक्त्वा ऽर्थस्य न क्षतिः सर्वदा यस्य कस्य चित्संस्कारजातीयस्य सत्त्वात् । दर्शितं च तन्निर्वचनमाचार्यैर्व्यासग्रन्थे । सर्वस्य प्रपञ्चस्य संस्कारोपाधिकं सत्त्वमिति पक्षे संस्कारे का गतिरिति चेत् । शब्दानुमानमूलकस्य सकलसंस्कारविषयतया तद्विषयस्यापि सतः संस्कारस्यानुवृत्त्या तदप्युपपद्यतएव । तथापि मायायामनुपपत्तिरलंकार इति न मायावादे अत्यन्तमुपपादनार्थं प्रयतितव्यमिति व्युत्पादनाय शङ्कैयम् । २२४
अस्तु वेति प्रतीकोपादानानन्तरं नोपपद्यते ऽर्थः परमार्थसत्त्वं यस्याः सा तथेति पाठः साधुः । निरुपाधिकभ्रमविषयेष्वेव सत्त्वं प्रातीतिकमिति नियमः श्रोत्र तु न तथेति स्वयं परिहारान्तरमाह कर्णनेमीति । कर्णनेम्यवच्छिन्नं नभः श्रोत्रमिति नैयायिकादिमते तदवच्छिन्ना दिक् श्रोत्रमिति कौमारिलमते च तदवच्छेदोपाधिकस्यांशस्य दृष्टान्तीकरणमुपपद्यते । स दृष्टान्तः स्वसिद्धान्तसंमतो न भवतीति स्वयं युक्त्यन्तरमाह आरभ्यमिति । सांशत्वतः सावयवत्वतः । यद्यपि सावयवत्वमपि भेदाऽभेदसत्त्वसमुच्चयविकल्पदूषणेन दूषितप्रायं तथापि स्वमते सत्यो भाग इति व्यावहारिकसत्यत्वस्यैव कथनात् स न दोष इत्याशयः । सत्यश्च संभवेदिति । संभावनार्थेन लिङा जीवस्य ब्रह्मांशत्वं परोक्तरीत्या परमार्थसत्यमिति कथमपि संभावयितुं न शक्यते । मुक्तिदशायामभेदज्ञाननिवर्त्यस्य स्वाश्रयगताऽभेदरूपमुक्तिकालानुवृत्त्या ऽत्यन्ताभावप्रतियोगिनश्च संसारदशायां प्रतीतस्य ,, ।

भेदस्य मिथ्यात्वाऽनतिलङ्घनादिति द्योतितम् । अहं वेदेति । सूक्तद्रष्टुरहमिति परामर्शः* ॥

२२५ । १ **प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥**

व्यवहितसंबन्धाऽपौनरुक्त्ये फले इति । व्यवहितेन जन्माद्यधिकरणेन संबन्धः । तेनैवापौनरुक्त्यं च । **पादसंगतिरिति** । बालाक्यधिकरण† प्रथमसंगतिग्रन्थानुसारिणीयं संगतिः । **अद्वैतव्यासेधकत्वाचेति** । तद्व्यासेधकत्वं हि लक्ष्यसमर्पकब्रह्मशब्दोपात्तवस्त्वपरिच्छेदात्मकलक्ष्याकारविपरीताकारोपस्थापकं लक्षणं लक्ष्ये संभवदपि विवक्षितलक्ष्याकारानुगुणत्वेन तदव्यापनदोषदुष्टं स्यादिति भावः । **समन्वयावसान** इति । बालाक्यधिकरणद्वितीयसंगतिग्रन्थे यत्प्रतिज्ञातं प्रकृताधिकरणस्याध्यायावसाने लेखनिमित्तं वक्ष्यतइति तदनेन दर्शितम् । **समन्वयो दुष्प्रतिपाद इति** । जगत्कारणब्रह्मणि समन्वय इत्यर्थः । कथं प्रतिज्ञादृष्टान्तयोजनेति शङ्कायामयं परिहाराभिप्रायः । ब्रह्मज्ञानेन वियदादेः सर्वस्य मृत्पिण्डलोहमणिनखनिकृन्तनज्ञानैर्घटशरावकटकमुकुटखनित्रकुद्दालादीनां च तत्तज्ज्ञानानन्तरमपि संशयविषयत्वेनानुभूयमानानां मुख्यवृत्त्या ज्ञातत्वासंभवाद् गौणत्वं त्वया ऽप्यास्थेयमिति । **प्रधानपरौ‡** प्राधान्याभिप्रायौ । अनुमानबाधादिति पूर्वपक्षलिखितान्यनुमानानि । **अस्त्वागमो निमित्तपर§ इति** । तथा च नानुमानवृन्दस्यागमबाध इति भावः ।

२२६ । ७ **कार्यस्य विवर्तत्वेनेति** । तथा च सद्रूपस्य ब्रह्मणः प्रपञ्चतादात्म्यं सदात्मना सन् घट इत्यादिप्रतीतिषु भासतइति सदात्मना ब्रह्मज्ञानं सदात्मना प्रपञ्चतत्त्वविषयमपि भवति एवं मृत्पिण्डस्वर्णमणिनखनिकृन्तनरूपोपादानतादात्म्यं घटादिषु मृत्सुवर्णकालायसात्मना मृद् घटः सुवर्णं कुण्डलं कालायसं खनित्रमित्यादिप्रतीतिषु भासतइति तेन तेन कार्यानुविद्धेन मृदादिरूपेण मृत्पिण्डादिज्ञानं तेन तेन रूपेण तत्तत्कार्यविषयमपि भवति । न हि प्रपञ्चतादात्म्यापन्नं सद् घटादितादात्म्यापन्नं मृदादिकं वा तत्तदुपादानातिरिक्तं येन सन्मृदाद्यात्मना ब्रह्म मृत्पिण्डादि-

* अत्र षष्ठं वाक्यान्वयाधिकरणं पूर्णम् । † व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ १६ ।
‡ प्राधान्यपराविति ३ पु॰ पा॰ । § निमित्तत्वपर इति ४ पु॰ पा॰ ।

ज्ञानं तेन तेन रूपेण तत्तत्कार्यविषयं न स्यात् । ननु भवेदेवं मृत्पिण्डादीनां घटाद्युपादानत्वे तदेव नास्ति घटादीनामिव पिण्डादीनामपि मृदादिकार्यविशेषत्वाद् घटादिषु पिण्डाद्याकारानुवृत्त्यभावाच्च सर्वमृण्मयादीनामेकैकमृत्पिण्डादिकार्यत्वस्य कथमप्युपपादयितुमशक्यत्वाच्च । तथा च दृष्टान्तभागस्योपादानाऽविषयतया दार्ष्टान्तिकवाक्यस्यापि तद्विषयता न युक्तेति चेद् न । मृत्पिण्ड एव घटः कृत इत्याद्यबाधितव्यवहारेण मृत्पिण्डादीनां घटादिकार्यान्तरोपादानत्वाद् मृत्पिण्डादिगतमृत्त्वादिरूपकिंचिदाकारानुवृत्तेर्घटादिषु सत्त्वाद् उपादानगतयावदाकारानुवृत्तिनियमस्य क्षीरादिकार्येषु दध्यादिषु व्यभिचारात् सर्वं मृण्मयमित्यादिषु सर्वशब्दानामेकैकमृत्कूटादिकार्यपरत्वात् । तस्माद् दृष्टान्तानुसारेणापि दार्ष्टान्तिकवाक्यस्योपादानविषयत्वं युक्तमेव ।

ननु पञ्चमी न कारणमात्रे स्मर्यतइत्ययुक्तं ज्ञापकेन तत्सिद्धेरित्याशङ्क्य तत्तात्पर्यमाह ज्ञापनेनेति* । ननु नैतद्युक्तं पाणिनीये ज्ञापकयोगवि- २२६
भागलभ्यस्य व्याकरणान्तरे प्रत्ययविधानावश्यम्भावात् तद् दृष्ट्वैव व्याख्यातॄणां ज्ञापकाद्यन्वेषणप्रवृत्तेः पाणिनीयस्यैव वेदार्थनिर्णयोपयोगित्वादित्याशङ्क्य ज्ञापकस्यान्यथासिद्धिमाह अपि चेति । हेतुग्रहणमगुणवचनाद्धेतुपञ्चम्या न ज्ञापकं तस्य विभाषा गुणे ऽस्त्रियामिति सूत्रविहितां गुणवचनेभ्यः पञ्चमीमादाय चारितार्थ्यात् । जाड्यादागतं जाड्यरूप्यमिति तदुदाहरणसंभवात् । वस्तुतस्तु हेतुमनुष्येभ्य इति सूत्रे हेतुत्वं न पञ्चम्यर्थविशेषणं येन हेतौ पञ्चम्यन्वेषणीया स्यात् किं तु मनुष्यवाचित्वमिव हेतुवाचित्वमपि प्रातिपदिकविशेषणम् । एवं च हेतुवाचिभ्यो मनुष्यवाचिभ्यश्च प्रातिपदिकेभ्यस्तत आगत इत्यर्थे रूप्यप्रत्ययविधिः । तत आगत इत्यधिकारसूत्रे च तत इत्यपादानपञ्चमी तथापि मुख्यं यदपादानं विवक्षितं तद् ग्राह्यं न तु नान्तरीयकम् । अत एव स्रुघ्नादागच्छन् मध्ये वृक्षमूले स्थित्वा ततो ऽप्यागत इत्येतावता तत आगत इत्यर्थे सोऽस्य इतिवद् वार्क्षमूल इति तद्धितो न भवति । एवं च यः स्वहेतुभूताज्जन्मभूम्यादेरपादानादागतः यश्चाहेतोरमनुष्याद् देवदत्तादेरपादानादागतस्तत्रोभय-

* ज्ञापकेनेति२-५ पृ० पा० ।

चापि हेतुवाचिनो मनुष्यवाचिनश्च प्रातिपदिकाद्रूप्यप्रत्ययविधायकस्यास्य सूत्रस्य हेतुपञ्चमीज्ञापकतायाः कथमपि न प्रसक्तिः । नन्वस्य सूत्रस्य हेतुपञ्चमीज्ञापकत्वाभावे ऽपि विभाषा गुणे ऽस्त्रियामिति सूत्रे योगविभागादगुणवचनेभ्यो ऽपि हेतुपञ्चमी भविष्यतीति चेद् न । योगविभागाऽनपेक्षणात् । पुत्रात्प्रमोदो जायते पश्चिमाद्यामिनीयामात्प्रसादमिव चेतनेत्यादिप्रयोगाणां निमित्ते ऽप्यन्तरङ्गकारणत्वज्ञापनार्थम् अपादानत्वारोपेण निर्वाहात् । समनन्तरापत्ये ऽपि गोत्रवदुपाध्यांहारेण रामो जामदग्न्य इति गोत्रापत्यविहितप्यञ्प्रत्ययदर्शनाद् धूमवत्त्वादित्यादिपञ्चमीनिर्वाहः । हेतुपञ्चमीसद्भावे वा कथं तन्निर्वाहः । न हि धूमवत्त्वं वह्नेः कारणं ज्ञापकं तु स्यात् । न ज्ञापके पञ्चमीविधानमस्ति । तस्मात् तदशिष्यं संज्ञाप्रमाणत्वाद् लुब्योगाप्रख्यानादिति सूत्रकारप्रयोगाज् ज्ञापके पञ्चम्याः साधुत्वम् । कारकहेतौ तु हेताविति सूत्रेण तृतीययैव भाव्यम् । अस्तु वा कारकहेतावपि पञ्चमी । तथापि कारकविभक्तेर्बलीयस्त्वादिहापादानपञ्चम्येव । जनिकर्तुरिति पुत्रात्प्रमोदो जायतइत्यादिपञ्चमीसंग्रहार्थे प्रकृतिपदं कारणसामान्यपरमिति व्याख्यानमयुक्तं तथा सति कारकइत्यधिकृतस्य पदस्य कारणसामान्यवाचिनो निर्द्धारणसप्तम्यन्तस्यानन्वयप्रसङ्गात् । न हि कारणानां मध्ये यदुपादानकारणमितिवत्कारणानां मध्ये यत्कारणमित्येतदन्वितार्थं भवति ।

२२६ । १९ **कार्यकारणाऽभेदसूचनादिति** । न च यथा ऽग्ने यन्मे तनुवा ऊनं तन्मआपृणेति मन्त्रे यन्मे प्रजायै पशूनामूनं तन्मआपूरयेति वावैतदाहेति तदर्थप्रदर्शकब्राह्मणानुसारेण यजमानस्य स्वस्मिन् प्रजापश्वभेदोपचारवद् ब्रह्मणः स्वस्मिन् सृज्यमानतेजःप्रभृत्यभेदोपचारः स्यादिति शङ्कनीयम् । प्रतिज्ञातसर्वविज्ञानोपपादनार्थे प्रवृत्ते प्रपञ्चे तथोपचारकल्पनाऽयोगात् । **श्रौतावधारणेति** । ननु श्रुतावेवकारार्थे उपादानान्तराभावः कथं साक्षात्पदेन तदशक्तेन प्रदर्श्यते । उच्यते । उभयाम्नानादित्येतावति सूत्रणीये साक्षादिति विशेषणमुभयाम्नानवाक्ये तदनुवादेनान्यः कश्चिदर्थो मुख्यतया प्रतिपाद्यो ऽस्तीत्यवगमयति । कोसाविति विचारणायामेवकारघटितवाक्यस्याप्येषाधरन्तीत्यादिवदितरव्यवच्छेदपरत्वादुपादानान्त-

राभावो मुख्यतया प्रतिपाद्यो ऽवतिष्ठते तर्हि विषयवाक्यं ब्रह्मण उपादानत्वप्रतिपादकं न भवतीति सूत्रमपि तद्व्यवस्थापनार्थं न भवेत् तथा च कथमितरच्च प्रकृतिर्ब्रह्मेति भाष्यमित्याशङ्क्याह **भाष्यइति** । विषयवाक्यप्रतिपाद्यस्य प्रकृत्यन्तराभावस्य प्रकृतिग्रहणम् उपलक्षणमित्यर्थः । प्रकृत्यन्तराभावव्यवस्थापनस्यापि ब्रह्मणः प्रकृतित्वस्थिरीकरणं फलमिति फलाभिप्रायेण भाष्यमिति तात्पर्यवर्णने तु नोपलक्षणत्वं कल्पनीयम् । यद्वा प्रकृतिग्रहणमुपलक्षणमित्यात्मकृति*टीकाग्रन्थापेक्षितो भाष्यइत्यध्याहारो ऽनेन ग्रन्थेन दर्शितः । कथं च तद् ब्रह्मणो रूपमिति टीकाग्रन्थं ब्रह्मणि उपादानत्वाभावे तदभेदश्रवणं न घटेतेति व्यतिरेकप्रदर्शनार्थत्वेन योजयन्नेव यदीत्यादितदनन्तरग्रन्थम् अन्वयप्रदर्शनार्थत्वेनावतारयति **द्वे वावेति** । २२६

यद्यपि सच्च त्यच्चाभवदित्यभेदेन श्रुतमिति वक्तव्यं तस्यैव वाक्यस्य प्राक् प्रकृतत्वात् तथापि द्वे वाव ब्रह्मणो रूपे इति टीकावाक्येन स्मारिते द्वे वावेत्यादिवाक्ये षष्ठ्या पृथिव्यादिवाय्वादिरूपयोर्मूर्तामूर्तयोर्ब्रह्मभेदः प्रतीयतइति शङ्कानिरासाय तस्या अपि न भेदे तात्पर्यम् अथात आदेशो नेति नेतीति तदनन्तरवाक्ये ब्रह्मातिरिक्तमूर्तामूर्तनिषेधादिति दर्शयितुं तद्वाक्यमुपन्यस्तम् । कथं च तद् ब्रह्मणो रूपमिति टीकाग्रन्थस्य व्यतिरेकप्रदर्शनार्थत्वलाभाय यदि ब्रह्मोपादानं न स्यादिति शेषो ऽध्याहृतः । एवमध्याहारापेक्षव्यतिरेकप्रदर्शकवाक्यार्थस्याऽस्फुटस्य गम्यत्वाद्व्यतिरेकमुक्त्वैतद्विहाय व्यतिरेकं सिद्धवत्कृत्येत्युक्तम् । यदि तस्य ब्रह्मोपादानमित्यन्वयप्रदर्शनस्यापेक्षितांशमध्याहरति **तर्ह्येवं रूपं स्यादिति शेष इति** । रूपं स्वरूपमभिन्नमिति यावत् । यदि न तस्य ब्रह्मोपादानमिति केषु चित् टीकाग्रन्थेषु नकारयुक्तः पाठो दृश्यते तस्मिन्पाठे कथं चेत्याद्युपादानमित्यन्तमेकं वाक्यम् अध्याहारानपेक्षं व्यतिरेकमात्रप्रदर्शनार्थमिति द्रष्टव्यम् ।

योनिरितीति । पृथिवी योनिरोषधिवनस्पतीनामित्यादिप्रसिद्धिः २२९ परिणामिविषयैव दृष्टेति भावः । **नासत इति** । यदसत् तत्सर्वदैवासदिति

* व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ २८ ।

न स्याच्चिणादात्वं यत् सत् तत्सर्वदा सदिति निष्पत्त्यर्थप्रवृत्त्यानर्थक्यम् । ननु नित्यस्य निष्कलस्येति हेतुगर्भनिर्देशाभ्यां सिद्धस्यार्थस्य नित्यत्वादनेकदेशत्वादिति पुनः कीर्तनं व्यर्थमित्याशङ्क्य तद्विवरणमित्याह **हेतुगर्भनिर्देशयोरिति । यथाश्रुतमाश्रित्येति ।** अस्तु परिणामस्तथापि लौकिकपरिणामवदनिर्वचनीयत्वमप्यातीत्येयं प्रतिपादयतीत्यर्थः । संक्षेपशारीरके ऽप्येवमुक्तम् प्रतिष्ठिते ऽस्मिन् परिणामवादे स्वयं समायाति विवर्तवाद इति । **प्रधानानुरोधेनेति ।** यथा स्वर्गकामकर्तव्यज्योतिष्टोमप्रकरणमध्यपातिनः को हि तद्वेद यदमुष्मिन् लोके ऽस्ति वा न वेति परलोकसंदेहवाक्यस्य प्रधानाविरोधाय तदङ्गभूतातीकायविध्यपेक्षितवस्तुस्तवनपरतया पामरजनसिद्धसंदेहानुवादकत्वम् एवमिहापि प्रधानप्रतिपाद्याऽद्वैतसिद्ध्यविरोधाय तदङ्गभूतप्रपञ्चनिषेधोपयिकतया भ्रान्तजनकल्पितपरिणामानुवादकत्वमित्यर्थः । **न चेति ।** यथा ह्यसत्यो घटाभावः सत्यं घटं सहते एवमनिर्वाच्यो विकारः स्वात्यन्ताभावं निर्वाच्यं सहते इत्यन्वयमुखेन सिद्धिः* ॥

२२८ । १ **एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥**

अदृश्यमानाणुनिर्देशादिति न किं चन भगव इत्युक्तेरणुवादे सालम्बनत्वसिद्ध्यर्थमदृश्यमानत्वविशेषणम् । **अणिम्न इति सूक्ष्मता चोक्तेति ।** स य एषो ऽणिमेत्यादिसंप्रतिपन्नब्रह्मवाक्येष्विवेति भावः† ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ कल्पतरुव्याख्याने परिमले प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥

संपूर्णश्च समन्वयाख्यः प्रथमो ऽध्यायः ॥



* अत्र सप्तमं प्रकृत्यधिकरणं पूर्णम् ।

† अत्राष्टमं सर्वव्याख्यानाधिकरणं पूर्णम् ।

अथ द्वितीयोऽध्यायः ।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥ २२९ ।

सर्वज्ञेति । यः सर्वज्ञ इति श्रुत्या ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्तीति श्रुत्या कपिलस्यापि सार्वज्ञ्यं प्रसिद्धम् अतः सर्वज्ञभाषितत्वं वेदसांख्ययोः सममित्यर्थः । ननु स्मृत्यन्तरेभ्यो निरवकाशत्वेन प्राबल्ये ऽपि श्रुतिभ्यः प्राबल्याभावात्कथं पूर्वपक्ष इत्यत आह **पूर्वपक्षमाहेति** । वेदं कृत्वा वेदिमिति पदार्थधर्मक्रमविषयश्रुतितः क्षुतश्चाचामेदिति स्मृतेः पदार्थविषयत्वेनैव सावकाशश्रुतितो ऽपि निरवकाशत्वेन स्मृतेः प्राबल्यं भवेदतः पूर्वपक्षो युक्त इत्याशयः ।

अर्थापहारेणेति । सर्वैर्वेदैकरूपस्मृत्यर्थापहारेण तन्मानभूतश्रुतेरप्यपहारात्तदनुमानं बाधितविषयमित्यर्थः । क्षुतनिमित्ताशुद्ध्यपनयार्थमाचमनकरणे ऽपि न वेदवेदिक्रमविरोधः । आचमनस्य शुद्धिद्वारा वेदिकरणाङ्गत्वादङ्गस्य चाव्यवधायकत्वात् । उक्तं हि वार्तिके ।

वेदं कृत्वा यदा वेदिमकृत्वा ऽऽचामति क्षुते ।
वेदीमेव करोतीति स वक्तुं शक्यते तदा ॥
वेदिरेव ह्यनाचम्य कुर्वतो विगुणीभवेत् ।
तामेव सगुणां कर्तुं शुद्ध्या न व्यवधास्यते ॥ इति ।

सत्यपि व्यवधाने श्रौतस्मार्तसकलपदार्थप्राप्त्यनन्तरमेवानुष्ठानाय क्रमस्य संग्राह्यत्वात् पश्चात्संग्राह्यस्य पूर्वप्राप्त्यनुरोधेन संग्रहौचित्यान्न विरोधः । तदप्युक्तं वार्तिके ।

प्राप्तेषु हि पदार्थेषु क्रमः पश्चादपेक्ष्यते ।
यदा प्राप्तेष्वसौ क्लृप्तः केन पश्चाद्विरुध्यते ॥ इति ।

नन्वधिकरणारम्भे तटस्थेनाक्षिप्ते तदारम्भः सिद्धान्तिना समर्थ-

नीयः कथं पूर्वपक्षी समाधत्त इत्युक्तिरित्याशङ्क्य पूर्वपक्षोपपादकत्वसाम्यात् सिद्धान्त्येव पूर्वपक्षिशब्देन लक्षणयोक्त इति व्याचष्टे **पूर्वपक्षीति** ।

२२९ । १७ **पौरुषेयत्वेनेति** । ननु वेदस्यार्थज्ञानपूर्वकत्वेन पौरुषेयत्वमत्रत्यसिद्धान्तवक्ष्यमाणयैव युक्त्या शास्त्रयोनित्वाधिकरणे* निराकृतं कथमिह पुनः पौरुषेयत्वशङ्का एवं तर्हि सांख्यतन्त्रमप्यपौरुषेयमेव तद्वक्तुः कपिलस्य वासुदेवांशत्वेन परब्रह्मरूपतया तस्यापि तन्निःश्वसितत्वाऽविशेषादित्याशयः । ननु श्रुतीनामपि स्फुटतरत्वं विवक्षितं यथा कथं चन श्रुतित्वेनाऽस्फुटत्वकल्पने कपिलवचसामपि सूत्रत्वेन शक्यं तत्कल्पनम् अतः स्फुटाऽस्फुटत्वं न वैषम्यम् । अत एव श्रुतयः कपिलवचनैर्निर्णयार्थास्तत्सापेक्षा इत्यधिकरणानारम्भशङ्कायाः प्रथमसमाधानमापातत इति टीकायामुक्तम् । अन्यथा हि स्पृष्टोद्गायेदिति श्रुतिरपि सर्ववेष्टनस्मृत्या निर्णयार्था तत्सापेक्षेति कल्पनं प्रसज्येतेत्याशङ्क्य व्याचष्टे **अनन्यपरत्वमिति** ।

पूर्वपक्ष्याशयं निराकरोति **सगरपुत्रप्रतप्तुरिति** । यत्र वासुदेवांशेन वैदिकार्थो वर्ण्यते तत्र तस्य सार्वात्म्योपदेष्टृत्वं दृष्टम् अतस्तद्विरुद्धार्थोपदेष्टुस्ततोऽन्यत्वं निश्चीयत इति भावः । तदर्थस्मृतिपूर्वकाणीत्यत्रापि बहुव्रीहिसमासमाह **तेषामिति** । तदर्थानुभवपूर्विका इत्यत्र तमाह **तासामिति** । यद्यपि तदर्थस्मृतिपूर्वकाणीत्यत्रापि बहुव्रीहिगर्भबहुव्रीहिरविशिष्टस्तथापि तदर्थानुभवपूर्विका इत्यत्र बहुव्रीहिद्वयप्रदर्शनेन तत्रापि तदुन्नेतुं शक्यमिति लाघवार्था तदनुक्तिः । **कथं चिदित्यर्थ इति** । विलम्बेनेत्यर्थ इत्यर्थः । अनेनाग्रिमस्य तावदित्यस्य ततः प्रागेवेति शीघ्रमर्थ इत्यर्थादुक्तं
२३१ । ३ भवति । **दौहित्रस्य कर्मेति** । ब्राह्मणादेराकृतिगणत्वात् कर्मणि ष्यञ् प्रत्यय इति भावः । अव्यक्तस्योत्पत्तौ स्मृतिं प्रदर्श्य तल्लये स्मृत्यन्तरप्रदर्शनात्तस्य प्रलये नाशो ऽभ्युपगत इति प्रतिभाति तथा ऽभ्युपगमो न युक्तः तस्य ज्ञानैकनिवर्त्यत्वाभ्युपगमादित्याशङ्क्य व्याचष्टे **ज्ञानात्प्रलीयत इति** । अव्यक्तोत्पत्तिस्मृतिस्तु भूतसूक्ष्मोत्पत्तिविषया । एवं च यद्यपि लयस्मृतिरपि तद्विषया योजयितुं शक्या मूलकारणविषयत्वे ऽपि प्रलये सूक्ष्मावस्थापत्तिविषया योजयितुं शक्या तथापि स्वमते मूलकारणमविद्या-

---

* व्याससू॰ अ॰ १ पा॰ १ सू॰ ३ ।

रूपमिति विभावयितुं ज्ञानादित्यध्याहृतम् । ऋषिं प्रसूतमित्यादिमन्त्राद्र्थस्यायमर्थः । अग्रे सर्गादौ स्वस्मात्प्रसूतमृषिं कपिलं कनकवर्णं हिरण्यगर्भं ज्ञानैश्वर्यप्रकर्षैर्बिभर्ति अयं सकलवेदार्थविद्भवत्वित्यनुग्रहकटाक्षेण जायमानावस्थायामेव पश्यति चेति यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै हिरण्यगर्भं पश्यति जायमानमित्यादिमन्त्रान्तरैकार्थ्यात् । अथ बिभर्तीत्येतद् भृञ्धातोः पोषणमर्थमादाय व्याचष्टे **पूरयतीति ।**

मन्त्रगतयच्छब्दप्रतिनिर्देशकतच्छब्दघटितं वाक्यं दर्शयति **यः स सर्वेषामात्मेति ।** यद्यपि यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वा इति पूर्वार्द्धयुक्ते ऽस्मिन् मन्त्रे नास्तीदं वाक्यं नापि पूर्वेतरमन्त्रयोरस्ति तयोः विद्याविद्ये ईशते यस्तु सो ऽन्य इति सर्वाधिपत्यं कुरुते महात्मेति च विधेयान्तरपरत्वात् तथापि पुरुष एवेदं सर्वं त्वं स्त्री त्वं पुमानसीत्यादिनचत्यमन्त्रान्तरप्रतिपन्नार्थं इह विधेयत्वेन गृहीतः । तद्ग्रहणं च सार्वात्म्यप्रतिपादनप्रधानायामस्यां श्वेताश्वतरोपनिषदि न भेदनिष्ठसांख्यतन्त्रकर्तृमहिमप्रतिपादनस्य प्रसक्तिरस्तीति तेनापि हेतुना मन्त्रस्य तद्विषयत्वनिराकरणार्थं सांख्यकर्तृविषयत्वे ऽपि तेन तस्य वेदार्थज्ञानवत्त्वमात्र सिध्यति न तु क्व चिदपि विषये ऽस्य भ्रमो विप्रलम्भश्च नास्तीत्येतदपि । मनोस्तु यद्वै किं चेति वीप्साशब्देन भेषजत्वोक्त्या च तदुक्तेः सर्वेचाप्यर्थं तदुभयराहित्य सिध्यतीत्यपि विशेषो द्रष्टव्यः । यजुर्वेदे यो ब्रह्मवर्चसकामः स्यात्तस्मा एतं सोमारौद्रं चरुं निर्वपेदिति ब्रह्मवर्चसकामस्येष्टिं विधाय आज्यं प्रोक्षणमाज्येन मार्जयन्ते इत्यन्तेन तस्य प्रत्येकं ब्रह्मवर्चसोपयोगार्थसहितं वैशेषिकमङ्गकलापं विधाय यावदेव ब्रह्मवर्चसं तत्सर्वं करोतीति फलार्थवादानन्तरम् अतिब्रह्मवर्चसं क्रियतइत्याहुरीश्वरो दुश्चर्मा भवतीत्येवंरूपेष्ट्यनुष्ठानेनातिब्रह्मवर्चसं क्रियते तेन यजमानः श्विची भवितुं प्रभवतीत्येवं फलमेव पुनर्दोषरूपं संकीर्त्य तत्परिहारार्थं मानवीऋचौ धाय्ये कुर्यादिति मनुना दृष्टे ऋचावग्निं वः पूर्व्यं गिरा देवमीडे वसूनामित्यादीनां पञ्चानाम् ऋचां मध्ये ये के चिद्वे ऋचौ सामिधेनीमध्ये धाय्यारूपेण योजयेदिति विधाय कथं मानवीभ्यामृग्भ्यां श्वित्रपरिहार इत्याकाङ्क्षायां यद्वै किं च मनुरवदत्तद्भेषजं भेषजमेवास्मै करोतीत्यर्थवादेन तत्संघटनं कृतम् ।

धर्मवक्त्रा मनुना यन्मन्त्रजातं दृष्टं तत्सर्वं भेषजं भवतीति तदिदमत्रोदाहृतम् । ननु यद्वै किं चेति वचनं न स्वायम्भुवमनूक्तीनां भेषजत्वोक्तिपरं किं तु समष्टिमनोऽभिमानिहिरण्यगर्भोक्तीनाम् । तैत्तिरीयशाखायां हि मानवीऋचो धाय्ये कुर्यादिति विधिशेषार्थवादरूपम् इदं वचनं श्रूयते । अत्रानूद्यमाने ऋचौ न मनोः प्रकाशिके किं तु मनसः । देवानां यन्मन* इति ह्यनूद्यमानयोः ऋचोः श्रूयते अतो मानवी इत्यत्र समष्टिमनोऽभिमानित्वधर्मेण हिरण्यगर्भः प्रकृत्यशेनोक्त इति स एव यद्वै किं चेति वाक्ये ऽपि मनुशब्दोक्तो भवितुमर्हतीति चेद् यद्येवं किं विंदष्टिविकृतौ मनोः ऋचः सामिधेन्यो भवन्तीति विधिशेषतया श्रुतं मनुर्वै यत्किं चिदवदत्तद्भेषजमिति वचनमुदाहरणमस्तु । न हि तत्र मनःप्रकाशिका ऋचो विनियुज्यन्ते किं तु मानससूक्तगता एव तत्र रूढिभञ्जकाभावात् । अत एव तन्त्रवार्तिके मनूक्तीनां भेषजतायामिदमेव वचनमुदाहृतम् । भाष्ये यद्वै किं चेत्युदाहरणमनादरेण । **सर्वज्ञत्वादिभिरिति** । ननु सर्वज्ञत्वादिव-
२११ । २५ चनाद् ममान्तरात्मेत्यादिकमन्तर्यामिविषयं स्यान्न तु जीवैक्यविषयमिति चेन्न । बहवः पुरुषा ब्रह्मन्नित्यादिना प्रश्नोत्तरत्वेन जीवविषयत्वावश्यभावात् परमेश्वर एक एव जीवभावेन सर्वशरीरेषु वर्तत इति एतद्दृष्ट्या परमेश्वरगुणवर्णनस्याप्यविरोधात्† ॥

एतेन योगः प्रत्युक्तः ॥ ३ ॥

योगस्वरूपतत्साधनेत्यादिटीकाग्रन्थं व्याचष्टे **एषामिति । श्रुतौ‡ सांख्ययोगशब्दाभ्यामिति** । नन्विदं श्रौतलिङ्गमात्रस्याधिकशङ्कापरिहारौ सांख्ययोग§साधारणौ कथं योगमात्रविषयत्व तयोरुक्तम् । उच्यते । कपिलमितिवदिदं श्रुतिसामान्यमात्रमिति पूर्वाधिकरणएवोक्तप्रायम् अतो नेदं लिङ्गमधिकशङ्काबीज किं तु योगशास्त्रे योगनिरूपणं श्वेताश्वतरोपनिषदाद्युपदिष्टयोगप्रपञ्चनरूपमिति प्रत्यक्षश्रुतिमूलत्वमधिकशङ्काबीजं तस्मिन्नंशे तस्य प्रामाण्ये ऽपि न तात्पर्याविषये स्वतन्त्रप्रधानादौ प्रामाण्यम् अतो न तेन स्वतन्त्रप्रधानादिसिद्धिरिति तत्परिहारः‖ ॥

---

* देवानां व इन्मन इति शोधितं ५ पु० । † अत्र प्रथम स्मृत्यधिकरणं पूर्णम् ।
‡ श्रौतेति १ पु० पा० । § सांख्यशब्दयोगेति २ पु पा० ।
‖ अत्र द्वितीय योगप्रयुक्त्यधिकरणं पूर्णम् ।

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥ २३२

अचेतनप्रकृतिकमिति । ननु अविद्याप्रकृतिकत्वेन सिद्धसाधनं चेतनप्रकृतिकं न भवतीत्यर्थकल्पने सिद्धान्तिमते दृष्टान्ते साध्यवैकल्यं हेतुविशेषणे वैयर्थ्यं चेति चेद् उच्यते। कार्यद्रव्यं चेतनप्रकृतिकं न भवति द्रव्यत्वादात्माविद्यावदित्यनुमानमत्र विवक्षितम् । कार्यद्रव्यमात्रपक्षीकरणज्ञापनाय हेतुविशेषणम् । घटस्यापि पक्षीकरणान्न तत्र साध्यवैकल्यशङ्का । घटयतीति घटः घटेर्ण्यन्तात्पचाद्यच् । णेरनिटीति णिलोपः । अघटितसंघटनापटीयो ऽज्ञानं तद्वदित्यर्थः । भाष्यटीकयोः प्रत्युदाहरणसंगतिरपि-मटीकाया * प्रदर्शितेति तात्पर्यमुक्त्वा स्वयमस्याधिकरणस्य दृष्टान्तसंगतिमाह वेदेति । प्रत्यक्षेणेति । स्वदृष्टलिङ्गकस्य स्वविशेषतोदृष्टानुमानस्य प्रत्यक्षवदतिविस्पष्टप्रमीयत्वात्प्रायः प्रत्यक्षमिदमिति संभावनाविषयता भवतीत्यर्थः । अनुश्रवो वेदः तद्गम्यमानुश्रविकम् । सुखाद्यात्मत्वं सुखदुःखमोहात्मत्वं† तद् उच्चावचविशेषणेनानेकप्रकारत्ववाचिना सातिशयत्वादिसूचनेन दर्शितम्। तद्यथाचपृड्इति । लोकतो ऽनवगम्यमानस्य चेतनप्रकृतिकत्वस्य केवलश्रुतार्थापत्त्या कल्पनायामचेतनत्वप्रतिपादकशब्दविरोधस्य दूषणतयोद्भावनसामर्थ्याल्लोकानुभवसद्भावे श्रुतार्थापत्तेस्तद्विरोधो न दूषणं किं तु प्रत्यक्षश्रुतिरेव चैतन्यानभिव्यक्तिपरतया व्याख्येया भवेदिति सूचितं भाष्ये तद्विवृणोतीत्यर्थः ।

आर्थत्वे उपोद्घलकापेक्षा तदेव नेत्याहेति । ननु आर्थत्वमिहापि तुल्यमेव भूतेन्द्रियाणां वक्तृत्वविवदितृत्वान्यथानुपपत्त्या चैतन्यस्य कल्प्यत्वाद् देवतात्वस्य मनुष्यत्वादिवच्चैतन्यव्याप्यजातिविशेषतया तस्य तदनुमेयत्वाच्च । न चेक्षतिश्रवणं चैतन्यश्रवणमेवेति वाच्यम् । ईक्षत्यधिकरणे‡ तस्य भाक्तत्वेनोक्तत्वात्§ । प्रलये सुषुप्तानां चेतनानामपञ्चीकृतभूतसृष्टिसमये चैतन्योद्भवाभावेन तस्य तदभिमानिदेवतेक्षणपरत्वस्यायुक्ततया भाक्तत्वावश्यम्भावाच्चेति चेदुच्यते । श्रुतचेतनप्रकृतिकत्वनिर्वाहाय भूते- २३३

* अपिमपटिकाया इति २-५ पु० पा० । † सुखमोहात्मत्वमिति २ पु० पा० ।
‡ ब्र० सू० अ० १ पा० १ सू० ५ । § भाक्तत्वादिति १ पु० पा० ।

न्द्रियाणां चेतनत्वमेवाभ्युपगम्यतामिति शङ्कायन्त्ये तेजःप्रभृतीक्षणस्य मुख्यत्वमेव संभवतीतीक्षत्यधिकरणोक्तभाक्तत्वाक्षेपेणाप शङ्का तदभाक्तत्वोपोद्बलकतया । मृदब्रवीदित्याद्युदाहरणम् । ननु तेजआदिशब्दानां तदधिष्ठातरि परमेश्वरे शक्तिरेव भाष्यटीकयोरभिमता ऽस्तु किमिति लाक्षणिकत्वमुक्तमित्याशङ्क्याह तदिदमुक्तं कथं चिदिति । ईक्षणस्य मुख्यत्वे कथं चिदित्येतन्नान्वेति परमेश्वरस्य मुख्येक्षणसद्भावादतस्तदीयेक्षणस्य मुख्यत्वे तेजआदिशब्दानाममुख्यत्वमायातीत्येतत्सूचनार्थमिति लाक्षणिकत्वमेव तेषां* मूलाभिमतमिति भावः ।

२३३ । ८ पक्ष एवेति । व्यतिरेकिहेतुव्यावृत्त्यर्थे साध्यासाधकविशेषणम् । ननु विशेषव्याप्त्यपेक्षायामसाधारण्ये ऽपि जगच्चेतनप्रकृतिकं न भवति चेतनविशेषगुणानुगतिरहितत्वाद् यद्यद्विशेषगुणानुगतिरहितं न तत्तत्प्रकृतिकं यथा सुवर्णविशेषगुणानुगतिरहितं पटादि न सुवर्णप्रकृतिकमिति सामान्यव्याप्त्यपेक्षायां नासाधारण्यम् । न च सामान्यव्याप्तिर्यतद्भ्यामननुगता नानुमानोपयोगिनीति शङ्कनीयम् । यो यस्य वन्यस्य प्रणेता स तस्मादधिकविषयज्ञानवानित्येवमादिरूपायाः सामान्यव्याप्तेः सिद्धान्तिना ऽप्यनुमानाङ्गतया प्रागङ्गीकृतत्वात् । आचार्यैरधिकरणारम्भे प्रदर्शितस्य विशेषव्याप्तिमूलकस्यैवानुमानस्यासाधारण्यशङ्कारहितत्वाच्चेति चेदुच्यते । यत्तद्भ्यामननुगता सामान्यव्याप्तिर्न स्वतन्त्रा ऽनुमानाङ्गम् । ईश्वरो वेदाधिकद्रष्टेत्याद्यनुमानं बुद्धिसंवादेन श्रुत्यवगतसार्वज्ञ्यदृढीकरणार्थं न स्वयमेव कस्य चिदर्थस्य साधनार्थमिति तथाननुगतापि सामान्यव्याप्तिरुपन्यस्यते । तदभावे ऽपि हि यथा सोम्यैकेन मृत्पिण्डेनेत्यादौ दृष्टान्तोपन्यासमात्रेण बुद्धिसंवादो जायते । आचार्यैः प्रदर्शितमप्यनुमानमप्रयोजकत्वपरिहाराय यदि चेतनप्रकृतिकं स्यात्तद्विशेष†गुणानुगतिमत्स्यादिति तर्कमपेक्षमाणं तन्मूलभूतां सामान्यव्याप्तिमुपजीवतीति तदपि नावतिष्ठते किं त्वापाततो ऽननुगतसामान्यव्याप्त्यनपेक्षमिव भासमानं पूर्वपक्षावलम्बनमस्त्वित्याशयेन न विलक्षणत्वादिति सोऽत्रानुमाने स्पष्टे विद्यमाने ऽप्यनुमानान्तरमाचार्यैरु-

---

* पक्षामिति १ पु० पा० ।

† तर्हि शेषेति १ पु० ।

पन्यस्तं ननु महांश्चायं पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखादीनां च रूपादिभेदादिति भाष्योद्भावितव्यभिचारेणैव तर्कमूलसामान्यव्याप्तेरपि शैथिल्यापादनाद् दूषितमिति तद्दूषणे फलान्तरमाचार्यैर्न कृतम् ।

ननु प्रमाणविषयविवेचकतयेत्ययुक्तं श्रुत्यैव प्रमाणमूर्द्धन्यया तद्विषयविवेकसिद्धेरित्याशङ्क्य व्याचष्टे वचनयुक्त्याभासनिरासेनेति । आपा २३३
ततस्तद्विरोधित्वेन भासमानानां युक्त्याभासानां चानुसधाने संजातस्य चित्तक्षोभस्यापनयनेन श्रुतिविषयदार्ढ्यापादनं तद्विवेचनमित्यर्थः । ननु पूर्वपक्षेपन्यस्तेषु तर्कमूलाक्षेपहेतुषु ब्रह्मणः सिद्धरूपत्वेन पृथिव्यादिसाम्यं मननरूपतर्कोदयश्चेति हेतुद्वयमेव परिहृतं न तु निरवकाशत्वप्रधानप्रत्यासत्तिहेतुद्वयमिति चेत् । उच्यते । ब्रह्मणः सिद्धरूपत्वे ऽपि श्रुत्यनुग्राहकतर्कोदये ऽपि स्वतन्त्रानुमानविषयत्वं नास्तीति प्रसाधिते शब्दसाधनासमस्य चक्षुरस्तद्वाधनइव* ब्रह्मसाधनाक्षमस्यानुमानस्य तद्बाधने सामर्थ्याभावः फलितो भवतीत्युपले चुरतेरुपयस्येव तत्र कुण्ठीभवतो ऽनुमानस्य श्रुतितः प्राबल्यहेतुकथनमस्थानविजृम्भितमिति स्वत एव सिद्धेस्तद्धेतुद्वयमाहत्य न दूषितम् ।

न ह्यचेतनस्येत्यादिग्रन्थं व्याचष्टे अचेतनस्य जगत्कारणस्येति । नन्वचेतनाच्चेतनस्येवोद्भूतविशेषगुणादनुद्भूतविशेषगुणस्याप्युत्पत्तिर्न संभवतीति चेद् न । काष्ठन्वालाभावा† तद्गतवारिस्थतेजसो दीपात्तुणानेश्चोत्पत्तिदर्शनात्तत्रोद्भूतरूपावयवान्तरकल्पने गौरवात् । घटः प्रकाशतइत्यनुभवदर्शनेन घटादिषु चैतन्यमुद्भूतमित्यपि कल्पनोपपत्तेश्च । कस्य चित्प्रकाशते कस्य चिन्न प्रकाशतइति व्यवहारस्तु चैत्रात्परो ऽयं न मैत्रादिति व्यवहारवदुपपद्यते परत्ववच्चैतन्यस्यापि सप्रतियोगिकगुणत्वकल्पनोपपत्तेः । न तथेति । ,, । २.
सत्कार्यवादिनस्तत्र शरावादिदृष्टान्ते ऽप्युक्तदोषापत्तिस्तुल्येति भावः । कारणानुवृत्त्येति । न तु कार्यरूपानुवृत्त्या ऽतो नोभयथाप्युक्तदोषापत्तिरिति भाव. । ननु जाग्रत्प्रपञ्चदोषैणेव स्वप्नप्रपञ्चदोषेणापि ब्रह्मणो रूपणमापादामेव कथमरूपणे दृष्टान्तीक्रियतइत्याशङ्क्य जीवे तदरूपणस्यानुभवसिद्ध-

* चक्षुव इवेति १ पु पा ।　　　　† व्यासाद्गगणेति १ पु पा ।

तया जीवो ऽत्र दृष्टान्तो विवक्षित इति व्याख्यातमित्याह **अतो न साध्यसमत्वमित्यर्थ इति** । यो ऽन्यत्रात्मन इत्यत्रान्यत्रेत्येतत्प्रथमार्थे ऽन्यत्र भूताच्च भव्याच्चेतिवत् । सिद्धमर्थमाह **आत्मव्यतिरेकेणेति** ॥

२३४ । १३ **एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥**

अतिदेशस्येति । स्मृतेर्मूलाभावे ऽपि तर्कस्य व्याप्त्यादिमूलसत्त्वात्तद्विरोधेन समन्वयः सङ्कोचनीय इति पूर्वाधिकरणेन प्रत्युदाहरणसंगतिरित्यर्थः । तेन दृष्टान्तसंगतिमपि दर्शयन्नतिदेशाधिकरणस्याभ्यधिकाशङ्कामाह **यथा हीति । इयमारम्भणेति ।** न कार्यं कारणाऽभिन्नं नापि तद्भिन्नं सत्यं किं त्वनिर्वचनीयमित्युपपादयितुमारम्भणाधिकरणे† कार्यकारणभेदशङ्का निरसनीया इह तु भेदगर्भकार्यकारणभावे प्रत्यक्षत्वाऽप्रत्यक्षत्वावसेयसत्त्वाऽसत्त्वविरोधाभ्यां तन्निरसनमभ्युच्चयमात्रमित्यर्थः ।

असदकरणादित्यादीति ।

असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात्कारणभावाच्च कार्यस्य‡ ॥

इति सांख्यानां सत्कार्यवादप्रधानश्लोकः । अस्यार्थः । कार्यं कारणव्यापारात्प्रागपि सदेव नीलरूपस्य पीतभावेनेवाऽसतः सत्त्वेन कर्तुमशक्यत्वात् । उपादानग्रहणाच्च प्रागपि सदेव कार्यम् । उपादानानि कारणानि तेषां कार्येण ग्रहणात् कारणैः कार्यस्य संबन्धादिति यावत् । कारणसंबद्धं हि कार्यं भवद् भवेत् । कारणाऽसंबद्धमेव कार्यमुत्पद्यतामिति चेद् न । सर्वसंभवाभावात् । असबद्धस्य कार्यत्वे हि असबद्धत्वाविशेषाऽ§त्सर्वं कार्यं सर्वस्मात्संभवेद् न चैतदस्ति । असबद्धमपि कारणं तदेव करोति यत्र शक्तमिति चेद् न । शक्तस्य शक्यकरणात् । शक्तमपि हि कार्यं शक्यं करोति नाशक्यम् । अव्यवस्थातादवस्थ्यात् । शक्यं करोति चेत्कथमसति शक्तिविषयतारूपा शक्यता कार्यस्य कारणात्मत्वादपि कार्यं सदेव । तस्य कारणात्मत्वं च घटशरावादिकं पूर्वाह्णे मृत्कूटं एवासीदित्यनुभवेन गुरुत्वद्वैगु-

* अत्र तृतीयं विलक्षणत्वाधिकरणं पूर्णम । † व्या० सू० अ० २ पा १ सू० १४ ।
‡ भावाच्च सत्कार्यमिति सांख्यकारिकापाठः । § असंबन्धाऽविशेषादिति २ पु पा० ।

र्यानुपलम्भादियुक्त्या चेति। (ननु पृथुबुध्नोदरादिसंस्थानविशेषाणां सदातनत्वे ऽपि कदा चित्प्रत्यक्षत्वं कदा चित्परोक्षत्वं च पटकूर्माङ्गादिपरिणाहानामिवाविर्भावतिरोभावाभ्यामुपपद्यते)* । न हि पटकूर्माङ्गादिपरिणाहानां संकोचनावस्थायामप्रत्यक्षत्वमनुत्पत्त्या नाशेन वा किं तु तिरोधानेन । ततश्च तेषां विकाशव्यापारेणेव दण्डचक्रादिव्यापारेण पृथुबुध्नोदरादीनामभिव्यक्तौ प्रत्यक्षता अभिव्यक्तिश्च तत्तिरोधायकपिण्डावस्थोपमर्दः । मुद्गरपातेन घटावस्थोपमर्द इति कपालावस्थाभिव्यक्तिः । कपालानि चूर्णीकृत्य जलमृदन्तरसंयोजनमर्दनादिभिर्मार्दवं प्रापय्य दण्डचक्रादिव्यापारेण तिरोहिताया घटावस्थायाः पुनरभिव्यक्तिः । एवं पटावस्थायां दाहेन तिरोहितायां तद्भस्मनां क्षितितलपतितानां तत्क्षितिप्ररूढकार्पासतरुकुसुमफलपरिणतौ क्रमेण तिरोहितायाः पटावस्थायाः पुनरभिव्यक्तिरिति। अवस्थानामपि सदातनत्वे प्रत्यक्षत्वपरोक्षत्वव्यवस्थायां न क्व चि†दनुपपत्तिरिति चेद् एवं द्रव्यतदवस्थाविशेषाणां सदातनत्वसमर्थने ऽपि तदाविर्भावतिरोभावौ प्रागसन्तौ आगन्तुकावेवाभ्युपगन्तव्यौ । तयोरपि सदातनत्वे घटावस्थायां‡ कदा चित्प्रत्यक्षत्वं कदा चित्परोक्षत्वमिति व्यवस्थाऽनुपपत्तेस्ततश्च तयोरसदकरणादिहेतूनां प्रतिहतेः । तद्वदेव घटादिद्रव्याणां तदाकारविशेषाणां चागन्तुकत्वमभ्युपगन्तुं युक्तम् । इदानीं मृत्पिण्ड एवास्ति घटो नास्तीत्यादिव्यवहारदर्शनात् कारणचक्रव्यापारानन्तरमिदानीं घट आसीदित्यादिव्यवहारदर्शनाच्च पटपरिणाह इदानीमभिव्यक्त आसीत् प्राक् तिरोहित आसीदित्यादिवदाविर्भावतिरोभावव्यवहाराभावाच्च। शेषमारम्भणाधिकरणे§ वक्ष्यते ।

प्रकृतौ हि॥ द्वादशाहे इति । नन्वहर्गणानां प्रकृतौ समूहे द्वादशाहे २३।
त्रयाणां त्रयाणामह्नां त्रिवृत्स्तोमकत्वादिकं नास्ति। सत्यं यत्रास्ति तदुपलक्षणमेतत्। तद्यथा क्व चिदेकोनपञ्चाशद्रात्रविशेषे श्रूयते अतिरात्रो नव त्रिवृद्भन्त्यहानि नव पञ्चदशान्यहानि नव सप्तदशान्यहानि नवैकविंशान्यहानि द्वादशाहस्य दशाहस्य दशादानि महाव्रतं चातिरात्रश्चेति। **निश्चितार्थैरिति** । यद्यपि

* ( ) एतन्मध्यस्थो ग्रन्थो नास्ति १ पु । + क्व चिदिति १ पु· पा· ।
‡ घटाद्यवस्थायामिति १ पु· पा· । § ब्र· सू· अ· २ पा· १ सू· १४ ।
|| हिशब्दो नास्ति१-५ पु· ।

त्रिवृदादिशब्दाः स्तोत्रीयाणामृचां नवसंख्यादिवाचिनो नाहर्वाचिनः तथापि तेषामन्यत्र लक्षणया ऽहःपरत्वं दृष्टमित्येतावता तादर्थ्यनिश्चयोक्तिः । ननु तेषां संवत्सरपरत्वमपि त्रयस्त्रिवृतः संवत्सरास्त्रयः पञ्चदशा इत्यादिद्वादशवार्षिकसत्रोत्पत्तिवाक्येषु नव त्रिवृतः संवत्सरा नव पञ्चदशा इत्यादिषट्त्रिंशत्संवत्सरसत्रोत्पत्तिवाक्येषु च दृष्टं न च तेषु संवत्सरशब्दस्यार्थानवधारणमस्ति संवत्सरसत्राणां प्रकृतिभूते गवामयने चत्वारो ऽभिप्लवाः षडह एकः पृष्ठ्यः षडहः समास इति त्रिंशति अहस्सु मासत्वोक्तिलिङ्गाद् यावत्यश्चतुर्विंशोक्थ्यस्य स्तोत्रीयास्तावत्यः संवत्सरस्य रात्रय इति संवत्सररात्रीणां षष्ट्युत्तरत्रिशतसंख्याकचतुर्विंशोक्थ्यस्तोत्रीयाभिः समसंख्यत्वोक्तिलिङ्गात्सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृत इति स्मरणाच्च सावनपरत्वावधारणेनानुष्ठानपर्यन्तत्वदर्शनात् । तथेहापि मुख्यवृत्त्यैव सावन-
२३५ । १६ संवत्सरपरत्वमुपपादयितुं शक्यमिति पूर्वोक्तस्वरसादाह **औषधादिसिद्धिकल्पनापीति** । सहस्रसंवत्सरजीवनोपायभूतमौषधादिकं क्व चित्प्रामाणिकशास्त्रे दृष्टं क्लृप्तं नास्ति येन सहस्रसंवत्सरायुरर्थितया स्वत एवौषधादिसिद्धानामधिकार इति विध्याक्षेपगौरवं परिह्रियेत किं तु सहस्रसंवत्सरविधिबलादेव तथाभूतमौषधादिकमस्तीति कल्पनीयम् । न च तथा कल्पनया ऽप्यधिकारनिर्वाहः । सामान्यतः कल्पितस्याप्यौषधादेरिदन्तया परिज्ञानाभावेन तत्सेवया तावदायुःसंपादनाभावात् । न ह्यग्निसंवर्द्धनं स्वरवर्णप्रसादनं वलीपलितनाशनमित्यादिरसायनानामिव तावदायुःसंपादकस्य रसायनस्येदन्तया परिज्ञानं कथमपि लब्धुं शक्यम् । तावदायुषां गन्धर्वादीनामधिकाराश्रयणे ऽपि* तेषां ब्राह्मण्यादिकं तदभावे ऽप्यग्निसंपानम् अन्यभावे ऽपि क्रत्वनुष्ठानं वा कल्पनीयमिति विध्याक्षेपगौरवमपरिहार्यमतस्तत्परिहाराय पञ्चपञ्चाशत इति संख्यावाचिशब्दस्य संवत्सरा इति कालवाचिशब्दस्य वा लक्षणीयत्वेन वाक्यार्थे वक्तव्ये संख्याशब्दस्य व्यवस्थितार्थत्वात् संवत्सरशब्दस्यापाततो ऽनेकार्थतया प्रचलदवस्थत्वादहरेव संवत्सर इत्यहनि दृष्टप्रयोगत्वाच्च अहर्लक्षणत्वमभ्युपेत्य वाक्यार्थो निर्णेतव्य इति भावः ।

---

* श्रयणे ऽपीति न पु० पा० ।

दूर्वाकारेति । यद्यारम्भणाधिकरणे स्फुटीकरिष्यमाणं विवर्तवादं प्रच्छाद्य समनन्तरभोक्त्रापत्त्यधिकरणावलम्बनं परिणामवादमाश्रित्य परमाणुवाददूषणं वक्तव्यं तदोपादानोपादेययोरल्पाधिकपरिमाणत्वनियमस्य प्रचितपरिमाणतूलपिण्डारब्धेषु पिचुप्रभृतिषु व्यभिचार उद्भावनीयः । मेरुसर्षपयोरनन्तावयवारब्धत्वाविशेषेऽपि तदानन्त्ययोरेवातीतक्षणकल्पानन्त्ययोरिव विशेषोपपादनेन तुल्यपरिमाणप्रसङ्गं निरस्य चोदीयोऽर्थान्तरकल्पनापत्तिप्रसङ्गेन च परमाणुकारणवादो दूषणीयः* ॥

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १३ ॥ २

ननु केवलागमगम्यब्रह्मविषयत्वं साधकस्येव बाधकस्यापि तर्कस्य न संभवतीति शङ्काया मन्त्रार्थवाददृष्टान्तेन परिहारो न संभवति मन्त्रार्थवादयोर्मानान्तरगम्यविषययोरेव मानान्तरबाधेनान्यथानयनाङ्गीकारादित्याशङ्कायामपि मानान्तरगम्यप्रपञ्चाभावश्रुतीनामेव तत्सत्त्वग्राहिमानान्तरेण बाधः शङ्क्यत इति तात्पर्यमाह **तर्हि जगद्भेद इति** । एतदनुसारेण प्रवृत्तप्रवर्तमानग्रन्थो व्याख्यातुमयं ग्रन्थः† ॥

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥ २३६

लौकिकप्रमाणानां तत्त्वावेदकत्वव्याघातरूपो विशेषोऽत्राभिधित्सितः कुतोऽवसीयत इत्याकाङ्क्षायां सोपपदेन तद्विषयमिथ्यात्वप्रतिपादनादित्याह **तदनन्यत्वपदेनेति** । ननु सोपपदाद्भवति विषयवाक्ये पूर्वाधिकरणव्यवस्थापितभेदाभेदानुगुणदृष्टान्तोपादानात्तद्दृढीकरणे तात्पर्यं कुतो नावसीयत इति शङ्कोत्तरत्वेन प्रतिज्ञाश्रयतात्पर्यवर्णनपरं ग्रन्थमवतारयति **श्रुताविति** । **तत्त्वज्ञानं चेतीति** । तत्त्वस्याबाधितरूपस्य ज्ञानमित्यर्थः । तथा चेदन्तया प्रतीयमानस्य भुजगस्य रज्ज्विदमंश इव सत्तया प्रतीयमानस्य विश्वस्याधिष्ठानपदांशस्तत्त्वमिति सद्रूपे तस्मिन् विज्ञाते विश्वमारोपितं तद्विशेषरूपेणाऽज्ञातमपि तत्त्वतो ज्ञातं तज्ज्ञानेनैव विषयीकृतं भवतीत्यर्थः । एतेनासाधारणं स्वरूपं धर्मो वा तत्त्वं न तु भ्रमाधिष्ठानम् ।

---

* अत्र चतुर्थं शिष्टापरिग्रहाधिकरणं पूर्णम् ।

† अत्र पञ्चमं भोक्त्रापत्त्यधिकरणं पूर्णम् ।

तथा सति सदंशस्तत्त्वमिति ब्रह्मशुक्त्याद्यधिष्ठानस्यानन्दशुक्तित्वादेरतत्त्वप्रसङ्गादिति निरस्तम् । स्वरूपं धर्मो वा बाध्यो तत्त्वमित्यबाधितत्वविशेषणावश्यंभावे सत्यसाधारणविशेषणवैयर्थ्यात् । नष्टशब्दो यद्यपि प्रयोगप्राचुर्याद् ध्वस्ते प्रसिद्धस्तथापि दृष्टनष्टस्वरूपत्वादिति हेतोर्व्यतिरेकव्याप्तिप्रदर्शनपरे तथा हीत्यादिटीकाग्रन्थे त्रिविधपरिच्छेदराहित्यस्य वस्तुसत्त्वरूपसाध्याभावव्यापकत्वप्रदर्शनात् त्रिविधपरिच्छेदो ऽत्र हेतुर्विवक्षितो न तु कालपरिच्छेदमात्रम् । न च त्रिविधोपादानवैयर्थ्यम् । ध्वंसात्यन्ताभावान्योन्याभावप्रतियोगित्वरूपहेतुत्रयपरत्वोपपत्तेः । अभावत्वेन सर्वक्रोडीकरणेनाभावप्रतियोगित्वरूपैकहेतुपरत्वोपपत्तेश्च । न च ब्रह्मणि व्यभिचारः । स्वान्यूनसत्ताकत्वेनाभावविशेषणादित्यभिप्रेत्य त्रिविधसंग्रहार्थं नश अदर्शने इति धात्वर्थकथनानुसारेण समभिव्याहृतदृष्टप्रतिद्वन्द्विविषयतौचित्यानुसारेण च

२३६ । १९ नष्टशब्दं व्याचष्टे **अदृष्टमित्यर्थ इति** । एवं च कालान्तरदेशान्तरवर्तितया वस्त्वन्तरतादात्म्येन चादृष्टत्वोक्त्या तत्तदर्थाभावाक्षेपात् कालपरिच्छिन्नत्वादिहेतुलाभः । नन्वेवं सति नष्टपदेनैव हेतुलाभात् किं दृष्टग्रहणेनेत्याशङ्क्य ध्वंसकालाद्यवच्छिन्नः सत्त्वाभाव इह साध्यते स दृष्ट एवेति भ्रान्तशङ्कावारणार्थं प्रतीतिकालादिसाधारणः सत्त्वाभावः साध्य इति साध्यशरीरज्ञापनार्थं तदित्याह **प्रतीतिसमये इति** । क्व चिददृष्टमित्यर्थ इति स्थाने अनित्यमित्यर्थ इति पाठस्तु नष्टशब्दस्य ध्वस्ते प्रसिद्धिप्राचुर्यमाश्रित्य । अस्मिन् पक्षे कालपरिच्छेदमात्रस्य हेतुत्वाद् ब्रह्मणि व्यतिरेकव्याप्तिप्रदर्शनपरे टीकाग्रन्थे न ह्यसौ कदा चित्क्व चित्कथं चिद्वा ऽस्तीति देशवस्तुपरिच्छेदयोरप्यभावकथनं कालपरिच्छेदाभावे दृष्टान्तार्थमिति योज्यम् । टीकायां ये हि दृष्टस्वरूपा इत्यनेन विवक्षितस्यानुमानस्य प्राथमिकतयाहिग्रन्थेन व्यतिरेकव्याप्तिः प्रदर्शिता तस्यैव विपक्षबाधक द्वैतीयीकतयाहिग्रन्थेनोच्यतइति निष्कृष्य तदनुमानप्रदर्शनपूर्वकमवतारयति **विमतमिति । सावधिकत्वादिति** । पूर्वोक्तरीत्या त्रिविधावधिमत्त्वादनित्यत्वादिति वा ऽर्थः । सावधिकसत्त्वादिति पाठे सावधिकस्थितिकत्वादित्यर्थमादायोक्तार्थएव पर्यवसानं द्रष्टव्यम् । अन्यथा कदा चित्सत्त्वमङ्गीकृत्य तेन त्रैकालिकसत्त्वाभावसाधने विरोधात् ।

टीकायामाद्यविकल्पद्वयं सत्त्वासत्त्वोभयविषयमुपन्यस्याऽर्थान्तरत्वादिविकल्पद्वयमसत्त्व*मात्रविषयमुपन्यस्तं तत् स्वयं सत्त्वेनासत्त्वेन चानिर्वचनीयत्वा†भावसिद्ध्यर्थं सत्त्वे ऽप्यतिदिशति **असत्त्ववदित्यादिना** । २३१
ननु सत्त्वं भावधर्मः असत्त्वं त्वभावरूपमर्थान्तरमित्यभ्युपगमे नास्ति दोषः । न चाकिंचित्करतायामर्थान्तरस्य विरोधित्वानुपपत्तिस्तस्य प्रतियोगिन्यकिंचित्करत्वे ऽपि स्वभावादेव प्रतियोगिप्रतिक्षेपरूपविरोधित्वोपपत्तेः । अन्यथा प्रतियोगिनि किंचित्करस्यैव (विरोधित्वनियमे ऽत्रैव विषद्वाचकसमर्थनार्थस्य सदसतोरेकत्वविरोधादिति टीकाग्रन्थस्य सत्स्वभावस्याऽसत्त्व)‡विरोधादित्यस्य ग्रन्थस्य चानिर्वाहात् । उच्यते । सत्त्वासत्त्वे भावधर्मावित्यभ्युपगमे विकारनित्यत्वापात इति यो दोष उक्तः स सत्त्वमेकमेव भावधर्मो न कदापि भावस्यासत्त्वमित्यभ्युपगमे ऽपि तुल्यः । असत्त्वमर्थान्तरं न चासत्त्वान्तरकरमित्यभ्युपगमे त्वसन् घट इति सामानाधिकरण्यानुपपत्तिः । न हि सत्त्वासत्त्वगोत्वाश्वत्वादीनां स्वभावादेव परस्परविरोधसद्भावे ऽपि सदसद्गौरश्व इत्यादिसामानाधिकरण्यमस्ति । न चासन् घट इति सामानाधिकरण्यमभावप्रतियोगी घट इत्यर्थकमिति वाच्यम् । तथा सति प्रतियोगित्वधर्माश्रयतया विकारसत्त्वापातात् । एवं सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वमिह विश्वस्योपपादितम् । भेदाभेदाभ्यामनिर्वचनीयत्वमपि पूर्वाधिकरणे कार्यकारणभेदवादिभिश्च दर्शितैः परस्परं प्रतिक्षेप्तुमशक्यैर्न्यायैः सिद्धमित्यनुसंधेयम् ।

ननु मृदात्मना शरावादीनामेकत्वं मृदश्च शरावाद्यात्मना नानात्वमिति परोक्तमापाद्य विकल्पपूर्वकं दूषणमयुक्तोपालम्भः§ । मृदेका शरावादयो नानेत्येतावत एव परोक्तत्वात् । भाष्ये यथा वृक्ष इत्येकत्वं शाखा इति च नानात्वमिति प्रथमदृष्टान्तानुसारेण मृदात्मना घटशरावाद्यात्मनेति आत्मशब्दयोरविवक्षितार्थत्वादित्याशङ्क्य तात्पर्यमाह **मृदेकेति** । यदि तथा परमतं स्यात्तदा सर्वविज्ञानप्रतिज्ञानिर्वाहार्थमस्मदुक्ता रीतिरनुसरणीयेति परमते ऽपि शुद्धाद्वैतमेव सिध्येद् न नानात्वस्य ,, १०

* उपसत्त्वेति २ पु० पा० ।
† सत्त्वेन च निर्वचनीयत्वेति २ पु० पा० ।
‡ ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु० ।
§ अनुक्तोपालम्भ इति १ पु० पा० ।

सत्यता । अतस्तास्वन्यतामनुसृत्य प्रतिज्ञां निर्वोढुं कार्यकारणयोर्द्वयोरपि परस्परात्मनैकत्वं नानात्वं च पराभिमतमिति वक्तव्यम् । अत एव नन्वनेकात्मकं ब्रह्मेति भाष्ये कारणस्य कार्यात्मनाभिप्रायेण नानात्वमुक्तमिति तत्र विकल्प्य दूषणकथनं युक्तमित्यर्थः । अभेद एव स्यादिति पाठमनुसृत्य शुद्धाद्वैतमेव सिध्येदिति तत्तात्पर्यं वर्णितम् । अत्यन्तभेद एव

२३७ । १३ स्यादिति पाठस्तु सुगमः । **न भवेदपीति ।** भेदमाश्रित्य भवनवदभेदमाश्रित्याभवनमपि वक्तुं शक्यमिति भावः । तस्करदृष्टान्तः छान्दोग्ये पुरुष सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपत इत्यादिना प्रपञ्चितः । **असत्यादिति ।** असत्यादहिज्ञानान्मरणकार्यवमभयोत्पत्तिर्वक्ष्यते । नन्वसत्त्वप्रावसत इवाहिज्ञावहेरुपलक्षणत्वेन तादर्थ्यसंभवाद् नाऽहिज्ञानस्यासत्यत्वमिति चेद् न । असद्विकल्पस्यासद्विशिष्टत्वेनासत्त्वे बाधकाभावात् । न च शशशृङ्गमस्तीति ज्ञानाद् भ्रान्तस्य प्रवृत्त्यभावप्रसङ्गो बाधकः । असतः साधकत्वदर्शनस्य प्रातिभासिकव्यावहारिकाणां साधकत्वोपपादने कैमुतिकन्यायेनानुकूलत्वात् । अत एव खण्डनकारैरसतः साधकत्वं यत्नेनोपपादितम् । ननु तथापि व्यावहारिकत्वादिनिर्वचनेष्वपेक्षितमसत्प्रातिभासिकवैलक्षण्यं व्यावहारिकमभ्युपेयम् । असतः प्रातिभासिकस्य च तद्वैलक्षण्यस्याक्षति प्रातिभासिके च सत्त्वेनाव्यावर्तकत्वात् । अतस्तत्रासत्प्रातिभासिकत्वद्वहेरप्युपलक्षणत्वं स्यादिति चेन्न । तत्र विशिष्टरूपेणासदपि प्रातिभासिकमपि स्वरूपेण तद्वैलक्षण्यं विशेषणमिति विवक्षया व्यावर्तकत्वोपपत्तेः । क्व चित्कस्य चिद्बाधकवशादुपलक्षणत्वकल्पनेऽपि प्रकृते विशेषणत्वे संभवति तद्दृष्टान्तेनोपलक्ष्याकारान्तरसापेक्षोपलक्षणत्वकल्पनायोगात् । महासर्पभ्रमजन्यभये क्षुद्रसर्पभ्रमजन्यभयादुत्कर्षदर्शनेन कार्योत्कर्षानुविधेयोत्कर्षस्य सर्पस्य विशेषणतया भयप्रयोजककोटिनिवेशनावश्यंभावाच्च ।

,, । २४ **परिहारसाम्यमाहेति ।** ननु कथं परिहारसाम्यं सत्यत्वाविशेषेऽपि यत्कारणतावच्छेदकावच्छिन्नं ततः सत्यं कार्यं नान्यस्मादिति नियमः सत्यपक्षे संभवति । आरोपपक्षे त्वजिनमजीनमित्युभयोरपि दैर्घ्यारोपाऽविशेषे धूमबाष्पयोर्व्याप्यारोपाविशेषे च कथं नियमः । उच्यते । यादृशेन ज्ञानेन

सत्यत्वं कार्य*कारणभावानतिप्रसङ्गोपपादकं सिद्धं परो मन्यते तादृश-ज्ञानसिद्धं व्यावहारिकसत्त्वमस्माकं तदनतिप्रसङ्गोपपादकं तत्तु ज्ञानेतरस्य सर्वथैव बाध्यमित्यभिमानः । अस्माकं तु तद्युक्त्या ब्रह्मज्ञानेन च बाध्यमिति सिद्धान्तः । एवं च धूमएव वन्हिव्याप्तिज्ञानात् तत्सत्त्व-सिद्धिः न तु धूमत्वभ्रान्तिविषये बाष्पे तज्ज्ञानादिति पराभिमानात् । अस्माकं धूमे एव वह्निव्याप्त्यारोपाद्व्यावहारिकवह्निप्रमा नान्यत्रेति व्यवस्था । यदि क्व चिद्बाष्पधूमभ्रमस्थले ऽपि संवादिनी सा जायतइति न वस्तुसङ्गाप्तिमत्त्वं तत्प्रयोजकं किं तु साध्यवति लिङ्गज्ञानमात्रमारोपानारोपसाधारणमितीष्यते तदा यतः साध्यवत्त्वज्ञानात्पक्षे साध्यत्वस्य वस्तुतः सिद्धिं परो मन्यते तदस्माकमारोपरूपमिति तत्सिद्धं व्यावहारिकं साध्यत्वं तत्प्रयोजककोटौ निवेश्यम् । एवमजीनमजिनमित्यत्राप्युपपादनं वर्णदैर्घ्या-देश्च सत्यत्वमशक्योपपादनम् । न च दीर्घादिध्वनिसाहित्यं तदभिव्यक्तत्वं वा तत् । न हि दीर्घादिध्वनिसहिता इमे वर्णास्तदभिव्यक्ता वेति प्रतियन्ति लोकाः किं तु दीर्घो ऽयं ह्रस्वो ऽयमित्येव प्रतियन्ति । लोक-विरोधेन चानुभवव्याख्याने रजतभ्रमादीनामपि रजतसदृशमिदमित्यादिव्याख्यानं को वारयेत् ।

ध्वस्ते इति । ध्वंसु गतौ चेति गत्यर्थमादाय यथा चेयं ध्वस्तेति पाठस्य गतिरुक्ता । स्तब्धेति पाठः सुगम इति त्यक्तः । तर्ह्येवेति । कथं चेत्येतत्प्रकृतार्थानुगुण्यार्थं तर्ह्येवेत्यर्थे योजनीयम् । आक्षेपार्थत्वे स्वप्नद्गनुभवभ्रान्तित्वस्यैव प्रतिपिपादयिषितत्वापत्तेरिति भावः । **नानात्वांशेन तु कर्मकाण्डाश्रया इत्यादिनेति** । नन्वयं ग्रन्थो भाष्ये पूर्वपक्षग्रन्थः टीकायां तु यद्वोक्तमित्यतः प्रागयं ग्रन्थ एव नास्ति तदनन्तरं तु पूर्वपक्षभाष्यानुवादरूपो ऽयं ग्रन्थः कथमयं ग्रन्थो नाथ इत्युक्तमिति सिद्धान्तग्रन्थतया ऽवतारितः । उच्यते । अनेन ग्रन्थेनानूदितः पूर्वपक्षः सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात्सत्यत्वोपपत्तेरि-त्यादिभाष्येण तात्पर्यप्रदर्शकटीकाग्रन्थेन च निराकृत इति प्रदर्शनार्थे पूर्वपक्षग्रन्थोपन्यास इति न दोषः । केषु चित्कोशेषु नानात्वांशेनेत्यादिग्र- २३८ ।

* सत्यकार्येति १ पु० पा० ।

तीकग्रहणमेव नास्ति तस्मिन् पाठे नाद्य इत्युक्तमित्येतावतैव सर्वव्यवहाराणामित्यादिभाष्यतद्व्याख्यानाभ्यामिति ज्ञातुं शक्यत्वात्प्रतीकाग्रहणम् ।
२३८ । १६ यथा खल्विति । घटध्वंसो नाम घटविरोधिकपालरूपकार्यान्तरोदय एव न त्वभावरूपः । तदतिरिक्ताभावरूपध्वंसकल्पने गौरवात् कपालरूपविरोधिकार्यान्तरोदयेनैव ध्वंसव्यवहारोपपत्तेश्च । ननु कपालोत्पत्त्यनन्तरं घटो नास्तीति व्यवहारविषयः कश्चिदभावो ऽपि स्वीकर्तव्यः स एव मुद्गरपातादिसाध्यो घटध्वंसो ऽस्त्वित्यत आह तस्य तुच्छत्वेनेति । सो ऽभावो न कस्य चित्कार्यो ऽभावत्वादेव । तथा च घटापनयनानन्तरमिव मुद्गरपतनानन्तरमपि घटो नास्तीति व्यवहारो नित्यसंसर्गाभावविषय एव ध्वंसव्यवहारस्तु कपालोत्पत्तिविषयः । अत एव कपालोत्पत्तिदशायां कपालान्युत्पद्यन्तइति व्यवहारवद् घटो ध्वस्त* इति व्यवहारः । उत्पन्नेषु कपालेषु कपालान्युत्पन्नानीति व्यवहारवद् घटो ध्वस्त इत्येव व्यवहारः कपालतदुत्पत्त्योरदर्शने घटो ध्वस्तो ध्वसत†इति च व्यवहारयोरभावश्च । यद्वा तुच्छत्वेनेत्यस्याभावत्वेनेति नार्थः किं त्वलीकत्वेनेति । तथा च भावविशेषैरेवाभावस्य व्यवहारोपपत्तेर्भावातिरिक्ताभावस्याऽप्रामाणिकत्वेन कार्यत्वशङ्कानास्पदत्वादित्यर्थः ।

तत्रापि व्यभिचारस्योक्तत्वादिति । तद्भावनानुरक्तधीबोध्यत्वं न तत्तादात्म्यधीबोध्यत्वम् । भाष्योदाहृते पटे तन्तुतादात्म्यबुद्ध्यभावाद्-तस्तद्वैशिष्ट्यबुद्धिबोध्यत्वं तदिति वक्तव्य तत्त्वालोकसयुक्तत्वेनैव चाक्षुषधीवेद्यत्वनियते घटे व्यभिचार इति प्रागेवोक्तम् । तस्मात्तद्भावोपलब्धिनियतभावोपलब्धिकत्वरूपहेत्वर्थप्रदर्शनपरमिदं भाष्यमित्यर्थः । प्रागनुपलब्धत्वादित्यनेन किं पटाकारोल्लेखेनानुपलब्धिर्विवक्षिता उत स्वरूपेण । नाद्यः । तदानीमातानवितानरूपाकारविशेषाभावेन तदाकारोल्लेख्युपलब्ध्यभावस्योपपन्नतया तस्य द्रव्यभेदासाधकत्वादित्यभिप्रेत्य द्वितीयमसिद्ध्या दूष-
२३९ । २५ यति अभेदवादिन इति । ननु कारणवत्कार्यमपि सत्यमित्येतावता सत्यद्वयं न प्रसज्यते रज्ज्वदन्तायां भुजङ्गस्यारोपिते कार्ये कारणब्रह्मसत्ताया

---

* ध्वंसते इति १ पु पा० ।   † ध्वस्त इति २ पु० ।

एव प्रतीतिः । तदनन्यत्वं च न तदभेदः किं तु तद्व्यतिरेकेणाभाव
इत्यधिकरणारम्भे वर्णितत्वादित्याशङ्क्याह **उक्ताभिप्रायानभिज्ञ इति** । २४०
भावे चोपलब्धेः* सत्त्वाच्चावरस्येति† सूत्रद्वयभाष्यटीकाग्रन्थच्छायया कार्य-
कारणयोरभेद इष्ट इति प्रतिभासेन प्रागुक्तमर्थमननुसंदधानस्यैवेयं
शङ्केत्यर्थः । **सत्त्वं चेदिति** । सापेक्षं वाक्यमध्याहारेण पूरयति **त्रिष्विति** ।
यद्येवमिति टीकावाक्यमस्यैव वाक्यस्यार्थमाहेत्यमिति न पौनरुक्त्यम् । सत्त्वं
चेकं कार्यकारणयोरिति षष्ठी भेदगर्भसंबन्धार्था चेदभिमहेतूक्तिर्विरुध्येते-
त्याशङ्क्य स्वरूपपदाध्याहारेण व्याचष्टे **कार्येति** । कार्यकारणयोरबाधित-
स्वरूपभूतं यत्सत्त्वं तदेकमित्यर्थः । **तस्यापि** तस्यैवेत्यर्थः । वैपरीत्य-
मेवास्त्विति खल्वियं शङ्का । अस्यां शङ्कायां तथा सति हीति ग्रन्थस्य
परिहारसमर्पकत्वेनान्वयाभावात्तत्संघटनार्थमभिप्रायानभिज्ञं शङ्कावादिनं प्रति
स्वाभिप्रायोद्घाटनपरं वाक्यमध्याहरति **न हीति** । साक्षादभेदं मुख्याभेदं
न ब्रूम इत्यर्थः ।

तत्र तयोरारोपितत्वेनेति । नन्व कारणमिह ब्रह्म यत्सदेव
सोम्येदमिति श्रुतं यद्विज्ञानाच्च सर्वतत्त्वविज्ञानं प्रतिज्ञातं ततश्च सद्रूपे
कारणे कार्यस्यैव समारोपः कथमिह कारणस्यापि समारोपोक्तिः । उच्यते ।
कार्यकारणे उभे अपि सत्ये वस्तुतः परस्परं भिन्ने इत्येवंरूपेण द्वयोरपि
सद्रूपे कारणे ब्रह्मण्यारोपितत्वं विवक्षितमिति न दोषः । एवमभिप्रायो-
द्घाटने कृते पुनस्तस्याप्युपरि वैपरीत्यशङ्कां परिहारग्रन्थनिवर्त्यत्वेन
दर्शयति **यदि मन्येतेति** । ननु सत्त्वमारोपितं चेदारोपितसत्त्वे कार्यका- ,, ।
रणे अप्यारोपिते स्यातां कथं त‡त्सत्त्वमेवेत्यवधारणम् । उच्यते । सत्त्वस्या-
भिन्नत्वेनारोपो विवक्षितः । एवं च§ द्वे सत्त्वे स्यातामिति नाभेदसिद्धिरि-
त्येषा प्राक् कृतैव शङ्का स्थापितैव भवति तयोः सत्त्वस्य वा समारो-
पितत्वप्रसङ्ग इति टीकाग्रन्थो ऽप्युपपादितो भवति । अन्यथा सत्त्वस्य
समारोपितत्वे तद्धर्मिणोः कार्यकारणयोरपि समारोपितत्वमवर्जनीयमिति
वाकारेण विकल्पतः समारोपस्य प्रसञ्जनमनुपपन्नं स्यात् । ननु भिन्नत्वेन

* व्या॰ सू॰ अ॰ २ पा १ सू १५ ।

† व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १६ ।

‡ तच्छब्दो नास्ति १ पु॰ ।

§ एव चेदिति १ पु पा ।

तीकग्रहणमेव नास्ति तस्मिन् पाठे नाद्य इत्युक्तमित्येतावतैव सर्वव्यव-
हाराणामित्यादिभाष्यतद्व्याख्यानाभ्यामिति वाच्यं शक्यत्वात्प्रतीकाग्रहणम् ।
२३८ । १६ यथा खल्विति । घटध्वंसो नाम घटविरोधिकपालरूपकार्यान्तरोदय एव
न त्वभावरूपः । तदतिरिक्ताभावरूपध्वंसकल्पने गौरवात् कपालरूपविरो-
धिकार्यान्तरोदयेनैव ध्वंसव्यवहारोपपत्तेश्च । ननु कपालोत्पत्त्यनन्तरं
घटो नास्तीति व्यवहारविषयः कश्चिदभावो ऽपि स्वीकर्तव्यः स एव
मुद्गरपातादिसाध्यो घटध्वंसो ऽस्त्वित्यत आह तस्य तुच्छत्वेनेति । सो
ऽभावो न कस्य चित्कार्यो ऽभावत्वादेव । तथा च घटापनयनानन्तरमिव
मुद्गरपतनानन्तरमपि घटो नास्तीति व्यवहारो नित्यसंसर्गाभावविषय
एव ध्वंसव्यवहारस्तु कपालोत्पत्तिविषयः । अत एव कपालोत्पत्तिदशायां
कपालान्युत्पद्यन्तइति व्यवहारवद् घटो ध्वस्त* इति व्यवहारः । उत्प-
न्नेषु कपालेषु कपालान्युत्पन्नानीति व्यवहारवद् घटो ध्वस्त इत्येव व्यव-
हारः कपालतदुत्पत्त्योरदर्शने घटो ध्वस्तो ध्वंसत†इति च व्यवहारयोर-
भावश्च । यद्वा तुच्छत्वेनेत्यस्याभावत्वेनेति नार्थः किं त्वलीकत्वेनेति ।
तथा च भावविशेषैरेवाभावस्य व्यवहारोपपत्तेर्भावातिरिक्ताभावस्याऽप्रामाणि-
कत्वेन कार्यत्वशङ्कानास्पदत्वादित्यर्थः ।

तत्रापि व्यभिचारस्योक्तत्वादिति । तद्भावनानुरक्तधीबोध्यत्वं
न तत्तादात्म्यधीबोध्यत्वम् । भाष्योदाहृते पटे तन्तुतादात्म्यबुद्ध्यभावाद-
तस्तद्वैशिष्ट्यबुद्धिबोध्यत्वं तदिति वक्तव्यं तत्त्वालोकसंयुक्तत्वेनैव चाक्षुषधी-
वेद्यत्वनियते घटे व्यभिचार इति प्रागेवोक्तम् । तस्मात्तद्भावोपलब्धिनियत-
भावोपलब्धिकत्वरूपहेत्वर्थप्रदर्शनपरमिदं भाष्यमित्यर्थः । प्रागनुपलब्ध-
त्वादित्यनेन किं पटाकारोल्लेखेनानुपलब्धिर्विवक्षिता उत स्वरूपेण । नाद्यः ।
तदानीमातानवितानरूपाकारविशेषाभावेन तदाकारोल्लेख्युपलब्ध्यभावस्यो-
पपन्नतया तस्य द्रव्यभेदासाधकत्वादित्यभिप्रेत्य द्वितीयमसिद्ध्या दूष-
२३९ । २५ यति अभेदवादिन इति । ननु कारणवत्कार्यमपि सत्यमित्येतावता सत्य-
द्वयं न प्रसज्यते रज्ज्विदन्तायां भुजङ्गइवारोपिते कार्ये कारणब्रह्मसत्ताया

---

* ध्वंसते इति १ पु पा० ।

† ध्वस्त इति २ पु० ।

एव प्रतीतिः । तदनन्यत्वं च न तदभेदः किं तु तद्व्यतिरेकेणाभाव इत्यधिकरणारम्भे वर्णितत्वादित्याशङ्क्याह **उक्ताभिप्रायानभिज्ञ इति** । २४० ।
भावे चोपलब्धेः* सत्त्वाच्चावरस्येति† सूत्रद्वयभाष्यटीकाग्रन्थच्छायया कार्यकारणयोरभेद दृष्ट इति प्रतिभासेन प्रागुक्तमर्थमननुसंदधानस्यैवेयं शङ्केत्यर्थः । **सत्त्वं चेदिति** । सापेक्षं वाक्यमध्याहारेण पूरयति **त्रिष्विति** । यद्येवमिति टीकावाक्यमस्यैव वाक्यस्यार्थसंग्राहकमिति न पौनरुक्त्यम् । सत्त्वं चेकं कार्यकारणयोरिति षष्ठी भेदगर्भसंबन्धार्था चेदयमहेतूक्तिर्विरुध्येतेत्याशङ्क्य स्वरूपपदाध्याहारेण व्याचष्टे **कार्येति** । कार्यकारणयोरबाधितस्वरूपभूतं यत्सत्त्वं तदेकमित्यर्थः । **तस्यापि** तस्यैवेत्यर्थः । वैपरीत्यमेवास्त्विति खल्विय शङ्का । अस्यां शङ्कायां तथा सति हीति ग्रन्थस्य परिहारसमर्पकत्वेनान्वयाभावात्तत्संघटनार्थमभिप्रायानभिज्ञं शङ्कावादिनं प्रति स्वाभिप्रायोद्घाटनपरं वाक्यमध्याहरति **न हीति** । मायादभेदं मुख्याभेदं न ब्रूम इत्यर्थः ।

तत्र तयोरारोपितत्वेनेति । ननु कारणमिह ब्रह्म यत्सदेव सोम्येदमिति श्रुतं यद्विज्ञानाच्च सर्वतत्त्वविज्ञानं प्रतिज्ञातं ततश्च सद्रूपे कारणे कार्यस्यैव समारोपः कथमिह कारणस्यापि समारोपोक्तिः । उच्यते । कार्यकारणे उभे अपि सत्ये वस्तुतः परस्परं भिन्ने इत्येवंरूपेण द्वयोरपि सद्रूपे कारणे ब्रह्मण्यारोपितत्वं विवक्षितमिति न दोषः । एवमभिप्रायोद्घाटने कृते पुनस्तस्याप्युपरि वैपरीत्यशङ्कां परिहारग्रन्थनिवर्त्यत्वेन दर्शयति **यदि मन्येतेति** । ननु सत्त्वमारोपितं चेदारोपितसत्त्वे कार्यका- ,, । १८
रणे अप्यारोपिते स्यातां कथं त‡त्सत्त्वमेवेत्यवधारणम् । उच्यते । सत्त्वस्याभिन्नत्वेनारोपो विवक्षितः । एवं च§ द्वे सत्त्वे स्यातामिति नाभेदसिद्धिरित्येषा प्राक् कृतैव शङ्का स्थापितैव भवति तयोः सत्त्वस्य वा समारोपितत्वप्रसङ्ग इति टीकाग्रन्थो ऽप्युपपादितो भवति । अन्यथा सत्त्वस्य समारोपितत्वे तद्धर्मिणोः कार्यकारणयोरपि समारोपितत्वमवर्जनीयमिति चाकारेण विकल्पतः समारोपस्य प्रसञ्जनमनुपपन्नं स्यात् । ननु भिन्नत्वेन

* व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १५ ।
† व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १६ ।
‡ तच्छब्दो नास्ति १ पु॰ ।
§ एव चेदिति १ पु॰ पा॰ ।

कार्यकारणयोः समारोपितत्वं सिद्धान्तिना स्वीकृतम् अभिन्नत्वेन सत्त्वस्य समारोपितत्वं पूर्वपक्षिणा । एवमुभाभ्यां स्वीकृतस्यान्यतरसमारोपितत्वस्य प्रसञ्जनं कस्यानिष्टमिति क्रियतइत्याशङ्क्य स्वीकृतार्थप्रसञ्जने फलमाह
२४० । १९ **अयुक्तं दर्शयितुमिति ।** उभाभ्यामङ्गीकृतयोरारोपयोर्मध्ये ऽयुक्तमारोपं निर्द्धारयितुं स्वीकृतप्रसञ्जनमित्यर्थः । अयुक्ततामिति पाठे पूर्वपक्ष्यङ्गीकृतारोपस्यायुक्ततां दर्शयितुमित्यर्थः । **तामेवेति ।** द्वितीयपाठानुसारी स्त्रीलिङ्गनिर्देशः । प्रथमपाठे तु तमेवेति पुंल्लिङ्गनिर्देशेन भाव्यम् । ननु कार्यकारणयोः सत्त्वस्य वा समारोप इति प्रसक्तस्य पक्षद्वयस्य कथं भेदाभेदयोरन्यतरसमारोपकल्पनायामित्यनुवाद इत्याशङ्क्य भेदाऽभेदशब्दौ* लाक्षणिकाविति व्याचष्टे **भेदइति ।** भिन्नत्वेन कार्यकारणयोरभिन्नत्वेन सत्त्वस्य च समारोपौ सिद्धान्तिपूर्वपक्षिभ्यां विवक्षितौ न स्वरूपेणेति विभावयितुमित्थं लाक्षणिकशब्दप्रयोग इति भावः । एवं च कार्यकारणभावसमारोपोक्तिः फलतो भेदसमारोपपर्यवसिता . सत्त्वसमारोपोक्तिश्च अभेदसमारोपपर्यवसितेति फलितार्थमवलम्ब्य वयं त्वित्यादिना भेदस्य समारोपितत्वं व्यवस्थापितमिति द्रष्टव्यम् ।

स्वस्मादपीति । न च स्वस्माद् भेदः स्वस्मिन्नास्तीति विषयाभावादेव तद्ग्रहणं न प्रसज्यतइति वाच्यम् । एक एव भेदः स्तम्भकुम्भयोरन्योन्यप्रतियोगिको वर्ततइति प्रकृते पक्षे यः स्तम्भे कुम्भाद्भेदः तस्यैव कुम्भे ऽपि वर्तमानतया विषयाऽभावस्य वक्तुमशक्यत्वादिति भावः । एवं च यद्यपि कुम्भएव कुम्भभेदप्रतीतिरुत्पन्ना प्रमा स्याद् विषयाबाधादिति वक्तुं शक्यं तथापि स्तम्भाद्भेदः कुम्भएव कुम्भाद्भेदः स्तम्भएव उभावपि भेदौ प्रतियोगिभेदेन भिन्नाविति पक्षे नेदं दूषणं प्रसरेदिति तत्साधारण्यार्थं दूषणान्तरमाह **सो ऽसाधुरित्यादिना ।**

तत्र भेदाधिकरणत्वेन भेदप्रतियोगित्वेन च प्रतीत्यपेक्षया† मूलोक्तमन्योन्याश्रयं योजयित्वा तत्परिहारार्थम् अधिकरणत्वप्रतियोगित्वयोर्भेद-
२४१ । ६ विशेषणाऽनिवेशने स्वयं दोषमाह **यस्य कस्य चिदिति ।** ननु नेदं दोषा-

* भेदाभेदाविति १ पु० पा० ।
† अपेक्षायामिति १ पु०

पादनं युक्तं शुक्तिरजतभ्रमस्थले प्रतियोग्यधिकरणज्ञानरूपभेदग्रहकारणसत्त्वेऽपि दोषात्तदग्रहोपपत्तेरिति चेन्न । तथा सति भ्रमानन्तरं शुक्तित्वे विशेषदर्शनात् प्राग् दोषनिवृत्तौ तद्दर्शनमनपेक्ष्य रजतभेदग्रहापत्त्या यावद्विशेषदर्शनं भ्रमानुवृत्तेरभावप्रसङ्गात् । न च विशेषादर्शनमेव भेदग्रहप्रतिबन्धको दोष इति न विशेषदर्शनात्प्राग् दोषनिवृत्तिसंभव इति वाच्यम् । एवं हि विशेषदर्शनं रजतभेदग्रहे कारणमङ्गीकृतं स्यात् तच्च न शुक्तित्वदर्शनमात्रं शुक्तित्वरजतत्वयोरविरोधभ्रमदशायां सत्यपि शुक्तित्वदर्शने रजतएव भेदप्रत्ययानुदयात् किं तु रजतभेदव्याप्यत्वेन तद्दर्शनमिति वक्तव्यम् । ततश्च नान्योन्याश्रयानतिवृत्तिः । न चाभेदभ्रमोत्तरभेदप्रत्यये विशेषदर्शनापेक्षायामपि सर्वत्र तदनपेक्षणात्प्राथमिकं भेदप्रत्ययं न भेदज्ञानापेक्षमिति नान्योन्याश्रयापत्तिरिति वाच्यम् । तथापि शुक्तौ रजताद्विभिन्यसकीर्णधर्म*प्रतियोग्युल्लेखार्थं भेदव्याप्यत्वेन शुक्तित्वरजतत्वग्रहस्यावश्यापेक्षणीयत्वेनान्योन्याश्रयाऽनिवारणात् । न च वाच्यं शुक्तित्वरजतत्वयोः परस्परं संसर्गाऽभावव्याप्यत्वग्रहस्तदर्थमपेक्ष्यतामिति शुक्तित्वरजतत्वयोरभेदभ्रमदशायां तयोः परस्पराभावव्याप्यत्वाग्रहेण तद्ग्रहार्थं तदुभयभेदग्रहापेक्षणाद् धर्म्यभेदभ्रमदशायां तदुभयभेदग्रहाऽसंभवे† तद्ग्रहार्थं धर्मिभेदग्रहस्याप्यपेक्षितत्वाच्चान्योन्याश्रयाऽनिवारणात् । नन्वन्योन्याश्रयेण भेदे प्रतीतिदूषणे तत्रापि मिथ्याभूतभेदप्रतीतिर्न स्यात् कारणाभावात् । न चेष्टापत्तिः । प्रतीतिमात्रापलापेऽनुभवविरोधात् । उच्यते । सत्यत्वे लोकमर्यादया प्राप्तं भेदग्रहघटितकारणकलापं विना भेदप्रतीतिर्न संभवतीति दूषणमुच्यते न तु व्यावहारिकभेदप्रतीतिरपलप्यते । अस्मन्मते भेदतत्प्रतीत्योर्मायामयत्वेन लोकमर्यादया प्राप्तकारणानपेक्षणात् । न ह्यैन्द्रजालिकप्रदर्शितानेकप्रासादनगरादीनि तदपेक्षाणि न वाऽस्मन्मते रज्जुसर्पादीनि तदपेक्षाणि । स्वप्नेषु च कदाप्यदृष्टं दृश्यमानं विनैव पूर्वानुभवसंस्कारं प्रागनुभूतमिति प्रत्यभिज्ञायमानं दृश्यते । न च सत्यत्वेऽपि ईश्वरसामर्थ्यात् क्लृप्तकारणं विना कार्योत्पत्तिः शङ्कनीया । पुरुषसामर्थ्यस्य क्लृप्तकार्यकारणभावव्यवस्थानतिलङ्घित्वात् । न हीश्वरोऽपि गगनपर्वतादीन् वैपरीत्येन सृजति संहरति चेति सत्यत्व-

* धर्ममिति २ पु॰ पा॰ ।

† संभवेनेति १ पु पा ।

वादिभिरुपेयते । अस्माकं त्वध्यारोपापवादेन ब्रह्मात्मैक्यपराणां स्वार्थतात्पर्याभावान्मायिकप्रपञ्चसृष्टिर्यथा तथा वा ऽस्तु । प्रतियोग्यधिकरणयोः स्वरूपेण प्रतीतिमात्रं न पर्याप्तं किं तु परस्परव्यावृत्तधर्मावच्छेदेन प्रतीतिरपेक्षितेति शङ्कायामप्येतदेव दूषणं शुक्तीदमंशरजतयोर्भेदग्रहप्रसङ्गादिति । न हि शुक्तीदन्त्वं रजतत्वं च न परस्परव्यावृत्तं परस्परव्यावृत्तत्वेन ग्रहापेक्षायां तु प्रागुक्त एवान्योन्याश्रयः ।

२४१ । ११ अत एव शुक्तिरजतभेदग्रहेण भ्रमानुदयप्रसङ्गादेव । नन्वसाधारणत्वं न भिन्नत्वं येन भेदान्तरापेक्षा स्यात् किं तु तत्तत्प्रतियोगिकत्वम् । तथा च भ्रमस्थले घटादिप्रतियोगिकत्वभाने ऽपि दोषाद् रजतप्रतियोगिकत्वाऽभानान्न तद्भेदग्रहरूपता धर्मिज्ञानस्य प्रसज्यतइत्याशङ्क्याह **इति दिगिति** । शुक्तित्वाऽग्रहे ऽपि दोषनिवृत्तौ रजतभेदग्रहापत्त्या भ्रमानुवृत्तिर्न स्यादित्यादिदूषणजातमत्रापि स्यादिति भावः । **भेदेनोपजीव्यत्वादिति** । ननु स्तम्भकुम्भोभयवृत्तिर्भेदो वस्तुत एकमेकं स्तम्भं कुम्भं चाश्रयतु नाम न तावता स्तम्भकुम्भयोः प्रत्येकं सदैक्यं भेदस्योपजीव्यं तदुभयगतपृथिवीत्वादिवद् भेदाश्रयतायामप्रयोजकत्वात् । अस्तु वा यथा कथं चित्स्तम्भकुम्भादिष्वैक्यस्य भेदाश्रयतायामुपजीव्यता किमायातं प्रकृते । न हि तावता कतरः समारोप्य इति विचार्ययोः सद्रूपाऽभेदकार्यकारणभेदयोरुपजीव्योपजीवकभावः समर्थितो भवति । उच्यते । कार्यकारणयोर्भेदमात्रमिह न निराकार्यं व्यावहारिकभेदस्य सिद्धान्तिना ऽप्यङ्गीकृतत्वात् किं तु सत्यभेदो निराकार्यः । भेदसत्यत्वं च धर्मिसत्यत्वसापेक्षम् । अतः कार्यकारणयोः सद्रूपाभेदप्रतीतिमपेक्ष्य तयोः सत्यभेदप्रतीतिः संपादनीयेति* तदभिप्राये-
,, । १६ यमुपजीव्यत्वोक्तिः । **भ्रान्तभेदानुवाद इति** । तदनुवादस्य चेदं फलं यत्सद्रूपानुगतप्रत्ययात्सद्रूपेण कार्यं कारणाभिन्नमिति खल्वभेदप्रतिपादनं कार्यं तत्रासंकीर्णधर्मिप्रतियोग्युल्लेखार्थं भेदप्रतीतिरपेक्षणीया । अतो भेदस्याप्यभेदोपजीव्यता तुल्येति शङ्काया निवर्तनम् । तन्निवर्तनं चैवं विवक्षितम् । अस्मादिदमभिन्नमित्यनेनेदमसदृशमित्यत्र सादृश्यस्येव भ्रान्ति-

प्रधानतया ऽनुप्रविष्टस्य भेदस्य यौ धर्मिप्रतियोगिनौ तयोरुल्लेखो ऽयं न त्वभेदस्य । असादृश्यवदभेदस्य निष्प्रतियोगिकत्वात् । ततश्च नोपजीव्यतया प्राबल्यं प्रतिषेध्यत्वात् । अन्यथा नेदं रजतमिति प्रतीतौ प्रधानतया रजतप्रतीतिरपेक्षणीयेति तस्याः प्राबल्यं भवेदिति । नान्यासतीति भाष्ये असतीति पदच्छेदमभिप्रेत्य नकारानुषङ्गेण नाप्यसतीति यद्वाक्यान्तरं दर्शितं* तत्र कार्यरूपेणेत्यधिकाध्याहारस्य फलमाह **कार्येति ।** कार्यरूपेण २४ शक्तेः सत्त्वमिहापाद्यते प्रसाध्यते तथा सत्येव हि कार्यस्य प्रागुत्पत्तेरसत्त्वप्रतिक्षेप, सिसाधयिषितः सिध्यति न स्वरूपतस्तत्सत्त्वप्रसाधनमात्रेण अतस्तत्सिद्ध्यर्थमध्याहार इत्याशयः ।

पुनरुक्तिमाशङ्क्येति । यद्यपि समवायदूषणार्थत्वे ऽपि समवायाभ्युपगमाच्च साम्यादनवस्थितेरिति† द्वितीयपादसूत्रे वक्तव्येन पुनरुक्तिर्भवेत् तथापि तस्येव सगृह्य स्मरणार्थत्वेन तदपुनरुक्तिर्द्रष्टव्या । **व्यासक्तत्वादिति ।** व्यापाराविष्टतया पूर्वापरीभूतत्वादित्यर्थः । **इतरथा हीति ।** साङ्ख्यानामस्माकं च सत्कार्यवादोपपादनच्छायासाम्ये ऽपि कार्यं कारणसत्तयैव सद्रूपं स्वतस्त्वनिर्वचनीयमिति भाष्यसदर्भतात्पर्याऽकथने साङ्ख्यवाद एवाङ्गीकृतः प्रसज्येतेत्यर्थः । **नटवदिति ।** भाष्योदाहृतदृष्टान्तानुसारि वाचस्पतिमतमित्याह **अज्ञातं नटवदिति ।** नटो हि द्रष्टृभिरविज्ञातनिजरूप एव तत्तदभिनेयासत्यरूपतां प्रतिपद्यते एव जीवैरविज्ञातं ब्रह्मासत्यवियदादिप्रपञ्चाकारतां प्रतिपद्यतइति दृष्टान्तोक्त्या वाचस्पतिमतं भाष्याभिमतं निश्चीयतइत्यर्थः;‡ ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥ २४३

ब्रह्मात्मैक्यमुक्तमिति । विषयवाक्यश्रुतसर्वविज्ञानप्रतिज्ञानिर्वाहार्थे ब्रह्मात्मैक्यमप्यत्र विवक्षितम् । अत एव सूत्रे जीवेष्वभेदं जडेषु तद्व्यतिरेकेणाभावं च सङ्गृहीतुं तदनन्यत्वमित्युक्तमिति भावः । स्वाभाविकं ब्रह्मणैकत्य जीवा अविद्योपहिता न जानन्तीत्येकवाक्यतया पाठः सङ्गतः । न जानन्तीति स्थाने स्वेष्टं न जानन्तीति पाठे तेषामज्ञानमस्तीति पाठे च स्वाभाविकमित्यारभ्य वाक्यद्वयमिति योजनीयम्§ ॥

* वाक्यान्तरीयदर्शितमिति १ पु पा । † व्या सू अ २ पा २ सू १३ ।

‡ अत्र षष्ठम् आरम्भणाधिकरणं पूर्णम् । § अत्र सप्तमम् इतरव्यपदेशाधिकरणं पूर्णम् ।

२४३ । १३ **उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥**

अद्वितीयत्वप्रयुक्तामनुपपत्तिमिति । नन्वद्वितीयस्यापि ब्रह्मणो मायया सगुणेश्वरभावापन्नस्य कर्मसापेक्षता वैषम्यनैर्घृण्ये न सापेक्षत्वा* दित्यधिकरणे दर्शयिष्यते अत उपादानैक्ये ऽपि कर्मवैचित्र्यात्कार्यवैचित्र्यं कर्मक्रमात्कार्यक्रमश्च भविष्यतीति चेद् न । दृष्टसाधनभेदतत्क्रमावनपेक्ष्य अदृष्टभेदतत्क्रममात्रेण कार्यभेदतत्क्रमादर्शनादिति भावः । **साधयत्येवेति ।** साधनमिति करणार्थे ल्युटा अतिशयितं साधकं करणमाहुः । अतिशयो ऽव्यभिचाररूपो विवक्षित इति भावः । **कालान्तरे ऽपि वा स इति ।** सो ऽपि क्षीरस्य धर्म इति भावः । ननु पयोम्बुवच्चेत्तत्रापीति† द्वितीयपादसूत्रेण क्षीरपरिणामे ऽपि परमेश्वरसङ्कल्परूपं तद्धर्मभूतं कारणान्तरमस्तीति वक्ष्यते । सत्यं परमेश्वरं कारणं प्रत्याचक्षाणस्य ह्ययं पूर्वपक्षः । न तस्य लोकदृष्ट्यनुवर्तिनः क्षीरपरिणामे कारणान्तरमस्तीति तं प्रत्ययं दृष्टान्तः ।

असहायस्याधिष्ठातृत्वसमर्पकमिति । ननु मन्त्रार्थवादादरे सत एवेश्वरस्य सङ्कल्पमात्रेण स्रष्टृत्वं सिध्यति तदनादरे देवादिदृष्टान्तेनापि न सिध्यतीति कथमिदं सूत्रं देवादिदृष्टान्तप्रदर्शकमुपपद्यतइति चेदुच्यते । अचेतनस्य बाह्यसहकारिनिरपेक्षस्य कारणत्वमुपगम्य चेतनस्यैव तत्प्रत्याचक्षाणः पूर्वपक्षी पादादिमारभ्यानुवृत्तः सांख्य एव । स च परमेश्वरस्य स्रष्टृत्वमसहमानो ऽपि देवादीनामाजानसिद्धं मनुष्यादीनां योगसाध्यं च अणिमादिसत्यसङ्कल्पत्वापरपर्यायप्राकाम्यपर्यन्तमैश्वर्यमन्तःकरणधर्ममङ्गीकरोतीति भूतवर्णिनां देवादीनां सङ्कल्पमात्रेण स्रष्टृत्वादिकमपि हैरण्यगर्भवदङ्गीकरोत्येव तेषां तदङ्गीकुर्वतश्च तद्विषयमन्त्रार्थवादप्रामाण्यमनुमतमिति तदवलम्ब्य सूत्रप्रवृत्तिः‡ ॥

२४४ । १० **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥**

द्व्यणुकमिति । द्व्यणुकारम्भार्थमेकः परमाणुरयवन्तरेणाऽधश्चोर्ध्वं च पार्श्वतश्चतसृषु दिक्ष्वपि यणा दिशां मध्ये यत्किंचिद्दिग्गतेन यदा सह-

* व्या० सू० अ० २ पा० ३ सू० ३ । † अपिशब्दो नास्ति ५ पु० ।
‡ व्यासू० अ० २ पा० ३ सू० २४ ।
§ अत्र अष्टमम् उपसंहारदर्शनाधिकरणं पूर्णम् ।

च्यते तदा दैवादर्वाक्षिप्तपञ्चदिग्गतैरपि कैश्चिदणुभिरस्य संसर्गो भवन्न निवारयितुं शक्यः । ते च षडपि परमाणवो मध्यगतपरमाणौ भिन्नभिन्नप्रदेशावच्छिन्नं संसृज्यन्ते चेत्स परमाणुः षडंशः स्यादिति तत्परिहाराय समानदेशा इति वक्तव्यम् । तथा च प्रथिमानुपपत्तिरित्यर्थः । द्व्यणुकएव प्रथिमानुपपत्तिदोषे वक्तुं शक्ये ऽपि तार्किकाऽनभिमतं सप्तपरमाण्वारब्धं द्रव्यं युक्त्या अङ्गीकर्तव्यमापाद्य तत्रैतद्दोषाभिधानम्

षट्केन युगपद्योगात्परमाणोः षडंशता ।

षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः ॥

इति न्यायवार्तिकोदाहृतं परमाणुवाददूषणश्लोकमनुसृत्य । ननु मूर्तानां समानदेशताविरोधादेकस्मिन् परमाणौ षट्परमाणुसंयोगा व्यापका न संभवन्तीति सप्तपरमाण्वारब्धद्रव्याऽसंभवाद् द्व्यणुकएव प्रथिमानुपपत्तिदोषो वक्तुं युक्त इति चेन्न । द्व्यणुकैस्त्र्यणुकारम्भं वदतस्तार्किकस्य मते परमाणुषु मूर्तत्वे ऽपि समानदेशताविरोधस्य वक्तुमशक्यत्वादेकद्व्यणुकारम्भकपरमाणुसंयोगे सत्येव तदारम्भकपरमाण्वन्तरे द्व्यणुकान्तरारम्भकपरमाणुसंयोगस्यापि तेनाङ्गीकर्तव्यत्वात् कारणाऽकारणसंयोगात्कार्याऽकार्यसंयोग इति तन्मते यदवयवावच्छेदेनावयविद्वयसंयोगस्तयोरवयवयोरपि संयोगावश्यम्भावात् । तस्मात् षण्णां समानदेशत्वइति श्लोकानुसरणं युक्तमेव । तदनुसरणं च द्व्यणुके कैमुतिकन्यायेनैतद्दोषसंयोजनार्थं शङ्कान्तरनिवर्तनार्थं च । तत्र शङ्कान्तरमेवं मा भूत् परमाण्वारब्धद्रव्येषु महत्त्वं तदारब्धेषु त्र्यणुकेषु तत्संभवाद् दृश्यमानघटादिमहत्त्वोपपत्तिरिति तन्निवर्तनमेव विवक्षितम् । त्र्यणुकेषु वा कथं महत्त्वं भवेत् कारणमहत्त्वाभावात् । कारणबहुत्वाद्भवेदिति चेन्न । सप्तपरमाण्वारब्धद्रव्ये सत्यपि कारणबहुत्वे महत्त्वाऽभावाद् व्यभिचारेण कारणबहुत्वस्य कार्यमहत्त्वाऽप्रयोजकत्वात् । ननु निरवयवेष्वसंयुक्तप्रदेशासंभवेन तद्बहुत्वस्य कार्यमहत्त्वाऽप्रयोजकत्वे ऽपि सावयवककारणबहुत्वं कार्यमहत्त्वप्रयोजकं स्यादिति चेन्न । सावयवानामपि परमाण्वारब्धद्रव्याणां संयोगस्तदारम्भकपरमाणुद्वयसंयोगावच्छेदेन वाच्यः हस्तपुस्तकसंयोगावच्छेदेनेव कायपुस्तकसंयोगः । परमाणुद्वयसंयोगश्चेद्व्याप्यवृत्तिस्तदा तत्कार्यद्रव्यसंयोगो ऽपि तदवच्छेदेन भवन् व्याप्यवृत्ति-

रेव स्यादिति परमाण्वारब्धद्रव्येष्विव तदारब्धेषु त्र्यणुकेष्वपि महत्त्वापत्तिः
समानैव ।

२४५ । ३ द्व्यणुकपिण्ड इति । कैमुतिकन्यायसिद्धार्थप्रदर्शनार्थं द्व्यणुकग्रहणम् ।
अव्याप्यवृत्ताविति । व्याप्यवृत्त्यभावे संयोगस्य तत्र वृत्तिरेव न स्यादि-
त्यव्याप्नुवन्वेत्यादिग्रन्थेनोक्तमित्यर्थः । अव्यापने वेत्यनुवादस्याव्याप्नुवन्वेत्य-
नुवादाद् भिन्नार्थत्वसिद्धये प्रदेशभेदेनाव्याप्यवृत्तित्वं तदर्थमाह अथेति ।
तत्राहेति । ननु परमाणूनामवयवाभावे ऽपि नानादिगवच्छेदभेदेन तत्सं-
योगानामव्याप्यवृत्तितोपपद्यत इति चेन्न । दिशामप्यसंबद्धानामवच्छेदकत्वा-
सम्भवे तत्संबन्धानां संयोगरूपाणां व्याप्यवृत्तित्वेनातिप्रसक्ततया तदव्या-
प्यवृत्तितोपपादकावच्छेदकत्वाऽसम्भवात् तत्राप्यवच्छेदकान्तरान्वेषणे अन-
वस्थानात् । ननु मेरुसर्षपपरिमाणसाम्यप्रसङ्गरूपप्रतिकूलतर्केण मूर्तत्वलिङ्ग-
कोक्तानुमानपराहतिर्वक्तुं न शक्यते । अनन्तक्षणघटितयोरवान्तरकल्पमहा-
कल्पयोरिवाऽनन्तपरमाण्वारब्धयोर्मेरुभूगोलकयोरिव चानन्त्यविशेषो* पपत्ते-
रित्याशङ्क्य नानेनेत्थं प्रतिकूलतर्कपराहतिरुच्यते किं तु मेरुसर्षपौ समान-
परिमाणौ मूर्तत्वात्संप्रतिपन्नसाध्यघटद्वयवदित्यनुमानस्य धर्मिग्राहकप्रत्यक्षे-
णेव शङ्कितानुमानस्य धर्मिग्राहकानुमानेन बाध उच्यते लाघवसहकृतेनानु-
मानेन परमाणोर्निरवयवत्वेन सिद्धेरित्याहुः ।

यदि प्रत्यक्षेति । एवं च बाध एवात्र विपक्षे दण्डो विवक्षितः ।
इत्थं परप्रक्रियेहानूदिता । न हि स्वमते परमाणोस्तन्निरवयवत्वस्य वा
,, । ६ सिद्धिरभ्युपगम्यते । कार्यकारणभाव इति । कार्यकारणयोर्भाव इति द्विव-
चनान्ताद् भावशब्देन तयोः पृथग्भावो लभ्यत इत्यारम्भवादे पर्यवसानम् ।
अन्यथापि कृत्स्नैकदेशविकल्पेन दूषणं विवक्षितम् । अवयव्यवयवे वर्त-
मानः कार्त्स्न्येन वर्तते एकदेशेन वा । आद्ये तु विदेवावयवे ऽवयविपरि-
समाप्तेरवयवान्तरस्य तदनारम्भकत्वप्रसङ्गः । द्वितीये त्वेकदेशो ऽवयव
एवेति तत्राप्यवयविनो वृत्तिविकल्पे ऽनवस्था । तथा अवयवः कृत्स्नमवय-
विनमारभते तदेकदेशं वा । आद्ये अवयवान्तरस्यानुप्रवेशप्रसङ्गः ।

* विशेषात्तिद्येवेति १ पु० पा ।

द्वितीये यो ऽप्येकदेशो ऽवयव इति तस्याप्येकदेशान्तरारम्भकत्वे ऽनव-स्थेति । इदं दूषणमारम्भणाधिकरणे*भाष्येण सिद्धमित्यत्र नोपन्यस्तम्† ॥

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥ २४।

अशरीरस्य न मायेति । शरीरग्रहणमिन्द्रियवर्गस्याप्युपलक्षणम् । विकरणत्वादिति हि सूत्रकृता पूर्वपक्षबीजमुद्भावयिष्यते । सूत्रे ऽपि कर-णग्रहणं शरीरस्याप्युपलक्षणम् । शरीरेन्द्रियरहितस्य मायाशक्तिर्न संभव-तीति तर्कस्य श्रुतेस्तु शब्दमूलत्वादि‡त्यत एव परिहारे सिद्धे ऽपि शुष्क-तार्किकः श्रुतिमात्रेण न परितुष्येदिति तत्परितोषाय प्रमेयसम्भावनाजनक-श्रुत्यनुग्राहकन्यायप्रदर्शनार्थमधिकरणारम्भः । तदर्थमेव पूर्वाधिकरणे ऽपि श्रुतेस्त्विति तुशब्दद्योत्यतच्छ्रुत्यनुग्राहकन्यायोपन्यास§ ॥

न प्रयोजनवत्त्वात् ॥ ३२ ॥ ३३ ।

स्वापादौ प्रयोजनानभिसंधिरूपे श्वासे साध्याभाववदिति । उभयत्र सप्तम्यौ समानाधिकरणे । सर्वज्ञानोपरमरूपो हि स्वापादिः प्रयोजना-ऽनभिसंधिरूपो ऽपि भवति । स्वापादौ प्रयोजनाऽनभिसंधिरूपे साध्याभाव-वदिति क्व चित्पाठः । तस्मिन् पाठे प्रयोजनाभिसंधिरहितत्वेत्येतदर्थकं द्वितीयसप्तम्यन्तं श्वासादिविशेषणम् । पाठद्वये ऽपि चेतनक्रिया प्रयोजनाभि-संधिपूर्विकेति टीकोपदर्शितव्याप्तौ व्यभिचाराभावशङ्का । सूत्रे लीलाशब्दस्य क्रियामात्रं विलासरूपक्रिया चेत्यर्थद्वयं संभवति लीलाक्रियाविलासयोरिति स्मरणात् । तत्र क्रियामात्रार्थत्वमादाय यादृच्छिकाङ्गुलीचलनादिक्रियायां स्वाभाविकश्वासनिमेषादिक्रियायां च प्रयोजनोद्देशरहितायां व्यभिचार उक्तः । अथ विलासार्थ‖मादाय व्यभिचार उच्यते तथापि तात्कालिकसुद्र-सुखादिप्रयोजनज्ञानमस्तीति न व्यभिचार इत्याशङ्कां निरस्यतीत्याह **यदुक्तमिति । लीलया कर्तरि सत्यभिचारमिति ।** सुखितस्य सुखानुभवप्रयुक्ता हासगानादिरूपा प्रयोजनोद्देशरहिता दृश्यते । न हि तत्र

---

* व्याससू० अ० २ पा० १ सू० १४ ।

† अत्र सर्वमं इत्थमसत्यधिकरणं पूर्णम् । ‡ व्या० सू० अ० २ पा० १ सू० २७ ।

§ अत्र सप्तमं सर्वोपेताधिकरणं पूर्णम् । ‖ विलासार्थमेवमिति १ पु० पा० ।

प्रयोजनमप्यपि संभावयितुं शक्यते । दुःखोद्रेके रोदनवत्सुखोद्रेके हासगा॰
नादेः प्रयोजनोद्देश्यरहितस्य सर्वानुभवसिद्धत्वात् । अत एव हसितरुदिता॰
२४६ । १३ दिषु कारणमेव पृच्छन्ति न प्रयोजनम् । **न लीलादौ व्यभिचार इति ।**
लीलायादृच्छिकस्वाभाविकक्रियासु च व्यभिचार इत्यर्थः ।

क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥

इति माण्डूक्योपनिषदि तात्कालिकानन्दप्रयोजनलीलात्वमेव क्रीडार्थं सृष्टिरित्यन्यइत्यनेनानभिमतं प्रदर्शितं न तु हासगानादितुल्यप्रयोजनोद्देश॰रहित लीलात्वम् ।

स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥

इति श्वेताश्वतरोपनिषदि सृष्टेः सृज्यवस्तुस्वभावतैवानभिमतत्वेन प्रदर्शिता न तु स्रष्टृस्वभावता । अतो लीलास्वभावपदयोर्न श्रुतिविरोधः । **एतच्छक्यत्वे निदर्शनमिति ।** पर्वतसेतुबन्धनं बहुकर्तृकत्वाद्दुष्कर सत् शक्यमित्यत्र निदर्शनमित्यर्थः । महयां चकारेति पाठः साधुः । मह पूजाया॰मिति धातुः स्वार्थण्यन्तः तस्य कथयतिवदकारान्तत्वादत उपधाया इति वृद्ध्यभावः । महीचकारेति पाठस्त्वस्मादेव धातोरेरजिति कर्मार्थकाजन्तात् च्विप्रत्यये सति अभूततद्भावे तदर्थे अभूतत्वाविवक्षायां योजनीयः । प्रसङ्गात्प्रतिबिम्बेश्वरवादे सैवलीलाशब्दसामञ्जस्यमाह **प्रतिबिम्बगता इति ।** लीलाशब्दस्य क्रीडावाचितायामिदं दूषणं न क्रियमाणवाचितायामनायाससाध्यक्रियालक्षकताया वा* ॥

२४७ । ७ **वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ ३४ ॥**

व्यभिचारमाहेति । युक्तवादित्ववचनरूपविषमवाक्यस्रष्टरि सभ्ये निग्रहानुग्रहरूपविषमकृत्यस्रष्टरि सभापतौ च निरवद्ये हेतुसत्त्वेन व्यभिचार इत्यर्थः । **तत्तत्प्राणिकर्मवासने इति ।** स्यादेव विषमकर्मानुष्ठापनेन वैषम्य परमेश्वरस्य यदि तत्र स्वातन्त्र्य भवेन्न त्वेव सुखदुःखानु-

मात्रमेव तद्धेतुकर्मानुष्ठापने ऽपि तस्य तत्पूर्वकर्मवासनासापेक्षत्वादिति भावः । **आगताविति** । पुण्यपापे विना फलभोगाभ्यागतावित्यर्थः । **वेदान्तानर्थक्यमिति** । अकस्मात्पुण्यपापफलाभ्यागतौ यथा विधिनिषेध- २४८
शास्त्रानर्थक्यम् एवं पुनः संसारोद्भूतौ मोक्षशास्त्रानर्थक्यमिति भाष्ये विवक्षितमिति व्याचष्ट इत्यर्थः । **अनादिकर्मतैवेति*** । स्यादेव कर्मानुष्ठापने वैषम्यं यदि क्व चित्सर्गादौ पूर्वकर्मवासनानपेक्षः किं चित्कर्मानुष्ठापयेत् क्व चिदपि कल्पे तन्नास्ति बीजाङ्कुरन्यायेनानादित्वात् कर्मतद्वासनाप्रवाहस्येत्यर्थः । **भविष्यत्क्लृपणमपेक्ष्येति** । इदमगत्या ऽङ्गीकृतम् । प्रकृतावपि तुषोपवापसमये कपाले सिद्धस्य पुरोडाशसंबन्धस्याभावात् । यत्र तु प्रकृतौ सिद्धसंबन्धो लभ्यते न तत्र भविष्यत्संबन्ध आश्रीयते यथा ऽग्निहोत्रहवण्या हवींषि निर्वपतीत्यत्र तत्र ह्यग्निहोत्रं यया हुतं सा ऽग्निहोत्रहवणी गृह्यते न तु यया होष्यते सापि प्रकृत्यारम्भात् पूर्वमग्निहोत्रस्य हुतत्वेन प्रकृतिभूतयोर्दर्शपूर्णमासयोः सिद्धसंबन्धवत्त्वात् । यत्र तु तद्विकृतौ पवमानेष्टौ सिद्धाग्निहोत्रसंबन्धा ऽग्निहोत्रहवणी न लभ्यते तत्रा ऽसंभवाद् निर्वापगुणभूताया अग्निहोत्रहवण्या लोप इत्येव गुणलोपे च मुख्यस्येत्यधिकरणे† प्रतिपादितम्‡ ॥

सर्वधर्मोपपत्तेश्च ॥ ३७ ॥ २४८

निर्गुणे ऽप्यविरुद्धमिति । इदमत्र वक्तुं शक्यम् । ब्रह्मणो निर्गुणत्वमसिद्धं सर्वज्ञत्वादिगुणकत्वात्तस्य निमित्तोपादानभावोपपादनार्थे सर्वज्ञत्वसर्वशक्तिकत्वयोः सर्वधर्मोपपत्तेश्चेत्यनेनैव सूत्रेण प्रतिपादनादन्योन्यधर्मांश्चाध्यस्येत्यादिभाष्यवाक्यैरपि तदनुमोदनाद् वस्तुतो धर्मिभिन्नं ज्ञानादिकं ब्रह्मणि नास्तीति चेन्न । घटाद्युपादानेष्वपि वास्तवतद्भिन्नरूपादिगुणाऽसंप्रतिपत्तेः । तत्त्वतो ब्रह्मणि व्यावहारिकगुणत्वमपि नास्ति किं तु स्वरूपप्रकाश एव तत्तद्विषयोपरागेण तत्तज्ज्ञानत्वव्यपदेशमात्रमिति चेन्न । श्रुतिस्मृतिसिद्धसर्वज्ञत्वादिव्यवहारालम्बनया व्यावहारिकधर्मधर्मिभेदकल्पनोपपत्तौ व्यपदेशमात्रत्वाभ्युपगमाऽयोगाज्जीवब्रह्मणो-

* अनादित्वेनेतीति १ पु॰ पा॰ । † जै॰ सू॰ अ॰ १० पा॰ २ सू॰ ५१ ।
‡ अत्र द्वादशं वैषम्यनैर्घृण्याधिकरणं पूर्णम् ।

रिव ब्रह्मतज्ज्ञानयोरप्यनादिविभागाङ्गीकारेण धर्मज्ञानएवागमापायिविषयोपरागप्रयुक्तावान्तरभेदकल्पनोपपत्तेश्च । तथापि ब्रह्मणि प्रपञ्चगतरूपादिगुणो नास्तीति चेत् किं ततः । सगुणमेवोपादानमिति नियममातिष्ठमानस्य कुतार्किकस्य परितोषाय गुणवत्त्वमुपपादितमेव । न च तन्मते ऽप्यस्ति नियमः कार्यगतगुणतोपादानेन भाव्यमिति । द्व्यणुकेषु महत्त्वाभावात् । न च विशेषगुणविषयो ऽयं नियमः । परिमाणादिव्यावृत्तविशेषगुणत्वाऽनिर्वचनात् । किं च निर्गुणस्य नोपादानत्वमिति परमते ऽपि नास्ति नियमः । प्रथमक्षणे ऽस्यैव घटस्य रूपादिसमवायिकारणत्वाभ्युपगमात् । उपादानशब्देन द्रव्यसमवायिकारणविवक्षायामप्रयोजकत्वादिति । तदेतत्सर्वमाचार्याणामपि हृदयस्थमेव । पूर्वाधिकरणेषु विवर्तवादमनपेक्ष्यापि परिहारान्तरप्रतिपादनात् । किं तु सूत्रभाष्यापर्यालोचनया स्फुटमिति कण्ठतो न प्रतिपादितम् ।

२४८ । १७ नित्यत्वाद्यारोपोपलब्धेरिति । ननु जातिर्नित्येति न प्रत्यक्षारोपो ऽस्ति शब्दानुमानजारोपेषु न प्रातिभासिकविषयोत्पत्तिरस्ति । अनित्यत्वारोपोपलब्धेरिति पाठे ऽप्ययमेव दोषः । न हि घटे दृश्यमाने घटत्वं नष्टमिति प्रत्यक्षारोपः संभवति । नष्टे घटे तत्संभवे ऽपि तत्र घटत्वस्य धर्मिणो ऽनभिव्यक्त्या न तद्धर्मिको नष्टत्वारोपः प्रत्यक्ष इत्युपपद्यते । सत्यम् । दशमस्त्वमसीति बोध्यस्यैव यस्य सन्निहिते विषये नष्टत्वभ्रमः स व्यवस्थितविषयश्चेतस्य तद्गतजातिनष्टत्वभ्रमः सन्निहितजातिधर्मिकः प्रत्यक्ष उपपद्यतइति तदभिप्रायमनित्यत्वारोपोपलब्धेरिति वचनम् । नित्यत्वेति पाठस्तु मिथ्यात्वेन ज्ञाननिवर्त्यायां जातौ शब्दानुमानजे नित्यत्वारोपे ऽपि प्रातिभासिकविषयोत्पत्तिरस्तीति पक्षमाश्रित्य नेतव्यः । इदमुपलक्षणम् । रात्रौ दीपप्रभायां नीलोत्पलवर्णे रक्तवर्णत्वारोपः विभागे संयोगाभावत्वारोप इत्यादिकमप्युदाहरणं द्रष्टव्यम्* ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीवेदान्तकल्पतरुपरिमले द्वितीयाध्यायस्य प्रथमः पादः ॥

---

* अत्र त्रयोदशं सर्वधर्मोपपत्त्यधिकरणं पूर्णम् ।

अथ द्वितीयाध्यायस्य द्वितीयः पादः ।

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥ ५२८

मोक्षमाणानामिति । मुचो ऽकर्मकस्य गुणो वेति सूत्रेण कर्मणः कर्तृत्वविवक्षणादकर्मकस्य सन्नन्तस्य मुचेर्गुणः । अत्र लोपो ऽभ्यासस्येत्यभ्यासलोपः । संयोगादयो हीति । स्थूलपिण्डस्य यः केन चित्संयोगस्तद्विभागः परिमाणविशेषो गुरुत्वविशेषो वा न तेषां कारणपर्यन्तमनुवृत्तिरस्तीति न तेषु व्यभिचार इत्यर्थः । ननु तथापि रूपे व्यभिचारः स्थूलपिण्डे यद्रूपं तस्यैव कणे ऽपि दृश्यमानत्वादिति चेद् न तावत्कार्यकारणभेदवादिमते व्यभिचारः । तन्मते कारणे कार्ये च रूपभेदात् । नापि कारणातिरिक्तकार्यानिर्वचनीयत्ववादिमते । तन्मते कार्यवत्तद्रूपस्याप्यनिर्वचनीयस्याभ्युपगमसंभवात् । नापि कार्यकारणाऽभेदवादिनः सांख्यस्य मते । तन्मते पञ्चतन्मात्रप्रकृतौ तामसाहङ्कारे रूपाभावेन तस्य सूक्ष्मकारणपर्यन्तानुवृत्त्यभावात् । ननु चेतनानधिष्ठितत्वं सांख्येन साध्ये न प्रवेशितमतो विरुद्धत्वाभिधानमयुक्तमित्याशङ्क्य तदप्रवेशने सिद्धसाधनं स्यादिति तत्परिहाराय तत्प्रवेशनावश्यंभावमापाद्येदं विरुद्धत्वाभिधानमिति योजयति अयमत्रेति । एवंशब्दस्येति । तथा च यथा कृतकत्वं विरुद्धम् एवं समन्वयादिविरुद्धशब्दानुपूर्व्या वाक्ययोजनेति भावः । ननु सांख्यानुमाने विरुद्धत्वोद्भावनपरं सूत्रमित्युक्तं. सिद्धान्त्युद्भावनीयकिंचिदनुमानपरमिति नोक्तमत उपाधिशङ्कयमस्थानविजृम्भितेत्याशङ्क्य विरुद्धत्वोपपादनाय हेतोः साध्यविपर्ययव्याप्तिर्या सिद्धान्तिना उपपादनीया तत्रेदमुपाध्युद्भावनमित्यवतारयति सत्त्वाद्यन्वितत्वादिति । ननु साधनोपाध्योः साध्यव्याप्त्वेन प्रतीयमानयोरुपाधिरेव वस्तुतः साध्यव्याप्यः साधने तु तद्गतं साध्यव्याप्यत्वं संनिधानादारोप्यते । अत एवोप समीपे स्थित्वा ऽन्यत्र स्वधर्माधायकत्वाज् जपाकुसुमादिवन्निपिद्धत्वादिरुपाधिरित्युच्यते । ततश्च साधनमेव सर्वत्र सोपाधिकं न साध्यमतो ऽत्र साध्यस्य सोपाधिकत्व- २५१ ।

शङ्का न युक्तेत्याशङ्क्य समानन्यायत्वात्साधनवत्साध्यस्यापि सोपाधिकत्वं
२५१ । २३ वक्तुं युक्तमित्युपपादयति यथेति । एवं चान्तरङ्गत्वे स्वधर्मासञ्जकत्व-
लक्षणमुक्तमुपाधिपदप्रवृत्तिनिमित्तं यद्यपि नास्ति किं तु साध्यान्तरएव तथा-
प्यन्यदेव प्रवृत्तिनिमित्तं किं चिदनुमानदूषणोपाधावस्तु । न हि सर्वत्र
उपाधिपदस्य तदेव प्रवृत्तिनिमित्तमिति नियमः उपाधिर्नो धर्मचिन्ता कुटु-
म्बव्यापृतस्तु यः स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयमित्यादभि-
धानकोशेषु तस्योक्तप्रवृत्तिनिमित्तरहितार्थान्तरवाचकत्वस्यापि स्मरणादिति
भावः । ननु व्यतिरेकव्याप्त्यनवधारणे ऽप्यन्वयसहचारमात्रेण केवलान्व-
यिनीवान्वयव्याप्तिर्ग्रहीतुं शक्येत्याशङ्क्याह इतरथेति । व्याप्यव्यापकयोर्व्य-
तिरेकवत्त्वे * यत्र व्यापकाभावस्तत्र व्याप्यत्वाभिमतं वर्ततइति व्यभि-
चारशङ्काया निरसनाय तत्र तदभावो ऽवधारणीयः । न च तदवधारणं
शक्यम् । पक्षान्यत्वरूपव्यापकाभावो हि पक्षमात्रवृत्तिः तत्र च न साध्या-
२५२ । २२ भावनिर्णयो ऽस्तीत्यर्थः । समपदं मुधेति । प्रवृत्तिनिमित्तलाभार्थं सम-
व्याप्त्यन्वेषणमिति शङ्कायाः समाधानं तु अनुपदमेव सिद्धम् । न च प्रवृ-
त्तिनिमित्तपरिज्ञानार्थमिह लक्षणमुच्यते किं तु दूषकतोपयिकरूपपरिज्ञा-
नार्थं (समव्याप्त्यन्वेषणमिति शङ्का †) तदर्थं च साध्यव्यापकत्वमेवापे-
क्षितं न तु तद्व्याप्यत्वमपि । उपाध्यभावेन पक्षे साध्याभावोन्नयनस्य
साध्यव्यापकोपाधिव्यभिचारित्वेन साधने साध्यव्यभिचारोन्नयनस्य वा
तत एव भावात् । शङ्कितस्त्वनुकूलतर्कैरिति । साधने साध्यव्या-
प्यत्वनिर्णायकैरनुकूलतर्कैः शङ्कितोपाधिरुद्धियते इत्यर्थः । उपाधिलक्ष-
णानुप्रविष्टं व्यापकत्वं व्याप्तिप्रतियोगित्वं न भवति येन व्याप्तिलक्षण-
स्योपाधिगर्भतया चक्रकाश्रयः स्यात्किं तु साध्यवन्निष्ठेत्यादिनिरुक्ताव्य-
भिचाररूपं तदिति नवीनैः कृते समाधाने दूषणमुक्तं नवीनैः ‡ । एवमपि
साध्यत्वस्य व्याप्तिगर्भत्वान्न चक्रकोद्धार इति केश्चिदुक्तं तद्दूषणमुपन्य-
२५३ । ८ स्यति नवीनतरास्त्विति । उपाधेः साध्यव्यापकत्वं सपक्षे ग्राह्यं न तु
पक्षे सपक्षे च अप्रतिपन्न तन्न साधनीयमिति । तत्र साधनीयत्वं न साध्य-

* व्यतिरेकत्वे इति १ पु पा॰ । † ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु॰ ।
‡ नवीनतरैरिति १ पु॰ पा॰ ।

पदस्यार्थे इत्यन्यच साधनीयतया संभाव्यमानत्वं तदर्थे इति वक्तव्यम् । तथा संभावना साधनव्यापकत्वप्रतिसंधानाधीनेति चक्रकापत्तितादवस्थ्यमित्यर्थः । ननु तदपि व्यापकत्वप्रतिसंधानं साधनवन्निष्ठात्यन्ताभावाऽप्रतियोगित्वविषयमस्तु कुतश्चक्रकमिति नवीनतरमते स्पष्टं तद्दूषणं स्वयं किमिति नोच्यतइत्याशङ्क्य अनास्थयेत्याह अस्माकमिति । एतदिति । धूमेन वह्न्यनुमाने ऽप्येतत्पर्वतेतरवह्निसाध्यकता स्यादिति शङ्कार्थः । तच लाघवसहकृततया वह्निमात्रनिरूपितव्याप्तिग्राहकप्रमाणेनैवाच केन चित्प्रमाणेन विरोधो नास्ति सिद्धसाधनपरिहारार्थं तन्निवेशनस्य पूर्वपक्षिणा ऽपेक्षणीयत्वेन लाघवादरणाऽयोगात् प्रत्युत दृढप्रमाणानुगुण्यं चास्तीति परिहारार्थः ।

सुखयति सुखंकरोति । सुखदुःख तत्कृताविति चौरादिको धातुः । ननु प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्था इति सांख्यैः सत्त्वादीनां सुखादिरूपत्वमुक्तं कथं सुखादिहेतुत्वं तदुक्तमापाद्य दूषणमुच्यते । अथ पद्मपादत्युदाहरणटीकायां सत्त्वादीनां सुखादिहेतुत्वमपि सांख्याभिमतमुपन्यस्तमिति चेत्तर्हि अचोद्यमानं दूषणं न लगेतच प्रतियोगिविशेषव्यवस्थितसत्त्वाद्युद्रेकेण तच तच व्यवस्थितसुखादिजनकत्वस्य समर्थितत्वात् कथं च चन्दनकण्टकादिषु कालविशेषे प्राणिविशेषे च व्यवस्थितं सुखादिजनकत्वं सिद्धान्तिनापि निरसितुं शक्यम् । अनुभवसिद्धत्वादिति चेत् । अयमिह दूषणाभिप्रायः । भावेषु सुखादिसमन्वयः* तथाभूतकारणानुमाने हेतुः किं प्रत्यक्षसिद्धः उत सुखादिकार्यकल्प्यः । नाद्यः । असिद्धेः । न हि घटः सुखी सुखमस्ति वा ऽनुभवो ऽस्ति द्वितीये सर्वदा सर्वान् प्रति एकरूपं सुखादिकार्यं तत्कल्पकम् उत कालविशेषेषु चानियततत्कल्पकम्† । नाद्यः । असिद्धेरेव चन्दनकण्टकादिषु सुखादिहेतुत्वनियमाभावात् । न द्वितीयः । अनिच्छाप्रयत्नादिरूपाणामपि भावानामनियतेच्छाप्रयत्नादिजनकत्ववदसुखादिरूपाणामपि‡ तेषामनियतसुखादिजनकत्वसंभवेनाऽनियतसुखादिकार्याणां विपर्ययेषु तादूप्याऽकल्पकत्वादिति । एवं च चन्दनाऽन्यथे २५३

* समन्वय इति १ पु॰ पा॰ । † तत्तत्कल्पकमिति १ पु॰ पा॰ ।
‡ सुखादिजनकादिषु सुखादिहेतुत्वनियमाभावाद्रूपाणामपीति ३ पु॰ पा॰ ।

ऽपि सुखादिव्यभिचाराच्च नैक्यमित्याहेत्यवतारिका विकल्पान्तरोत्तरावतारिकात्वेन योजनीया ।

ननु प्राग्दूषितपक्षार्थे हेत्वन्तरसमुच्चयावतारिकात्वेन सुखादिव्यभिचारस्य सत्वादुद्रेकाभावेनोपपत्त्या हेत्वन्तरपरत्वाऽयोगात्

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥

कारणमस्त्यव्यक्तम्

इति सांख्यैः प्रधानसाधका हेतवो दर्शिताः । अस्यार्थः । विश्वरूपमेव वैश्वरूप्यं त्रैलोक्यादिवत्स्वार्थिकः प्रत्ययः । विश्वरूपस्य प्रपञ्चस्य कारणमव्यक्तमस्ति । कुतः कारणे कार्यस्य विभागादविभागाच्च । सत्कार्यवादे हि कारणे सत एव कार्यस्याभिव्यक्तिलयौ विभागाऽविभागौ कूर्मशरीरे सत एव तदवयवजातस्य । ततश्च यत्र कारणे सतः प्रपञ्चस्य विभागाविभागौ तदव्यक्तकार्यावस्थं कारणमस्ति । इतश्च तदस्ति । शक्तितः प्रवृत्तेश्च । कारणशक्तितो हि कार्यं प्रवर्तते अशक्तात्कार्यानुत्पत्तेः । शक्तिश्च कारणगता न कार्यस्याव्यक्तावस्थाया भिन्ना प्रमाणवतीति परिमाणसमन्वयावाकरे एव स्पष्टौ । तत्र समन्वयो विकल्पमभिप्रेत्य दूषितः । परिमाणदूषणप्रदर्शनार्थं मुखतो विकल्पयति **परिमितत्वमिति** ।

२५३ । २२ **स्वसत्तामतिक्रम्येति** । अत्र सह वर्तनं सामानाधिकरण्यं न विवक्षितं किं तु स्वयं यत्र व्याप्नोति तथाभूतवस्तुसत्त्वमात्रमतस्तथैव नभसि लक्षणानुगतिं दर्शयति **कारणं हीति** । लोके हि कारणं मृदादि घटमिव शरावादिकमपि व्याप्नोति घटस्तु शरावादिकमपि न व्याप्नोतीति दृष्टम् । अतः कार्ये कर्तृ कार्यान्तरे ऽप्यनुगतं कारणं न व्याप्नोतीत्यर्थः । ननु शब्दतन्मात्रकारणकं नभो गन्धतन्मात्रादिकमपि न व्याप्नोतीति तदव्यापनेन लक्षणानुगतिः किमिति नोक्तेत्याशङ्क्याह **गन्धेति** । नभो गन्धतन्मात्रं सर्वथा न स्पृशतीति तदव्यापनेन लक्षणानुगतिः सुप्रसिद्धेति स्पष्टत्वात् सा ऽत्र नोक्तेत्यर्थः । ननु सत्त्वरजस्तमस्सु व्यभिचार इति परिहारो न युक्तः ।

अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः ।
नैषामादिः संप्रयोगो वियोगो वोपलभ्यते ॥

इति सांख्यैः सत्त्वादीनामन्योन्यसंसृष्टत्वेन सदा सर्वत्र सद्भावस्य अभिमतत्वादित्याशङ्काह परिहरतीति । युक्त एवायं परिहारः कार्यकारणभा- २५३
वमूलो यस्मादात्म्येन पूर्णानुप्रवेशः सा व्याप्तिस्तदभावरूपमव्यापनम् इह परिमितत्वमिति विवक्षितत्वात् । न हि यथा तैः कार्यजातमित्यादियन्थेन तथैव प्रतिपादनादिति भावः । ननु किमनेन कुसृष्ट्या अर्थविशेषानुन्नीय विकल्पनेन परिमितत्वं परिच्छिन्नत्वमित्येवास्तु । तथा च सर्वगतेषु गुण-पुरुषेषु न व्यभिचारः । न च गुणानां सर्वगतत्वे प्रलये तेषां साम्या-पत्तिः सर्गे वैषम्यापत्तिश्च न स्यादिति वाच्यम् । न हि तावता तेषां प्रलये क्व चित्क चित्कदा चिदेव सत्त्वं सर्गादौ यस्य यदोद्रेकस्तस्य तदा ऽन्य-त्रापि अव्यापनमित्येष विशेषो ऽङ्गीकार्यः । हेमन्तशिशिररात्रिषु निदाघदिवसेषु सदा सर्वत्र सतोरेव हिमातपयोः क्व चित्क चिदुद्रेकवत् सदा सर्वत्र सता-मेव गुणानां क्व चित्कदा चित्कस्य चिदुद्रेक इत्युपपत्तेः । न च हिमातप-योरवयवभूयस्त्वरूप उद्रेकः संभवति न तु गुणानां निरवयवानामिति वा-च्यम् । तथापि परिणतिविशेषरूपोद्रेके अनुपपत्त्यभावादिति चेन्न । उद्रेका-वस्थाया अपि महदहंकाराद्यवस्थावत् कार्यत्वेन तत्रैव परिमितत्वहेतुसत्त्वेन व्यभिचारादिति भावः । चापीत्यस्यान्वयप्रदर्शनाय यत्पदमध्याहरति या प्रवृत्तिरिति ।

साध्यविरुद्धोक्तिः*र्व्यक्तोक्तिरिति । सांख्यानां प्रवृत्तेरिति हेतु- २५४ । ५
विरुद्धस्तदीयसाध्यसाधको न भवतीति कण्ठतो नोक्तं किं तु तस्यैव हेतोः स्तदीयसाध्यविरुद्धसाध्यान्तरोक्तिरूपवक्रोक्त्या सूचितम् । नित्यः शब्दः कृत-कत्वादिति साधयन्तं प्रति अनित्यः शब्दः कृतकत्वादित्यनुमानमनुकूलत-र्कसहितं हि न केवलं पूर्वानुमाने बाधकतया ऽवतिष्ठते किं तु तस्मिन् विरुद्धत्वोद्घाटनपर्यन्तमपि भवति । एवं च हेतुत्वेनाभिधानादिति पर्यन्तं साध्यविरुद्धोक्तौ न हेतुपरं किं तु तस्या एव विषयोमिति योजनीयम् । यद्वा तत्पर्यन्तपौनरुक्त्योपपादकत्वेन पूर्वत्र योजनीयम् । अज्ञित्वा†मूले वैष-म्याऽऽश्रयमूला हि प्रकृतेरनुपपत्तिरुच्यते इह तु प्रवृत्ते साध्यसाध्यविपरीतसा-

---

* विरुद्धत्वोक्तिरिति मूले पाठः   † व्या० सू० अ २ पा २ सू० ८ ।

धने हेतुत्वमुपपद्यतइति स्यात्। साध्यविरुद्धत्वोक्तिः वक्रोक्तिरिति चिन्त्यः। तस्मिन् पाठे हेतुत्वेनाभिधानाद्वितीयां साध्यविरुद्धत्वस्योक्तिः सूचनारूपा सा वक्रोक्तिर्भवतीत्यर्थः। अस्मिन् व्याख्याने टीकायां वक्रोक्त्येति न करण-तृतीया किं तु प्रकृत्यादितृतीयेति भेदः। **आलोचनमात्रमिति**। वस्तु-स्वरूपमात्रगोचरं ज्ञानमालोचनम्। इदमित्थमित्यध्यवसायरूपा तु वृत्तिः त्रिविधान्तःकरणमध्ये बुद्धिरूपस्यान्तःकरणस्येति सांख्यानां मतम्। **कर्मप-रिपाकावसराभिज्ञस्येति**। ननु कर्मपरिपाकापेक्षा सांख्यपक्षेऽपि समाना धर्माऽधर्मयोर्मध्ये यः पक्वस्तेनैव तदितरस्य प्रतिबन्ध इति तन्मतेऽपि वक्तव्यत्वादिति चेन्मैवम्। चेतनाधिष्ठानरहितयोः* पाकस्याप्यसंभवाद् उत्तरसूत्रेण धेनूपयुक्ततज्जाठराग्निसंपर्काधीनतृणादिपाकेऽपि चेतनाधिष्ठाना-पेक्षाया वक्ष्यमाणत्वात्।

२५५। २१ **अवास्तवस्य न निषेध इति**। ननु सांख्यमतेऽप्यवास्तव एव पुरुषस्य भोगः। एवं हि तन्मतम्। पुरुषश्चेतन्यमात्रवपुः कूटस्थो नित्यमुक्तः सांसारिकसुखदुःखानुभवरूपो भोगः परिणामिन्या बुद्धेर्धर्मः पुरुषस्य तु बुद्धिच्छायापत्त्या तदैक्यमिवापन्नस्य तद्दर्शनमात्रं भोगः। तेन तस्य विवे-काऽग्रहादाध्यासिकं भोक्तृत्वम्। विवेकख्यात्या भोक्तृत्वाध्यासमात्रनिवृत्ति-र्मोक्षः। वस्तुतः पुरुषो न बद्धो नापि मोक्ष्यतइति। यदाहुः।

तस्मान्न बध्यतेऽद्धा† न मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥

सत्यम्। पुरुषस्य भोक्तृत्वमपि सांख्यैरभ्युपगतम्। यदाहुः।

संघातपरार्थत्वात् त्रैगुण्यविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च॥ इति।

कथमिदं तेषां परस्परविरुद्धवचनमिति चेत्किं कुर्मः। अत एव विप्रतिषेधाच्चासमञ्जसम्‡मिति वक्ष्यते। यदि त्वविरोधार्थं भोगाश्रयबुद्धेस्य-दर्शनं पुरुषस्य भोग इति कल्प्यते तदा तद्दर्शनरूप एव तात्त्विको भोगः पुरुषस्य निर्विकारस्य न संभवतीति दूषणमिहोक्तं द्रष्टव्यम्।

* रहितयोस्तयोरिति ३ पु पा०। † अद्धेति नास्ति १-२ पु०।
‡ व्याससू० अ २ पा २ सू० १०।

एकस्यापि कर्तृकर्मत्वादिति* । पच्यते फलमित्यत्र हि कर्मकर्तरि यक्प्रत्ययः । अतः फलस्यैव कर्तृत्वं कर्मत्वं चाऽविवादमित्यर्थः ।
कर्मत्वोपचारादिति । कर्मकर्ता कर्तैव केवलं न कर्म कर्मकार्ययोगात्मने २५७
पदादिभाक्त्वात्तु कर्मत्वोपचारेण कर्मकर्तेति व्यपदेशः । ननु पच्यते फलमित्यत्र फलगतपरिणत्यनुकूलः फलपाकचैत्रगतदोहनव्यापारः‡ पचिक्रिया तज्जन्यपरिणतिफलशालिनः फलस्य मुख्यमेव कर्मत्वमुपपद्यते किमर्थमुपचाराश्रयणमिति चेत् । उच्यते । इह पचिधातोः फलगता परिणतिरर्थः न तु तदनुकूलपुरुषव्यापारः । येन पुरुषव्यापारं† प्रत्येव सौकर्यातिशयात् कर्तृत्वेन विवक्षितस्य तज्जन्यक्रियाफलशालित्वात्कर्मत्वमपि मुख्यं संभवतीत्युच्येत न त्वेवम् । कर्मकर्तृप्रयोगे धातूनां तत्तत्क्रियाफलवाचित्वात् । यदाह कैयटः । लुनातिस्तावद् द्विधाभवनोपसर्जने द्विधाभावने वर्तते लुनाति केदारं देवदत्तः द्विधा भवन्तं द्विधा भावयतीत्यर्थः । यदा तु केदारस्य सौकर्यातिशयविवक्षया देवदत्तव्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्तते अनेकार्थत्वाद्धातूनां भिन्ना एव वा धातवो भिन्नार्थाः सारूप्यात्तु तत्त्वाध्यवसायः । तत्र द्विधाभवने केदारस्य कर्तुः कर्मवत् कर्मणा तुल्यक्रिय इति कर्मकार्याण्यतिदिश्यन्ते तेन लूयते केदारः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्तइति । एवं चात्र परिणतिरेव पचिक्रियेति तामवलम्ब्य परसमवेतक्रियाफलशालित्वस्य कर्मत्वव्यापकस्य समर्थयितुमशक्यत्वाद् व्यापकाभावे च व्याप्यासंभवात् कर्मत्वस्यौपचारिकत्वोक्तिर्युक्तैव ।

अत्रैव साक्षित्वेन पाणिनिसूत्रांशमुदाहरति **पाणिनिरिति** । कर्मवत्कर्मणेति सूत्रे वतिना मुख्यकर्मत्वाभावः स्पष्टीकृत इत्यर्थः । **परोक्तदोषानुवाद एवेति** । यद्यप्यध्याहारेणाभ्युपगमाभावस्फोरणवदनध्याहारेण तद्विषयाभावस्फोरणे ऽपीष्टप्रसङ्गकथनरूपदूषणं भात्येव तथापि तथा स्फुटं न भातीति तात्पर्यम् । अविभागापत्तिश्चेत्यत्र अविभागो नैक्यम् । अख्यातिवादिनः सांख्यस्य मते भ्रमविषयैक्यविभ्रमाभावादित्याशङ्क्य विवेकाग्रह एवाविभागशब्देन विवक्षित इति व्याचष्टे **अविवेक इति** । भाष्यटीकास्थ- २५८ ।

---

* एकस्यापि कर्मकर्तृभावादिति मूले पाठः । † पुरुषे व्यापारमिति २ पु॰ पा॰ ।
‡ दोहनव्यापार इति १ पु॰ ।

मदर्शनशब्दं तमःपरत्वेन व्याचष्टे न दृश्यते नेति । तुशब्द इति । शेषेषु पूर्वपक्षव्यावृत्त्यर्थेषु तुशब्देषु नकारसमानार्थत्वं प्रसिद्धम्* ॥

२५८ । १० **महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥**

साम्यकृतेति । परमाणुवादनिराकरणार्थत्वमात्रेण साम्यमिह विवक्षितम् । उभयथापि निराकरणीययुक्तिभेदस्य स्वयमेवोक्ततया सर्वथा साम्याभावात् । यद्वा शिष्टापरिग्रहाधिकरण†निराकृति‡युक्तिरप्यत्र टीकायामनुवादरूपेणोपन्यस्ता भाष्ये ऽपि वैशेषिकप्रक्रियोपन्यासेन व्यञ्जितेति तेनापि रूपेण साम्यं विवक्षितम् । **एवकार इति ।** मायाशबलस्य ब्रह्मण उपादानत्वे माया ऽप्युपादानमिति सिद्धसाधनवारणाय टीकायामेवकारः । तेन चेतनोपादानकं न भवतीति साध्यार्थे पर्यवसानान्न सिद्धसाधनमिति भावः । **असंयुक्तानामिति ।** द्व्यणुकमारभ्य स्थूलारम्भकत्वं यत् शङ्कावाद्यभिमतं तदभाव इह साध्यः । स चासंयुक्तावस्थायां शङ्कावादिना ऽपीष्यत इति सिद्धसाधनवारणाय संयुक्तविशेषणमित्यर्थः । **द्व्यणुकमनारभ्येति ।** साध्यविशेषणस्य प्रयोजनमाह **अनेन बाधो ऽपोदित इति ।** परमाणूनां द्व्यणुकारम्भद्वारा स्थूलारम्भकत्वात् स्थूलं नारभन्त इति साध्यं बाधितं स्याद् द्व्यणुकानारभ्येति विशेषणेन तन्निरासः कृत इत्यर्थः । **स्वापेक्षया स्थूलेति ।** स्थौल्यमत्र परिमाणाधिक्यमात्रं विवक्षितं न तु महत्त्वमिति भावः । **न द्वितीय इत्याहेति ।** द्व्यणुकारम्भप्रक्रियायास्त्वया ऽनङ्गीकृतत्वाद् द्वितीयपक्षो न युज्यत इत्यर्थः । **अवयवावयविभावविरहिणामिति ।** जलाऽऽलोकादिविरलद्रव्यव्यतिरिक्तानामिति विशेषणान्तरस्याप्युपलक्षणमेतत् । स्वच्छजलान्तर्गतसिकतादिग्रहणार्थे यत्र जलं तत्रैवाऽऽलोकस्याप्यङ्गीकृतत्वात् । नन्वान्तरालिककार्योपलब्ध्यर्थमेव त्र्यणुकारम्भ इष्यत इत्याशङ्क्य **अथेति । विशेषो वेति ।** द्व्यणुकान्येव त्र्यणुकारम्भकाणि न परमाणव इत्यत्र विशेषो वक्तव्य इत्यर्थः ।

२६० । ६ **अस्ति तावदिति ।** नन्ववयविनामवयवापकर्षोत्कर्षवैषम्यप्रसाधनं द्वित्वप्रभृत्यारम्भकत्वप्रयोजकताप्रसाधनं च क्वोपयुज्यते । द्वयोः

---

* अत्र प्रथमम् अनुमानाधिकरणं पूर्णम् । † व्या सू अ २ पा॰ १ सू १२ ।
‡ निराकर्तीति २ पु पा ।

परमाण्वोः संयोगस्य कदा चिदवर्जनीयत्वाद् द्वयोः संयोगे सति समवाय्यसमवायिकारणसमवधानाद् द्व्यणुकोत्पत्तिरप्रत्याख्येयेति ऋजुना मार्गेण द्व्यणुकं साधयितुं शक्यम् । न च द्वयोः संयोगान्न कार्यद्रव्योत्पत्तिरिति विवदमानं प्रति तत्प्रसाधनमिति वाच्यम् । तथापि कार्यद्रव्येष्ववयवोत्कर्षापकर्षवैषम्यप्रसाधनस्यानुपयोगात् । तन्तुद्वयसंयोगात्सूत्रोत्पत्तिदर्शनेन तथा विवादानवकाशाच्च । तस्माद् द्व्यणुकप्रसाधने नैतावतो यत्नस्योपयोगः । यत् तु परमाणुद्वयेन द्व्यणुकवत्त्रयेण क्व चित् त्र्यणुकोत्पत्तिरस्त्विति शङ्कायां निराकरणं तदयुक्तम् । त्रयाणां परमाणूनां द्व्यणुकानामिव कदा चित्संयोगयौगपद्यस्यावर्जनीयतया परमाणुत्रयारब्धत्र्यणुकस्याप्यप्रत्याख्येयत्वात् । परमाणुसाधारण्येन द्वित्वप्रभृत्यारम्भकसंख्येत्यनुपदं स्वयमेव प्रसाधिततया परमाणुचित्व नारम्भकसंख्येति वक्तुमशक्यत्वाच्च । कारणकारणजातीयस्येत्यादिनियमस्त्वसिद्धः । क्व चित्तन्तुत्रयारब्धसूत्रत्रयेण त्रिवृत्सूत्रोत्पत्तिर्दृश्यते क्व चित् तन्तुत्रयेणेति व्यभिचारात् । यदि सूत्रत्रयारब्धात्त्रिवृत्सूत्रात्तन्तुत्रयारब्धं त्रिवृत्सूत्रं विजातीयं तर्हि द्व्यणुकत्रयारब्धात् त्र्यणुकात्परमाणुत्रयारब्धं त्र्यणुकमपि विजातीयमस्तु । अथ परमाणुत्रयारब्धं त्र्यणुकमप्येव भवेदिति भोगभेदाभावेन वैयर्थ्यात्तथाभूतत्र्यणुकोत्पत्तिर्न संभवतीति चेन्न । कारणबहुत्वान्महत्त्वसंभवेन भोगभेदोपपत्तेः सामग्रीसद्भावप्रभावितस्य कार्यस्य प्रयोजनाभावेन प्रत्याख्यानाभावाच्च । न हि प्रयोजनचतिभिया सामग्री कार्यं नार्जयतीति न्यायाद् भोगभेदाभावेन सामग्रीसद्भावप्रभावितस्य कार्यस्य प्रत्याख्याने च द्व्यणुकमपि प्रत्याख्यायेत परमाणुवत्तस्याप्यतीन्द्रियत्वेन भोगभेदाभावात् । यदि द्व्यणुक त्र्यणुकोत्पत्तिप्रणाडिकया भोगभेदोपयोगि तर्हीदमपि तथास्तु । एतेन टीकोपन्यस्तद्व्यणुकद्वयारब्धद्रव्यनिराकरणमपि निरस्तम् । तस्यापि द्रव्यस्य स्थूलकार्योत्पादनप्रणाडिकया द्व्यणुकवद्भोगभेदोपयोगित्वात् । तस्मात्सर्वमिदमसमञ्जसमिति चेदुच्यते । वैशेषिकप्रक्रियानुवादो ऽयम् । अत एवेत्थमुपालम्भनीयः । अत एव भाष्ये वैशेषिकाभिमतव्यवस्थापक्षाश्रयेण तदुक्तदूषणस्य व्यभिचारं प्रदर्श्य व्यवस्थापक्षो न स्थायीति सूचनार्थं यद्यपि चत्वारः परमाणवो वहूनि द्व्यणुकानीत्यादिवाक्येनाप्यपक्षस्यापक्षमुद्राख्य तथापि व्यभिचारमात्रमुक्तम् ।

२६१ । २ **महातूलपिण्डयोरिति*** युक्तः पाठः । न तु महत्तूलपिण्डयोरिति । आन्महतः समानाधिकरणजातीययोरित्यात्वनियमात् । ननु महद्दीर्घवद्वेति सूत्रे सामानाधिकरण्ये सत्यपि आत्वं न दृश्यते न च तत्र महद्दीर्घशब्दौ श्लोकयोरितिवद् भावप्रधानाविति पदार्थभेदाद् द्वन्द्वसमासः । अतः सामानाधिकरण्याभावान्नात्वप्रसक्तिरिति वाच्यम् । टीकायां ह्रस्वपरिमण्डलाभ्यामित्यस्य धर्मपरतायाः प्रदर्शितत्वेन महद्दीर्घशब्दयोरपि तदन्वयार्थं धर्मिपरताया वक्तव्यत्वात् । यदि तत्र पदार्थाभेदे ऽपि पदार्थतावच्छेदकभेदाद् द्वन्द्व इति न सामानाधिकरण्यं तर्हीहापि तथास्त्विति चेदुच्यते । पदार्थाभेदे पदार्थतावच्छेदकभेदेन द्वन्द्वो न संभवति महाभाष्यविरोधात् । तत्र हि चार्थे द्वन्द्व इति सूत्रे याज्ञिकश्चासौ वैयाकरणश्चेत्यादिषु पदार्थतावच्छेकभेदाद् द्वन्द्वमाशङ्क्य शेषो बहुव्रीहिरिति सूत्रतः शेषइत्यस्यानुवृत्तेस्तस्य समानाधिकरणसमासविषयत्वेन शेषत्वाभावात्तदप्राप्तिरुपपादिता । कथं तर्हि महद्दीर्घवदित्यस्य निर्वाहः । इत्थम् । कानि चित् त्र्यणुकानि महान्ति कानि चिद्दीर्घाणीति त्र्यणुकव्यक्तिभेदविवक्षया इह द्वन्द्वसमास आश्रीयते । यद्यपि सर्वाणि त्र्यणुकानि महान्ति दीर्घाणि च महत्त्वदीर्घत्वयोः समनियतत्वात् तथापि कानि चित् त्र्यणुकानि परितो द्व्यणुकसंयोगैरुत्पद्यन्ते कानि चित्तिर्यग्द्व्यणुकसंयोगैः । तत्र यानि द्वितीयापेक्षया महान्तीति द्वितीयान्याद्यापेक्षया दीर्घाणीति च प्रत्यययोग्यानि भवन्तीति तथाभूतत्र्यणुकव्यक्तिद्वैविध्यापेक्षया द्वन्द्व उपपद्यते । न चेह तथा द्वन्द्वोपपत्तिः द्वयोरपि तूलपिण्डयोर्महत्त्वाधिकरणत्वेन विवक्षितत्वात् ।

२६२ । १६ **स्वाश्रयेति ।** स्वेषां विशेषगुणत्वाभिमतानां ये आश्रयास्तेषां व्यवच्छेदे तत्तद्विशेषगुणप्रवृत्तेतरव्यावर्तने उचिता अवच्छेदका ये ऽवान्तरसामान्यविशेषास्तद्वन्त इत्यर्थः । ते चावान्तरसामान्यविशेषा नीलरूपादिषु नीलत्वादयः शुक्लरूपे पृथिव्यादित्रयसाधारणे पाकजत्वाऽपाकजत्वभास्वरत्वाऽभास्वरत्वानि । एवं रसादिष्वप्यूहनीयम् । स्नेहत्वावान्तरसामान्यसद्भावे तेन लक्षणानुगतिस्तदभावे स्नेहत्वेनैवान्तरशब्दस्य व्याप्यपर-

* महत्तूलपिण्डयोरिति मु मूलपु पा ।

त्वात् । अभेदे ऽपि व्याप्य*व्यापकभावसद्भावात् । अथ स्वाश्रयशब्दस्य एकैकाश्रयभूतव्यक्तिपरत्वे नीलत्वादीनां तदितरसकलव्यावर्तकतावच्छेदकत्वाभावादसंभवः लक्षणे सामान्यशब्दस्य जातिपरत्वमपहाय धर्ममात्रपरत्वमङ्गीकृत्य नीलादिषु लक्षणसमर्थने सामान्यगुणेष्वपि तथैव लक्षणसमर्थनसंभवादतिव्याप्तिरित्याशङ्क्याश्रयशब्देन नवानां मध्ये एकैकद्रव्यं सामान्येन
विवक्षितं न तु तत्तद्व्यक्तिमात्रमिति व्याचष्टे **नवसु मध्यइति । व्यावर्तकाः** २६२
व्यावर्तकतावच्छेदकाः । ननु नवसु मध्ये ऽप्येकैकद्रव्यव्यक्तिरेकैकविशेषगुणव्यक्तेराश्रय इति तत्तद्द्रव्यव्यक्तिगततदितरसकलव्यावृत्तिप्रयोजकतावच्छेदकगुणगतावान्तरजात्यभावादसंभवतादवस्थ्यम् । न च लक्षणप्रविष्टाऽवान्तरसामान्येन यज्जातीयो गुणो यावत्सु वर्तते तावत्सु तद्गततदितरव्यावृत्तिप्रयोजकतावच्छेदकत्वं विवक्षितम् । अणुपरिमाणादिकं यावत्सु चतुर्विधद्व्यणुकादिषु वर्तते तावद्गतेतरव्यावृत्तिप्रयोजकतावच्छेदकमणुपरिमाणत्वादिकं भवतीति तद्गतामणुपरिमाणादीनां विशेषगुणत्वप्रसङ्गात्तदाश्रयाश्चतुर्विधद्व्यणुकादयो ऽपि हि नवसु मध्ये भवन्त्येव । अथ नवसु मध्यइति विशेषणबलान्नवान्यतममात्रवृत्तित्वं स्वाश्रयविशेषणं लभ्यतइति नोक्तदोष इति चेत्तर्हि लाघवान्नवान्यतममात्रवृत्तिगुणत्वमेव लक्षणमस्त्वित्याशङ्क्य तत्रैवोक्तलक्षणार्थपर्यवसानमाह **एवं चेति । पृथिव्यादीति ।** अनेकेत्यादिमात्रोक्तावसंभवः स्याद् नीलत्वादीनां विशेषगुणत्वप्रयोजकसामान्यानां काककोकिलकुवलयाद्यनेकलक्षणसामानाधिकरण्यापादकत्वात् । अतो नवलक्षणव्यतिरिक्तव्यतिरिक्तत्वमनेकविशेषणम् । यद्यपि नवानां लक्षणानां मध्ये इत्यन्वयमुखोक्तो यो ऽर्थः स एवमुक्तावपि पर्यवस्यति तथापि नवानां लक्षणानामननुगतानां नवलक्षणव्यतिरिक्तव्यतिरिक्तत्वेनानुगमार्थं व्यतिरेकमुखेनोक्तिः । **नवत्वविशिष्टेति ।** एकोयं न नवेति प्रतीतिर्नवेमे नैक इति प्रतीतिश्च नवत्वविशिष्टेभ्यस्तत्समुदायान्तर्गतस्याप्येकस्य एकस्मान्नवघटितानामपि
नवानां भेदो ऽस्तीति भावः । **उपलक्षितेनेति ।** यत्र विशेषणत्वं न तत्रो- २६३ ।
पलक्षणत्वमिति नवत्वविशिष्टास्तदुपलक्षितव्यतिरिक्ता इत्युक्तम् । न च ये नवत्वविशिष्टास्ते ऽप्यपेक्षाबुद्धिविनाशान्नवसंख्याविनाशे तदुपलक्षिता भव-

---

* व्याप्येति नास्ति २ पु० ।

न्तीति वाच्यम् । अपेक्षाबुद्धीनां यावदाश्रयभाविद्वित्वादिसंख्याव्यञ्जकत्वेनापेक्षाबुद्धितन्नाशाभ्यां द्वित्वाद्युत्पत्तिनाशानङ्गीकारात् स्वसमवेतेति विशेष्यमात्रं घटत्वादिष्वतिव्याप्तमिति विशेषणोपादानं सामान्येषु समवेतस्य कस्यचिद्धर्मस्याभावादतिव्याप्तिनिरासः । **द्रव्यजातीयेति ।** संख्यादीनामाश्रया नवापि द्रव्याणि द्रव्यत्वेनैकजातीयानि तेषां गुणादिभ्यो व्यवच्छेदकाः संख्यादय इत्यतिव्याप्तिः । नन्वेकजातीयत्वं द्रव्यत्वावान्तरजात्या विवक्षितमित्याशङ्क्य तथा सत्यव्याप्तिरित्याह **गगनभेदेति ।** स्वमते कल्पभेदेन गगनभेदसत्त्वे ऽपि लक्षणवादिमते स नास्तीति भावः* ॥

२६४ । १ **उभयथापि न कर्मातस्तदभावः ॥ १२ ॥**

अनवबोधरूप इति†। जडत्वाविशेषादणवो ऽदृष्टाश्रयास्तव मते किं न स्युरित्युपहासार्थमणुसमवायित्वपक्षोक्तिरित्यर्थः । तस्य चेतनाऽनधिष्ठितस्याप्रवृत्तेरिति कर्मणश्चेतनाधिष्ठितत्वं न केवलं सांख्याधिकरणोक्तरीत्याऽभ्युपगन्तव्यं किं त्वदृष्टस्य प्रलये ऽपि‡ सत्त्वात्तदापि द्व्यणुकोत्पादककर्म मा भूदित्येतदर्थमपि तदभ्युपगन्तव्यम् । न च परिपक्वमदृष्टं फलजनकं परिपाकश्च सर्गाद्यसमयएव स्यादिति वाच्यम् । ईश्वराधिष्ठानसाहित्यव्यतिरेकेण तत्परिपाकस्य निर्वक्तुमशक्यत्वात् । अणुवादिमते गुणरूपस्यादृष्टस्यौषधादिवत्ततो ऽन्यस्य पाकस्यासंभवात् फलकालादिसाहित्यरूपतया कथंचित्तन्निर्वचने ऽपि तथाभूतपाकयुक्तस्याप्यदृष्टस्य तन्मते ऽपि परमेश्वरविनियोज्यत्वात् । उक्तं हि न्यायवार्तिककृता । कर्म पुरुषस्येश्वरो ऽनुगृह्णाति को ऽनुग्रहार्थः यद्यथाभूतं यस्य च यदा परिपाककालस्तत्तथा तदा च विनियुङ्क्तइति । नन्वस्तु तन्मते ऽपीश्वराधिष्ठितत्वाद्यभ्युपगमः यथा तथैवास्तु को दोष इत्याशङ्क्य तत्र पाशुपताधिकरणे§ दूषणं वक्ष्यतइत्याह **पत्युरिति । प्रयत्नविशेषेति ।** प्रायोभिप्रायमेतत् । वायुनापि नोदनदर्शनात् । **तर्हि न कचिदपीति ।** वृक्षादिष्विव संयोगस्याव्याप्यवृत्तित्वोपपादकाः प्रदेशविशेषादयो ऽपि वक्तुं न शक्येरन्निति भावः ।

प्रदेशकल्पनया प्रतीतिरुपकल्पते चेत्तथैवास्तु को दोष इत्याशङ्क्य तथा

---

* अत्र द्वितीयं महद्दीर्घाधिकरणं पूर्णम् ॥ † अयोधरूप इति ३ पु० पा० ।

‡ अदृष्टप्रलये ऽपीति ३ पु० पा० । § व्या० सू० अ० २ पा० २ सू० ३७ ।

सति संयोगतन्मूलद्व्यणुकादिः कल्पितः स्यादिति दूषणे तात्पर्यमाह प्रदेशकल्पनया ऽपीति । तन्नियामकत्वात्तन्तुपटोभयं संश्लिष्टताप्रयोजक- २
त्वात् तत्कारणवत् पटोत्पादनद्वारा तदुभयसंश्लिष्टतापादकवेमादिवत् । इदमेव दूषणं वक्तुं शक्यम् । प्रागभावस्यापि पटकारणत्वात्तस्य तन्तुपटाभ्यां संबन्धाभावाद्व्यभिचारः । अथ प्रागभावस्य पटे न प्रतियोग्यनुयोगिभावरूपः स्वरूपसंबन्धस्तस्य तन्तुभिरपि स्वरूपसंबन्धः कल्प्यः कारणानां मिलितानां* कार्यजनकत्वेन† कार्योत्पत्तौ तेषां मेलनस्याप्यपेक्षितत्वान्मेलनस्य च संबन्धरूपत्वादिति चेत्किं स्वरूपमपि संबन्धो भवितुमर्हति ओमिति चेत्तर्हि अवयवावयव्यादीनामपि स्वरूपमेव संबन्धः स्यादिति किं समवायेन । संबन्धिस्वरूपाणामनन्तत्वाल्लाघवेन सर्वानुगत एकः समवायः कल्प्यत इति चेद् न । एकस्यानेकेषां वा कल्पनीयत्वे खलु लाघवादेकस्य कल्पनमिहानेकेषां क्लृप्तत्वात्तेष्वेव क्लृप्तेषु संबन्धत्वमात्रं कल्पनीयं न तु समवायस्तद्गत संबन्धत्वं चेत्युभय कल्पनीयं गौरवात् । अथ समवायपक्षे समवायस्तद्गतं संबन्धत्वं चेति द्वयमेव कल्पनीयम् अवयवावयव्यादिषु संबन्धत्वकल्पने तेषामननुगतत्वेन क्रोडीकारकाभावाद् अनन्तानि संबन्धत्वानि कल्प्यानीति समवायपक्ष एव लाघवमिति चेन्न । निरूपकभेदेन संबन्धत्वे भेदानङ्गीकारे ऽवयवादिषु तत्तदभावसंबन्धत्वस्य क्लृप्तस्यैवावयव्यादिसंबन्धत्वरूपताया अपि संभवेन अवयवादिषु संबन्धत्वस्यैकस्याप्यकल्पनीयत्वान्निरूपकभेदेन तद्भेदाङ्गीकारे समवाये ऽपि तत्तन्निरूपकभेदप्रयुक्तानां तत्संबन्धत्वकल्पनावश्यभावात् समवायपक्षे धर्मिकल्पनागौरवस्याधिकस्य सद्भावादिति । इत्थं दूषणं समवायस्य संबन्धान्तरानपेक्षत्वे संयोगोपि तदनपेक्षः स्यादिति वक्ष्यमाणरीत्यैवोन्नेतुं शक्यमिति भाष्यादिषु न कण्ठरवेणोक्तम् ।

पक्षेतरस्यापीति‡ । यद्यपि पक्षमात्रव्यावृत्त उपाधिः पक्षेतरः ११
प्रसिद्धः असंबन्धत्वोपाधिश्च न तथा अपक्षात्संयोगादपि व्यावृत्तत्वात् तथाप्युपाधिव्यतिरेकेण साध्यव्यतिरेकसाधक यदुपाध्युत्थाप्यं प्रतिपक्षानु-

---

* अमिलितानामिति १ पु॰ पा॰ ।   † कार्याजनकत्वेनेति १ पु॰ पा॰ ।
‡ पक्षे तरस्यापीति मूले प्रमादान्मुद्रितं तदेवं शोध्यम् ।

मानमुपाधेर्दूषकताबीजं तस्यासाधारणहेत्वाभासदोषग्रस्तत्वं पक्षेतरत्व-स्यानुपाधितायां बीजम् । यथा पर्वतीयवन्ह्यनुमाने एतत्पर्वतेतरत्वस्यानु-पाधितायामयं पर्वतो निर्वह्निः एतत्पर्वतत्वादिति तदुत्थाप्यप्रतिपक्षा-नुमानस्य सकलसपक्षव्यावृतत्वरूपेणासाधारण्येन दुष्टत्वात्तस्यानुपाधित्वम् । तदीयमनुपाधिताबीजमिहापि समानम् । समवायो ऽसंबद्धः संबन्धत्वादित्य-त्रापि ह्यस्त्यसाधारण्यमित्यस्य पक्षेतरत्वसाम्येनानुपाधित्वशङ्का । उपाधि-त्वसमर्थनस्यायमाशयः । पक्षे साध्याभावनिश्चये सति पक्ष एव सपक्षोपि जातो ऽतः सकलसपक्षव्यावृतत्वाभावाद् नासाधारण्यमनुपाधिताबीजम-स्तीति अगुणत्वे सत्यसंबन्धत्वम् अगुणत्वविशिष्टस्य संबन्धत्वस्याभाव-स्तया च संयोगे ऽपि विशेषणाभावप्रयुक्तविशिष्टाभावरूपोपाधिसत्वान्न साध्या-व्यापकत्वम् ।

२६५ । २५ **संयोगस्य गुणत्वमसिद्धमिति** । रूपादिचतुर्विंशत्यनुगतस्यैकस्य गुणत्वस्य निर्वक्तुमशक्यत्वादिति भावः । **उभयसिद्धस्थलइति** । यद्यप्य-नुमानवादिमते साध्याव्यापकत्वमप्युपाधिदोष एवं प्रति प्रतिपक्षोन्नयनासं-भवात् तथापि तथा निःशङ्कदोषो न भवतीति तात्पर्यम् । **अनध्यवसि-तत्वमसाधारण्यम्** । **संबन्धत्वे सतीति विशेषणमिति** । शुद्धसाध्य-व्यापकत्वाभावे ऽपि पक्षधर्मावच्छिन्नसाध्यव्यापकोयमुपाधिरित्यर्थः । नन्वेवं प्रतिपक्षोन्नयने शुद्धसाध्यव्यतिरेको न सिध्येदित्याशङ्क्य पक्षधर्मरूपविशेषण-वति विशिष्टव्यतिरेकः सिध्यन्विशेष्यव्यतिरेकमादाय पर्यवस्येदित्याह **तथा चेति** ।

२६७ । १ **व्याप्तिः प्रमिता वक्तव्येति** । न च विपक्षबाधकाभावादिह तर्कमूलव्याप्यप्रमितिः शङ्कनीया रूपादीनां जन्यत्वे हि रूपत्वादिकं प्रयोजकमेष्टव्यम् अनुगतत्वाल्लघुत्वाच्च । न तु कार्यगतरूपत्वं पार्थिवपर-माणुगतपाकजरूपाननुगतत्वाद् गुरुत्वाच्च । तथा च परमाणुष्वपि रूपादि-स्वीकारे अग्निसंयोगजन्या रूपादयः स्वोत्पत्तौ* स्वाश्रयकारणगतरूपाद्यपेक्षेति पराभ्युपगतरीत्यैव जलपरमाणुगतरूपादीनां पार्थिवपरमाणुगतश्यामरूपस्य चोत्पत्तावपेक्षितानां रूपादीनामाश्रयत्वेन परमाणूनां कारणीभूता अव-

* अग्निसंयोगजन्यदवाणु स्वसार्थिति व पु॰ पा॰ ।

यथाः सिध्यन्तो न निवारयितुं शक्यन्ते । सावयवत्वे चाऽनित्यत्वमप्यनिवार्यम्। तथा त्रसरेणुः समवायिकारणारभ्यः महत्त्वे सति चाक्षुपत्वात् तदपि त्रसरेणुसमवायिकारणं समवायिकारणारभ्यं महदारम्भकत्वादिति परैः परमाणुः साध्यते तथा चाद्यानुमाने विपक्षबाधकतर्क एवमुच्यते । महत्परिमाणस्य जन्यत्वे महत्त्वापकर्षमात्रं प्रयोजकं न तु महत्परिमाणगतमुत्कर्षापकर्षरूपजातिद्वयं गौरवात् । तथा च त्रसरेणुमहत्त्वस्यापकृष्टमहत्त्वरूपतया जन्यत्वेन कारणापेक्षायां तत्र स्वाश्रयसमवायिकारणगतसंख्यापरिमाणप्रशिथिलसंयोगान्यतमावश्यम्भावेन त्रसरेणोः समवायिकारणमवश्यमभ्युपगन्तव्यमिति तत्र महत्त्वस्य जन्यत्वे महत्त्वापकर्षो ऽपि न प्रयोजकः किं तु परिमाणापकर्ष इति युक्तं सामान्यस्य लघुत्वाद्दीर्घपरिमाणानुगतत्वाच्च । ततश्च त्रसरेणुमूलकारणे यद्यपकृष्टपरिमाणमभ्युपगम्येत तदा तस्य जन्यत्वेन कारणपरिमाणाद्यपेक्षया तस्य सावयवत्वं प्रसज्येतेति तत्परिहाराय तत्र परममहत्त्वस्याभ्युपगन्तव्यत्वात् तदुक्तरीत्यैव परिमाणगततज्जन्यताप्रयोजकरूपापेक्षया जगन्मूलकारणानुमानप्रवृत्तौ तेन परममहद्ब्रह्मैव तथात्वेनानुमितं भवेदिति । एवं च स्थौल्यानित्यत्वे प्रसज्येयातामिति तर्के स्थौल्यशब्दितस्य महत्त्वस्य परमाणावनिष्टस्यापादनम् अनित्यत्वस्य तूभयाऽनिष्टस्येति विवेकः ।

सत्प्रतिपक्षतामाशङ्क्येति । नतु जगत्सोपादानं भावकार्यत्वादिति यद्ब्रह्मपर्यवसाय्यनुमानमुपन्यस्तं यच्च जगदुपादानं न स्पर्शवन्न चाणु नित्यत्वादित्यनुमानान्तरमुपन्यस्तं तत्रोभयथापि परमाणुनित्यत्वानुमानं न प्रतिपक्षतां भजते । तत्साध्याभावाविषयत्वाद् जगत्कारणस्य स्पर्शवत्त्वे ऽप्यणुत्वे ऽपि नित्यत्वमकारणकत्वादिभिरुपपद्यतइति द्वितीयानुमानस्याप्रयोजकत्वं परमतेरनुमानैः सिध्यति तदपि द्वितीयानुमानकल्पनापेक्षम् । तस्मात्सामान्यतो जगत्कारणानुमानस्य ब्रह्मपर्यवसानेन * परमाण्वसिद्धिदूषणमुक्त्वा नैयायिकोक्तानि परमाणुनित्यत्वानुमानान्यपि दूषयतीत्येवावतारयितुं युक्तमिति चेदुच्यते । तावत्येवार्थे भाष्यटीकयोस्तात्पर्ये तथापि २६

* पर्यवसाने इति ख पु पा ।

तेषामनुमानानां सिद्धान्तविरुद्धार्थविषयतामात्रेण प्रतिपक्षव्यपदेशः* कृतः ।
तदेतदर्थादित्यनेन सूचितम् । **प्रतीत्य प्राप्येति** । निमित्तकारणत्वेन लब्ध्वे-
६९ । ३ त्यर्थः । तत्सूत्रवाक्यमिति व्याख्याने स्वयमेव हेतुमाह **सौत्रचशब्दव्या-
ख्यानत्वादिति । न तादुत्पाद्यत्वं केषां चिद्गुणानां सामान्यादीनां
च तदभावादिति** । यद्यपि द्रव्याधीननिरूपणत्वमपि शब्दगन्धादिषु
नास्तीत्यव्यापकत्वं समानं तथापि द्रव्योत्पाद्यत्वं वह्न्युत्पाद्ये धूमे ऽतिप्रसक्त-
मिति तदुपेक्षणम् । **शुक्लत्वं द्रव्यवृत्तीति** । सामानाधिकरण्यप्रत्यक्षमात्रेण
नैयायिकंमन्यो न परितुष्येदिति तदनुग्राह्यमनुमानमुपन्यस्तम् । नन्वाकारा-
न्तरायोगो ऽसिद्धः गुणत्वादित्याशङ्क्य विशिनष्टि **स्वातन्त्र्यप्रयोजकेति** ।
ननु तामिमामयुतसिद्धिं विकल्प्य दूषयतीत्ययुक्तं द्रव्याश्रितत्वनियमो‡
गुणादीनामयुतसिद्धिरिति निरुक्तत्वात्तत्र च वक्ष्यमाणविकल्पाप्रसरादित्याश-
ङ्कावतारयति **भवेदिति** । तथापि तामिमामित्ययुक्तमित्याशङ्क्य तस्यार्थ-
माह **तदर्थविकल्पो ऽपीति** । अपृथग्देशत्वादयो हि धर्मधर्मिभावनिय-
मरूपा ऽयुतसिद्ध्युपपादकत्वेन शङ्किता अतस्तदर्थविकल्पस्तद्विकल्पत्वेनोप-
चरित इत्यर्थः । **प्रकारान्तरेणेति** । अपृथगेको देशो ययोरिति व्युत्पत्तिमा-
श्रित्य अपृथक्सिद्धत्वं भाष्ये दूषितम् इदानीं पृथग्देशत्वाभावं तदर्थमा-
श्रित्य शङ्कत इत्युत्तरग्रन्थस्य सामान्यतो ऽवतारिका । तत्राव्यवहितग्रन्थम-
वतारयति **तत्र तावदिति**§ । अन्यदेशत्वं युतसिद्धिरिति युतसिद्ध्युपपा-
दकमन्यदेशत्वमित्यर्थः । सङ्गित्वादिति पाठमाश्रित्य तस्य संबन्धित्वादि-
त्यर्थस्तेद्व्यभिचारः स्यादित्याशङ्क्य व्याचष्टे **संयोगित्वादित्यर्थ इति** ।
अभ्युपेत्यापीति । आकाशात्मनोस्तन्मते संयोगाभावात्तन्मतमर्यादया
२१० । १२ पूर्वोक्तं दूषणं न भवतीत्येतदुक्तापृथग्देशत्वस्याभ्युपगमे मूलम् । **ननु शुक्ल-
त्वमित्यादीति** । शुक्लः पट इत्यादौ शुक्लशब्दस्य शुक्लगुणविशिष्टे द्रव्ये
प्रयोगे कुशलशब्दस्येव निरूढा लक्षणा । न चेयं घटस्य शुक्ल इत्यपि कदा
चित्प्रयोगप्रसङ्गः । निरूढलक्षणया ऽन्यत्र प्रयुक्तस्य पदस्य मुख्ये ऽर्थे|| ऽप्र-

---

* प्रतिपक्षे व्यपदेश इति ३ पु. ।
† न तु तदित्यादिः पाठो मु. मू. पु. ।
‡ द्रव्याश्रयित्वनियम इति ३ पु. पा. ।
§ तत्र तावदितीति प्रतीकाकारः १ पु. ।
|| अर्थे इति नास्ति १ पु. ।

योगस्यापि दर्शनात् । न हि कुशलशब्दस्य कुशलवनकर्तरि प्रयोगो ऽस्ति । अतस्तत्र गुणविशिष्टद्रव्यलक्षणकात् शुक्लशब्दाद् भावार्थप्रत्ययोत्पत्त्या शुक्लत्वं शुक्लता शौक्ल्यं शुक्लिमेत्येव प्रयोग इत्यर्थः ।

धर्मिग्राहकप्रत्यक्षविरोधादाभास इति । न च पटस्य शुक्लं रूप- २१
मिति व्यवहारमूलभूतं भेदविषयं प्रत्यक्षमप्यस्ति तद् अभेदप्रत्यक्षं बाधेतेति वाच्यम् । न ह्युक्तव्यवहारो भेदविषयः किं तु षष्ठ्यर्थसंबन्धविषयः । संबन्धेन तु भेदो ऽनुमातव्यस्तदप्यनुमानं शुक्लः पट इत्यभेदसाक्षात्कारो बाधेत तस्माद्राहोः शिर इतिवदौपचारिकं संबन्धव्यपदेशमात्रमिति कल्पनीयम् । किं च पटस्य शुक्लं रूपमित्येतत्पटस्य शुक्लत्वं शौक्ल्यमित्यादिना समानविषयं शुक्लत्वमित्यादिप्रत्यये च गुणगुणिभेदवादिभिर्गुणे यच्छुक्लत्वमभ्युपगम्यते तदेव पटे प्रतीयते ऽतः पटस्य शुक्लं रूपं शुक्लो गुण इत्यादिव्यवहारो ऽपि पटगतशुक्लत्वसामान्यविषय इत्येव वक्तुमुचितम् । शुक्लत्वसामान्ये कथं शुक्लशब्द इति चेत् शुक्लगुणे वा कथं शुक्लत्वं शुक्लिमेत्यादिभावप्रत्ययान्तः शब्दः । शुक्लशब्दस्य द्रव्यलक्षणामाश्रित्येति* चेत् तस्येह सामान्ये लक्षणा ऽस्तु गौर्नित्येति प्रयोगे गोशब्दस्येव । यद्वा शुक्लशब्दः शुक्लद्रव्यस्येव तद्गतशुक्लत्वसामान्यस्यापि वाचकः यथा साक्षात्कारशब्दः प्रत्यक्षज्ञानस्येव तद्गतसाक्षात्त्वसामान्यस्यापि । अत एव घटसाक्षात्कार इति साक्षात्कारिप्रमेति च व्यवहारः । एवं च गुणवचनेभ्यो मतुब्लोपानुशासनमपि सामान्यवाचिभ्यो मतुपः प्रसक्त्या सार्थकं भविष्यति । न चैवमपि साक्षात्कारीतिशब्दवत् शुक्लशब्दादिनिप्रत्ययेन शुक्लीत्यपि प्रयोगः स्यात् तल्लोपानुशासनाभावादिति वाच्यम् । अर्शआदिगणे वर्णशब्दपाठस्याऽर्शआदिभ्यो ऽच्प्रत्ययविधानार्थत्वेन तत इनिठनोर्बाधात् । मतुपस्तु ततो बाधो न भवति प्राणिस्थादातो लजन्यतरस्यामित्यतो ऽन्यतरस्यांग्रहणस्य वैशेषिकप्रत्ययैर्मतुपः समुच्चयार्थमनुवृत्त्यङ्गीकारात् । अतो मतुब्लोपानुशासनं सार्थकम् । एवमभेदप्रत्यक्षानुसारेण व्यवहारव्यवस्थाकरणे लाघवमपि भवति । द्रव्यातिरिक्तगुणाभ्युपगमे हि गुणस्तत्संबन्धश्चेत्युभयमपि कल्पनीयमिति गौरवं भवेत्तस्माल्लाघवानुगृहीताभेदप्रत्यक्ष-

---

* आश्रित्येति नास्ति २ पु॰ पा॰ ।

लाद् गुण्यभेद एव गुणानामास्थेयः । सुरभिर्गन्धफली मधुरो गुडः उष्णो वन्हिरिति गन्धादीनामपि द्रव्याभेदप्रत्यक्षैस्तद्भेदनिरासात् । अयं च गुण-गुण्यभेदो गुणिपरिशेषेण प्रतिनियतेन्द्रियग्राह्यनानागुणसंघातपरिशेषेणोभयथा-प्यनिर्वचनीयभावेन वा पर्यवस्यतीत्यन्यदेतत् ।

२१० । २४ **पूर्वपक्षिण एव ग्रन्थ इति** । न चेत्ययं शब्दः पूर्वपक्षनिराकरणार्थे इत्येवं सिद्धान्तग्रन्थो न भवति किं तूत्पत्तेः समवायान्यत्वस्य निराकरणार्थः स इति पूर्वपक्षग्रन्थ एवायमित्यर्थः । **यद्युच्येतेति** । प्रतीकग्रहणानन्तरमप्राप्तिपूर्विका प्राप्तिरित्येकं लक्षणम् । अन्यतरकर्मजोभयकर्मजप्राप्त्योरन्यतरेत्यपरं युतसिद्धिलक्षणम् । तद्भावश्च न कार्यकारणसंबन्धस्य भवतीति क्व चित्पाठः । तत्र कर्मजा प्राप्तिरित्येतावदेव वक्तव्यं जनककर्मद्वैविध्यस्पष्टीकरणार्थं विशेषणम् । अप्राप्तिपूर्विका प्राप्तिरन्यतरकर्मजा प्राप्तिः उभयकर्मजा प्राप्तिरिति त्रीणि संयोगलक्षणानि । एतानि च कार्यकारणसंबन्धस्य न भवन्तीति पाठान्तरम् । तत्र यद्यपि द्वितीयतृतीयलक्षणे परस्परलक्ष्याव्याप्तिः तथापि तयोर्लक्षणशब्दः प्रकारभेदमात्रपर इति तत्रापि पाठे कर्मजा प्राप्तिरित्येकमेव लक्षणं लक्षणद्वयोक्त्या पर्यवस्यति । **उत्पन्ने तत्क्षणएवेति** । उत्पत्त्यनन्तरक्षणएवेत्यर्थः । **पटसत्ताक्षणइति** । पटोत्पत्तिक्षणइत्यर्थः । **असति प्राप्तरि प्राप्त्यनुपपत्तेरिति** । यद्यपि समवायनित्यत्वपक्षे पूर्वक्षणे प्राप्तर्यसत्यपि जन्मसमयएव समवायरूपा कारणप्राप्तिरुपपद्यते तथापि तदनित्यत्वपक्षे दूषणमिदं द्रष्टव्यम् ।

एकाकर्षणइति । एकस्मिन्नाकृष्यमाणे इतरेषां तत्संसृष्टानामाकर्षणं सावयवानामेव दृश्यते अतो वायुना द्व्यणुके कृष्यमाणे तदवयवयोः परमाण्वोर्निरवयवद्रव्यत्वादाकाशवत्तत्संसृष्टत्वे ऽप्याकर्षणं न स्यादित्यर्थः* ॥

२१२ । ५ **समुदायउभयहेतुके ऽपि तदप्राप्तिः ॥ १८ ॥**

माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकाणाम् आदिबुद्धशिष्याणां सर्वशून्यत्वविज्ञानमात्रास्तित्वविज्ञानाकारानुमेयबाह्यास्तित्वप्रत्यक्षबाह्यास्तित्वविषयाः प्रस्थानभेदास्तेषामेव प्रतिपत्तिभेदादिति के चन बुद्धसमयस्था

* अत्र तृतीय परमाणुजगत्कारणत्वाधिकरणं पूर्णम् ।

वदन्ति। अन्ये त्वाहुः । सर्वज्ञानां तेषां गुरुवाक्यानि शृण्वतां पुरोवर्तिन्येकस्य मेचकत्वबुद्धिरन्यस्य चैत्रत्वबुद्धिरपरस्य स्थाणुत्व*बुद्धिरित्यादिवद् भ्रान्तिरूपा विरुद्धप्रतिपत्तिर्न† संभवति तेषां सर्वज्ञत्वात् षोडशिग्रहणाग्रहणप्रत्ययवद्विकल्पिकार्थविषयापि न संभवति क्रियायामिव सिद्धवस्तुनि विकल्पायोगात् । अतः प्रथममादिबुद्धेनोत्तममध्यमाधमभाविविनेयबुद्ध्यनुसारेण सर्वशून्यत्वादिपक्षभेदाः सूचितास्तद्विवरणार्था माध्यमिकादीनां प्रस्थानभेदा इति । तत्र द्वितीयं तन्मतं विवृणोति **विप्रतिपत्तिर्हीति । असंहता-** २७
नामिति । कार्यकारणेऽसंहतानामपीन्द्रियसंबन्धादान्तरेण चित्तेन निरूप्यमाणतया ऽऽन्तरसमुदायमध्ये परिगणनमिति भावः । **अहमित्याकारमालयविज्ञानमिति ।**

तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम् ।
तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत् ॥

इति तदीयो व्यवहारः । **विज्ञानस्कन्धो निर्विकल्प इति ।** केचिद्देवदत्तादिनाम संज्ञास्कन्ध इत्याहुः । तन्मते विकल्पो ऽपि विज्ञानस्कन्धः । **अनुपलब्धिलिङ्गकमिति ।** यद्यपि प्रातश्चत्वरे गजाभावानुमानवदिहानुपलब्धिलिङ्गकत्वेन तान्त्रिकैर्व्यवहृतमनुमानं नास्ति तथापि व्यापकविरुद्धोपलब्ध्या यच्चेतनाऽनधिष्ठितकारणेभ्यः कार्योत्पत्तेर्व्यावर्तनं प्रसाधयिष्यते तदभिप्रायाऽनुपलब्धिलिङ्गकत्वोक्तिः । यद्वा अचेतनत्वादिति चैतन्याभावलिङ्गकं यदनुमानं प्रदर्शयिष्यते तदभिप्राया ।

अतो या कार्योत्पत्तिरिति । ननु या कार्योत्पत्तिः सा चेतना- २७३
धिष्ठितकारणेभ्यो भवतीति प्राग् दर्शितेयं व्याप्तिस्तामुपजीव्य व्यापकविरुद्धोपलब्ध्या परपक्षनिरसनं सिद्धान्त्यभिमतचेतनाधिष्ठितकारणकत्वप्रसाधनं च कृतं कथं तदनन्तरमव्याप्तिसिद्धिरुच्यते । नैष दोषः । प्रथमं या कार्योत्पत्तिरिति वाक्येन व्याप्यव्यापके उपन्यस्ते तयोर्व्याप्तिग्रहानुकूलतर्को विपर्ययपर्यवसानसहितः स स्वव्यापकेत्यादिना ऽधितिष्ठत इत्यन्तेन ग्रन्थेन दर्शितः । तदनन्तरमतो या कार्योत्पत्तिरित्यादिवाक्येन व्याप्तिसिद्धिरुक्ता । पूर्वमेवानन्तराधिकरणे ऽपि ये यस्मिन् सत्यपि कादाचित्कास्ते तदतिरि-

* स्थाणुत्वेति १ पु· पा· । † विप्रतिपत्तिर्नेति २ पु· ।

त्तापेक्षा इति प्रथमं व्याप्यव्यापकयोरुपन्यासः ततो व्यापकविरुद्धोपलब्धिमूलकविपर्ययपर्यवसानसहिततर्कोपन्यासः ततः प्रथमोपन्यस्तव्याप्यव्यापकयोर्व्याप्तिसिद्धिकथनं च भविष्यति ।

२७३ । १२ तत्कार्यं प्रति हेतुरित्यपीति । यद्यप्येवं सति व्यापारवदाश्रय इति विशेषणं न निवेशनीयम् अत एव कुम्भकारकार्ये कुम्भे ऽतिव्याप्तिवारणलाभात्तन्निवेशने यागव्यापाराऽपूर्वाव्याप्त्यापत्तेश्च । तथापि चक्रभ्रमणादिवत्कारणक्रियारूपस्य व्यापारवदाश्रयत्वं नियतं कारणानां कार्यजननाय प्रवृत्तिरपि तत्क्रियारूपा अतस्तत्र व्यापारव्यापारिणोः समसमयत्वे कार्यकारणभावानुपपत्तिर्भिन्नसमयत्वे आश्रयाश्रयिभावानुपपत्तिरिति दूषणं वक्तुं लक्षणे अनपेक्षितस्यापि तस्य तदनुप्रवेशनेन सद्भावः स्मारितः । बाह्य आभ्यन्तरश्च प्रतीत्यसमुत्पादो हेतूपनिबन्धनश्चेति द्वाभ्यां कारणाभ्यां भवतीति बौद्धा व्यवहरन्ति । तत्र कारणं प्राप्य कार्यमुत्पद्यतइति यद् अयं प्रतीत्यसमुत्पादः कारणात्कार्योत्पाद इत्यर्थः । हेतूपनिबन्धः एकैककारणसंबन्धः । प्रत्ययोपनिबन्धः कारणसमुदायसंबन्धः । तत्र बाह्यकार्ये हेतूपनिबन्धस्योदाहरणं बीजादिफलपर्यन्तं प्रत्ययोपनिबन्धस्योदाहरणम् । बीजाद‍ङ्कुरजनने महाभूतानि धातुविशेष इति षण्णां धातूनां समवायः आध्यात्मिककार्ये हेतूपनिबन्धस्योदाहरणम् । अविद्यादिदौर्मनस्यान्तं प्रत्ययोपनिबन्धस्योदाहरणम् । पञ्चभूतान्यहंप्रत्ययरूपो विज्ञानधातुश्चेति षण्णां धातूनां समवायः । एवं द्विविधयोरपि कारणवर्गयोः कार्योत्पादे स्वस्वनिष्ठचैतन्यापेक्षा वा स्वतन्त्रकारणान्तरगतचैतन्यापेक्षा वा नास्तीत्यपि तेषां मतम् । तदिदं सर्वं सक्षेपतः प्रतीत्यसमुत्पादलक्षणमुक्तमित्यादिना सो ऽयं प्रतीत्यसमुत्पादो दृष्टत्वाद् नान्ययितव्य इत्यन्तेन टीकाग्रन्थेन प्रपञ्चितम् । तत्रैतेष्वेव षट्सु धातुष्वित्यादिना तदेतैरविद्यादिभिराक्षिप्तः संघात इत्यन्तेन टीकाग्रन्थेन भाष्यानुक्रान्ताऽविद्यादिदौर्मनस्यान्तस्वरूपविवरणपूर्वकं तेषां चेतनानपेक्षः कार्यकारणभाव उपसंहृतः ।

एवमाशङ्कासूत्रभागतद्भाष्यविवरणपरे टीकाग्रन्थद्वये व्याख्येयांशद्वयमुपादाय व्याचष्टे प्रत्ययोपनिबन्धस्य संग्राहकमित्यादिना । उत्पादादनुत्पादाद्वेत्येतदन्वयव्यतिरेकपरतया व्याचष्टे यस्मिन् सतीति । मनो

" । १८

विज्ञानं च यो ऽभिनिर्वर्तयतीति । अत्र पूर्ववाक्यस्य च यो ऽभिनिर्वर्तयतीत्यनुषङ्गः कृतः । यो नामरूपमभिनिर्वर्तयति यश्च मनोरूपं विज्ञानमभिनिर्वर्तयति स विज्ञानधातुरुच्यतइत्यर्थः ।

देहाकारपरिणतेष्विति । के चिदविद्यादिरूपं* क्व चित् क्व चिद्भेदेन पर्यायन्ति क्षणिककार्यदुःखशून्येषु स्थायिनित्यसुखवस्तुबुद्धिरविद्या ततो रागद्वेषमोहास्ततो धर्माधर्मसंस्कारा इत्येतत्सर्वं संस्कारवशाज्जीवस्य गर्भाशयद्रव्ये वृत्तिलाभो† विज्ञानं विज्ञानसंसर्गाद्गर्भद्रव्यस्य कललपेश्याद्याकारेणाभिव्यक्तिर्नामरूपं तदभिव्यक्तिक्रमेण निर्वृत्तं षडिन्द्रियायतनं शरीरं षडायतनतन्निर्वृत्तशरीरेन्द्रियस्य गर्भगतविषयेन्द्रियसंसर्गजं ज्ञानं स्पर्शः तन्निमित्ते सुखदुःखे वेदना सुखप्राप्तिदुःखपरिहारार्थो विषयोपादानेच्छा तृष्णा तया विषयेषु प्रवृत्तिरुपादानं ततः क्रमेण गर्भान्निष्क्रमणं भवः निर्गतस्य मनुष्यत्वादिजात्यभिमानो जातिः क्रमभाविनी जरामणो प्रसिद्धे म्रियमाणस्य पुत्रकलत्राद्यभिष्वङ्गादन्तर्दाहः शोकः तदुत्थः प्रलापः परिदेवना मरणक्लेशः दुःखं मानसं दुःखं दौर्मनस्यमिति आचार्यैरप्यन्योक्त यथाविद्याशब्दार्थः प्रागुक्तः । २७

ननु सूत्रे हेतूपनिबन्धे चेतनानपेक्षामभ्युपगम्य प्रत्ययोपनिबन्धमात्रे तदपेक्षाकथनमयुक्तम् एकैककारणे ऽपि तद्व्यापारयितृचेतनापेक्षाया वक्तुं शक्यत्वादित्याशङ्क्याह **हेतूपनिबन्धस्त्विति ।** स्वरूपत एव तदसंभवस्योत्तरसूत्रे वक्ष्यमाणत्वादधिष्ठातृचेतनाभावेनापि तन्निरसनं हतहननमित्युपेक्षितमिति भावः । तदेतदङ्गीकृत्येति पूर्वग्रन्थेन सूचितम् । **ननु मितितेभ्य इति ।** ननु चेतनमन्तरेण देहोत्पत्तिरपि पूर्वपक्षिणा‡ समर्थिता न तथाङ्कुरोत्पत्तिदृष्टान्तापेक्षा ऽस्तीति चेत् सत्यं पञ्चस्कन्धसमुत्पादस्तु प्रत्ययोपनिबन्धो न हेतुमात्राधीनोत्पत्तिरिति टीकायां विविच्य कारणसमुदायाद्देहोत्पत्तौ चेतनापेक्षा ऽस्तीति समर्थयितुं प्रारब्धम् । तेनाङ्कुरोत्पत्तौ चेतनापेक्षा त्यक्तेति भ्रान्तिमपागन्तुं । देहोत्पत्तिमात्रस्य विशिष्य निर्देशे ऽप्यङ्कुरोत्पत्तिरपि पक्षकोटिरेवेति तत्समाधानम् । न च सर्वत्र १७५

* स्वरूपमिति १ पु० । † वृत्तिलाभ इति १ पु० पा० ।
‡ पूर्वपक्षिणेति १ पु० पा० ।

हेतुत्वइति । अङ्कुरादावपि चेतनस्य हेतुत्वे तत्र कारणान्तरेषु सत्सु चेत-
नमात्रव्यतिरेकादङ्कुरादिव्यतिरेको दर्शनीयः स नास्तीति शङ्कार्थः ।
प्रत्यक्षेण कारणताग्रहे खल्वन्वयव्यतिरेकापेक्षा इह तु घटादिदृष्टान्तेनाङ्कु-
रादौ चेतनकारणसत्त्वमनुमीयते । तत्र चेदानीन्तनज्ञानदृष्टान्तेनाद्यज्ञानस्य
२१६ । १ ज्ञानान्तरजन्यत्वानुमानवत्तदनपेक्षेति परिहारार्थः । **संघातस्याप्रयोजक-
त्वमिति ।** संघातस्य कार्यहेतुत्वे हि कार्योत्पत्त्यर्थमपेक्षितस्य सिद्धये
सहन्त्रा भाव्यम् । न तु स कार्यहेतुः किं तु* प्रत्येकसमर्थानाम् आर्थसमाज-
मात्रमित्यर्थः । **अन्ये च बीजक्षणाः सन्तीति ।** भक्षणाद्युपयुक्ता इत्यर्थः ।
अनन्तरजन्यबीजजननइति । स्वाव्यवहितानन्तरक्षणजन्यं यद्बीजं
तज्जननइत्यर्थः । **स्वस्वकार्योपजननइत्यनुषङ्ग इति†** । स्वशब्दान्तरा-
ध्याहारेणानुषङ्ग इत्यर्थः । **नन्विति ।** पूर्वपूर्वबीजक्षणस्योत्तरोत्तरबीजक्ष-
णजनने भवत्वनपेक्षत्वम् एतावता कथं कुसूलस्थबीजएव कृषीवलः कृती
स्यादिति दूषणं भवेद् अन्त्यक्षणस्य कुसूलाद्बहिर्भाव्यक्षेत्रेप्तस्यैवाङ्कुरजन-
कत्वकल्पनो‡पपत्तेरिति शङ्कार्थः । ननु यथाकार्यमनुपपद्यमानं सत्कारणं
नोत्पादयति एवं स्वसामर्थ्येनापि तन्नोत्पादयत्येव अतः किं तु स्वसाम-
र्थ्येनेति कार्यस्य कारणोत्पादकत्वाभ्युपगमो न युक्त इत्याशङ्क्य साध्या-
हारं व्याचष्टे **यदि जनकमिति ।** कार्यं कारणस्य जनकं चेत् स्वसामर्थ्येने-
त्येव वक्तव्यं न च तदप्युपपद्यते अविद्यमानस्य सामर्थ्याभावादित्यर्थः ।
क्षणस्याभेद्यत्वादिति क्षणस्य पूर्वभागे अनुपकृतत्वावस्था उत्तरभागे उप-
कृतत्वावस्थेति दर्शयितुम् । क्षणस्य भागशो भेत्तुमशक्यत्वादित्यर्थः । नित्येष्व-
णुष्विति भाष्यवाक्ये आश्रयाश्रयिभूतेष्वित्यस्य विशेष्यं दर्शयति **भाष्यइति ।**
टीकायामवतारितं किमङ्ग पुनरिति द्वितीयभाष्यवाक्यस्थमाश्रयाश्रयिशून्येष्वि-
११ । १७ त्येतद्भावप्राधान्येन योजनीयमित्याह **आश्रयेति । आश्रयाश्रयिभूते-
ष्विति पाठे भोक्तृविशेषणमिति ।** यद्यपि भोक्तृरहितेष्विति भाष्यपाठे
नोपसर्जनानां भोक्तॄणामिद सम्बन्ध्यन्त विशेषण§ भवितुं नार्हति तथापि
भोक्तृष्वसत्स्विति पाठान्तरमाश्रित्य तद्विशेषणत्वमुक्तम् । तद्विशदय-

* कि न्त्विति नास्ति १ पु ।
† स्वस्वकार्यइत्यनुषङ्ग इति प्रतीकाकारः ५ पु॰ ।
‡ कल्पनेति नास्ति १ पु॰ ।
§ भोक्तृविशेषणमिति पु॰ पा॰ ।

तीति । नासंहतस्य सामग्रीत्वमिति सिद्धान्त्यभिसन्ध्यवेदनं खलु प्रागुक्तं तदिदानीमस्तु तावदिति ग्रन्थेन विशदीक्रियते । अनेन हि ग्रन्थेन केवलाद्धेतोः कार्यं नोपजायतइत्येतदास्तां तावदिति नासंहतस्य सामग्रीत्व-
मित्येतद् दूषणमिह नोद्घाट्यतइत्युक्तम् । **सामान्यं हीति ।** भूयोऽवयव- २७८
सामान्यं खलु सादृश्यन्तदन्यापोहभ्रमाधिष्ठानत्वेन कारणमित्यर्थः । यद्यप्येतावता घटरुचकाद्यनुगता मृत्सुवर्णादिरूपकारणता नायाति तथापि टीकायां श्रुतस्य कारणशब्दस्यार्थोऽयं दूषणं तु तया चेत्याद्यनन्तरग्रन्थेन भविष्यतीति तात्पर्यम् । **नन्विति ।** कार्यकारणभावे सादृश्यमप्रयोजकं किं तु यस्मिन् सति यद्भवति तत्कारणमित्यर्थः । **तर्हि जातिरेवेति ।** जात्युपाधौ कारणत्वग्रहे ऽभ्युपगम्यमाने ऽपि* विवक्षितविवेकेन जातेः कारणत्वग्रह उक्तः स्यात् तथा च व्यक्तीनां कारणत्वं वदता त्वया तासां जात्यवस्थाविशेषणत्वेन जात्यभेदो वक्तव्यः अन्यथा जातेः कारणत्वेन व्यक्तीनां कारणत्वाऽनिर्वाहात् । न च तथेष्यतइति त्वया वक्तुं शक्यम् । जातिरवस्तुभूता व्यक्तयो वस्तुभूता इति त्वयेष्यमाणत्वादित्यर्थः । **वस्तुनो नित्यत्वापादानं दुष्परिहरमिति ।** उत्पादनिरोधशब्दयोर्धर्मशब्दपर्यायत्वे वस्त्वतिरिक्तोत्पादनिरोधानङ्गीकाराद्वस्तु नोत्पत्तिमन्न निरोधवदिति स्यात् तथा च तस्य नित्यत्वापत्तिरित्यर्थः । **उत्तरक्षणोत्पत्तिकालइति ।** उत्तरक्षणस्य कार्यस्योत्पत्तिः पूर्वस्मिन् कारणक्षणएव भवतु तथा च न कारणक्षणस्योत्तरक्षणे ऽप्यनुवृत्त्या स्थायित्वप्रसङ्गः । नापि कार्योत्पत्तेः कारणस्य च समसमयत्वहानिरिति शङ्कार्थः । **नन्वन्त्यसंतानेन इति ।** मुक्तिपर्यन्तमनुवर्तमानाया विषयोपप्लुतचित्तसंततेरन्त्यस्य सन्तानेन इत्यर्थः । **सादृश्यं हीति ।** यद्यपि विषयविशेषोपरागकृतसादृश्यं न विव- २७९
क्षितं येन चैत्रात्मरूपचित्तसंताने ऽनुवर्तमानस्य रूपज्ञानस्याहं रसज्ञानोत्पत्तौ तत्सन्तानविच्छेदः स्यात् । नापि सत्तासामान्यकृतं येन सोपप्लवचित्तोपरमे मुक्तौ निरुपप्लवचित्तसन्तानोदये ऽपि पूर्वसन्तानोच्छेदो न स्यात् किं तु विषयोपप्लवकृतं सादृश्यं विवक्षितमिति वक्तुं शक्यम् । तथापि निरन्वयविनाशः क्वापि न संभवति द्वितीयविकल्पदोष तथापि द्रष्टव्यः ।

---

* ऽपिशब्दो नास्ति ग पु० ।

२१९ । २२ **इदानीं प्रत्यक्षेणानुवृत्तिमाहेति ।** ततोऽयं तेजसा मार्तण्डमण्डलमम्बुदत्वायोपनीयतइत्यनुमेयमिति प्रक्रिया । सूर्यकिरणप्रशिलातलपतिताम्बुनि प्रवर्तते न त्वग्नितप्रायःपतिताम्बुनीत्यपरितोषात्प्रकारान्तरेण परिहारमाहेत्यर्थः । **तस्य न हि तावदिति ।** भावरूपस्य शब्दस्य द्रव्यादिषड्भावबहिर्भावप्रसङ्गो नास्तीत्यर्थः । **द्वीन्द्रियग्राह्येति ।** इदं दत्त्वा इदं देयमिति चरन्नैयायिकमतानुसारेण द्वीन्द्रियग्राह्यघटादिवारणार्थम् एकविशेषणे दत्ते पश्चाद्वायुवारणार्थमस्पर्शत्वे सतीति विशेषणं देयम् । प्रथममेव तस्मिन् दत्ते तु एकविशेषणं नापेक्षितम् । **एकस्य नानाकारत्वं व्याहतमिति ।** ज्ञानातिरिक्ताकाराऽनभ्युपगमादाकारनानात्वं ज्ञाननानात्वमेव पर्यवस्येदित्यर्थः । **एकज्ञानेनेति ।** एकेनैव ज्ञानेन तत्तदन्तावच्छिन्ननानापदार्थोल्लेखे सत्येव तेनेदं सदृशमिति सादृश्यस्फुरणापेक्षितनानात्वोल्लेखो भवतीत्यर्थः । ननु न वयमिति प्राग्विकल्पितेषु पक्षेषु तत्तदन्तासादृश्यानि भासन्तएव भासमानानि च ज्ञानस्याकारः ज्ञानं चैकमेवेति पक्षः । आकाराणामारोपितत्वेन वास्तवज्ञानैकत्वव्याघातो नास्तीति पुनराशङ्कते* **तथा च तेनेदमिति ।** यतो भिन्नत्वे ज्ञानान्तरवदकल्पितः स्यादत आकाराणां ज्ञानाभेदे ऽभ्युपगन्तव्ये परस्परमप्यभेदापत्त्या पदार्थानां ज्ञानज्ञेययोश्च लोकप्रसिद्धो भेदो निन्हुतः स्यादित्यर्थः । **तथा च धर्मिभेदेनेति ।** कस्य चिज् ज्ञानस्य नित्यत्वमाकारः कस्य चिदनित्यत्वमिति धर्मभेदेन व्यवस्थायां विरोधाभावाद्वादिनां विवादो न स्यादित्यर्थः । **आन्तरस्यानभिधेयस्येति ।** अनभिधेयत्वम् अशक्यसमयो ह्यात्मेति स्वयमेव स्फुटीकरिष्यति । **व्यक्तेश्चोक्तमार्गेणाशक्यग्रहत्वादिति ।** यद्यपि मीमांसकमते शक्यविषयभूताया अपि व्यक्तेः शक्तिविषयसामान्यसमानवित्तिवेद्यतया शब्दोल्लेखिसविकल्पकप्रत्ययविषयत्वमस्ति तथापि बौद्धैः
२८३ । ४ स्वलक्षणं निर्विकल्पकमात्रविषय इत्यङ्गीकृतमित्यशक्यग्रहत्वमुक्तम् । **पाशुपतस्य तपस्विनः† इति ।** के चन पाशुपताः स्वकीयशिवभागवतचिह्नतया पूर्वाचारप्राप्त जङ्घायां किङ्किणीबन्ध्यादिकं कुर्वन्ति तत् पृथग्जनाः जनसम्बाधे स्वपरविपर्यासो मा भूदिति कृतं चिन्हमित्यारोप्य कथमस्य विपर्यासस्य

* आशङ्कतइति १ पु० पा० ।

† पाशुपतस्य हि तपस्विन इति मूले पाठः ।

प्रवृत्तिरित्युपहसन्ति तेनापामरप्रसिद्धमात्मख्यापनमित्यर्थः । वर्षातपाभ्यां व्योम्नः किं फलमस्ति वर्षणाद्रत्वम् आतपेन शुष्कत्वं वा फलं नास्तीत्यर्थः । किं तु चर्मणि वर्षातपयोः फलमस्तीति पूर्वार्धस्यार्थे स्थिते उत्तरार्द्धस्यार्थमाह चर्मोपमश्चेदित्यादिना* ॥

नाभाव उपलब्धेः ॥ २८ ॥ २८४

तथा चार्थात्प्रमेयमिथ्यात्वमापत्स्यतइति । यदा ज्ञानाधिकरणके प्रमाणफले अशक्तिव्यावृत्त्यज्ञानव्यावृत्त्यादिसामान्यात्मके तदा तन्मते सामान्यस्य कल्पितत्वात्कल्पितेन प्रमाणेन तत्फलेन च वस्तुसिद्ध्यभावाद्बौद्धाह्यवस्तुमिथ्यात्वमापततीत्यर्थः । न च वस्तुतो भिन्नाभ्यामिति । वस्तुतो भिन्नाभ्यां प्रमाणफलाभ्याम् एकस्याभेदानुपपत्तेरेकज्ञानाभेदात्तयोर्न भेदसिद्धिरित्यर्थः । मा भून्प्रमाणफलयोर्भेदसिद्धिः (सत्येन ज्ञानेन तादात्म्यात्)‡ तयोः स्वरूपतः सत्यत्वसिद्धौ तावता तत्प्रमेयस्य बाह्यवस्तुनः सत्यत्वं सिद्ध्येदित्याशङ्क्य तयोरन्यापोहात्मकसामान्यरूपतया स्वरूपतोऽप्यसत्यत्वमुपपादयतीत्यवतारयति तमेव दर्शयतीति । स्वरूपयन्त-मिति तु पाठे अर्थमिति शेष इति । सरूपयत्तदिति पाठे सरूपयदित्यस्य तदिति विशेष्यपदमस्ति न तु स्वरूपयन्तमिति पाठे ऽतस्तदुचितो ऽर्थमिति पुंलिङ्गविशेष्यशब्दो ऽध्याहृतः । एकपरमाण्वात्मनीति । एकपरमाणुस्वरूपे स्थौल्यं गृह्यते चेत् स्वाभाविकं भवति न त्वेकपरमाणौ स्थौल्यं सम्भवति अतो ऽनेकत्र परमाणौ स्थूलमित्येकाकारेण ग्रहणं न स्वाभाविकमित्यन्योपाधिकं वाच्यमित्यर्थः । व्याघातादिति । भेदे तादात्म्य व्याहतं भेदाभेदपक्षस्तु विरोधान्न सम्भवतीति तच्च लघोक्तम् । अश्विनाविति । यद्यप्यश्विनौ देवभिषजावश्वयुजोर्नक्षत्रयोर्देवता न तु नक्षत्रे एव अश्वयुजौ नक्षत्रमश्विनौ देवतेति श्रुतेस्तथाप्यभेदोपचारादश्विनौ नक्षत्रे इत्युक्तम् । स्वभावहेतुरित्यस्य बौद्धव्यवहारसिद्धमर्थमाह यो यन्मात्रानु- २८७ । २
बन्धीति । प्रत्ययत्वमात्रानुबन्धीति । स्वप्नप्रत्ययादिषु बाह्यानालम्बनत्वदर्शनात् प्रत्ययत्वमात्रप्रयुक्तं निरालम्बनत्वमित्यर्थः । निरालम्बन-

* अत्र चतुर्थं समुदायाधिकरणं पूर्णम् ।

† वस्तुभिन्नाभ्यामिति ५ पु॰ पा॰ । ‡ ( ) एतन्मध्यस्थो ग्रन्थो नास्ति १ पु॰ ।

तायाः प्रत्ययात्मत्वं भावान्तरमभावो हीति तन्मतेनोपपादयति **निरालम्बनत्वस्येति। सर्वे ऽप्यालयविज्ञानसन्तानक्षणा हेतव इति वक्तव्यमिति** । ननु सर्वे हेतव इति वा कश्चिदेव हेतुरिति वा नोच्यते किं तु के चन हेतवः के चिदहेतव इत्युच्यत इति चेद् न । सर्वसन्तानवर्तित्वाविशेषे तथाव्यवस्थितिकल्पनाऽयोगात् । अतो नीलज्ञानकादाचित्कत्वसिद्ध्यर्थं बाह्यसत्त्वमभ्युपेयमिति भावः । **तत्प्रबोधसामर्थ्यमि**त्यस्य विवरण**मुत्तरक्षणगतवासनापरिपाकाख्यप्रबोधसामर्थ्यमिति** । तदनन्तरचकारस्तु टीकास्थस्य नीलज्ञानोपजननसामर्थ्यसमुच्चयार्थस्यानुवादः ।

२९० । ६ **एवं हि संतानान्तरस्य कालविप्रकर्षः स्यादिति** । यदीदानीन्तनचैत्रसंतानसंजातनीलज्ञानसमनन्तरपूर्वक्षणएव मैत्रसंतानोत्पत्तिः स्यात्ततः प्राङ् मैत्रसंतानो न स्यात् तदा प्राङ्मैत्रसंतानरूपापेक्षितव्यवहकार्यभावाच् चैत्रसंताने नीलज्ञानानुदय इति वक्तुं शक्यं न त्वेतदस्ति । तथा सति मैत्रसंतानरूपसंसारस्य सादित्वप्रसङ्गात् । तस्मात्प्रागपि मैत्रसंतानसत्त्वे तु कालविप्रकर्षाऽभावान्नीलज्ञानोदयप्रसङ्ग इति भावः । **स्वसंतानमात्रनिमित्तकत्वं विपक्ष इति** । हेतोरप्रयोजकत्वेन पक्षस्यैव साध्याभाववत्तया विपक्षत्वशङ्कायां हेतोर्विपक्षव्यावृत्तिः संदिग्धा भवति पक्षस्य साध्याभाववत्त्वे तद्वृत्तेर्हेतोर्विपक्षवृत्तितेति । यद्यपि हेतुमति पक्षे साध्यसंदेहः स्वारसिको न व्यभिचारसंदेहत्वेन दोषः । अनुमानमात्रोच्छेदापत्तेः । तथाऽप्यप्रयोजकत्वसंदेहाहितः सो ऽपि तत्र दोष एवेति भावः । **स्वसन्तानमात्रनिमित्तत्वमुपपादयितुमिति** । संतान*मात्रनिमित्तत्वेपि कादाचित्कत्वमुपपद्यतइति हेतोरप्रयोजकत्वमुपपादयितुमित्यर्थः । **नन्वालयविज्ञानक्षणानामिति** । चैत्रमैत्रादिभिन्नसंततिपतितानामित्यर्थः । न च संतानो नाम कश्चिदिति ग्रन्थेन संतानस्वरूपं निषिध्यतइति प्रतिभाति । तदयुक्तम् । अग्रे संतानभेदाऽभेदाभ्यां शक्तिभेदाऽभेदव्यवहारदर्शनादित्याशङ्क्य तद्वाक्यं संतानस्य क्षणोत्पादकत्वनिषेधार्थतया योजयति **क्षणानां संबन्धीति** । संतानस्य क्षणोत्पादकत्वे खलूत्पादकाविशेषादेकविधं सामर्थ्यं स्याद् न तु तदस्तीति भावः । **क्षणभेदेपि न सामर्थ्य**-

* स्वसंतानेति १ पु पा ।

भेद इत्युपपाद्येति । ननूक्तमित्यादिशङ्कावादी सौत्रान्तिकः सत्यभेदे ऽपि
प्रतिविज्ञानव्यक्ति न सामर्थ्यभेदः एकस्मादालयविज्ञानवत्यान्नीलज्ञाने सति
पुनर्नीलज्ञानान्तरानुत्पत्तिप्रसङ्गादतः सर्वेषामपि तेषां सामर्थ्यमास्थेयमिति
नीलज्ञानकादाचित्कत्वाभावप्रसङ्गमुपपाद्य स्वमते तत्प्रसङ्गं परिहरतीत्यर्थः ।
विज्ञानवादी सौत्रान्तिकमते हन्त तर्हीत्यादिना दूषणं वदतीत्यवतारयति
तत्र दूषणमाहेति । एकमेव नील नीलाकारज्ञानं जनयेदित्येतदनन्तरं
न संतानान्तरस्य वर्तीति स्थाने नीलान्तरं सन्तनान्तरवदिति क्व चित्पा-
ठस्तत्र नीलान्तर सन्तानान्तरवर्तिनं नीलाकारज्ञानं जनयेत् पीतसन्तान-
वर्तिगुणान्तरवदित्यर्थो ग्राह्यः । **यथा च नीलपीतादिसन्तानान्तरा-
णामिति** । एकस्मान्नीलसन्तानान्तरस्य पीतसन्तानस्य च भेदाऽविशेषे
ऽपि क्व चिन्नीलज्ञानजननशक्तिः क्व चिन्नेतिवदेकज्ञानएवैक*विज्ञानसन्तति-
पातित्वाविशेषे ऽपि केषु चितज्जननशक्तिः केषु चिन्नेतीति व्यवस्था
कल्प्यते दृष्टानुसारित्वात्कल्पनायाः । अतः सन्तानभेदः शक्तिभेदइव तद-
भेदो ऽपि शक्त्यभेदे न प्रयोजक इति भावः । **अर्थात्पूर्वमिति लभ्य-** २९१
तइति । असंविदितत्वोक्तिसामर्थ्यात् पूर्वज्ञानमिति लभ्यतइत्यर्थः ।
सामर्थ्यमेवोपपादयति **वर्त्तमानस्येति** । संविदितत्वात्तदानीं ज्ञायमा-
नत्वादित्यर्थः । मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तप्रत्ययः । असं-
विदितत्वम् अनागते ऽप्यविशिष्टम् अतस्तद्व्यावर्तनं विधान्तरेण दर्श-
यति **अनागतस्य चेति** । **तादृशज्ञानमिति** । यत्तदानीमज्ञायमानं
सिद्धसत्ताकत्वं तथाभूतज्ञानं साधनेत्यर्थः । इदमपाकूतमित्यादिटीका-
ग्रन्थेन वक्ष्यमाणमर्थं भाष्यारूढं करोति **तत्रभवतेति** । तथापीत्या-
दिटीकार्थं मनसि कृत्वा ऽवतारयति **तत्रासम्भवमिति** । ततः प्राक्तन-
ग्रन्थं तदुपयोगिनमवतारयति **तत्र बौद्धेनेति** । **स्थौल्यं सर्वस्येति** ।
बाह्यार्थसत्त्वे युगपदनेकदिग्देशव्यापि वस्तु स्थूलमिति वक्तव्यम् । तच्च सर्वा-
त्मना कदापि न दृश्यते करतलामलकादीनामप्यधोभागावच्छेदेन दर्शना†-
भावात् । अतो दर्शनाऽदर्शनाभ्याम् एकस्यैव स्थूलवस्तुन आवृतत्वमनावृ-
तत्वं च वाच्यमिति विरुद्धधर्माध्यासाद्भेदः प्रसज्यते । विज्ञानवादे तु नायं

* इत्येकेति ग पु॰ पा॰ । † तदर्शनेति ग पु॰ पा ।

दोषः । तत्र हि विज्ञाने यावानाकारो भासते तावानेवास्ति आवृतस्तु
६१ । १७ नान्तर्बहिर्व्याप्रियत इत्यर्थः । **इदानीमेतमसम्भवमनुमत्येति** । आस्ताम-
सम्भवो ममानिर्वचनीयवादिनो मते ते कथं नासम्भव इति प्रतिपादयती-
त्यर्थः । टीकायां व्यतिरेकाऽव्यतिरेकवृत्ति*विकल्पौ च परमाणोरंशवत्त्वं
चोपपादितानि वैशेषिकपरीक्षायामिति ग्रन्थं विज्ञानवादिमतनिराकरणार्थ-
हेत्वन्तरपरत्वेन योजयति **अर्थस्य ज्ञानाऽभेदे सत्यवयविन्यवयवे
चोक्तदोषान्तरमपि ज्ञाने दुर्वारमित्याहेति** । अवयवी अवयवेभ्यो
भिद्यते न वेति विकल्पो व्यतिरेकाऽव्यतिरेकविकल्पः । भेदपक्षे स प्रत्य-
वयवं कार्त्स्न्येन वर्तते एकदेशेन वेति विकल्पो वृत्तिविकल्पः । एताव-
वयविदोषौ । सूक्ष्मावयवः परमाणुरपि सांशो ऽनंशो वेति विकल्पपूर्वकं
सांशत्वावश्यम्भावापादनम् अवयवदोषः । एतद्दोषत्रयं विज्ञानवादिमते
ऽपि स्यात् । न हि विज्ञानवादिना ऽस्माभिरिव जगदनिर्वचनीयमि-
त्युच्यते येन तस्येत्थं विचाराऽसहत्वं भूषणं स्यात् किं तु बाह्यास्ति-
त्ववादिभिर्यथावद्बहिरस्तीत्युच्यते तत्सर्वमन्तः सत्यमेवास्तीत्युच्यते
सत्यत्वे च बहिरिवान्तरप्येते विकल्पदोषाः प्रादुःष्युरिति भावः । अमु-
मेव टीकाग्रन्थमवयविवादिनं प्रत्युक्ता दोषाः समुदायवादिनं प्रत्यपि
स्युरिति प्रासङ्गिकसौत्रान्तिकमतनिराकरणार्थत्वेनापि योजयति **यद्वा
विज्ञानादिभिन्नस्थूलार्थ इति** । केषु चित्कोशेषु द्वितीयावतारिकैव यद्वेति-
शब्दरहिता दृश्यते न प्रथमावतारिका । यद्यप्ययं व्यतिरेकाऽव्यतिरेका-
दिटीकाग्रन्थः सर्वैरेव प्रमाणैर्बाह्यार्थ उपलभ्यमानः कथं व्यतिरेकाऽव्यति-
रेकादिविकल्पैर्न संभवतीत्युच्यत इति भाष्यानूदितविज्ञानवादिकृतबाह्यास्ति-
त्वनिराकरणार्थो† व्यतिरेकादिविकल्पविवरणमत्र न कर्तव्यम् अधस्तादेव
कृतमित्येतदर्थः प्रतिभाति तथापि न केवलमयं दोषः ममानिर्वचनीयवा-
दिनो मते न प्रसरतीत्येतावत् किं त्वन्तः सदिति वादिनो बहिः सदिति
वादिनश्च बौद्धस्य मते वैशेषिकमत इव प्रसरतीत्युष्ट्रलगुडन्यायो ऽप्यनेन
ग्रन्थेन सूचित इति प्रदर्शयितुमस्य ग्रन्थस्य विधान्तरेण द्वेधा तात्पर्यमा-
२६२ ३ चार्यैरुक्तम् । **परमाणूनिति** । ज्ञानाकाररूपानित्यर्थः । चाक्षुषस्य प्रभा-

---

* व्यतिरेकवृत्तीति १ पु० पा० ।   † निराकरणार्थत्वेति २ पु० पा० ।

रूपादिविज्ञप्तिबोध्यत्वनियमो नास्ति स्तनकविनाशादिवपुर्याद्ये व्यभिचा·
रादित्याशङ्क्य मनुष्योऽसि विशेषितमित्याह मनुजग्रहणमिति । वास्य- २९२
वासकत्वमविशेषापत्तये हेतुरिति । उत्तरज्ञानस्य नीलाद्याकारसमर्पणोप·
युक्तवासनाशक्तिमत्पूर्वज्ञानं वासकम् उत्तरज्ञानं वास्यम् । अनयोः संततो
वास्यवासकत्वं तस्य सविकल्पकत्वादिदोषप्रसङ्गहेतुत्वेनतया विवक्षितविशे·
षेण वासनाया अत्र सद्धेतुत्वमुक्तं भवति । अनादिवासनोद्भूतेति संमति·
ग्रन्थेनैव च तथैव स्फुटीकरिष्यते । भाव्यमिति । भाव्यं नीलादिकम् उभयं
विज्ञानतद्विषयात्मकं च कर्मामूर्तत्वादिरमूर्तत्वं सत्यमसत्यं च कर्तृ
समाश्रयतइति सत्यादिशब्दार्थो भावाभावोभयात्मक उक्त इत्यर्थः । न
चास्त्येकः प्रतिसंधाता नैतावता वाह्यार्थसिद्धिरित्याशङ्क्याह त्वया च स
नेष्यतइति । व्यापिनित्यस्य क्षणिकविज्ञानसन्तानव्यतिरिक्तस्यास्तित्वे
ऽपि तन्मतभङ्गस्तुल्य इति भावः । चोदयतीति ग्रन्थमाशङ्कानिराकरणार्थत्वे·
नावतारयति विज्ञानस्य स्वव्यतिरिक्तार्थविषयत्वइति । विज्ञानग्र-
हणमात्रएवेति । अन्तःकरणवृत्तिरूपं यद्विज्ञानं तन्नीलादिविषयग्रहणं
तन्मात्रएव स्वीकृते तत्प्रतिविम्बिते। विज्ञानसाक्षी विज्ञानविषयं ग्रह·
णान्तरं नापेक्षते स्वयमेव तद्ग्राहकरूपत्वादतो ज्ञानग्रहस्येति भाष्यार्थ
इत्यर्थः । अनुभवितुर्व्याप्ताविति । अनुभवितृकर्तृकव्याप्तावित्यर्थः । अनेन
साक्षिविषयेति विज्ञानसाक्षिग्रहणा†काङ्क्षानुत्पादादिति भाष्यं विज्ञानसाक्षिणः
कर्तुर्विज्ञानविषयग्रहणाकाङ्क्षानुत्पादादित्येतदर्थपरतया पूर्वं व्याख्यातं तद्वा-
च्यमनेन ग्रन्थेन विज्ञानसाक्षिकर्मकग्रहणान्तराकाङ्क्षानुत्पादादित्यपि व्याख्यातं
भवतीत्यर्थः । वियद्वस्त्विवेति । कुम्भस्योत्पत्तौ सत्यां तस्य या वियत्सं-
पूर्णता सा वियद्वस्तुस्वभावानुरोधात्सर्वत्र व्यापकस्य वियतो ऽयं स्वभावो
यदवच्छेदकस्य कुम्भादेरुत्पत्तौ सत्यां तेनावच्छिद्यतइति । एवंभूतात्स्व-
भावानुरोधादेव न तु कारणान्तरात्सा संपूर्णता । एवं धियां दृशा संपूर्ण-
तापि दृग्वस्तुस्वभावादेवेति श्लोकार्थः । स्वतःसिद्धप्रकाशतया ज्ञानस्य २९४
ग्राह्यत्वमिति संबन्ध इति । ज्ञानस्य ग्राह्यत्वमित्यस्यानुषङ्ग इत्यर्थः ।
व्यापकसाक्षिसंबन्धस्येति । अविद्यावच्छिन्नो जीव एव साक्षी स १

* बौद्ध इति पु० भा० ।　　† विज्ञाने साक्षिर्दर्शनेति १ पु० ।

विषयप्रदेशो ऽप्यस्तीति विषयस्यापि तत्संबन्धस्तुल्य इत्यर्थः । तदधीनाभिव्यक्तिकेति । व्यापको ऽपि साक्षी स्वच्छान्तःकरणावच्छिन्नो ऽनावृतो विषयावच्छिन्नस्त्वावृत इत्यावरणभङ्गार्थं वृत्त्यपेक्षेत्यर्थः । एतत्प्रपञ्चस्त्वस्मत्कृते सिद्धान्तसंग्रहे द्रष्टव्यः ।

२९४ । १७ यथा चाक्षुषी प्रमेति । यद्यपि दृष्टान्ते चक्षुःप्रमात्मकं व्यञ्जकमेकं रूपं वायुश्चेति व्यङ्ग्यमव्यङ्ग्यं च भिन्नं दार्ष्टान्तिके व्यङ्ग्यसाक्षिचैतन्यमेकम् अन्तःकरणं घटादिकं चेति व्यञ्जकमव्यञ्जकं च भिन्नं तथापि व्यङ्ग्यव्यञ्जकभावो वस्तुमहिम्ना व्यवस्थित इत्येतावन्मात्रे दृष्टान्तः सर्वात्मतासमस्तु दृष्टान्तः प्रागेवाचार्यैर्दर्शितः । मुकुरतले मुखमित्यनेन घटमुकुरयोर्मुखसान्निध्याविशेषे ऽपि स्वच्छो मुकुर एव मुखस्य व्यञ्जको न घट इति । आत्मा ज्ञेय इति । नन्विदं शरीरं सात्मकं प्राणादिमत्त्वादित्यानुमानिकज्ञानविषयत्वेन चेद्यो सिद्धानित्यादिशब्दज्ञानविषयत्वेन च सिद्धसाधनम् । प्रकाशमानत्वं ज्ञेयत्वं चेत्साध्याऽविशेषः । अन्यच्च दुर्वचमिति चेत् । आत्मा अपरोक्षज्ञानविषयः अनुमितिशाब्दज्ञानाऽजन्यव्यवहारविषयत्वादित्यत्र तात्पर्यात् । कथं सकलविशेषोपसंग्रहवतीति । यद्यपि व्यवहारविषयत्वमेक एव धर्मो हेतुः न तु धूमवदनेकव्यक्तिरूप इति नात्र सकलहेतुव्युत्पत्त्युपसंग्रहापेक्षा तथापि सकलहेत्वाश्रयोपसंग्रहापेक्षास्ति यो यो धूमवान् सो ऽग्निमानित्यादिनोदाहरणवाक्येन व्याप्तिबोधकेन वीप्सितयच्छब्दोपस्थापितसकलहेत्वाश्रयेषु साध्यसंबन्धबोधनात्तदनुसारेण व्याप्तेर्यावद्धेत्वाश्रयवर्तिसाध्यसामानाधिकरण्यरूपताया वक्तव्यत्वादिति भावः । आगन्तुको यस्य नास्ति सो ऽनागन्तुकः स चा सौ प्रकाशश्चेति बहुव्रीहिगर्भकर्मधारयपरिग्रहे को ऽत्रागन्तुको निषेध्य इति जिज्ञासायामाह अर्थादिति । नित्याऽपरोक्षत्वहेतूपादानसामर्थ्यादागन्तुकस्तद्विषयप्रकाशो निषेध्य इत्यर्थाल्लभ्यते इत्यर्थः । भासमानत्वमिति । आवृतत्वादभासमाने ऽपि पूर्वोक्तेन भासतेतिशब्देन बोध्यत्वमस्तीति तदपि भासमानं भवेदतो बाधविधुरमित्युक्तम् । तथा सत्यसंभवः । ब्रह्मातिरिक्तस्य सर्वस्य

२९५ । ७ बाध्यत्वादिति व्यावहारिकविशेषणम् । वेदान्तजन्यवृत्त्युपाधाविति । तथा च यदुपहितं ज्ञेयं न तत्स्वप्रकाशत्वेनेष्यते यत्त्वनुपहितं तदिष्यते

न तज्ज्ञेयमिति मानभव इत्यर्थः । ननु वृत्त्युपहितस्य तेन रूपेण तद्विषयत्वं नोक्तं किं तु वृत्त्युपरागे सति वृत्त्यंशं परित्यज्य केवलस्यात्मनस्तद्विषयत्वमुक्तं वृत्त्युपरागोऽपि सत्तयैवोपयुज्यते न प्रतिभास्यतया । अतो वृत्तिसंसर्गे सत्यात्मा विषयो भवति न तु स्वत इति अतः स्वप्रकाशस्य केवलस्यात्मनो वृत्तिविषयत्वाङ्गीकारादज्ञेयत्ववचनमयुक्तमिति चेद् न । उपाध्यघटनीयज्ञानविषयत्वाभावस्य विवक्षितत्वात् । न चैवं मुकुरोपाधिघटनीयज्ञानविषयभावे मुखप्रतिबिम्बे ऽतिव्याप्तिः । प्रतिबिम्बस्य बिम्बाभिन्नत्वाद्बिम्बस्य च मुखप्रतिबिम्बोपाधिं विना ऽपि ज्ञेयत्वात् । **संविदभिन्नत्वं चेति** । इन्द्रियत्वावच्छिन्नेन्द्रियजन्यज्ञानत्वं ज्ञानापरोक्ष्यं तद्विषयत्वं विषयापरोक्ष्यमिति विभागो नेष्यते किं तु सर्वानुगतमापरोक्ष्यं संविदभिन्नत्वं तच्च संविद्रूपस्यात्मनः स्वतःसिद्धं तदन्यस्य बाह्यस्य घटादेरान्तरस्यान्तःकरणवृत्त्यादेश्च संविदभेदेनाध्यस्तत्वादभिव्यक्तसंविदभेदाध्याससिद्धमित्यर्थः । **तत्समर्थनार्थमिति** । आत्मनो नित्यापरोक्षसंविदभिन्नत्वसमर्थनार्थमित्यर्थः । **शशवदिति** । हेतुद्वये ऽपीदं विशेषणं घटादिव्यावृत्त्यर्थम् । अत एव तस्य व्यतिरेकदृष्टान्तता । यद्यप्यात्मनो वेदान्तप्रतिपाद्याखण्डानन्दरूपेणावृतत्वात्तेन रूपेण संदिग्धत्वमस्ति अत एव तस्य शास्त्रविषयतोक्ता प्रथमसूत्रे तथापि तस्य ज्ञानसुखादिसाक्षिचैतन्यरूपेणानावृतत्वमसंदिग्धत्वं चास्तीति द्वितीयहेतोर्नासिद्धिः । **न चासिद्धविशेषणत्वम्** । प्रथमानुमानस्येति शेषः ।

एतदन्येति । एतस्मात्पक्षीकृतादन्यत्वेन विशेषितं यज्ज्ञेयत्वं २६५ ।
तद्रहितं यद्भासमानं तदन्येत्यर्थः । दृष्टान्ते पक्षादन्यत्वमादाय साध्यसिद्धिः । पक्षो हि ज्ञेयः सन्नपि पक्षान्यत्वाभावात्तद्विशिष्टज्ञेयत्वरहितो भवति भासमानश्च तदन्यत्वं घटे संपन्नं पक्षे तु न पक्षादन्यत्वमादाय साध्यसिद्धिः बाधात् । किं तु पक्षादन्यत एव कुतश्चित्पक्षान्यत्वविशिष्टज्ञेयत्वरहिताद्भासमानादन्यत्वमादाय पक्षे साध्यसिद्धिर्वाच्या प्रसिद्धघटादिमध्ये च पक्षादन्यत्वविशिष्टज्ञेयत्वरहितं भासमानं वस्तु नास्ति सर्वस्यापि भासमानस्य घटादेः पक्षादन्यस्य पक्षान्यत्वविशिष्टज्ञेयत्ववत्त्वात् । अतो यस्मादन्यत्वमादाय पक्षे साध्यपर्यवसानं वाच्यं तत्किं सिद्धमसिद्धं पक्षाद-

न्यत्वविशिष्टज्ञेयत्वरहितं भासमानं वस्त्वनेनानुमानेन सिध्यति । तत्र च विशिष्टराहित्यं न पक्षान्यत्वविशेषणाभावाद्वक्तुं शक्यम् । यतो ऽन्यत्वं पक्षस्य साध्यते तस्य पक्षान्यत्वनियमादतस्तत्र ज्ञेयत्वरूपविशेष्याभावेन विशिष्टराहित्यं वाच्यमित्यज्ञेयभासमानवस्तुसिद्धिः । अतस्तस्य साध्यप्रसिद्ध्युपपादकस्यानुमानस्यानन्तरं क्व चित्क्व चित्कोशे अनुमानान्तरप्रदर्शनं तत्र हेतुविशेषणव्यावर्त्यकथनमाश्रयासिद्धिपरिहरणं साध्यार्थकथनं तत्रैव सिद्धसाधनत्वशङ्कानिराकरणार्थत्वेन न चैतदित्यादिटीकायन्थवाक्यावतारणं च दृष्टं तद्विलिख्यते। तथा देवदत्तस्य तदात्मास्तित्वजिज्ञासायामेकस्मिन् क्षण एव तदात्मनिष्ठतदात्मविषयसंदेहध्वंसो ऽसंदिग्धा ऽविपरीततदात्मानुभवजन्यः एतदात्माभावप्रमैतदात्मविपर्ययाभ्यामजन्यत्वे सति जिज्ञास्यमानैतदात्मगोचरसंदेहनिवृत्तित्वात् पुरुषान्तरगतैतदात्मगोचरतथाविधसंदेहनिवृत्तिर्वस्तुनि नास्तीत्यभावप्रमया नास्तीति भ्रमेण वा ऽनवधानेन सा भवति । सा च न भावतत्त्वानुभवजन्येति तत्र व्यभिचारः स्यात्तन्निवृत्त्यर्थमेतदात्माभावेत्यादिविशेषणद्वयम् । न च वाच्यमात्मनः शश्वदसंदिग्धत्वे कथं संदेहध्वंसः प्राप्त्यभावात् संदिग्धत्वे च कथं शश्वदसंदिग्धत्वमिति यतः शश्वदसंदिग्धत्वे ऽपि पुरुषान्तरारोपितनास्तित्वकोटिकः संशयः स्यात् स च स्वरूपानुभवान्नेत्स्यते । आत्मानुभवजन्य इत्यत्र चास्तीति व्यवहारहेतुरनुभव उक्तः स स्वरूपभूतो ऽपि संभवतीति ।

मदुक्तविधानुभवजन्यत्वं संदेहध्वंसस्य सिद्धं साध्यते आत्मविषय-
२९५ । १७ तथाविधानुभवाभ्युपगमादित्याशङ्क्याह न चैतदिति । यदि ततो ऽन्यो ऽनुभवः संशयच्छेत्ता स्यात्तर्हि तदात्मजिज्ञासायामप्यनुभवस्यानुदयसंभावनया ऽऽत्मसंदेहः स्यादित्यर्थः । स्यादेतत् । आत्मजिज्ञासायां तद्विषयो संविदुदयतएवेति तत्राह अनवस्थेति । यश्चेश्वरस्तथाविधानुभवजन्यत्वेन सिद्धसाधनत्वमाह सं प्रत्यनीश्वरेति विशेषणीयम् ।

तदाभ्यां तर्काभ्यां परिशोधितमनुमानं स्वयंप्रकाशत्वे पर्यवस्यतीत्याह तस्मादिति । यद्यैवमिदं प्रक्षिप्तमिव प्रतिभाति । न हि साध्यप्रसिद्ध्यर्थानुमानवदिहानुमानान्तरमपेक्षितम् । संदेहानुत्पादनियमवत्संदेहनिवृ-

तिनियमो ऽप्यनागन्तुकात्मानुभवसद्भावे साधकान्तरं भवेद् वस्तुतः साधकान्तरमपि न भवति । यतस्तत्राश्रयासिद्धिपरिहारार्थं न हि सर्वानुभवसिद्धे सुखाद्यनुभवितरि साक्षिणि प्रत्यक्षदृष्टे घटइव पुरुषान्तरोक्तिमात्रेण नास्तित्वसंदेहः कस्य चिदुदेति यतः संदेहनिवृत्तिः पक्षे सिध्येत् । चार्वाको ऽपि खल्वहमनुभवस्य शरीरं विषयं प्रदर्श्यातिरिक्तमात्मानमपलपति न त्वहमनुभवमेवापलपति । न च चार्वाकोपन्यस्तशरीरात्मवादयुक्तिश्रवणक्षुभितहृदयस्य शरीरातिरिक्तात्मास्तित्वसंदेहो भवतीति तन्निवृत्तिः पक्षे स्यादिति वाच्यम् । तस्य संदेहस्य एक आत्मनः शरीरे भावा*दित्यधिकरणोक्तस्थिरन्यायानुसंधाननिवर्त्यस्य शरीरविषयत्वेन शङ्कितान्यथासिद्धिना ऽनुभवमात्रेण निवृत्त्यसंभवात् । किं च टीकायां स्वात्मनि संदेहानुत्पाद एव प्रपञ्चितः संदेहनिवृत्तिस्तु लेशतो ऽपि न स्पृष्टा । अतस्तत्र संदेहाद्यनुत्पादप्रपञ्चनानन्तरं प्रकृत्य तयोर्न चैतदन्याधीनसंवेदनत्वे घटते अनवस्थाप्रसङ्गश्चोक्त इति वाक्ययोः संदेहनिवृत्तिपक्षकानुमानविषयसिद्धसाधनत्वशङ्कानिराकरणार्थत्वेनावतारणमपि न युक्तम् । उक्तानुमानयोः स्वप्रकाशत्वानुमाने विषयपरिशोधकतर्कत्वोक्तिरप्ययुक्ता । आद्यानुमानस्य साध्यप्रसिद्धिसंपादनार्थत्वात् । द्वितीयानुमानस्य कथं चिददृष्टत्वे ऽपि नित्यानुभवे साधकान्तरत्वात् । तस्मान्न चैतदिति टीकावाक्यमात्मनो नित्यापरोक्षत्वाभावे कदा चिदात्मनि संदेहः स्यादित्येतत्परम् । आत्मविषयसंविदन्तरोत्पादनियमे वस्तुसंदेहानुत्पाद इति शङ्कावारणार्थमनवस्थाप्रसङ्गश्चोक्त इत्येव युक्तम् । तथैवावतारणं कोशान्तरेषु दृश्यते तेषु खलु साध्यप्रसिद्ध्युपपादकमनुमानानन्तरमित्थं न चैतदित्यादिवाक्ययोरवतारणम् ।

विपक्षे दण्डमाह न चैतदिति । यदि नित्यसाक्षात्कारत्वमात्मनो न २६५ ।
स्यात्तर्हि कदा चिदात्मनि संदेहः स्यादित्यर्थः । स्यादेतद् आत्मविषया संविदुदेत्येवेति तत्राह । अनवस्थेति । एवंग्रन्थेन व्याख्या†नानन्तरं केषु चित्कोशेषु अधिकशङ्कापरिहारग्रन्थो दृश्यते ननु सुखादीनामपि स्वसत्तायां

* न्यायसू॰ अ॰ ३ आ॰ २ सू॰ ५३ । † ग्रन्थव्याख्येति १ पु॰ पा॰ ।

संदेहाभावसाम्ये कथमात्मैव प्रकाश उच्यते आत्मप्रकाशेनैवानुगतेन तेषामापरोक्ष्यसंभवे प्रत्येकं न स्वप्रकाशत्वं कल्प्यमिति स्पष्टार्थो ऽयं ग्रन्थः ।

२९५ । २१ विपक्षे दण्ड उच्यतइति । अनुकूलतर्क उच्यते इत्यर्थः । साधनव्याप्त्यनुमानस्येति । स्तम्भादिप्रत्ययो निरालम्बन इति दर्शितानुमानस्येत्यर्थः । औपचारिको व्याख्यातव्य इति । प्रमाणामिलितसंस्कारजत्वसादृश्यात् स्वप्नज्ञाने स्मृतिशब्दो गौणो व्याख्येय इत्यर्थः । ननूपलब्धिशब्दो ऽनुभवमात्रपरः प्रसिद्धः किमिति षट्प्रमाणजनितत्वेन विशेष्यतइत्याशङ्क्याह एवमव्याख्यानइति । तेन संदिग्धवस्तुधर्म इति तेन भाष्येण सूचितमित्यन्वयः । ननु किमन्याधिष्ठानतत्त्वबोधनेनेति । प्रत्यक्षादिप्रमाण*बोधितविपरीताधिष्ठानतत्त्वबोधकं प्रमाणं निरधिष्ठानभ्रमं वदतः शून्यवादिनो मते न संभवति चेतन्मा भूत्प्रत्यक्षादिप्रतीतवस्तुगतं यद्विचारासहत्वं तदेव बाधकप्रमाणं भूत्वा प्रत्यक्षादीनां सांव्यवहारिकं प्रामाण्यं तद्विषयाणामतात्त्विकत्वं च गमयतीत्यर्थः । सदसदादिपक्षेति । विचारासहत्वं नाम कश्चिद्वस्तुभूतो धर्मो ऽस्त्येव स धर्मः सत्त्वासत्त्वसदसत्त्वानुभयात्मकत्वपक्षेष्वन्यतमपक्षपरिग्रहेण वस्तुभूतो व्यवस्थाप्यते स तु वस्तुतः सत्त्वादिरूपेण विचारं न सहतइत्येतावदेवोच्यतइति प्रथमविकल्पार्थः । विचारासहत्वे सत्त्वादिपक्षान् परित्यज्य शून्यमेव लभ्यत†इति द्वितीयविकल्पार्थः । असत्त्वाऽव्यवस्थाप्रतिज्ञाविरोध इति । किंचिदपि वस्त्वसत्त्वेन व्यवस्थापयितुं न शक्यतइति तत्प्रतिज्ञाविरोध इत्यर्थः । इति प्रतिभातीति । यद्यपि बौद्धव्याकरणे पश्यनादिशब्दाः साधुतया व्युत्पादितास्तथापि अनादिसिद्धप्रयोगसिद्धसकलसाधुशब्दसंग्राहकपाणिनीयाद्यपरिगृहीतत्वादसाधवः प्रतिभान्तीत्यर्थः‡ ॥

२९८ । ६ नैकस्मिन्नसंभवात् ॥ ३३ ॥

अस्तीति कायन्तइति । केधातोरादेच उपदेशइत्यात्वे कर्मणि घञि आतो युगिति युगागमे च सति काय इति रूपम् । शास्त्रीयेति । शास्त्रीयया तत्प्रतिपादिताग्निहोत्रादियागप्रभवया बाह्यया चेष्टारूपया प्रवृत्त्ये-

* प्रत्यक्षादिषु प्रमाणेति क पु० पा० । † पश्यतइति क पु० पा० ।
‡ अत्र पञ्चमम् अभावाधिकरणं पूर्णम् ।

स्यार्थः । आन्तरवृत्ति*र्यंसद्रूपा परकीया स्वयमप्रत्यक्षा साप्यूर्ध्वानुमाने लिङ्गं भवेद् अतो बाह्यग्रहणम् ।

ऊर्ध्वगमनशीलो हीति । ऊर्ध्वगमनं जीवस्य स्वभावः । देहे २९८ स्थितिस्तत्प्रतिबन्धककर्माधीनेति मतमाश्रित्योक्तम् । के चित्तु चिरकालशरीरावस्थितप्रयुक्तबन्धमुक्तावूर्ध्वगमनं मन्यन्ते । ते खल्वेवमाहुः । बन्धमुक्तस्योर्ध्वगमनं दृष्टं यथा पञ्जरमुक्तशुकस्य यथा वा वारिनिर्भिन्नपरिवर्तैरण्डबीजस्य यथा वा दृढपङ्कलिप्तजलनिमज्जनप्रक्षीणपङ्कलेपशुष्कालाबुफलस्य । इह त्वनादिकालप्रवृत्तबन्धविगमात्सततोर्ध्वगमनमिति । आस्रवादिषु पञ्चसु अन्तिमद्वयं फलरूपम् आदिमत्रयं तत्साधनम् । प्रवृत्तिरास्रवशब्दोक्तैकविधेति भेदः ।

> आस्रवः स्रोतसां द्वारं संवृणोतीति संवरः ।
> आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् ॥

इति जैनोक्तः संवरः शमदमादिरूप इति टीकायामुक्तम् । तथादिशब्देन गुप्तिसमित्यादिर्गृह्यते । कायवाङ्मनोनिग्रहो गुप्तिः । भूमिगतजन्तुहिंसापरिहाराय प्रहते मार्गे सम्यगादित्यरश्मिप्रकाशिते निरीक्ष्य संचरणं नियताहारविषेवणमित्यादिकं समितिरिति जैनैः परिभाष्यते । **आस्रावयति गमयतीति ।** आस्रवत्यनेन जीव इत्यायन्तादास्रवशब्दः । ण्यन्ताच्चेदास्राव इति स्यात् । **बन्धोऽष्टविधमिति ।** आस्रवः कर्मणा बन्धो† निर्जरस्तद्विमोचनमिति जिनदत्तोक्ते टीकायामन्यो न्विति दर्शिते तु मते बन्धः कर्मापादिता जन्मपरंपरेति द्रष्टव्यम् । **पूर्वोक्त आस्रवो ऽपीति ।** आस्रव इन्द्रियप्रवृत्तिः । घात्यघातिकर्मणामाकरयन्थयोर्विवेचितानि । अन्ये तु विधान्तरेण तद्विवेकमाहुः । जैनमते ज्ञानदर्शनसुखवीर्यगुणकस्य जीवस्य ज्ञानादिगुणानां मोक्षदशायामाविर्भविष्यतां संसारदशायां प्रतिघातकानि ज्ञानावरणीयादीनि पापरूपाणि चत्वारि घातिकर्माणि । शरीरसंस्थानतदभिमानतास्थितितत्प्रयुक्तसुखादिनिमित्तानि चत्वार्यघाति‡क-

* प्रवृत्तिरिति १ पु० पा० ।   † कर्मणो बन्ध इति १ पु० पा० ।
‡ सुखादिनिमित्तानि मत्वा सकलजनर्मघातीति १ पु० पा० ।

मेणि पुण्यमिश्रितत्वात्पुण्यरूपाणीति । नामिकाद्भेदनीयस्य भेदमाह
९९ । २ **सक्रियस्य बीजस्येति । कायतीति ।** आयुः कायतीत्यर्थे कैधातोरात्वे
आतो ऽनुपसर्गे कः इति कप्रत्यये आतो लोप इटि चेत्याकारलोपे सति
गोद इतिवदायुष्कमिति रूपम् । युगपत्तद्विवक्षायामित्यर्द्धं व्याचष्टे **युगप-
दस्तित्वनास्तित्वयोरिति ।** तत्राशक्तिमुपपादयति **वाचः क्रमवृत्ति-
त्वादिति । आद्या ऽवाच्यविविवक्षायामिति** सार्धश्लोके कथमाद्या-
दिशब्दोक्तानां सत्त्वासत्त्वतदुभयसमुच्चयानामवाच्यत्वम् । न ह्यत्र चतुर्थ-
भङ्गइवाऽशक्तिरस्तीत्याशङ्क्य तेष्वप्यन्त्येन सह युगपदाद्येन सह युगपदे-
कैकेन सह युगपदित्यध्याहारेणाशक्तिमुपपादयति **आद्यो ऽस्तित्वभङ्ग
इत्यादिना ।** एवं व्याख्याने पञ्चमादिभङ्गानां चतुर्थभङ्गात् फलतो भेदा-
भावमाशङ्क्य प्रकारान्तरेण व्याचष्टे **अथ चेति । तेष्वेव पक्षेष्विति ।**
सत्त्वैकान्तपक्षः सांख्याद्यभिमतः सत्कार्यवादः । असत्त्वैकान्तपक्षः शून्य-
वाद्यभिमतो ऽसद्वादः । क्रमेण सदसत्त्वपक्षो वैशेषिकाद्यभिमतो घटादीनां
मध्ये सतां पूर्वं पश्चाच्च प्रागभावप्रध्वंसप्रतियोगित्वरूपमसत्त्वमिति वादः ।
एतेषां पक्षेषु पूर्वपक्षा उत्तिष्ठन्ति सत्त्वं निर्वक्तुमशक्यं प्रागभावादिप्रतियोगित्वं
निर्वक्तुमशक्यमिति तेषां पूर्वपक्षिणां ये तत्तदनिर्वाच्यत्वैकान्त्यवादाः तेषां
भङ्गाः पञ्चमषष्ठसप्तमा इत्यर्थः । **नन्वस्ति स्यादिति ।** अस्तीति वर्तमा-
नत्वं बोध्यते स्यादिति कालत्रयाऽनवमर्शिविधेयत्वम् । तयोः परस्परविरु-
द्धयोः कथमेकस्मिन्नर्थे पर्यवसानं युगपद्बोध्यत्वमित्यर्थः* ॥

३०१ । २४ **पत्युरसामञ्जस्यात् ॥ ३७ ॥**

नकुलीशपाशुपता मन्यन्ते कार्यकारणयोगविधिदुःखान्ताः पञ्च पदार्थाः पशुपाशविमोक्षाय बोद्धव्याः । तत्र कार्याणि पृथिव्यादीनि पञ्चतत्त्वानि रूपादयः पञ्च गुणाश्चेति दशविधानि कारणानि ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च मनोबुद्ध्यहंकाररूपाणि त्रीण्यन्तःकरणानीति त्रयोदशविधानि । ध्यानादिरूपो योगः । धर्मार्थव्यापारो विधिः । स व्रतद्वाररूपेण द्विविधः । भस्मस्नानभस्मशयनोपहारादि व्रतम् । आद्ये प्रसिद्धे । उपहारः

* अत्र षष्ठम् एकस्मिन्नसंभवाधिकरणं पूर्णम् ।

षड्विधः । हसितगीतनृत्तहुडुक्कारनमस्कारजपभेदेन । तत्र हसितमट्टहासः । गीतं गान्धर्वशास्त्रप्रकारेण । हुडुक्कारो जिह्वातालुसंयोगान्निष्पाद्यमानो वृषभनादसदृशो नादः । यत्र लौकिका न भवन्ति तत्र चत्वार्येतानि निगूढं प्रयोक्तव्यानि । जपनमस्कारौ प्रसिद्धौ । द्वाराणि क्राथनस्पन्दनमन्दयानशृङ्गारणातत्करणतद्भाषणभेदेन षड्विधानि । असुप्तस्यैव सुप्तलिङ्गप्रदर्शनं क्राथनम् । वातव्याध्यभिभूतस्येव शरीरावयवानां कम्पनं स्पन्दनम् । उपहतपादेन्द्रियस्येव गमनं मन्दयानम् । रूपयौवनसंपन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति तदाचरणं शृङ्गारणा । कार्याकार्यविवेकविकलस्येव लोकनिन्दितकर्मकरणमपि तत्करणम् । व्याहतापार्थकादिशब्दोच्चारणमपि तद्भाषणम् । दुःखान्तो द्विविधः । अनात्मकः सात्मकश्च । अनात्मकः सर्वदुःखानामत्यन्तोच्छेदः । सात्मकस्तु दृक्क्रियाशक्तिलक्षणमैश्वर्यम् । तत्र दृक्शक्तिरेकापि विषयभेदात्पञ्चधोपचर्यते । दर्शनं श्रवणं मननं विज्ञानं सर्वज्ञत्वं चेति । सूक्ष्मव्यवहितविप्रकृष्टाशेषचाक्षुषस्पार्शनादिविषयं ज्ञानं दर्शनम् । अशेषशब्दविषयं ज्ञानं श्रवणम् । निरवशेषशास्त्रविषयं ज्ञानं मननम् । ग्रन्थतो ऽर्थतश्चा*संदिग्धज्ञानं विज्ञानम् । सर्वज्ञत्वं प्रसिद्धम् । क्रियाशक्तिरेका ऽपि त्रिविधोपचर्यते । मनोजवत्वं कामरूपित्वं विकरणधर्मित्वं चेति । निरतिशयशीघ्रगामित्वं मनोजवत्वम् । कर्मानपेक्ष्य स्वेच्छयैवानन्तशरीरेन्द्रियाधिष्ठातृत्वं कामरूपित्वम् । उपसंहृतशरीरेन्द्रियस्यापि निरतिशयैश्वर्यशालित्वं विकरणधर्मित्वम् । पशुपतिस्तु परमेश्वरः सर्वत्रापि कार्ये निमित्तं पशूनां कर्मानपेक्ष्य स्वेच्छयैव फलप्रदः । निरतिशयस्वातन्त्र्यशालित्वात् । न चैवं कर्मवैयर्थ्यम् । ईश्वरेच्छानुगृहीतकर्मणः साफल्यात् तदननुगृहीतस्य कर्मणः पर्जन्याननुगृहीतकृषिकर्मण इव नैष्फल्ये ऽपि दोषाभावात् तदनुग्रहसंभावनया कर्मसु प्रवृत्त्युपपत्तेरिति । एवं पाशुपतानामन्येषां च सांख्यादीनां केवलं निमित्तकारणमीश्वर इति मतमिह निराक्रियते **स्वगुणाऽप्रख्यापनेनेति** । तदप्रख्यापनं क्राथनस्पन्दनादिभिः । तथानुमानं तावन्न संभवतीति टीकायां तत्रेत्यस्य पूर्वग्रन्थानुसारेण यद्यपीश्वरस्य निमित्तमात्रत्वमित्यर्थः प्रतिभाति तथापि परा-

* अतो ऽर्थतश्चेति २ पु॰ पा॰ ।

भिमतान्यनीश्वरानुमानानि स्वयमुद्भाव्य निराकर्तुंकामस्तदर्थं तवेत्येतत् ईश्वरपरामर्शीति व्याचष्टे ईश्वर इत्यर्थ इति ।

३०३ । २० किं धर्मविषयत्वसंसर्गान्योन्याभाववत्त्वमिति । ननु घटादिष्वपि संसर्गाभावो नाम संसर्गप्रतियोगिकाभावो न भवति येनात्र संसर्गस्य संसर्गाभावो वा तस्यान्योन्याभावो वेति विकल्पः प्रवर्तेत किं तु घटादिप्रतियोगिकावेव संसर्गाभावान्योन्याभावौ तत्र प्रतियोगिनः संसर्गमारोप्य यस्याभावस्य बुद्धिरिदमिह नास्तीति स संसर्गाभावः । प्रतियोगिनस्तादात्म्यमारोप्य यस्याभावस्य बुद्धिरिदमिदं न भवतीति सोऽन्योन्याभाव इत्येव पराभिमतः संसर्गाभावाऽन्योन्याभावभेदः । अतो धर्मविषयत्वं संसर्गा*भाव इत्युक्तेनेत्थं विकल्पपरंपरा प्रवर्ततइति चेन्न । संसर्गाभावान्योन्याभावबुद्ध्योः प्रतियोगितादात्म्यारोपपूर्वकत्वासिद्धेः । तथा हि । भूतले घटो नास्तीति व्यवहारे भूतलइत्यस्य घटेन नान्वयः येन भूतले घटारोपः सिध्येत् किं तु नास्तीत्यनेनान्वयः । एवं व्यवहारानुसारेण प्रतीतिरपि घटप्रतियोगिकभूतलाधिकरणकाभावविषया न तु भूतलाधिकरणकेन प्रतियोगिना विशेषिताभावविषया । एवं घटः पटो न भवतीति व्यवहारे ऽपि घटः पट इति यत्नेनेति नान्वयः येनाधिकरणे प्रतियोगितादात्म्यारोपः सिध्येत्किं तु घट इत्यस्य न भवतीत्यनेनान्वयः यो ऽयं घटः स पटो न भवतीति । एवं व्यवहारानुसारेण तन्मूलभूतप्रतीतिरपि घटस्याधिकरणस्य पटप्रतियोगिकान्योन्याभाववत्त्वविषया न तु घटतादात्म्यापन्नेन प्रतियोगिना विशेषिताभावविषया । एवं सत्येव प्रतियोगिना ऽधिकरणेन चाभावो निरूप्यतइति परमतमर्यादा ऽपि संगच्छते । किं च यदि घटसंसर्गाभावो घटप्रतियोगिकः तदा घटापसरणानन्तरं भूतले घटो नास्तीति प्रतीतिर्निरालम्बना स्यात् । न हि कदा चित्तत्र स्थितस्यात्यन्ताभावः संभवति नाप्यन्यत्र तदानीं सतः प्रागभावध्वंसौ संभवतः नाप्युत्पादविनाशवदभावान्तरकल्पनं युक्तम् । तद्विकल्पमानं घटसंयोगनाशोत्पत्तिकाले उत्पद्यते पुनर्घटसंयोजनकाले नश्यतीत्यभ्युपगन्तव्यम् । एवं च सत्यवश्याभ्युपगन्तव्येन घटापसरणघटसंयोजनमध्यवर्तिना संसर्गप्रतियोगिकाभावसामान्येनैव प्रतीतिनिर्वाहे किं सामयि-

* निरवयवत्वसंसर्गेति १ पु पा० ।

कात्यन्ताभावकल्पनया । अतो घटसंसर्गप्रतियोगिकाभावो घटसंसर्गाभावः घटपटयोः परस्परप्रतियोगिकाभावो ऽन्योन्याभाव इत्येव विभागो वक्तव्य इत्यभिप्रेत्यैवं विकल्पपरम्परा कृता ।

अथ वेति । तत्रानुमानं तावन्न संभवतीति टीकाग्रन्थे तत्रेत्यस्य ३०४
यः स्वारसिको ऽर्थस्त्यक्तस्तं परिगृह्योत्तरग्रन्थस्तद्विवरणतया योज्यते । अस्मिन्व्याख्याने तस्मादनेनास्मिन् ग्रन्थे प्रमाणान्तरमास्थेयमिति टीकाग्रन्थे यदीश्वरस्य निमित्तमात्रत्वे प्रमाणान्तरमास्थेयमित्युक्तं तत्रास्थीयमानमपि न संभवति तदात्मानं स्वयमकुरुतेत्यादिश्रुत्यैव बाधादित्येतावत्पर्यन्तं तात्पर्यं न वक्तव्यं किं तु प्रमाणान्तराकाङ्क्षामात्रपरं तद्व्याख्येयमित्याह **सामान्यतः श्रुतिव्यतिरिक्तेति** । **व्याप्तेरविशेषादिति** । ईश्वरो न द्रव्योपादानमिति येन चेतनत्वहेतुना ऽनुमीयते तेनैव तस्य रागादिमत्त्वमप्यनुमातुं शक्यम् । उभयत्रापि मूलभूतव्याप्तेरनुकूलतर्कसद्भावाऽसद्भावाभ्यां विशेषाभावात्प्रत्युत रागाद्यनुमान एवानुकूलतर्कः संभवति । संसारिणां रागाद्युपादानतायाम् आत्मत्वमेव प्रयोजकं न तु संसार्यात्मत्वं गौरवादित्येवंरूप इति भावः । **निरवद्यत्वविशेषविरुद्ध इति** । साध्यविरुद्धवदनुमानबाध्यभिमतविशेषान्तरविरुद्धो ऽपि हेतुर्विरुद्धहेत्वाभास इति भावः । **तत्राप्यागमप्रामाण्यादिति** । यद्यागमश्चिरातीतान्निर्व्यापाराद्यागात्स्वर्ग इति बोधयेत्तर्हि तथैवानुमन्येमहि न त्वागमस्तथा बोधयति किं तु यागात्स्वर्ग इत्येतावन्मात्रं बोधयति तद्व्यापारकल्पनायामपि न विरुध्यत इत्यविरोधात्तत्र लोकानुसारेणाऽपूर्वकल्पनं न त्विह तथा रागादिमत्त्वकल्पनं प्रवर्तते निरवद्यत्वादिश्रुतिविरोधादिति भावः । यदीश्वर इति ग्रन्थे कारुण्यपर इति विशेषणस्वारस्यमनुसृत्य तेन ग्रन्थेन व्यावर्त्यामितरेतराश्रयदोषपरिहारशङ्कां प्रकारान्तरेण दर्शयति **अथ वेति** । करुणयैव न कर्मभिरतो नान्योन्याश्रय इति भावः । ३०४ ।
कर्मभिः प्रयोजनैरिति । अध्ययनेन वसतीतिवत्फलस्य हेतुत्वविवक्षया तृतीयेति भाव. । पूर्वकर्म कथमीश्वराप्रवर्तितमीश्वरप्रवर्तनलक्षणं कार्यं करोतीति टीकाग्रन्थो न युक्तः पूर्वकर्मणो ऽपीश्वरप्रवर्तितत्वस्य वक्ष्यमाणत्वादित्याशङ्क्य तत्तात्पर्यमाह **ईश्वरेण पूर्वकर्म तावदिति** । **एवं सति प्रवर्तकत्वोपपत्तिमनुक्त्वेति** । ईश्वरेण पूर्वं कर्म प्रवर्तयितुं न शक्यते कुत्सित-

फलानुदयप्रसङ्गादित्युक्तानुपपत्तिपरिहारार्थमीश्वरस्य प्रवर्तकत्वोपपत्तिमनुक्त्वैव परः केवलं कर्मेश्वरयोः प्रवर्त्यप्रवर्तकभावस्यानादितामात्रं यद्यवलम्बेत तदानीमन्धपरम्परादोषमाहेत्यर्थः । प्रवर्तकत्वानुपपत्तिमुक्त्वेति पाठे त्वीश्वरस्य प्रवर्तकत्वानुपपत्तिर्या सिद्धान्तिनोक्ता तदनुवादः । **अनुपपत्तिसाम्यादिति ।** ईश्वरस्याद्यतनकर्मणि च प्रवर्तकत्वानुपपत्तेः साम्यादित्यर्थः । अतो यथा केन चिदन्धेन स पटो रक्त इत्युक्ते कुत इदं श्रुतमिति परस्याकाङ्क्षायां स यद्यन्यमन्धं तदुपदेष्टारं ब्रूयात्सो ऽप्यनुयुक्तो ऽन्यमन्धं सो ऽप्यपरमन्धं न कं चिदपि स्वोपदेष्टारं चक्षुष्मन्तं ब्रूयाद् अनया ऽन्धपरम्परया प्राप्तः पटरक्तिमा यथैवाऽप्रामाणिकः एवमियमपि कर्मेश्वरयोः प्रवर्त्यप्रवर्तकभावपरम्परोक्ताऽनुपपत्तिधूननक्षमचक्षुष्मत्स्थानीयश्रुतिमूला यदि न स्यात्तदा कर्मेश्वरयोः प्रवर्त्यप्रवर्तकभावो न प्रामाणिकः स्यादिति भावः ।

भाष्ये प्रधानपुरुषेश्वरत्रयमिति कथमुक्तं पुरुषाणां बहुत्वादित्या-
०५ । १५ शङ्क्य व्याचष्टे **पुरुषान् जात्यैकीकृत्येति । तथापि प्रवाहनित्यत्वादिति ।** यदि द्रव्यत्वादन्तवत्त्वमनुमीयते तदा सर्वेषां संसारिणामनित्यत्वे ऽपि प्रवाहरूपेण संसारस्यानुवृत्तिर्न निवारिता स्यात्तथा च तच्छून्यतायामीश्वरः किमधितिष्ठेत्किंविषये वास्य सर्वज्ञत्वेश्वरत्वे स्यातामिति भाष्योक्तदूषणमलग्नं स्यात् । अत एव हि विद्वत्सु मुच्यमानेषु सर्वदा ब्रह्माण्डलोके जीवानामनन्तत्वादशून्यतेति श्लोकोक्तप्रकारेणाऽशून्यतानिर्वाहोपपत्तेः । द्रव्यत्वादिहेतुना कुसूलनिहितबीजवदेतावन्त एवेति पुरुषाणामियत्तारूपसंख्यावत्त्वानुमाने तु तेषां सर्वेषां क्रमेण मुक्तौ शून्यतापत्तिरिति दूषणं लग्नं भवतीत्यभिप्रेत्य संख्याविशेषानुमानमादृतमित्यर्थः । एतेन संख्यावत्त्वादेवान्तवत्त्वमनुमेयं चेदपि प्रधानस्येश्वरस्य जात्यैकीकृतानां पुरुषाणां च त्रित्वसंख्यया ऽन्तवत्त्वमनुमीयतां तेषां प्रतिव्यक्तिगतयैकत्वसंख्यया वा तदनुमीयतामित्यपि शङ्का निरस्ता । तावता सर्वशून्यतायामीश्वरस्य ज्ञेयाधिष्ठेयाभावदूषणावकाशासिद्धेः तस्मादियन्त एवेति परिच्छिन्नानां जीवानां मध्ये प्रतिकल्पमेकैकस्मिन्ननन्ते प्राप्ते ऽप्यनाद्यतीतकल्पप्रवाहे सर्वे ऽपि जीवा अतीताः स्युरिति कस्य भोगार्थं प्रधानमीश्वरो ऽधितिष्ठेत् किंविषया वा ऽस्य सर्वज्ञता स्याद् इदानीं सर्वशब्दार्थालाभादिति दूषणसिद्ध्यर्थमियत्तारूपसंख्याविशेषानुमानमपेक्ष्यते । ननु

यद्यतीतेषु कल्पेषु इयत्तापरिच्छेदाभावरूपमानन्त्यमिष्यते तदा तत्रैव द्रव्यत्वादिहेतोर्व्यभिचारः । यदि नेष्यते तदा जीवानामियत्तारूपसंख्याविशेषवत्त्वे ऽप्यतीतकल्पापेक्षया ऽधिकसंख्यावन्तस्त इतीदानीं केषां चित्संसारिणामनुवृत्तेस्तद्भोगार्थमीश्वरस्य प्रधानाधिष्ठातृत्वं सर्वज्ञत्वं चोपपद्यते । अपि कदाचित्तदुभयं न स्यादिति चेदिष्टापत्तिः । न हि तथानुभवविरोधो ऽस्ति अभ्युपगम्यते च सर्वमुक्तिवादिभिरयं तथाभावः । किं च प्रधानपुरुषेश्वराणां त्रयाणामप्यनन्तवत्त्वमानुमानिकेश्वरवादिनं प्रत्यापादितं केन हेतुना सर्वेषु पुरुषेष्वप्यतीतेषु प्रधानेश्वरयोरवस्थितिमभ्युपगम्येदं दूषणमुच्यते तस्मादयुक्तमिदं दूषणमिति चेदुच्यते । संख्यावत्त्वेन प्रमेयत्वेन पुरुषाणामियत्तानुमाने सर्वैः पुरुषैरनुभाव्यानि यावन्ति दुःखानि तेषामपि इयत्ता हेतुसाम्यात् सिध्यति सा चेयत्ता एकाद्यष्टादशस्थानगतपरार्द्धमध्य एव कं चित्संख्याविशेषमादाय पर्यवस्यति ततश्च सर्वैरपि पुरुषैरनादिकालप्रवाह*प्रवृत्तेतरशरीरेषु प्रतिशरीरमस्मदाद्यनिर्धार्यसंख्याविशेषाणि दुःखान्यनुभूयन्त इत्येतावता कालेन सर्वपुरुषगतानां सर्वेषामपि दुःखानामुच्छेदो ऽवश्यम्भावीत्यतो विनैव तत्त्वज्ञानं मुक्तेषु सर्वेषु पुरुषेषु स्वरूपतः स्थितेष्वपीदानीं स्थितेनापि प्रधानेन तेषां भोगार्थे न प्रवर्तनीयम् । नापीश्वरेण तदधिष्ठेयं नापि ज्ञेयं वस्तु किञ्चित्तेन शेषमस्तीति दूषणे तात्पर्यम् । यदि तु द्रव्यत्वहेतुनैव संख्याविशेषवत्त्वानुमानमिष्यत इति दुःखानामानन्त्यमभ्युपगम्येत तदा प्रतिपुरुषवर्तिनां दुःखानामियत्तापरिच्छेदाभ्युपगमे क्रमेण भुज्यमानानां तेषां माषराशिन्यायेन स्वयमेव क्षयः स्यादिति मुक्तेस्तत्त्वज्ञानैकसाध्यत्वाभ्युपगमविरोधः । प्रतिपुरुषवर्तिनामपि दुःखानामानन्त्याभ्युपगमे तत्त्वज्ञाने सति योगसामर्थ्याद् बहूनि शरीराणि परिगृह्य भोगेन नाश्यतया पराभ्युपगतानां दुःखानामानन्त्यात्कदा ऽपि क्षयो न स्यादिति तत्त्वज्ञानान्मुक्त्यभावप्रसङ्ग इति दूषणं द्रष्टव्यम् ।

सप्तमी च निमित्तार्थेति । कृडिति चेतिसूत्रवद्† निमित्तार्था ३०५ ।
सप्तमी ज्ञापकहेतुपर्यवसितेति भावः । ननु घटस्य कुलालवज्जगतो ऽपि केन

* प्रवाहेति नास्ति १ पु ।　　† सूत्रे इयेति १ पु पा० ।

चित्कर्षा भाव्यमिति ईश्वरानुमाने च कर्ता कुलालवदेव रागादिमान् स्यात् कुलालो मृदादिकमिव स्वसंयुक्तमेवाधितिष्ठेद्रूपादिमदेवाधितिष्ठेत् । श्रोत्रस्पर्शनादिवद् रूपादिहीनस्याप्यधिष्ठाने तदधिष्ठानवदेव प्रधानाद्यधिष्ठानमप्यधिष्ठातृभोगार्थं स्यात्* कुलालवदेव च जगत्कर्ता शरीरी स्यात् शरीरित्वे च भोगादिमान् स्यात् प्रधानपुरुषेश्वराश्च संख्यावत्त्वात्परिमाणवत्त्वाच्चान्तवन्तः स्युः पुरुषाश्च द्रव्यत्वादिभिः संख्याविशेषवन्तः स्युरित्यनुमानानि साम्येन दृष्टसाधर्म्यमात्रमवलम्ब्य प्रवृत्तानि पर्वतो महानसवद्वह्निमांश्चेत्तद्व-
३०५ । २४ देव व्यञ्जनवानपि स्यादित्येततुल्यानीत्याशङ्क्याह **सामान्यतोदृष्टानुमानोपन्यासस्त्विति** । ईदृशेनासारतरेणाप्यनुमानजातेन दूषयितुं शक्यत्वादत्यन्ततुच्छः पक्ष इति द्योतनार्थं तदुपन्यासः । न ह्यस्मादनुमानजातात् कार्यमात्रं कर्तृकारकसाध्यमित्याद्यनुमाने कश्चिद्विशेषोऽस्ति घटादिषु दृष्टायां कर्तृजन्यतायां लाघवात्कार्यत्वमेवावच्छेदकं न तु घटत्वादिकमननुगमादिति तर्केण दार्ढ्यापादने कार्यमात्रं दानादिवत्संप्रदानजन्यं पर्णपतनादिवदपादानजन्यं संप्रदानादिजन्यतायामपि कार्यत्वमेवावच्छेदकं लाघवान्न तु दानत्वादिकमननुगमादिति तर्कदृढीकृतानुमानैरङ्कुरादिकार्ये कर्तृकारकवत्संप्रदानापादानकारकयोरपि अतीन्द्रिययोः सिद्धिप्रसङ्गादिति भावः । ननु सांख्याधिकरणे कारणानि चेतनाधिष्ठानमन्तरेण कार्याणि न जनयन्तीत्यानुमानिकेश्वरसिद्धिरङ्गीकृता इह कथं तद्दूषणं क्रियते । नैष दोषः । तत्र पूर्वपक्षे मृद्घटादिषु दृष्टं कार्यानुसारिणा कारणेनभाव्यमिति नियममवलम्ब्य सुखदुःखमोहात्मकस्य जगतस्तथाभूतं कारणमनुमिमानं सांख्यं प्रति मृदादिदृष्टान्तेनैवाचेतनस्य जगत्कारणस्य चेतनेनाधिष्ठानमपि सिध्येत् स्वतन्त्रं प्रधानं जगत्कारणमिति निरीश्वरसांख्याभिमतं न सिध्येदित्येतावन्मात्रमुक्तं न तु स्वतन्त्रमीश्वरानुमानमनवद्यमिति । तेन नेश्वरः प्रसाधितः† ॥

३०६ । ५ **उत्पत्त्यसंभवात् ॥ ४२ ॥**

विष्णुभागवता मन्यन्ते भगवान् नारायणः परं ब्रह्म स वासुदेवादिचतुर्व्यूहात्मना ऽवतिष्ठते तत्र वासुदेवः परिपूर्णषाड्गुण्यशाली षड्गु-

* भोगार्थं स्यादिति नास्ति १ पु० ।

† अत्र सप्तमं पशुपत्यधिकरणं पूर्णम् ।

याश्च ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि चेतनाऽचेतनात्मकसकलप्रपञ्चाहम्भा-
वोल्लेखितया सामान्यतो विशेषतश्च सकलवस्तुगोचरं तस्य ज्ञानं ज्ञान-
मुच्यते । जगत्प्रकृतिभावः शक्तिः । जगत्सृजतो ऽस्य श्रमाभावस्तिलका-
लकवदप्रयत्नेन स्वसृष्टसकलजगद्धरणं च बलम् । अप्रतिहतेच्छत्वमैश्वर्यम् ।
जगत्प्रकृतित्वे ऽपि पयसो दधिभावेनेव विकारविरहो वीर्यम् । जगत्स्रष्टुः सह-
कार्यनपेक्षत्वं पराभिभवसामर्थ्यं च तेजः । ततो ज्ञानबलोन्मेषेण संकर्षण-
स्ततो वीर्यैश्वर्योन्मेषेण प्रद्युम्नस्ततः शक्तितेजःसमुन्मेषेण अनिरुद्धो
जायते संकर्षणादयश्च जीवमनोहंकाररूपा इति तन्मतम् । तन्निरासस्य
पूर्वाधिकरणेन संगतिमाह **अधिष्ठातैवेति** ।

ननु कापिलपातञ्जलस्मृतिप्रामाण्यनिरसनानन्तरं कर्तृगौरवेण विशे-
षेण पाञ्चरात्रप्रामाण्य*निरसनं पूर्वपादएव सङ्गतमित्याशङ्क्याह **अवान्तर-** ३०
संगतिवशादिति । ननु यदि पाञ्चरात्रं बुद्धिपूर्वा कृतिर्निःश्वसितकल्पा
श्रुतिरबुद्धिपूर्वा तर्हि विपरीतं बलाबलम् । अबुद्धिपूर्वकस्य हि प्रामाण्यं
घुणाक्षरन्यायेन क्व चिद्भवदपि न सार्वत्रिकं भवेत् । सर्वज्ञस्य भगवतो
बुद्धिपूर्वा कृतिस्तु मूलदार्ढ्यात्सार्वत्रिकं प्रामाण्यमश्नुतइत्याशङ्क्याह **याव-**
द्धीति । अयमर्थः । भगवतो बुद्धिरत्र विष्णुस्मृत्यादिमूलबुद्धिवत् स्मृति-
रूपा विवक्षिता उत सर्वज्ञस्य भगवतः प्रत्यक्षं संभवतीति प्रत्यक्षरूपा वा ।
आद्ये स्मृत्यन्तराणामिव पाञ्चरात्रस्मृतेरपि वेदमूलत्वेन प्रामाण्यं समर्थनी-
यम् । द्वितीये भगवतः सार्वज्ञ्यं वेदादवगतमिति समर्थनीयम् । पक्षद्वये
ऽपि वेदप्रामाण्यमुपजीव्य पाञ्चरात्रस्य प्रामाण्यमुपपादनीयम् । अबुद्धिपूर्व-
कस्यैव तस्य वक्तृदोषराहित्येन प्रामाण्यमविचलं बुद्धिपूर्वकस्य तु वक्तृदोष-
सभावनया प्रामाण्यं न तथा स्थिरम् । यद्यपि वेदावगतसार्वज्ञ्यस्य भ्रान्तिर्न
संभवति तथापि वेदविरोधदर्शने सति बुद्धदेशनावत्तदंशे व्यामोहकत्वशङ्का
नापैति सापि शङ्का यद्यपि न भवति तथापि उपजीव्यविरोधे गौणत्व-
कल्पनमावश्यकमिति ।

अत्र के चित्पाञ्चरात्रस्य प्रामाण्यमित्थं समर्थयन्ते । एकायनशाखा-
मूलकं पाञ्चरात्रमिति वेदमूलत्वेनैव तस्य प्रामाण्यम् । एकायनशाखामूलत्व

---

* पाञ्चरात्रं प्रामाण्येति १ पु ।

च पाञ्चरात्रएवोक्तं संकर्षणादयस्तु न जीवमनोहंकाराः किं तु तदभिमानिनो भगवद्व्यूहाः तेषां च जननमैच्छिकप्रादुर्भावरूपम् अतो न जीवोत्पत्तिप्रतिपादनाद्वेदविरोधः । न च तथापि वेदेषु ये गर्भाधानादयः चत्वारिंशत्संस्काराः समाम्नाताः तद्विपरीतास्ते पाञ्चरात्रे विहिता इत्यप्रामाण्यं शङ्कनीयम् । तेषामप्येकायनशाखायामाम्नानाच्छाखाभेदेन च कर्मणां प्रकारभेदस्यान्यथापि संप्रतिपन्नत्वात् । अत एव तदनुष्ठातॄणामपि न वैकल्यम् । सर्वेषामपि स्व*स्वशाखोक्तप्रकारकर्मानुष्ठानदर्शनात् । एवमेव तेषां ग्रन्थेषु कण्ठरवेणोक्तम् । तथा यदप्युक्तं गर्भाधानादिदाहान्तसंस्कारान्तराऽसेविनां भागवतानामब्राह्मण्यमिति तदप्यज्ञानमेवापराध्यति न पुनरायुष्मतो दोषः । यत एते वंशपरम्परया वाजसनेयिशाखामधीयानाः कात्यायनादिगृह्योक्तमार्गेण गर्भाधानादिसंस्कारान् कुर्वते नातो† ब्राह्मण्यात्प्रच्यवन्ते ये पुनः सावित्र्यनुवचनप्रभृतित्रयीधर्मत्यागेनैकायनश्रुतिविहितानेव चत्वारिंशत्संस्कारान् कुर्वते स्वशाखागृह्योक्तमर्थजातमनुतिष्ठन्ति न ते शाखान्तरीयकर्माननुष्ठानेन ब्राह्मण्यात्प्रच्यवन्ते । एवं चतुर्व्यूहं भगवन्तं प्रत्यहं पाञ्चकालिकेनाभिगमनादिपञ्चकेन वार्षशतिकव्रतेन समाराध्य पुरुषः क्लेशैर्मुच्यते । तत्राभिगमनं प्रातर्भगवन्मन्त्रजपस्तुतिनमस्कारादिकम् । तदनन्तरं पूजार्थं पुष्पादिसंपादनमुपादानम् । ततः पूजनमिज्या । ततो भगवच्छास्त्रतदनुगुणपुराणागमश्रवणचिन्तनादिकं स्वाध्यायः । ततः सायंसंध्यानन्तरं भगवति चित्तसमाधानं योग इति । तैः पाञ्चरात्र‡प्रामाण्यसमर्थनव्याजेन एवं पाञ्चरात्रिणा एकायनशाखिन इत्यादिमन्यमानानां ब्राह्मण्यवैकल्यमेव प्रतिष्ठापितम् । तथा हि । ये वाजसनेयिशाखामधीत्यातच्छाखागृह्योक्तप्रकारेण संस्कारानुतिष्ठन्ति तेषां शाखारण्डतयैव ब्राह्मण्यवैकल्यं प्रतिष्ठापितम् । ये तु त्रयीविहितान् संस्कारान् परित्यज्य पाञ्चरात्रविहितानेव संस्कारानुतिष्ठन्ति तेषां वैदिककर्माणि परित्यज्याऽवैदिककर्मानुष्ठानेन तत्प्रतिष्ठापितम् । न ह्येकायनशाखेति का चन शाखा क्व चिदधीयमाना दृश्यते येन तन्मूलतया ते संस्कारा वैदिकाः स्युः । खिलशाखात्वकल्पनं

---

* एकं स्वेति नास्ति १ पु. । † न ते इति १ पु. पा. ।
‡ पञ्चरात्रेति १ पु. पा. ।

च न प्रमाणमूलम् । अतस्त्रयीविहितसंस्कारविपरीतसंस्कारविधानांशे व्यामोहकत्वं त्रयीधर्माऽयोग्यानधिकृत्य तद्विधानमिति वा कल्पनीयमित्येषा दिक् । प्रपञ्चस्तु मणिदीपिकायां द्रष्टव्यः ।

व्याख्यातो भाष्यइति । आगमसिद्धान्तदिव्यसिद्धान्ततन्त्रसि- ३०७
द्धान्ततन्त्रान्तरसिद्धान्तरूपे चतुर्विधे पाञ्चरात्रे परस्परविप्रतिषेधो मा भूद्वेदनिन्दकपरिग्रहवैदिकसंस्कारवर्जनाऽवैदिकसंस्कारविधानशुद्रविद्याबाहुल्यादिभिर्वेदविप्रतिषेधोऽपि भूयान् स सर्वोऽपि भाष्यगतादिशब्दगृहीतो बोद्धव्य इत्यर्थः । एवमवैदिकत्वादेव वैदिकापरिग्राह्यत्वं पाञ्चरात्रस्योक्तं वैखानसशास्त्रे ।

आग्नेयं पाञ्चरात्रं तु दीक्षायुक्तं च तान्त्रिकम् ।
अवैदिकत्वात्तत्त्वं ततो वैखानसेन तु ॥
सौम्येन वैदिकेनैव देवदेवं समर्चयेत् ॥ इत्यादिना ।

अत्र न हि निन्दान्यायेन वैखानसप्रशंसार्थोऽयमर्थवाद इति केषांचित्समाधानमसाधु । अर्थवादेऽप्यवैदिकत्वहेतूक्तिसामर्थ्येन वेदाऽनधिकृतविषयत्वसिद्धेरनिवारणात् । दृष्टं हि पर्वचतुष्टययुक्ते चातुर्मास्ये द्वयोः प्रणयन्तीति द्वयोः पर्वणोरपूर्वाग्निप्रणयनान्तरविधानस्य तस्माद् द्वाभ्यामेतीति गमनसाधनत्वप्रतिपादकार्थवादवशाद्रूढ वा एतो यज्ञस्य यद्वरुणप्रघासः साकमेधश्चेत्युक्तस्तुतवरुणप्रघाससाकमेधाख्यपर्वद्वयविषयतया व्यवस्थापनम् । एवं च सिद्धवदवैदिकत्वकीर्तनमेव पाञ्चरात्रस्य एकायनशाखामूलत्वकल्पनमपि तुच्छीकरोतीत्यलं प्रपञ्चेन* ॥

इति श्रीमद्भरद्वाज[1]कुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

---

* अत्र अष्टमम् उत्पत्त्यसम्भवाधिकरणं पूर्णम् ।

[1] भारद्वाजेति ख पु पा ।

अथ द्वितीयाध्यायस्य तृतीयः पादः ।



३०८ । १ ## न वियदश्रुतेः ॥ १ ॥

पादार्थमाह इहेति । भूतविषयवाक्यविरोधपरिहार एव पादार्थः । भोक्तृविषयवाक्यविरोधपरिहारस्तु तत्प्रसङ्गागत इति नार्थभेदात्पादभेदप्रसङ्गः । ननु वाक्यानां परस्परविरोधसमाधानेन वाक्यार्थावधारणया समन्वये स्थिते तत्र मानान्तरविरोधसमाधानार्थो द्वितीयो ऽध्यायः । अस्मिन् वियदादिसृष्टिवाक्यविरोधपरिहारस्य नास्ति सङ्गतिरित्याशङ्क्य विप्रतिषेधप्रसङ्गागतो ऽयमिह तत्परिहार इति प्रदर्शनार्थं विप्रतिषेधाच्चेति भाष्यमित्याह **प्रासङ्गिकीमिति** ।

श्रुतिविप्रतिषेधादित्यर्थं इति । ननु कारणविषयश्रुतिविप्रतिषेधे इव कार्यविषयश्रुतिविप्रतिषेधे ऽपि समाधानं कृतमेव कारणत्वेन चाकाशादि*ष्वित्यधिकरणे । तत्र हि सूत्रस्य एकां योजनामाश्रित्याकाशादिकार्येषु विगाने ऽपि ब्रह्मणः कारणत्वे विगानं नास्ति । अकल्पितकारणवस्तुप्रतिपत्त्युपायतया कल्पितेषु तात्पर्याऽविषयेषु कार्येषु विगानं तु न दोष इति कार्यविगानमभ्युपेत्यैकं समाधानं कृतम् । योजनान्तरमाश्रित्य कार्यविगानस्य दोषत्वे ऽपि तदिह नास्ति दण्डचक्रादिघृतपूर्णान्तकार्यैककर्तृविषयायावत्कार्यैककर्तृत्वकतिपयकार्यैककर्तृत्वानुवादकवाक्यद्वयवत् तैत्तिरीयकच्छान्दोग्यश्रुत्योः प्रामाण्योपपत्तेरित्यपरं समाधानं कृतं किमधिकमिह कर्तव्यं समाधानमवशिष्यते । उच्यते । छान्दोग्ये तैत्तिरीयकश्रुताकाशवायूपसंहारमनपेक्ष्य तत्र द्वितीयसमाधानं कृतम् । इह तु तदुपसंहारमप्याश्रित्य तत्र सम्भावितशङ्कानिराकरणेन समाधानान्तरं कर्तुमयमारम्भः ।

११ । ४ **परपक्षेषु सर्वत्रेति** । यद्यपि स्ववचनविरोध इव श्रुतिविरोधो ऽपि न सर्वेषु परपक्षेषु निराकरणहेतुः बौद्धार्हतपक्षनिराकरणे तान् प्रति श्रुतिविरोधस्य हेतुकरणाऽयोगात्तथापि तेषामपि पक्षाः श्रुतिविरुद्धा इति

---

* ब्र॰ सू॰ अ॰ १ पा॰ ४ सू॰ १४ ।

कृत्वा ऽस्माभिर्निरस्यन्त इति श्रुतिविरोधो निरसनीयत्वे सार्वत्रिको हेतुर्भवतीति भावः ।

न वियदिति । यद्यप्यस्तीति सूत्र*माचार्यैः सिद्धान्तसूत्रमिति वक्ष्यते ३०८
तथापि न वियदिति पूर्वपक्षसूत्रमस्ति त्विति सिद्धान्तसूत्रमिति विशिष्टार्थाभिप्रायेण क्रमत्वमुक्तम् । ननु किमर्थं तत्र क्रमत्वमुच्यते तथैवास्तु को दोषः अनुत्पत्तिं पूर्वपक्षं कृत्वोत्पत्तिसमर्थने ऽपि ह्यनुत्पत्तिशङ्केवोत्पत्त्यनुत्पत्तिश्रुतिविप्रतिषेधशङ्कापि निरस्ता भवतीति फलितमर्थमादाय प्रागुक्ता प्रसङ्गसङ्गति†रुपपद्यते । यथा गुणोपसंहारफलाया विद्याभेदाभेदचिन्ताया गुणोपसंहारपादसङ्गतिः एवं न वियदिति सूत्रस्य पूर्वपक्षसूत्रतायामश्रुतेरित्यस्य वियदुत्पत्तिप्रतिपादकश्रुत्यभावादित्यर्थ इति नाश्रुतेः क्वाचित्कत्वसार्वत्रिकत्वविकल्पावकाशः । वक्ष्यमाणासम्भवादिहेतुबलेन विशिष्टश्रुत्यभावस्य सार्वत्रिकत्वात् । इदं सिद्धान्त्येकदेशिसूत्रमिति पक्षे ऽपि हि मुख्यश्रुत्यभावादित्यर्थ इत्याचार्यैरयमेवार्थः स्फुटीकरिष्यत इति चेत्सत्यं तथापि साक्षान्निराकरणीयं पूर्वपक्षं प्रापय्य तत्र सिद्धान्त्येकदेशिनः परिहारं प्रथमं प्रदर्श्य तस्यापि निराकरणेन परमसिद्धान्तप्रदर्शनं क्रियत इत्येवं सूत्राणां प्रसक्तपूर्वपक्षनिराकरणार्थत्वे सम्भवति अप्रसक्तपूर्वपक्षान्तरनिराकरणार्थत्वं सूत्राणामङ्गीकृत्य तेन फलतः प्रसक्तपूर्वपक्षनिराकरणसिद्ध्यङ्गीकारो न युक्त इति तात्पर्यम् ।

एवं तर्हि प्रसक्तो विप्रतिषेधपूर्वपक्ष उत्सूत्रो मा भूद् आद्यसूत्रद्वये
तत्प्रदर्शनार्थं गौण्यसम्भवा‡दित्यादिसूत्रत्रयमेव सिद्धान्त्येकदेशिमतप्रदर्शना-
र्थमित्यस्त्विति ये मन्यन्ते तन्मतं दूषयितुमुपन्यस्यति केचित्त्विति । ,, । ८
दूषयति किमश्रुतेरिति । अत्रेदं वक्तव्यम् । क्वाचित्क एवायमश्रुतेरिति हेतुः न श्रूयते हि छान्दोग्ये सृष्टिप्रक्रियायामन्नेन शुङ्गेनेत्यादिकार्यलिङ्गकतत्तदव्यवहितकारणानुमानप्रक्रियायां च कार्यत्वेन वियत् । न चात्र तदुपसंहारः शक्य इति भाष्य एव स्पष्टमुक्तम् । एवं तावच् छान्दोग्यश्रुतिरश्रवणलिङ्गवती उपसंहारमप्यसहमाना वियदुत्पत्त्यसम्भवाद्यनुगृहीता तदुत्पत्तिं प्रतिक्षिपतीत्ययमर्थो न वियदिति सूत्रेणोच्यते तैत्तिरीयकश्रुतिः सर्वविज्ञा-

---

* व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ २ ।　† प्रसङ्गसंगतिरिति २ पु॰ पा॰ ।

‡ व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ ३ ।

नप्रतिज्ञाद्यनुगृहीता तां व्यवस्थापयतीत्ययमर्थो ऽस्ति त्विति सूत्रेणोच्यते एवं श्रुतिप्रतिषेधपूर्वपक्षसूत्र*द्वयेन पर्यवसिते सर्वविज्ञानप्रतिज्ञानमन्यथासिद्धम् असम्भवादिकमेव त्वनन्यथासिद्धमिति मन्यमानस्य वियदनुत्पत्तिवादिनः सिद्धान्त्येकदेशिनो मतं सूत्रत्रयेणोच्यत इत्यङ्गीकारे ऽपि न का चिदनुपपत्तिरिति ।

३०८ । २१ **अस्ति त्वित्यपि सूत्रं निगूढाभिसंधेः सिद्धान्तिन एवेति ।** नन्वस्य सूत्रस्य सिद्धान्तसूत्रत्वमङ्गीकृत्य सिद्धान्ताभिप्रायाऽनभिव्यक्त्यपेक्षमौपचारिकं पूर्वपक्षसूत्रत्वकथनमिति क्लिष्टयोजना किमर्थं क्रियते पूर्वपक्षसूत्रमेवेदमस्तु एतत्सूत्रव्याख्यानानन्तरं हि भाष्ये ततश्च श्रुत्योर्विरोध इत्यादिना श्रुतिविप्रतिषेधपूर्वपक्षो दर्शितः । तदनन्तरं च तस्मिन् विप्रतिषेधे कश्चिदाहेतीत्युत्तरसूत्रावतारणं च कृतं टीकायामप्येतत्सूत्रव्याख्यानावसान एव तस्मात्सर्वाः श्रुतयः परस्परविरोधिन्यो नास्मिन्नर्थे प्रमाणं भवितुमर्हन्तीति पूर्वः पक्ष इति विप्रतिषेधपूर्वपक्षोपसंहारः कृतः । सत्यम् । टीकायां न वियदिति सूत्रं सिद्धान्त्येकदेशिन इत्युपक्रान्तं तस्य च प्रागेव प्रतिषेधपूर्वपक्षप्राप्तौ सत्यामुत्थानं वाच्यम् । न च विप्रतिषेधपूर्वपक्षनिराकरणार्थं सिद्धान्त्येकदेशिमते प्रवर्तिते तदनन्तरमेव पूर्वपक्षोत्थानमिति युज्यते । न चाद्यसूत्रे सिद्धान्त्येकदेशिसूत्रत्वेन बहिर्भूते सति केवलेन द्वितीयसूत्रेण विप्रतिषेधपूर्वपक्षोपि लम्भयितुं शक्यते तस्माद्बहिःष्ठ एव पूर्वपक्षः सिद्धान्त्येकदेशिसिद्धान्तिसूत्राभ्यां निगूढस्वस्वाभिसंधिभ्यां स्पष्टीकृतो जात इत्येतावता सूत्रद्वयव्याख्यानानन्तरं भाष्यादिषु पूर्वपक्षस्फुटीकरणमिति तात्पर्यम् ।

स्थालादिवचनत्वमिति । (स्थालं भोजनपात्रम्)† ।

स्थालम्भोजनपात्रे स्यात्‡उखायां तु सा स्त्रियाम् ।
स्थाली ना तु महादेव§ इति नैघण्टुका विदुः ॥

३०९ । १२ **षष्ठी तृतीयार्थे इति ।** पूरणगुणेत्यादिसूत्रेण पूरणार्थयोगे षष्ठीसमासनिषेधाज्ज्ञापकात् तृतीयार्थे षष्ठी । न केवलं विरोधादाकाशज-

* पूर्वपक्षे सूत्रेति १ पु० पा० ।
‡ पात्रे क्लीबं स्यादिति २ पु० पा० ।
† ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु० ।
§ महादेव इति २ पु० पा ।

न्माभावकल्पनेति । छान्दोग्यश्रुतावाकाशस्य जन्माभावो न कल्पनीय इति यद् इदं तैत्तिरीयश्रुतिविरोधमात्रान्न भवति किं तु छान्दोग्यश्रुतेः क्वचिदप्युपयोगाभावादपीत्याहेत्यर्थः । ननूपयोगाभावो न च श्रुतेन तदपबाधने इत्यादिग्रन्थेनोच्यते ततः पूर्वस्तु लभ्यमित्यन्तग्रन्थः संसर्गः श्रौतः भेदस्त्वार्थ इति ग्रन्थेन पुनरुक्त इत्याशङ्क्य तदनुवादकत्वमाह **तत्रापीति** । २०९
पूर्वोक्तविरोधानुवाद एवेति । श्रुतिविरोधेनार्थिकस्य बाध्यत्वं यदुक्तं तस्यार्थिकत्वोक्तिमुखेनानुवाद इत्यर्थः । **वाक्यद्वयमनुमीयतइति** । श्रुतकल्पिताभ्यां* तेजोवियत्सृष्टिवाक्याभ्यां तद्द्वित्वमनुमीयतइत्यर्थः । **उपसंहारोदाहरणान्तराभिप्रायमिति** । उपसंहारे उदाहरणान्तरं तद्वायुमसृजतेति कल्प्य वाक्यं तेन सह चित्वाद्बहुवचनमित्यर्थः ।

वियदुत्पत्त्यभ्युपगमेनेति । सिद्धान्त्येकदेशिनं प्रति प्रतिज्ञाहानिरव्यतिरेकादिति युक्त्या वियदुत्पत्तिमभ्युपगमय्य सत्यं दर्शितं विरुद्धं तु तदित्यादिना श्रुतिविप्रतिषेधवादिनं पूर्वपक्षिणमुत्थाप्य तन्निराकरणे प्रस्तुते सिद्धान्त्येकदेशिनं प्रति वक्तव्यस्य वियदुत्पत्तौ हेत्वन्तरस्य कथनमिहासंगतमित्यर्थः । यदि तु अपि च च्छान्दोग्यइत्यादिभाष्यग्रन्थो वियदुत्पत्तौ हेत्वन्तरप्रतिपादनार्थो न भवति किं तु प्रस्तुते वियत्तेजःप्राथम्यश्रुतिविप्रतिषेधनिराकरणएव । पूर्वं हि छन्दोगश्रुतेः तैत्तिरीयश्रुत्यनुवर्तनमर्थतः श्रुतेर्बलीयस्त्वात् श्रुतिविरोधा†भावात्क्रमेण पदार्थबाधायोगाच्च समर्थितम् इदानीं छन्दोगश्रुत्या वियदुपसंहारस्य स्वयमेवापेक्षितत्वादपि तदनुवर्तनं समर्थ्यतइत्येवं यदि व्याख्यायेत तदा प्रस्तुतग्रन्थेनैवैकवाक्यतेति न सिंहावलोकितन्यायापेक्षेति द्रष्टव्यम् ।

पराधीनसत्ताका इत्यर्थ इति । नन्वेवं सत्यविद्यावदेव २१० । वियतोऽपि स्वतः सत्ताराहित्येनाध्यस्तत्वमात्रं सिध्यति न कार्यत्वमिति चेन्मा सैत्सीदितो ऽनुमानात् कार्यत्वं संभूतश्रुत्या हि तत्सिद्धिरभिमता किमर्थं तर्हीदं सूत्रसूचितमनुमानं संभूतश्रुतिगौणत्वापादकासंभवशङ्कानिराकरणार्थं तथैव च भाष्ये सूत्रमवतारितम् । असंभवशङ्का च समधाधिकार-

---

* श्रुतिकल्पिताभ्यामिति २ पु॰ पा॰ । † श्रुतविरोधेति १ पु॰ पा॰ ।

णाद्यभावप्रयुक्ता पूर्वोत्तरकालयोर्विशेषाभावप्रयुक्ता वा ऽध्यस्तत्वसिद्ध्या निवर्तनीयव । अध्यस्तरजतादिषु रजतावयवतत्संयोगाद्यारम्भकाऽनपेक्षणाद् अध्यस्तस्य ज्ञाननिवर्त्यत्वनियमेन निवृत्त्यनन्तरकालइवोत्पत्तिपूर्वकाले ऽपि वियत्कृतविशेषाभावोपपत्तेश्च। उत्पत्तिराहित्यानुमानानि तु हेत्वसिद्ध्युपयोजकत्वा-

३१७ । १८ दिदोषपराहतानीति स्पष्टमेव। **अविद्यादावित्यादि**शब्देन षडस्माकमनादय इत्युक्तजीवेश्वराद्यन्तरसंग्रहः । ननु जीवेश्वरौ स्वरूपतः सत्यौ न पराधीनसत्ताकाविति तयोर्व्यभिचारतादवस्थ्यमित्याशङ्क्याह **जीवेश्वराद्यपीति** । आदिशब्देन वैराजाद्येश्वररूपान्तरसंग्रहः । विभागविशिष्टरूपं विना स्वरूपमात्रविवक्षायां तु तत्र धर्मिसमसत्ताकविभागरूपो हेतुरपि नास्तीति न व्यभिचार इति द्रष्टव्यम् । आत्मान्यत्वे सतीत्यस्य हेतुविशेषणत्वे विशेष्यांशवैयर्थ्यमाशङ्क्य विभक्तत्वहेत्वसिद्धिपरिहारार्थत्वेन योजयति **नन्वद्वैतवादिन इति*** । **आत्मवादे चेति** । आत्मवादे चात्मनो निराकरणशङ्कानुपपत्तिरिति यदेतद्भाष्यं तत्रात्मवादे चेत्येतदुपादानवादे चेत्येतत्परतया व्याख्येयमित्यर्थः । **आत्मवादे** चेत्येतदनन्तरम् **उपादानवादे चेति** प्रतिपदनिर्देशेन टीकायां दर्शित इत्यर्थः । क्व चिदात्मत्वादेवोपादानत्वादेवेति व्याख्येयमित्यर्थ इति पाठो दृश्यते स पाठ आत्मत्वादेव चात्मनो निराकरणशङ्कानुपपत्तिरिति भाष्यपाठमनुसृत्य तस्मिन् पाठे टीकायामात्मवादे चेति स्वकीयस्यैव शब्दस्योपादानवादे चेति विवरणं तेन भाष्यस्यमात्मत्वादिति पदमुपादानत्वादित्यर्थकं व्याख्येयमित्यर्थोत्सूचितं भवतीत्यर्थः ।

३११ । १२ **यथा भवतामिति** । न्यायमते क्षीरमविनष्टं न दध्याकारेण परिणमते किं त्ववयवसंयोगनाशात् क्षीरे नष्टे तदारम्भकपरमाणुषु रसान्तरोत्पत्तौ सत्यां द्व्यणुकादिप्रक्रियया दधिरूपद्रव्यान्तरारम्भ इति तथैवाक्षपादसूत्रं न पयसः परिणामो गुणान्तरप्रादुर्भावाद् व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानमिति । दध्यविनष्टस्य पयसः परिणामो न भवति तद्रसविरुद्धरसान्तरप्रादुर्भावादिति प्रथमसूत्रार्थः । घटपटादिषु सर्वत्र

* अयं प्रतीको नास्ति १ पु० ।

कुतश्चिद् द्रव्याद् द्रव्यान्तरस्योत्पत्तिः व्यूहान्तरादवयवसंयोगान्तरादिति दृश्यते तदेतत्पूर्वद्रव्यनिवृत्तौ* क्षीरविनाशस्यानुमापकं क्षीरावयवानां संयोगान्तरं पूर्वसंयोगविनाशं विना न संभवति तद्विनाशे च क्षीरविनाशो ऽवश्यम्भावी असमवायिकारणविनाशे सति कार्यस्थित्यसंभवादिति द्वितीयसूत्रार्थः† ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ ३११ ।

प्रधानेनाऽप्रधानबाधमुक्त्वेति । यथा स्वर्गकामवाक्येन प्रधानेन को हि तद्वेद यदमुष्मिन् लोके ऽस्ति वा न वेत्यप्रधानस्य फलसंदेहवाक्यस्य बाधस्तथेति भावः‡ ॥

असंभवस्तु सतो ऽनुपपत्तेः ॥ ९ ॥ ३१२ ।

यथा ऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति न चास्य कश्चिद् जनिता न चाधिप इति श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे प्राप्ते सिद्धान्त्येकदेशिमतरूपतच्छावर्तकपूर्वपक्षान्तरप्रदर्शकं भाष्यं शङ्कोत्तरत्वेनावतारयतीत्याह **भास्करोक्तेति** । सन्मात्रं हि ब्रह्मेत्यादिभाष्यस्य सत्सामान्यं ब्रह्मोत्पद्यते चेत्स सामान्यान्तरादुत्पद्यते सद्विशेषादसतो वेति विकल्पत्रयनिरासार्थत्वं प्रतीयते टीकायां त्वेतदुक्तं भवतीति तत्तात्पर्यवर्णनमुपक्रम्यान्यदेवोच्यते कथमनयोर्व्याख्यानव्याख्येयभाव इत्याशङ्क्य यथाश्रुतभाष्यव्याख्यानार्थो न भवति टीकाग्रन्थः किं तु भाष्याशयस्थयुक्त्यन्तरविवरणपर इति द्योतयन्नवतारयति **अपि च विवर्त्तता हीति** । **ब्रह्म कार्यमिति हि§ वदन् प्रष्टव्य इति** । यद्यपि कार्यत्वं विवर्तत्वं चेत्सद्रूपस्य ब्रह्मणः कार्यत्वमेव न संभवतीत्यैकध्येन दूषणं वक्तुं शक्यं तथापि प्रपञ्चार्थो विकल्पः । **न द्वितीय इत्याहेति** । आरम्भपरिणामयोः परं समानसत्ताकयोरुपादानोपादेयभावः न तु विवर्त इत्याशयः । **न तृतीय इत्याहेति** । यथाश्रुतभाष्यप्रतीततृतीयविकल्पनिराकरणार्थं ,, । १०
एव नाप्यसत इति भाष्यग्रन्थः स्वविकल्पिततृतीयपक्षनिराकरणार्थत्वेना-

---

* निवृत्तेरिति २ पु॰ पा॰ । † अत्र प्रथमं वियदधिकरणं पूर्णम् ।

‡ अत्र द्वितीयं मातरिश्वव्याख्यानाधिकरणं पूर्णम् । § हीति नास्ति १ पु॰ ।

३१२ । २० व्यावृत्त्या टीकाकारैर्यौजित इति भावः । **अत्र तु विकारस्य सतो ब्रह्मण इति ।** यत्कारणं तत्कार्यमिति नियमेन ब्रह्मणः कारणाभ्युपगमे तदपि कारणं तेनैव नियमेन कार्यं स्यात् कार्यं च विवर्तरूपमित्युक्तम् । ततश्च ब्रह्मणः कारणसद्भावोक्तिः समारोपिते क्व चित्सत्य समारोप इत्यर्थपर्यवसिता भवेत् समारोपिते समारोपश्च क्व चिदपि न प्रमित इत्यप्रामाणिकमित्यर्थः । नन्वसति समारोपो न संभवतीति माध्यमिकमतनिषेधे समर्थितं न तु समारोपिते समारोपो न संभवतीत्यत आह **माध्यमिकेति ।** तत्र हि यथा शुक्तिकेयमित्यन्यत्तत्त्वमनधिगम्य प्रत्यक्षावगतं रजतं न निषिध्यते एवं प्रत्यक्षादिप्रमितः प्रपञ्चोऽन्यदधिष्ठानतत्त्वमनधिगम्य निषेद्धुं न शक्यते अधिष्ठानतत्त्वावगमकबाधकप्रमाणानुदये प्रत्यक्षादीनां प्रामाण्याऽविघातेन तैरेव स्वविषयनिषेधमसहमानैर्विरोधात् । अतो बाधकप्रमाणावगम्येन तात्त्विकाधिष्ठानेन भाव्यमित्युपपादितम् । इदमुपपादनमसति समारोपस्येव समारोपिते समारोपस्यापि निषेधकं भवतीति भावः । **अपरमार्थवचन इति ।** समारोपितवचन इत्यर्थः । अनेन च निरधिष्ठानभ्रमपरम्परानादितेत्याहेति प्राचीनटीकाग्रन्थेऽपि निरधिष्ठानशब्दः समारोपिताधिष्ठानपर इत्यर्थाद्व्याख्यातम् । **अध्याहारः क्लेश इति ।** स्वमते सतो ब्रह्मणः असंभवः उत्पत्त्यभाव उत्पत्त्यनुपपत्तेरिति सूत्रयोजना । अबुद्धिस्थस्य कस्यापि नाध्याहारः प्रतिज्ञाहानिरव्यतिरेका*दित्यत्र यदव्यतिरेकः कृत्स्नस्य जगतोऽनूदितः तत्सद्रूपं ब्रह्म बुद्धिस्थम् । वियन्मातरिश्वनोः समर्थितोत्पत्तिरपि इह निषेध्यबुद्धिस्था सैवाऽनुपपत्तेरित्यत्राऽनुपपद्यमाना प्रतियोगिनी बुद्धिस्थेति परमते तु गुणादिकं नित्यत्वं चाबुद्धिस्थम् ,अह्निगीयगुणिरप्युत्पत्तिवद् नाव्यवहितबुद्धिस्थेति तदध्याहारक्लेशः । **पूर्वाधिकरणार्थ एवात्राक्षिप्यतइति† ।** पूर्वाधिकरणाक्षेपसमाधानार्थत्वात्प्रसक्तिरेव

३१३ । ९ संगतिरिति भावः । **पूर्वपक्षाभासेति ।** आकाशस्य तावदनुत्पत्तिर्न्यायशास्त्रादिषिद्धा भूगोलकादीनामपि न कदा चिदनीदृशं जगदिति सर्गप्रलयानभ्युपगन्तृमते प्रसिद्धा । एवमुत्पत्तिरहितत्वेन प्रसिद्धानामाकाशा-

* व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ ६ ।

† पूर्वाधिकरणमेवाक्षिप्यतइति प्रतीकाकारः १ पु॰ ।

दीनामुत्पत्त्यभिधानं सर्वकार्योपलक्षणार्थमिति नैकदेशोपादानवैयर्थ्यं न चेतरपरिसंख्यानमिति स्पष्टमेव । अतो न पूर्वाधिकरणाक्षेपावकाश इति भावः* ॥

तेजोतस्तथा ह्याह ॥ १० ॥ ३१३ ।

अत्र पूर्वपक्षसंभावनार्थमिति सिद्धान्त्येकदेशिमतमिह पूर्वपक्षत्वेन व्यपदिष्टम् । ततेजो ऽसृजत वायोरग्निरिति श्रुत्योर्विरोध इति पूर्वपक्षः प्रागेव द्रष्टव्यः । **तदीयषोडश्याख्येति** । षोडशिपात्रस्य खादिरत्वमप्यूर्ध्वपात्रान्तरेभ्यो ऽधिकं यूपसादृश्यमस्तीति विशिष्य षोडशिपात्रग्रहणम् । एवं च वाजपेयाङ्गत्वेन विधीयमानस्य सप्तदशारत्नित्वस्य साक्षाद्वाजपेयाख्ययागक्रियान्वयाऽयोगात्तदङ्गत्वनिर्वाहार्थं वाजपेयान्वयरत्निसंबन्धयोग्यकिञ्चिद्द्रव्यापेक्षायां यूपस्य वाजपेयानन्वयित्वात् षोडशिपात्रस्य प्रदेयसोमरसधारणद्वारा वाजपेयान्वयात्तत्संबन्धः सप्तदशारत्नित्वस्य वाजपेयाङ्गत्वश्रुत्या ऽर्थप्राप्तो गौणेन यूपशब्देनानूद्यतइत्यर्थः । **तदङ्गगतयूपइति** । वाजपेयाङ्गभूता ये पशवस्तद्गते तदङ्गे यूपे सप्तदशारत्नित्वं विधीयते वाजपेयस्येति शब्दस्तु तस्य प्रकरणप्राप्तवाजपेयसंबन्धानुवादकः । यद्यपीतिकर्तव्यताकाङ्क्षालक्षणप्रकरणेन तस्य वाजपेयसंबन्धो न प्राप्नोति वाजपेयाङ्गगतस्य तस्य तदितिकर्तव्यताकाङ्क्षापूरकत्वाभावात्तथाप्यधिकारलक्षणप्रकरणात् तस्य वाजपेयेन परम्परासंबन्धः प्राप्नोतीति स वाजपेयस्येत्यनेनानूद्यतइति भावः । **वास्तवाऽभेदादिति** । वायोः कारणत्वेनानुगतं यद् ब्रह्मरूपं तदभिप्रायमिदमभेदकथनं न तु विकारांशाभिप्रायम् । अध्यस्तस्य तस्य तात्त्विकब्रह्माभेदायोगाद्वायुभावापन्नस्य ब्रह्मण एव तेजःकल्पनाधिष्ठानत्वस्यानुपदं वक्ष्यमाणत्वाच्च । **पञ्चम्यनुग्रहायेति** । वायोरिति ३१४ । १
पञ्चम्या वायोस्तेजसि मृदो घटइवोपादानत्व प्रतीयते तच्च वायुरूपविकारानुगतस्य ब्रह्मणो ऽधिष्ठानत्वएवोपपद्यते न विकारान्तरानुगतस्य केवलस्य वेति भावः । **तद्भावापन्नेति** । तथाधिष्ठानत्वेन सत इत्यर्थः । **लोके कस्य चिच्छिष्यस्येति** । अधिकश्च गुणः साधारण्ये ऽविरोधात् कांस्यभोजिवदमुख्येऽपी†ति पूर्वतन्त्राधिकरणे चिन्तितम् आग्रयणे आग्नेयैन्द्राग्ना-

---

* अत्र तृतीयम् असम्भवाधिकरणं पूर्णम् ।

† जै· सू· अ· १२ पा·

ष्टयो यागाः श्रुताः । तत्र द्यावापृथिव्य एककपालो ऽपि श्रुतः स च वैश्वदेवपर्वगतैककपालयागप्रकृतिक इति ततः प्रसूनं बर्हिः प्राप्नोति । प्रसूनं पुष्पितं लूनं पुनर्जातं वा । आग्नेयादीनां तु प्रसूनमप्रसूनं वेत्यनियतं बर्हिः । तत्राग्नेयादीनां मुख्यत्वात्तदनुरोधेनानियमे प्राप्ते सिद्धान्तः । प्रसूनबर्हिरुपादानेऽपि मुख्यानामप्याग्नेयादीनां न किं चिद्वैकल्यम् । अप्रसूनबर्हिरुपादाने त्वेककपालस्यास्ति वैकल्यम् अतस्तमनुरुध्य प्रसूनमेव बर्हिरुपादेयमिति अत्र सूत्रकृता दृष्टान्तीकृतः कांस्यभोजिन्याय इह विवृतः* ॥

१५ । १ आपः ॥ ११ ॥

अतिदेशाधिकरणमिदम् । एतस्माज्जायतइत्युपक्रम्य खं वायुर्ज्योतिराप इति श्रुत्या ब्रह्मजत्वमपां प्रतीतम् । आग्नेय इति कारकपञ्चमीश्रुत्या तेजोयोनित्वं तच्छ्रुत्योर्विरोध इति पूर्वपक्षः । स इदं सर्वमसृजतेत्यादिबहुश्रुत्यनुसारेण पञ्चमी क्रमार्थेति श्रुत्योरविरोध इत्येकदेशिमतम् । ब्रह्मतेजसोर्वास्तवाऽभेदात्तेजोयोनित्वे ऽपि ब्रह्मजत्वमविरुद्धम् । तस्मादापः कारकपञ्चम्या तेजोयोनय इत्यधिकरणशरीरं सर्वं पूर्ववत् । अधिकाशङ्कानिरासप्रकारमाह **अत्रिवृत्कृतेति** । अत्रिवृत्कृतयोरप्तेजसोर्विरोधग्राहकप्रमाणाभावादविरुद्धत्वसिद्धिः† ॥

,, । ६ **पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥**

ता अन्नमसृजन्त अद्भ्यः पृथिवी इति श्रुत्योर्विरोधः । अपां व्रीहियवादीनां च वाचकयोरन्यतरलक्षणायां विनिगमनाविरहादिति पूर्वपक्षे सिद्धान्त्येकदेशिमतं परमसिद्धान्तव्यावर्तनीयत्वात्पूर्वपक्ष इति टीकायां व्यवहृतम् । अत्र व्युत्पत्तिप्रसिद्ध्योर्भेदमाह **योगवृत्त्येति** । **रूढ्येति** च **साभ्यासपृथिवीश्रुत्येति** । अद्भ्यः पृथिवी पृथिव्या ओषधय इत्येकस्मिन्प्रकरणे पृथिवीशब्दद्वयश्रवणं यदपां शर इति श्रुत्यन्तरे पृथिवीशब्दश्रवणं चाभ्यासोक्त्या संगृहीतं वर्षनिमित्तबहुभावापत्तिलिङ्गान्यथोपपत्तिप्रदर्शकम् । अन्यथाप्युपपत्तेरित्येतद् व्याचष्टे **अन्यथा पार्थिवव्रीह्यादिपरत्वेनाप्युपपत्तेरिति** । व्रीह्यादीनां पार्थिवत्वात्तेषामद्भ्यो जननोक्त्या पृथिव्या

* अत्र चतुर्थं तेजोधिकरणं पूर्णम् ।

† अत्र पञ्चमम् अबधिकरणं पूर्णम् ।

एवाद्भ्यो जननमुक्तं भवतीत्यर्थः । *अन्यथा पृथिवीपरत्वेनाप्युपपत्तेरिति पाठे ऽप्येवार्थे पर्यवसानम्* ॥

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥ ३१५

ईक्षत्याद्यधिकरणैरिति । ईक्षत्यधिकरणे श्रुतत्वाच्चेति† सूत्रे स करणा‡धिपाधिप इति श्रुतिमुदाहृत्य परमेश्वरस्य जगत्कारणत्वं प्रसाधितम् आनन्दमयाधिकरणे च तद्धेतुव्यपदेशाच्चेति§ सूत्रे इदं सर्वमसृजत यदिदं किं चेति श्रुतिमुदाहृत्य तत्र जगत्कर्तृत्वलिङ्गसमन्वयो दर्शितः बालाक्यधिकरणे|| च यो वै बालाकिः एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्म स वै वेदितव्य इति श्रुतिमुदाहृत्य तत्र तत्समन्वयो दर्शितः । कर्तृत्वं च सकलकारकान्तरप्रयोक्तृत्वम् । तेन परमेश्वरानधिष्ठितानां भूतानां स्रष्टृत्वनिषेधो लब्धः साक्षाच्च सांख्याधिकरणे¶ प्रधानस्य चेतनाधिष्ठानाभावे जगद्रचयितृत्वा**संभवो मृदादिदृष्टान्तेन समर्थितः । स न्यायो भूतेष्वपि तुल्यः । यद्यपि तस्य न्यायस्य पाशुपताद्यधिकरणो††क्तप्रतिन्यायैः पराहत्या स्वातन्त्र्येण नार्थसाधनक्षमता तथापि श्रुतिमनुग्राह्य प्रमाणे‡‡ प्रविष्टस्य तस्य वनप्रविष्टसिंहन्यायेन बलवत्त्वात्तस्यैव शरणम्§§ । एवमीक्षत्याद्यधिकरणैर्गतार्थः|||| ।

इत्याशङ्कामपनयन्निति । इत्थमाशङ्कापनयनं यथात्मन आकाश ,, । २० इत्यत्रात्मनः स्वातन्त्र्यमेवमाकाशाद्वायुरित्यादिष्वप्याकाशादीनां स्वातन्त्र्यमुतेश्वरपारतन्त्र्यमिति यदिह विचार्यते नेदमन्यत्र विचारितं किं तु स्वातन्त्र्यपूर्वपक्षे यदीक्षत्याद्यधिकरणेषु भूतानां ब्रह्माधिष्ठितानामेव कारणत्वं स्थितं यच्चान्तर्याम्यधिकरणे¶¶ साक्षाद् ब्रह्मणः सर्वनियन्तृत्वं स्थितं यच्च तेजोत*† इत्यधिकरणे तत्तद्भूतात्मना ऽवस्थितस्य ब्रह्मण

---

* अत्र षष्ठं पृथिव्यधिकाराधिकरणं पूर्णम् ।

† व्याससू॰ अ॰ ३ पा॰ २ सू॰ ३६ ।

‡ सकारणं करणेत्यादिः पाठः २ पु॰ ।

§ व्याससू॰ अ॰ १ पा॰ १ सू॰ १४ ।

|| व्याससू॰ अ॰ १ पा॰ ४ सू॰ १६ ।

¶ व्याससू॰ अ॰ १ पा॰ ४ सू॰ १ ।

** रचयितृत्वेति १ पु॰ पा॰ ।

†† व्याससू॰ अ॰ २ पा॰ २ सू॰ ३७ ।

‡‡ प्रमाणं शरणमिति १ पु॰ पा॰ ।

§§ शरणमिति नास्ति १ पु॰

|||| अधिकरणैर्गतार्थेति २ पु॰ पा॰ ।

¶¶ व्याससू॰ अ॰ १ पा॰ २ सू॰ १८ ।

*† व्याससू॰ अ॰ २ पा॰ ३ सू॰ १०।

एवोत्तरोत्तरकार्योपादानत्वं स्थितं तस्य सर्वस्याप्यनेनाक्षेपो भवतीति
१५ । २१ विशेषः । **पूर्वपक्षमाहेति** । आकाशाद्वायुरित्यादिश्रुतेर्य आकाशे तिष्ठन्नि-त्यादिश्रुतेश्चाकाशादिस्वातन्त्र्यपारतन्त्र्यविषयतया विरोधेनाप्रामाण्यमिति पादसंगतपूर्वपक्षे* प्राप्ते सत्येकदेशिमतरूपं पूर्वपक्षमाहेत्यर्थः । **आका-शादिशब्दैरिति** । यथा आत्मन आकाश इति स्वतन्त्रे ह्यात्मनि पञ्च-म्यर्थान्वयो दृश्यते तथा ऽऽकाशादित्यादिपञ्चम्यन्तोक्तानामपि तत्प्रायपा-ठेन स्वातन्त्र्यमवगम्यते । न चाऽचेतनानां स्वातन्त्र्यासंभवः । तत्तदभि-मानिदेवतार्थपरिग्रहात् । यमाकाशो न वेदेत्यादिश्रुतिष्वाकाशादिशब्दानां देवतापरत्वस्य दृष्टत्वात् । तत्तेज ऐक्षतेत्यादिच्छान्दोग्यश्रुतावीक्षणलिङ्गेन तेजःशब्दस्याप्यभिमानिदेवतापरत्वस्य वक्तव्यत्वेनाचापि तथात्वौचित्या-च्चेति भावः ।

यथा ऽऽकाशाद्यात्मनेति । समुच्चयोपमेयं बाह्यादिषु ब्रह्मस्व-रूपेण नोपादानम् आकाशादित्यादिपञ्चम्यन्तपदैस्तत्तदभिमानिदेवताप-दानामधिष्ठातृरूपनिमित्तत्वस्य प्रतिपादनतया तैराकाशाद्यनुगतस्य ब्रह्मण उपादानत्वाऽप्रतिपादनात् किं तु स्वविकारजडाकाशादिभूतरूपेण । नापि स्वरूपेणाधिष्ठातृ तत्तदभिमानिदेवतानामधिष्ठातृत्वावगमात् । ऐश्वर्यवतीनां च तासां स्वातन्त्र्योपपत्तेः । किं तु तत्तदभिमानिदेवतात्मनेत्यर्थः । एवं च सो ऽकामयतेत्यादिश्रुतौ ब्रह्मणो यत् सर्वत्र कार्ये कर्तृत्वमुपादानत्वं च श्रुतं यच्चान्तर्यामिब्राह्मणे तस्याकाशादिष्वपि नियन्तृत्वं श्रुतं तद्विरोधमा-शङ्क्य परिहरति **ननु सो ऽकामयतेत्यादिना** । **मूलकारणस्य च ब्रह्मण इति** । अथ मूलकारणत्वविशेषेण ब्रह्मणः सर्वोपादानत्वमपि मूल-कारणत्वात्पारम्पर्येणेति दर्शितम् । **अभिमानिदेवताद्वारेणेति** । आका-शमन्तरो यमयतीत्यादिवाक्यमाकाशाधिष्ठातृदेवतात्मभावेन व्यवहितस्य ब्रह्मण आकाशादिनियन्तृत्वपरम् । यमाकाशो न वेदेत्यादिकं कर्तृ†कर्म-
३१६ । १२ भावविरोधेन स्वस्य स्ववेद्यत्वाभावपरमिति भावः । **आकाशादिशब्दै-रिति** । आकाशादिशब्दानां चेतने तदभिमानिदेवतायां च प्रयोगसद्भावे ऽपि नोभयथापि शक्तिः । प्रसिद्धिप्राचुर्यानुसारेण तेषामचेतने शक्तिः देव·

* संगतपक्षे इति २ पु· पा· ।   † इत्यादिकर्म,इत्यादि· पाठः १ पु ।

तायां लक्षणेत्युपपत्तावुभयत्र शक्तिमत्त्वंनाऽयोगात् । एवं मनुष्यादिशब्दानामपि मनुष्यत्वादिजातिमत्सु देहेषु शक्तिः तदधिष्ठातृजीवेषु लक्षणा । न चाकाशाद्वायुरित्यादिष्वाकाशादिशब्दानां लक्षणायां कारणमस्तीत्यर्थः । तत्र **रूढतरत्वादिति** । अपादाने पञ्चम्याहत्य विहिता प्रसिद्धतरा हेतौ तु ज्ञापकान्वेषणेन कथं चित्समर्थनीया न प्रसिद्धेत्यर्थः ।

भूतात्मतामापन्नस्योपादानत्वमुक्तमिति भ्रममपनुदतीति । ३१६
आकाशादिविकाररूपेण तत्तद्विकारावच्छिन्नरूपेण वा ब्रह्मण उपादानत्वमुक्तमिति भ्रान्तिं निराकरोतीत्यर्थः । न विकारात्मना विकारावच्छिन्नेन वा परस्परव्यावृत्तेन रूपेणोपादानत्वं विवक्षितम् । तस्योभयस्यापि कल्पितत्वेन व्यावहारिकाध्यासाधिष्ठानत्वायोगात्सृष्टिनिरूपणस्याध्यारोपापवादन्यायेन निर्विशेषब्रह्मसिद्ध्यर्थतायाः असकृदावेदितत्वेनाचोपादानोपादेयभावस्याधिष्ठानाध्यस्तभावरूपस्यैव वक्तव्यत्वात् ।

अधिष्ठानं विवर्तानामाश्रयो ब्रह्म शुक्तिवत् ।
जीवाविद्यादिकानां स्यादिति सर्वमनाकुलम् ॥

इत्याचार्यैः प्रागुक्तया रीत्या सकलचेतनाचेतनप्रपञ्चविवर्ताधिष्ठानं सर्वविकारानुगतं यन्निर्विशेषं तेन रूपेणाकाशविकारानुगतेन सता वायूपादानत्वमित्याद्युक्तमिति समाधानार्थः । नन्वेवं सति आकाशादिपदानामाकाशाद्यनुगते ब्रह्मणि लक्षणा स्यात् लक्षणा चानुपदमेव निषिद्धा आत्मन आकाश इत्यादिषु प्रथमान्तानामाकाशादिपदानां विकारपरत्वस्य दृष्टत्वात्पञ्चम्यन्तानामपि मुख्यवृत्त्या तत्परत्वमेव च युक्तमिति चेत् । उच्यते । ब्रह्मण उपादानत्वोक्तिरियमार्थिकार्थविषया । आकाशाद्वायुरित्यादिशब्दार्थस्तु आकाशवाय्वादीनामेव मृद्घटन्यायेनोपादानोपादेयभावस्तस्मिन् कथिते तदाकाशादिविकारानुगतं ब्रह्म वाय्वाद्यधिष्ठानमित्यर्थोऽत्सिध्यति । अन्यथा तच्च त्यच्चाभवदित्यादिश्रुत्युक्तस्य ब्रह्मणः सर्वप्रपञ्चाध्यासाधिष्ठानत्वस्यानिर्वाहात् । इदमाकाशादित्यादिपदानां मुख्यवृत्त्या विकारमात्रपरत्वं तत्तद्विकारानुगतस्य ब्रह्मणोऽधिष्ठानत्वस्यार्थिकत्वं च विवरणाचार्यैर्न्यायनिर्णये वर्णितम् । तच्चेदमधिकरणमित्थं दर्शितम् । आकाशादीनामुत्तरोत्तरभूतोपादानत्वं पञ्चम्यन्तपदैर्यदवगतं तत्तावदन्याऽनपेक्षं प्रतीयते तावतैव वायोरुपादानाकाङ्क्षापूरणात् ।

व्रीहयो निरपेक्षा हि ज्ञायन्ते यागसाधनाः ।
यवाश्चैवमतस्तेषां मिश्रत्वं नावकल्पते ॥

इति न्यायाद् ब्रह्मणो ऽप्यन्यानपेक्षं सर्वोपादानत्वमाकाशादेव समुत्पद्यतइति सावधारणश्रुत्या ऽवगतं तत्रान्यतरोपादाने ऽन्यतरपदार्थबाधप्रसङ्गात् श्रुतपदार्थबाधकल्पनाद्वरं धर्मबाधकल्पनमिति वियदधिकरणोक्तन्यायेन नैरपेक्ष्यधर्मं बाधित्वा समुच्चयो ग्राह्यः । अतः पूर्वपूर्वभूताकारापन्नं ब्रह्मोत्तरोत्तरभूतोपादानमिति । यद्यप्याचार्याणामप्ययमर्थो ऽभिमतस्तथापि वियदधिकरणेन गतार्थमालोच्य टीकानुसारेणाधिकरणशरीरं प्रकारान्तरेण दर्शितं वियदधिकरणन्यायसिद्धस्त्वयमुपादानसमुच्चयस्तेजोत इत्यधिकरणएव सिद्धवत्कृत्य व्यवहृतः । अस्माभिस्तु चतुर्मतसारसंग्रहे टीकोक्तं न्यायनिर्णयोक्तं चार्थं संयोज्याधिकरणशरीरं दर्शितम् ।

तत्तद्भूताकारापन्नं सदितरजनकमिति कथं श्रुतिद्वयवैशसाद्
व्योमादीनां पञ्चम्या हि श्वसनमुखजनिषु विदिता स्फुटं निरपेक्षता ।
तेषां स्वातन्त्र्यं चादृष्टं सत एव बहुभवनदृशः श्रुतावुपवर्णना-
दाकाशादेवेत्यप्यन्या श्रुतिरिह समधिगमयते सतो निरपेक्षताम् ॥
बाधं नार्हन्त्येते सर्वे द्विविधवचनसमधिगता यतः खलु धर्मिणः
सन्त्याकाशाश्चेहासते न हि किमपि विनिगमकं तदन्यतरोज्झितौ ।
तस्माद्बाध्या तद्धर्मत्वाद्वियदधिकृतिकथितनयादियं निरपेक्षता
भूतानां तत्स्वातन्त्र्यं च स्थितवति यमयितरि परे न किञ्चन युज्यते ॥

भुजङ्गविजृम्भितं नामेदं वृत्तम् । अत्र पूर्वपक्षश्लोके यदाकाशादीनां स्वातन्त्र्यं तच्छान्दोग्यश्रुतिमवलम्ब्य निबद्धं तत्र तैत्तिरीयोक्तवियत्पवनोपसंहारे तयोरपि तेजोजलयोरिव बहुभवनवीक्षणायुक्तवाक्यद्वयकल्पनात् । तैत्तिरीयश्रुतिस्तु भूतानां न्यायनिर्णयोक्तनिरपेक्षोपादानत्वप्रतीतिनिर्वाहार्थं तया निवेशितेत्याचार्योक्तपूर्वपक्षप्रकाराद्भेदः* ॥

२१६ । २० **विपर्ययेण तु क्रमो ऽत उपपद्यते च ॥ १४ ॥**

किं दृष्टो ऽप्ययक्रम इत्यादिसिद्धान्तकोटिप्रदर्शकं वाक्यं योजयन्नवतारयति **घटादीनामिति ।** घटादीनां यो विपरीतो ऽप्ययक्रमो

* अत्र सप्तमं तदभिध्यानाधिकरणं पूर्णम् ।

दृष्टः स भूतानामस्तु किमित्याहेत्यर्थः । अप्ययस्य क्रमापेक्षायामित्यादिसिद्धान्तग्रन्थं तात्पर्यकथनपूर्वकमवतारयति **सन्निधाने ऽपीति** । दृष्टानुमानेोपनीतेत्येतद् दृष्टपदस्यानुमानेोपनीतपदस्य च कर्मधारयमाश्रित्य व्याचष्टे **घटादैा दृष्टेनेति** । ननु श्रुतिसन्निहितादपि लैाकिकक्रमः सन्निहिततर इत्ययुक्तं तथा सत्यश्वदाननिमित्तायां चाहणचतुष्कपालेष्टैा श्रुतिसन्निहितं पैाण्डरीके ऽश्वदानं न निमित्तं किं तु सुहृदादिभ्यः क्रियमाणं लैाकिकमश्वदानं निमित्तमिति स्यात् । किं च लोकादरणे लोके दग्ध*पटादिषु समकालः कार्यकारणयोरप्ययो दृष्ट इत्यक्रम एवात्र किं न स्यात् । यद्युच्येत श्रुतैा भूतानामुत्पत्तिः क्रमवती दृष्टेति तेषामप्ययेनापि क्रमवता भाव्यमिति । तर्हि क्रमाकाङ्क्षेत्यापकत्वेन श्रुतावुत्पत्तिक्रमदर्शनं प्राथमिकमिति श्रैातक्रम एव लैाकिकक्रमाद् बुद्धिस्थसन्निधानेन सन्निहिततर इत्यस्वरसाद्वेत्वन्तरोक्तिरित्यवतारयति **दृष्टेन क्रमेणेति** । भूतानामप्ययक्रमस्तु भूतशुद्धिप्रकारेण द्रष्टव्यः । स यथा गन्धादिपञ्चगुणसंघातरूपा पृथिवी प्रथमं गन्धापचयेन रसादिचतुर्गुणसङ्घातात्मकजलरूपतामापद्यते ततो जलं रसाप्ययेन तेजोरूपतां तेजो रूपाप्ययेन वायुरूपतां वायुः स्पर्शाप्ययेनाकाशरूपतां ततः शब्दतन्मात्राप्यय एवाकाशाप्ययः । एवं रसादिचतुर्गुणसङ्घातरूपं जलतत्त्वं प्रथमं रसाप्ययेन तेजोरूपतामापद्यतइत्यादि द्रष्टव्यम् । गुणसङ्घातातिरिक्ततदाश्रयद्रव्याभ्युपगमे च पञ्चगुणा पृथिवी चतुर्गुणजलरूपतामापद्यतइत्यादिक्रमो ऽनुसंधेयः†॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १५ ॥ ३१७

भूतोत्पत्तिलयशीलनं हीति । यद्यपि तच्छीलनेन पूर्वप्रलयपुनःसर्गमध्यवर्तिकादाचित्कमेवेति निष्प्रपञ्चत्व लभ्यते न त्वध्यस्तवियदादिप्रपञ्चमिथ्यात्वपरिशीलनेनेव सार्वदिकं निष्प्रपञ्चत्वं तथापि स्थूललक्ष्याभ्यासन्यायात् तत्र क्रमेणोपयुज्यते इति भावः । कथं बुद्धीन्द्रियाणामुत्पत्तिचिन्तेति करणव्युत्पत्त्याश्रयणेपि मनः सर्वेन्द्रियाणि चेति श्रुतैा सर्वशब्दगृहीतानां कर्मेन्द्रियाणां न संग्रह इति शङ्का ऽजहल्लक्षणया तेषामपि संग्रह इति समाधानार्थः ।

---

* लोकदग्धेति च पु पा० ।   † अत्राष्टमं विपर्ययाधिकरणं पूर्णम् ।

श्रुतिविरोधपरिहारेणेति । आत्मन आकाश इत्यादिश्रुतेरेतस्माज्जायत इत्यादिश्रुतेश्च भूतेन्द्रियोत्पत्तिक्रमविषये विरोध इति पूर्वपक्षः । आथर्वणपाठक्रमादिन्द्रियाणां प्रथममुत्पत्तिः छान्दोग्ये तेजसः प्रथमं श्रवणे ऽपि तैत्तिरीयकाम्नातवियत्पवनोपसंहारेण तेजःप्राथम्यस्येव तैत्तिरीयके वियतः प्रथमं श्रवणे ऽपि आथर्वणाम्नातमनइन्द्रियोपसंहारेण वियत्प्राथम्यस्यापि बाधोपपत्तेः । न च मनइन्द्रियाणां भौतिकत्वेन श्रुतभूतोत्पत्त्यनन्तरभावित्वस्य वक्तव्यतया पाठक्रमादर्थक्रमो बलीयानिति तेषां भूतानन्तरं निवेशो युक्त इति वाच्यम् । तेषामाहङ्कारिकत्वेन भौतिकत्वासिद्धेः । न च यः प्राणः स वायुरिति प्राणभौतिकत्वश्रवणात्तस्य भूतानन्तरं निवेशः कार्यस्तत्प्रायपाठान्मनइन्द्रियाणामपि भूतानन्तरं निवेशः स्यादिति वाच्यम् । प्राणस्यार्थतः पाठक्रमबाधेन पश्चान्निवेशे ऽपि मनस इन्द्रियाणां च प्रायपाठरूपेण स्थानप्रमाणेन पाठक्रमबाधनायोगादित्येकदेशिमतम् ।

३१८ । ८ **मनसो ऽन्नमयत्वेन निर्देश इति ।** त्रिवृत्करणरूपविकारकथनपरे वाक्ये अन्नमयत्वनिर्देशो मयटो विकारार्थत्वे लिङ्गमित्यर्थः । नन्वापोमयः प्राण इत्यत्र मयटो नास्ति विकारार्थत्वम् । अथाऽपां वायुरूपप्राणे कारणत्वं न सम्भवतीति तत्त्यागः तर्हि प्राक्सिद्धे मनसि प्रत्यहमश्यमानस्यान्नस्य कारणत्वं न सम्भवतीत्यत्राप्यसम्भवस्तुल्यः कथं च मनसो ऽन्नविकारत्वश्रवणमात्रेण सर्वेषामिन्द्रियाणां भौतिकत्वसिद्धिः । उच्यते । वायुरूपः प्राणो ऽपां मुख्यो विकारो न भवतीत्याप्यायनमात्रेणाऽमुख्यं विकारत्वं मयडर्थ आश्रीयते न वा ऽन्नमयमित्यत्र तस्य मुख्यार्थपरित्यागे कारणमस्ति । प्राक्सिद्धे ऽपि मनस्युपचितरूपावच्छिन्ने कारणत्वोपपत्तेः । दृश्यते हि प्राक्सिद्धे ऽपि तडागे वृष्टिजलस्योपचितरूपावच्छिन्ने कारणत्वम् । एवं तेजोमयी वागित्यत्रापि मयटो मुख्यविकारार्थत्वं द्रष्टव्यम् । एवं वाङ्मनसयोर्भौतिकत्वकथनं स्थालीपुलाकन्यायेनोपलक्षणमित्यन्येषामपीन्द्रियाणां सांख्यकल्पिताहंकारप्रकृतिकत्वासंभवाद् भौतिकत्वसिद्धिः* ॥

३१८ । १३ **चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥**

* अत्र नवमम् अन्तराविज्ञानाधिकरणं पूर्णम् ।

प्रासङ्गिकीं संगतिमाह **एवं तावत्तत्पदवाच्येति** । पूर्वोत्तराधिकरणयोः संगतिमाह **यदीन्द्रियोत्पत्तिरिति** । तन्मृतो देवदत्त इति पाठमाश्रित्य तदिति तस्मादित्यर्थ इति व्याख्यानं तस्मान्मृत इति पाठस्तु स्पष्टार्थः । **देहेन सहेति** । जीवनित्यत्वश्रुतीनां जीवजननमरणनिमित्तजातकर्मश्राद्धादिविधीनां च विरोधेन पूर्वपक्षे जातकर्मादिविध्यन्यथानुपपत्त्या जीवस्य जनिरङ्गीकार्या । न च तत्र देहजनिर्निमित्तं मृतजातदेहेऽपि जातकर्मादिप्रसङ्गात् । तस्माज्जीवनित्यत्वश्रुतयो भाक्तत्वेन व्याख्येया इत्येकदेशिमतम् । तत्र श्राद्धादिविधेरन्यथोपपादयितुमशक्यत्वाज् जीवनित्यत्वमवश्यमङ्गीकार्यम् । जातकर्मादिविधीनां जीवसंयुक्तदेहजन्म निमित्तं भविष्यतीत्येवं सिद्धान्तयतीत्यर्थः । भक्तिश्च शरीरस्योत्पादविनाशौ ततस्तत्संयोग इति टीकाग्रन्थं भक्तिश्च तत्संयोग इति व्यवहितान्वयेन शरीरस्योत्पादविनाशौ स्त इति वाक्यभेदेन च योजयति **भक्तिरित्यादिना** । भक्तिश्च शरीरस्योत्पादविनाशवतः संयोग इति पाठे त्वेकमेव वाक्यम्* ॥

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥ २१९ ।

कल्पाद्यन्तयोरुत्पत्तिविनाशवानिति । कल्पादौ परमेश्वरसंकल्पमात्रभवा अयोनिजा जीवा जन्मप्रभृत्येव कर्मानुष्ठानशक्ता इति तदुत्पत्त्यनन्तरकालानुष्ठितसाध्वसाधुकर्मपरम्पराधीना तेषां भोगवैचित्री न पूर्वकल्पानुष्ठितकर्माधीनेति भावः । **न शुद्धस्येति** । शुद्धस्यैव स्वरूपेण प्रविलये मुक्तिभाङ्गमपि न स्यादिति भावः ।

अविभागस्येति च्छेद इति । विभागमङ्गीकृत्य सर्वविज्ञानप्रतिज्ञानिर्वाहार्थं कार्यत्वाङ्गीकारे च कल्पादावुत्पन्नानां भोगे वैचित्र्यं न स्यात् । प्राथमिकसाध्वसाधुकर्मकरणस्य तद्वैचित्र्यहेतुत्वे च तत्करणस्य पूर्वकल्पानुष्ठितकर्मापेक्षत्वाभावे तैस्तैर्जीवैः प्रथमं साधून्यसाधूनि च कर्माणि कारयितुमीश्वरस्य वैषम्यनैर्घृण्ये प्रसज्येयातां प्राथमिककर्माचरणोपूदास्ते परमेश्वरस्तदनुसारेणोत्तरोत्तरकर्माण्येव कारयतीत्येवं तस्य सर्वकर्मकारयितृत्ववचनानां द्वितीयादिकर्मविषयतया संकोचकल्पने ऽप्ययमसाधु कर्म करिष्यतीति जानतः परमेश्वरस्य कूपे बालकः पतिष्यतीति जानतस्तत्परिह-

* अत्र दशमं चराचरव्यपाश्रयाधिकरणं पूर्णम् ।

रणाऽशक्तस्येश्वरौदासीन्यकृतस्तदुभयप्रसङ्गो ऽशक्यनिराकरणः । तस्मादनादिकर्मपरम्पराश्रयणाज्जीवानामनादित्वस्य सर्वविज्ञानप्रतिज्ञानस्य चोपपादनार्थमविभाग एवाभ्युपेय इति भावः* ॥

१९ । १५ **ज्ञो ऽत एव ॥ १८ ॥**

एवं ज्ञानयोग्यत्वस्येति । ब्रह्माभेदविरोधिष्वनित्यत्वास्वप्रकाशत्वाणुत्वस्वाभाविककर्तृत्वेषु निरस्तेषु ज्ञाततदभेदयोग्यताकस्येत्यर्थः । यद्यपि कर्ता शास्त्रार्थवत्त्वा†दित्यधिकरणेनोपपादनीयं जीवगतं कर्तृत्वमध्यस्तमित्येतदेवाभेदयोग्यताज्ञानोपयोगि न तु परात्तु तच्छ्रुते‡रित्यधिकरणे व्युत्पादयिष्यमाणं जीवेश्वरयोः प्रवर्त्यप्रवर्तकत्वमपि । तत्तु भेदसापेक्षं सदभेदयोग्यताविरोधित्वशङ्कास्कन्दितं काल्पनिकभेदेन कथं चिदुपपादनीय तथापि तद्विषयश्रुतिकलहो ऽपि क्व चिद्वारणीय इति प्रसङ्गादत्रैव पादे तद्वारणं कृतम् । अतो मूलाधिकरणसङ्गत्यैव प्रासङ्गिकाधिकरणमप्यत्र सङ्गतमिति भावः§ ॥

३२० । ९ **उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥**

अचलतो ऽपीति । यद्यप्यवयव्युत्पत्तौ उत्क्रमणमूर्ध्वदेशक्रमण॥रूपं चलत एव भवति तथापि जीववैभववादिनो जीवस्य तदसम्भवादुत्क्रमणशब्दस्य देहाभिमाननिवृत्तिमात्रं मरणमिति तत्र रूढिं मन्यन्ते तदाशयानुरोधेनाचलतोऽपि तत्संभव इत्युक्तम् । **सापादाना च सतीति ।** उत्क्रान्तिर्देहादपसृप्तिरूपा साक्षादणुत्वसाधनमित्यत्र गत्यागतिश्रवणमिव विश्लेषावधिरूपापादानश्रवणमपि हेतुस्तत्समुच्चयार्थ इत्यर्थः । उत्क्रान्तिरपीत्यपिशब्दस्य भिन्नक्रमत्वं विनोत्क्रान्त्यन्वयेऽपि घटते गत्यागतिवदुत्क्रान्तिरपि गत्यागतिशिरस्कत्वात्सापादानत्वाच्च देहादपसृप्तिरूपा सत्यणुत्वसाधनमिति न केवलमुपादानश्रुतेरित्यादिटीकाग्रन्थं योजयन्नेव तस्य तात्पर्यमाह चक्षुष इति । केवलमुत्क्रान्तिरणुत्वसाधनमित्येतदपादानश्रुतेरेव न भवति किं तु हृदयादीनां गन्तव्यत्वश्रुतेरपि । यद्यपि हृदयगमनं ततो जागरिते पुनः चक्षुरादिस्थानगमनं च साक्षादणुत्वसाधनं तथापि तथाभूतयोरेव पूर्वोदाहृतगत्यागत्योरुत्क्रान्तेर्देहादपसृप्तिरूपत्वगमकतया तस्या अणुत्वसाधन-

---

* अत्र एकादशम आत्माधिकरणं पूर्णम । † व्याससू॰ अ॰ २ पा ३ सू॰ ३३ ।
‡ व्याससू॰ अ॰ २ पा॰ ३ सू॰ ४१ । § अत्र द्वादश ज्ञाधिकरणं पूर्णम् ।
॥ ऊर्ध्वदेशात्क्रमणेति २॰पु पा॰ ।

तासिद्धाविज्ञानयोरपि तत्सिद्धावुपयोगो युज्यत इति तात्पर्यम् । **सुषुप्तः
पुनरिति ।** सुषुप्तशब्दस्योत्तरवाक्ये ऽन्वयः न तु व्याप्नोति सुषुप्त इति पूर्व-
वाक्ये । स यत्र तास्तेजोमात्रा इत्यादिवाक्यं सुषुप्तविषयं शुक्रमादाय पुनरेति
स्थानं हिरण्मयः पुरुष एकहंस इति मन्त्रः सुषुप्तविषय इति भेदात् ।
अत्र मात्रेत्यध्याहार इति । आरामिति प्रथमान्ते आराममिति मात्रे-
त्यध्याहार इत्यर्थः । **उक्तमार्गेणेति ।** त्वगिन्द्रियोदाहरणेनेत्यर्थः ।
तथा सति त्वग्जीवसंयोगस्यापीति । महदल्पयोः संयोगो ऽल्पानुरो- ३२ ।
धीति सिद्धान्तिनैवाणोर्जीवस्य सकलशरीरव्यापिनीं वेदनां समर्थयमानेन पूर्व-
पक्षिणा वक्तुं न शक्यमिति भावः । ननु जीवमनःसंयोगस्य मनोऽनुरो-
धित्वे ऽपि मनःसंयुक्तायास्त्वचः सर्वशरीरव्यापित्वात्सर्वाङ्गीणशैत्योपलब्धि-
रित्ययुक्तं जीवमनःसंयोगवत् मनोनुरोधित्वादित्याशङ्क्य **ननु त्वङ्मनः-
संबन्धो ऽपीति ।** **दण्डवदिति ।** यथैकदेशे गृहीते दण्डः* पुरुषेणाधि-
ष्ठीयते तथेत्यर्थः । ननु जीवमनःसंयोगो ज्ञानासमवायिकारणं तस्य प्रादेशि-
कत्वे कथं ज्ञानं व्यापीति शङ्कावारणार्थमसमवायिकारणस्य प्रादेशिकत्वे ऽपि
कार्यमप्रादेशिकं तन्तुसंयोगस्य तन्त्वेकदेशस्थत्वे ऽपि पटस्य तन्तुव्यापित्वादि-
ति केषु चिद्ग्रन्थेष्वधिकः पाठः । यद्यप्यन्तःकरणमणिवत्यादिटीकावाक्य तद्व्या-
ख्यानं च मनो ऽणु तस्यात्मना संयोगश्च ज्ञानासमवायिकारणमिति नैया-
यिकपक्षमाश्रित्य यदि सिद्धान्तानुसारेण पाञ्चभौतिकमनः प्रदीपप्रभावत्संकोच-
विकासशीलं तत्संयोगश्च नासमवायिकारणं तदा नैवात्र परिहरणीया शङ्का
ऽस्ति । **न चाणोरिति ।** न चाणोर्जीवस्येति पूर्ववाक्योक्तमर्थं विवृणोतीत्य-
र्थः । नन्वत एव हीत्यादिग्रन्थो न युक्तः समीपे स्थितस्यैव गन्धवद्द्रव्यस्येव
शीतद्रव्यस्यापि सन्निहितदेशस्थितस्य व्यापको गुण उपलभ्यत इति वक्तुं शक्य-
त्वादित्याशङ्क्याह **न चात्रापि विप्रतिपत्तव्यमिति । तत्प्रापणविषय-
मित्याहेति ।** प्रापणग्रहण सुषुप्तेरप्युपलक्षणं तथैवाग्रिमभाष्यदर्शनात्† ॥

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ ३२३ । ४

बन्धमोक्षावस्थाविषयत्वेनेति । बन्धावस्थायामाध्यासिकं कर्तृ-
त्वं मोक्षावस्थायां स्वाभाविकमकर्तृत्वमित्येवं विषयभेदेनेत्यर्थः । यद्यपि

---

* यथोक्तो दण्ड इति १ पु॰ पा॰ । † अत्र अर्धत्वम् उत्क्रान्तिगत्याद्यधिकरणं पूर्णम् ।

जीवस्याल्पपरिमाणवत्कर्तृत्वमपि बुद्ध्युपाधिकमिति वक्तुं भाष्यं तथापि शास्त्रप्रतिपन्नं कर्तृत्वं किमर्थमस्वाभाविकमङ्गीकरणीयं बुद्धेरेव तत्स्वाभाविको धर्मः जीवस्त्वकर्तेति विषयभेदेन विरोधपरिहारो ऽस्तु । अथ वा जीवस्यैव संसारदशायां फलमुखकर्तृत्वं न मुक्तिदशायामवस्थाभेदेन तत्परिहारो ऽस्त्विति शङ्काद्वयनिराकरणार्थो ऽधिकरणद्वयारम्भः । **क्रियाश्रयत्वइति** । क्रियावेशो हि विक्रियमाणस्य भवति विक्रियमाणस्य चानित्यत्वं नियतमिति भावः । ये इत्यस्य विशेष्यमध्याहरति **सांख्या इति । अनित्यत्वं परिहरतीति** । कर्तृत्वस्याध्यासिकत्वेन टीकायामनित्यत्वपरिहारः कृतः । स्वयं सांख्यान् प्रति भोक्तृत्वप्रतिबन्द्या परिहारान्तरमाह **चित्स्वभावत्वं चेदिति । कोशरूपबुद्धेरभिधानादिति** । बुद्धिरूपविज्ञानमयकोशपर्याये श्रुतस्य विज्ञानं यज्ञं तनुतइत्यस्य नात्मकर्तृत्वसाधकतेत्यर्थः । **अन्यापेक्षायामपि स्वातन्त्र्यमुपपादनीयमिति** । न त्वन्या ऽनपेक्षोपपादनीयेति भावः । प्रकृतसङ्गते ऽर्थे भाष्यं योजयति **उपलब्धाविति** । नित्यचैतन्यस्वरूपायां विषयोपलब्धौ तावन्नेन्द्रियाद्यपेक्षा नापि तदपेक्षितजन्योपलब्ध्यन्तरे उपलब्धेरुपलब्ध्यन्तरानपेक्षत्वात् किं तु नित्योपलब्धावेव विषयोपरक्तरूपायाम् । न च तावता स्वातन्त्र्यव्याघातः सर्वत्र कर्तृरूपकरणापेक्षादर्शनादित्यस्मिन्नर्थे भाष्यं योज्यमित्यर्थः* ॥

यथा च तक्षोभयथा ॥ ४० ॥

३२४ । ११ **स आत्मा तथेति** । स आत्मा तत्स्वभावस्येति शब्देनोक्त इत्यर्थः । ननु स्वभावोच्छेदात्स्वभाविनो भावस्य नाशप्रसङ्ग इति धर्मनाशेन धर्मिनाशापादनमयुक्तमित्याशङ्क्य स्वभावसिद्धधर्मनाशे धर्मिनाशः स्यादित्युपपादयति **स्वभाविनि सतीति । परमार्थेति** । पारमार्थिका शक्तिर्मोक्षे ऽप्यनुवर्तेतइति वादिनां मतइत्यर्थः । **भाष्ये कर्तृत्वमात्रस्येति** । अहङ्कारपूर्वकमपि कर्तृत्वं नोपलब्धुमर्हतीति भाष्ये कर्तृत्वसामान्यस्याहङ्कारिकस्यात्मन्यध्यस्तत्वं निषिध्यतइति प्रतिभाति । न च तद्युक्तम् । आत्मन्याहङ्कारिककर्तृत्वाध्यासस्याध्यासभाष्ये समर्थितत्वादित्याशङ्क्य चैतन्यकर्तृत्वस्यैवात्मन्यध्यसनीयत्वेन निषेध इत्याहेत्यर्थः । तथाविधत्वेनेति

* अत्र चतुर्दश कर्त्रधिकरणं पूर्णम् ।

स्थाने तथाविरुद्धत्वेनेति* क्वचित्पाठः । तत्र तथा आत्मन्यध्यसनीयत्वेन निषेधः कर्मकर्तृभावस्य विरुद्धत्वादित्यर्थः । यदि बुद्धेरुपलब्धिर्भवेदिति ग्रन्थं व्याचष्टे बुद्धेः कर्त्र्या इति† ॥

परात्तु तच्छ्रुतेः ॥ ४१ ॥ ३२५ ।

न चेश्वर इत्यादिटीकाग्रन्थेन रागादिरहितस्येश्वरस्य साध्वसाधुकर्मसु प्रवर्तकत्वमेवानुपपन्नमित्युक्त्यनन्तरसमुत्थितशङ्कान्तरनिराकरणार्थं येन धर्माधर्मापेक्षयेत्यादिवाक्यं मध्ये शङ्कान्तरं विना तदनन्वयादिति मत्वा शङ्कान्तरनिराकरणार्थत्वेन योजयति **तत्र प्रवर्तकत्वमेव तस्यायुक्तमित्यादिना** । अनेन न चेश्वरः सन् कर्मपरतन्त्र इति युक्तं येन तस्य प्रवर्तनीयधर्माधर्मापेक्षया साध्वसाधुकर्मप्रवर्तयितृत्ववैचित्र्यमुपपद्येतेत्यस्मिन्नर्थे तद्वाक्यं योजितम् । **विधिप्रतिषेधयोरिति** । ईश्वर एव विधिप्रतिषेधयोर्नियुज्येतेति भाष्यस्येश्वर एव विधिनिषेधशास्त्रनियोज्यः स्याद् न तु जीवो न स्वर्गकामनादिमान् मनुष्य इत्यर्थः प्रतिभाति न तु सोऽर्थो युक्तः । न हीश्वरस्य कर्माऽनपेक्षस्य जीवप्रवृत्तिनिवृत्तिकारयितृत्वे तथा दोष आपद्यते किं त्वीश्वरस्य स्वतन्त्रत्वे स एव विधिनिषेधस्थानाभिषिक्तः स्यादित्येष दोष आपद्यतेऽतस्तथार्थस्फूर्तये भाष्ये स्थानइति पदमध्याहरतीत्यर्थः‡ ॥

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४३ ॥ ३२६ ।

निरतिशयोपाधिसंपद्विभूतियोगादित्यस्य सकलाविद्योपाधिसम्बन्धादित्यर्थः प्रतीयते सोऽर्थो न युक्तः जीवानामेवाविद्याश्रयत्वाद् ब्रह्मणस्तदनाश्रयत्वादित्याशङ्क्यान्यथा व्याचष्टे **अधिष्ठानेति** । अनेनाधिष्ठाने ब्रह्मणि निरतिशयानां स्वकृतदोषरूपातिशयानाधायिनामुपाधीनां संपद् अविद्योपाधिविषयीकरणं यस्य तस्माद्विभूतियोगाद् अविद्यादोषकृतैश्वर्यपरिच्छेदरहितपारमेश्वररूपसंपादनादिति व्याख्यानं कृतम् । इत्थमपि व्याख्यातुं शक्यम् । उपाधिशब्देन मायोपाधिकृताः सृष्ट्यादिशक्तय उच्यन्ते ताश्च निरतिशया न तु जीवशक्तिवत्कतिपयसृज्यादिविषयत्वेन सातिशयास्तासां

---

* तेषां विरुद्धत्वेनेति २ पु॰ पा॰ ।
† अत्र पञ्चदशं तक्षाधिकरणं पूर्णम् ।
‡ अत्र षोडशं परायत्ताधिकरणं पूर्णम् ।

संपद्बाहुल्यं सैव विभूतिरैश्वर्यं तद्योगादिति । एवं च लोके ऽप्यधिकशक्तयो राजादयो ऽल्पशक्तीनां प्रजादीनामीशत इति दर्शनात्तथैव निरतिशयशक्तिशाली परमेश्वरो निकृष्टोपाधीनामल्पशक्तीनां देवमनुष्यादिजीवानामीष्ट इति वाक्यार्थः परिनिष्पन्नो भवति । निरतिशयोपाधिसंपन्नश्चेश्वरो हीनोपाधिसंपन्नान् जीवान् प्रशास्तीति भाष्यस्याप्येवमेवार्थः । अयमिह पूर्वपक्षः । सन्ति तावज् ज्ञातृज्ञेयध्यातृध्येयनियम्यनियामकाधेयाधिकरणभावादिविषया भेदश्रुतयः । सन्ति चाभेदश्रुतयः । यथा ऽऽथर्वणिकानां संहितोपनिषदि ब्रह्मसूक्ते ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत स्त्रीपुंसौ ब्रह्मणो जाताः स्त्रियो ब्रह्मोत वा पुमानिति मन्त्रः । यथा वा श्वेताश्वतरोपनिषदादिषु त्वं स्त्री त्वं पुमानित्यादयः । न चोभयविधश्रुत्यनुग्रहाय भेदाभेदपक्षाभ्युपगमो युक्तः । तस्य विरोधादिभिर्दुष्टत्वात् । तस्मादप्रमाणमेताः श्रुतय इति ।

अत्र टीकानुसारेण सिद्धान्त्येकदेशिमतम् । ईश्वर एव नास्ति । यतो जीवानां भेदाऽभेदचिन्ता तद्विषयश्रुतयस्तु केवलमर्थवादाः । भेदपक्षे ऽभेदपक्षे भेदाभेदपक्षे च दोषदर्शनात् । न च तद्दोषपरिहाराय जीवा न सन्तीति वक्तुं युक्तम् । तेषां प्रत्यक्षादिसिद्धत्वात् । अतो जीवानामेव जात्यैक्यमवलम्ब्याद्वितीयश्रुतय इति । भाष्यानुसारेण तु भेदश्रुतयः स्वार्थपराः पूर्वाधिकरणनिर्णीतस्य प्रवर्त्यप्रवर्तकभावस्य भेदापेक्षत्वात् स्वामिभृत्ययोस्तथात्वदर्शनात् । अभेदश्रुतयस्तु चेतनत्वसाम्यैक्यनिबन्धना उपचरितार्थाः अभेदे सुखदुःखवैचित्र्यानुपपत्तेरिति । एवमीश्वरापलापेनैव सिद्धान्त्येकदेशिमतं द्रष्टव्यम् । ननु क्रत्वर्थग्रहणेन गोदोहनादिपुरुषार्थप्रवृत्तिः पुरुषाभिप्रायानुरोध्यनुज्ञाधीनाभ्युपगता भवेदिति शङ्कां परिहरतीत्याह अपि च पुरुषार्थे ऽपीति* ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य-
श्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षि-
तस्य कृतौ श्रीवेदान्तकल्पतरुपरिमले द्वितीय-
स्याध्यायस्य तृतीयः पादः ॥

---

* अत्र सप्तदशम् अंशाधिकरणं पूर्णम् ।

अथ द्वितीयाध्यायस्य चतुर्थः पादः ।

तथा प्राणाः ॥ १ ॥ ३२९

ब्रह्मवेदने सर्ववेदनप्रतिज्ञा तदुपपादकश्रुतिविरोधादिति टीकायां ब्रह्मवेदनइत्यस्य द्वन्द्वसमासान्तर्गतपूर्वपदार्थभूतया सर्वविज्ञानप्रतिज्ञया ऽन्वयमपेक्षावशेन दर्शयति **कस्मिन्निति** । कस्मिन्सतीत्यर्थः ।

दोषात्त्विष्टिरिति । प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवता-मार्च्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति यो ऽश्वं प्रतिगृह्णाति यावतो ऽश्वान् प्रतिगृह्णीयात्तावतो वारुणा*श्चतुष्कपालान्निर्वपेद् वरुणमेव स्वेन भागधेयेनोपधावति स एवैन वरुणपाशान्मुञ्चतीति तैत्तिरीयाः समामनन्ति । अस्यार्थः । प्रजापतिर्वरुणाय प्रतिग्रहीत्रे अश्वमनयद् अददात् स प्रजापतिः स्वां देवतां प्रतिग्रहीतृत्वेन स्वदेवताभूत वरुणमार्च्छत् प्रापद् वरुणग्रहशब्दितः जलोदरव्याधियुक्तो जातः तत्परिहारार्थं वारुणीं चतुष्कपालेष्टिं कृतवानिति ।

एवमुपक्रमानुसारेणेयं दातुरिष्टिरित्युत्तराधिकरणे स्थास्यन्तमर्थं† सिद्धवत्कृत्यैतदधिकरणप्रवृत्तिरित्याह **ततो दानमित्तेष्टिरिति** । ननु उत्तराधिकरणार्थमनुपेक्ष्य यो ऽश्वं प्रतिगृह्णातीति यथाश्रुत‡वैदिकशब्दानुसारेण लौकिके ऽश्वप्रतिग्रहे वैदिके वेत्येवमेतदधिकरणप्रवृत्तिः किं न स्यादित्याशङ्क्याह **न तु लौकिके इति** । वैदिकत्वं वेदविहितत्वरूपं प्रतिग्रहे ,, । २०
न संभवति । यद्यपि प्रतिग्रहेर्ब्राह्मणो§ धनमर्जयेदिति नियमविधिव्यापारो ऽस्ति तथाप्यश्वप्रतिग्रहे सो ऽपि नास्ति नोभयतोदतः प्रतिगृह्णातीति तन्निषेधात् । किं च शास्त्राद्धि वैदिके न दोषः स्यादिति वैदिके दोषाभावः

---

*, ** वारुणानिति २ पु॰ पा॰ ।

† स्थितमर्थमिति १ पु पा॰ । ‡ यथाश्रुतमिति १ पु पा॰ ।

§ प्रतिग्रहे याजनाध्यापनप्रतिग्रहैर्ब्राह्मण इत्यादि पाठः १ प ।

स्मर्यते न चाश्वप्रतिग्रहे दोषाभावो ऽस्ति । अतो दानविषय एवायं विचार इति भावः । न केसरिण इति । सुहृदादिभ्यो रागप्राप्तमश्वदानं प्रतिषिद्धम् ।

३३० । ९ प्राप्तस्यानुवादको ऽर्थवादोयमिति । नन्वर्थवादो ऽनुपपत्तादिति* सूत्रेण वरुणग्रहशब्दोर्थवाद एव अश्वदानप्रयुक्ततया जलोदरव्याधेरनुवादादित्युक्तम् इहापि सिद्धान्ते तथैवोक्तं कुतः प्राप्तस्येदानीमनुवादः कीर्त्यते । उच्यते । लोकप्राप्तस्य जलोदरव्याधेरिहानुवादः वरुणो वा एतमश्वदातारं गृह्णातीति निर्देशस्तूपमार्थः । अग्निमेव खलु वा एष प्रविशति यो ऽयान्तरदीक्षामुपैतीतिवद् इवशब्दयोगात्तत्र वाच्योपमा इह तु सामानाधिकरण्यनिर्देशाद् गम्येति विशेषः । ततश्च जलोदरव्याधिमता तच्चिकित्सैवाश्वं दत्तवतेयमिष्टिरवश्यं कार्येति सिद्धं भवति । किं च प्रजापतिर्वरुणायाश्वमनयदित्याद्यसदर्थवादप्रतीतस्य दोषस्याश्वदातृत्वसामान्यादन्येष्वपि प्राप्तस्य वरुणो वा एतं गृह्णातीत्यत्रानुवाद इत्युपपद्यते । नन्वियमिष्टिर्मा भूद्दोषनिर्घातार्था तथापि वैदिकइति कुतः लौकिके ऽपि वा लौकिकएव वा किं न स्यात् । उच्यते । न तावदुभयत्र भवितुमर्हति लौकिके पुरुषार्थत्वं वैदिके क्रतुशेषतेत्येकस्य वाक्यस्य क्रतुपुरुषशेषताप्रतिपादकत्वेन वाक्यवैरूप्यप्रसङ्गात् । नापि लौकिकएव वैदिकस्य नैमित्तिकस्य वैदिकं निमित्तं प्रत्यासन्नमिति तद्विहायाप्रत्यासन्नलौकिकग्रहणायोगात्तद्ग्रहणे फलकल्पनागौरवप्रसङ्गाच्च । अतस्तस्माद्याचे प्रतीयेतेति युक्तः सिद्धान्तः ।

लौकिके धातुसाम्यार्थमिति । वमनेनान्तर्गतदोषनिःसरणाद्धातुसाम्यं भवतीति वमनोपायतया वैद्यके सोमपानमुक्तमस्ति तत्कृतं वमनं लौकिकं तस्मिन्नित्यर्थः । धातुसाम्यकरत्वान्न दोषतेति । धातुसाम्यार्थे वमने क्रियमाणे तात्कालिकेन्द्रियशोषो भवति चेद्भवत्वित्यङ्गीकृतत्वान्न दोष

,, । २४ इत्यर्थः । मन्त्रलिङ्गादिति । सोमरसं प्रति नाभिमतिक्रम्य मागा इत्यूर्ध्वमुखत्वनिषेधकमन्त्रलिङ्गादित्यर्थः । नन्वनुत्पत्तौ तत्त्वान्तरत्वापादनमयुक्तमविद्यादिवदनुत्पत्तावप्यतत्त्वान्तरत्वोपपत्तेरित्याशङ्क्याह अविद्यादीति† ॥ .

---

* जैमिनिसू० अ० ३ पा० ४ सू० ३४ ।

† अत्र प्रथमं प्राणोत्पत्त्यधिकरणं पूर्णम् ।

सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥ ३३१

पूर्वपक्षइति । यस्मात्स्थूलात्सूक्ष्माच्च शरीरात् त्वम्पदार्थो विवेक्तव्यः तस्मिन् भौतिके विषये श्रुतिविरोधपरिहारार्थोऽयं पादः । तत्र सप्तैव प्राणा लिङ्गशरीरान्तर्गतास्तदा तेभ्य एव त्वम्पदार्थो विवेक्तव्यः एकादश चेदन्येभ्यो ऽपीति प्रयोजनमित्यर्थः । ग्रहानतिशेरतइति व्युत्पत्तिमाश्रित्यातिग्रहशब्दस्य विषयेषु वृत्तौ हेतुमाह **रागोत्पादनेनेति । अपानइति च गन्धइति ।** लक्षणयोच्यतइत्यनुषङ्गः । **अपानेनेति ।** अपानशब्देन गन्धस्य लक्षणायां हेतुं तद्वाच्येनापश्वासेन करणेनाघ्रेयत्वरूपं संबन्धं श्रुतिरेव वदतीत्यर्थः । **प्राणान्तरव्यावृत्तिरिति ।** अशीर्षण्यानां प्राणत्वव्यावृत्तिरित्यर्थः । **उत्साधूपनस्तुतिपरत्वादिति ।** तथा च ये शीर्षण्याः प्राणास्ते सप्तेति लोकसिद्धार्थानुवादेन सप्तभिर्धूपनस्य स्तुतिरिति युक्तं न तु ये शीर्षण्यास्तएव प्राणा इत्यलौकिकार्थपरत्वमिति भावः । **तथापि सदनुवाद इति विशेष इति ।** ननु शीर्षण्याः प्राणाः सप्तेत्यपि सदनुवाद एव को विशेषः नेति ब्रूमः । वस्तुतश्चत्वार एव हि शीर्षण्याः प्राणा इति वक्ष्यते टीकायाम् । एकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानान्न चक्षुर्द्वित्वम् एकविनाशे* द्वितीयाऽविनाशान्नैकत्वमित्यक्षपादेन पूर्वोत्तरपक्षसूत्राभ्यां व्यवस्थापितं चक्षुर्द्वित्वं च दूषयिष्यते । इयमपरा योजनेत्यादिग्रन्थेनेन्द्रियाणामेकादशत्वमङ्गीकृत्यैवोत्क्रामदिन्द्रियसंख्याविषयश्रुतिकलहपरिहारार्थं वर्णकान्तरमारब्धम् तत्र सप्तैवोत्क्रामन्ति अन्यानि तु शरीरवत्प्रतिजन्म जायन्तइति पूर्वपक्षः । एकादशाप्युत्क्रामन्तीति सिद्धान्तः । अस्मिन् वर्णके पूर्ववर्णकादुत्कर्षं दर्शयितुं पूर्ववर्णके पूर्वपक्षसूत्रयोजनाक्लेशं पूर्वपक्षोपपादनाय तद्विरुद्धश्रुतियोजनाक्लेशं च दर्शयति **पूर्वयोजनायां हीति । वृत्तिभेदविषयत्वकल्पनेति ।** यद्यपि द्वितीयवर्णकपूर्वपक्षे ऽपि ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्तीति श्रुतेर्वृत्तिभेदविषयत्वकल्पनाक्लेशो ऽस्ति तथाप्यस्मिन् वर्णके स एक एव क्लेशः पूर्ववर्णके क्लेशद्वयमिति विशेषः । **अध्यात्माधिदैविकोपासनेष्विति ।** अध्यात्मं यागादीनामधिदैवमग्न्यादीनां च सन्त्येकोपासनाद्ब्रह्मादिशरीरप्राप्तिफलकानि तेषु यानि ३३२

---

* विनाशे इति १ पु पा ।

शरीरान्तरे ऽप्यनुवर्तमानानीन्द्रियाणि तान्येव तत्क्रतुन्यायादुपासनीयानि। अतः पूर्वपक्षे सप्तानामुपासनमेकादशानामपि सिद्धान्त इति फलभेदः* ॥

३३३।१ **अणवश्च ॥ ७ ॥**

द्वितीयवर्णकेन सङ्गतिमाह **एकादशानां प्राणानामिति**। पादसङ्गतिस्तु प्रासङ्गिकी श्रुतिकलहनिरासाभावात् सांख्यविप्रतिपत्तिमात्रनिरासात्। **परिच्छेदेति†**। अहमिहैवास्मीति परिच्छेदभानादित्यर्थः। **आधिदैविकव्यापकेति**। यद्यपि व्यष्ट्यन्तःकरणचैतन्यसंवलनरूपास्मदादिव्यष्ट्यहङ्कारवत्समष्ट्यन्तःकरणचैतन्यसंवलनरूपः समष्ट्यहङ्कारो ऽस्ति हैरण्यगर्भः स तु व्यापक इति वक्तुं शक्यं तथापि सांख्याभिमतमहत्प्राकृतिकेन्द्रियप्रकृतिभूतव्यापकाहङ्कारसद्भावे प्रमाणं नास्तीति तात्पर्यम्‡ ॥

,,।८ **श्रेष्ठश्च ॥ ८ ॥**

आनीदित्यस्येति। सदसदात्मकसकलप्रपञ्चाभिव्यक्त्या महाप्रलयविषयत्वमानीदित्यस्यावगम्यतइत्यर्थः§ ॥

,,।१२ **न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥**

एतस्माज्जायते प्राणः यः प्राणः स वायुरिति प्राणवायुभेदाऽभेदश्रुत्योर्विरोध इति पूर्वपक्षः। श्रुत्योर्विरोधे स्मृत्या तत्तात्पर्यं निर्णेतव्यमतः सांख्यस्मृत्या करणानां साधारणवृत्तिः प्राणो वायोर्भिन्न इति सिद्धान्त्येकदेशिमतम्। **पदभाष्यइति**। प्रतिपदविवरणरूपं छान्दोग्यभाष्यं पदभाष्यं तत्र वागादीन्द्रियप्रायपाठात्प्राणो घ्राणमिति व्याख्यातम् इह तु प्राणश्रुतिः प्रायपाठाद्बलीयसीति प्राणो मुख्यप्राण उक्त इत्यर्थः। कथं चिन्नयनं सिद्धान्तिनो ऽपि तुल्यमित्याह **त्वया ऽपि हीति**। सिद्धान्तिना ऽपि हि वायुप्राणयोः स्वरूपाऽभेदे|| तत्त्वाऽभेदमाश्रित्याभेदश्रुतिः वृत्तितद्वद्भेदाभिप्राया बाह्याध्यात्मिकव्यापारद्वैविध्याभिप्राया च भेदश्रुतिरिति व्याख्यातव्यम्। अतः कथं चिद्योजनं तन्मते ऽपि समानमित्यर्थः। **तर्हि किमिति**। प्राणो न वायुमात्रं नापि वायोस्तत्त्वान्तरमिति सिद्धान्त भेदाभेदश्रुत्योरुभयोरपि

---

* अत्र द्वितीयं सप्तगत्यधिकरणं पूर्णम्। † अपरिच्छेदेतीति प्रतीकाकारः १ पु०।
‡ अत्र तृतीयं प्राणाणुत्वाधिकरणं पूर्णम्। § अत्र चतुर्थं प्राणश्रैष्ठ्याधिकरणं पूर्णम्।
|| स्वरूपाभेदमिति ३ पु० पा०। ¶ वृत्तिप्रवृत्तिः तद्वदित्यादिपा० ३ पु०।

योजनायां क्लेशो ऽस्ति चेत्तर्ह्यभेद इति प्रथमपूर्वपक्ष एव किमिति नाद्रियते तत्र हि भेदश्रुतिमात्रस्य क्लेशेन योजनेत्याशङ्कार्थः । परिहाराभिप्रायमाह **यदा त्विति ।** यदा प्रथमावस्थायां विरुद्धे श्रुती विनिगमना*विरहान्परस्परत्याजितार्थे वर्तेते तदा लब्धप्रसरया स्मृत्या करणव्यापारः प्राण इति प्रतिपादिते श्रुती तत्परतया योज्येते तत्र भेदश्रुतेर्योजनाया न कश्चन क्लेशः अभेदश्रुतिस्तु वायुशब्दस्योपचारिकत्वकल्पनया शक्ययोजना । अतः पूर्वं पश्चाच्च भेदाभेदश्रुतिभ्यामभग्नस्वार्थस्मृत्यनुसारेण करणवृत्तिः प्राण इत्येव पूर्वपक्ष आद्रियतइत्यर्थः । प्रत्येकमिन्द्रियाणां वृत्तिः प्राण इति विकल्पे टीकायां दूषणं नोक्तम् । तत्र स्वयं दूषणमाह **प्रत्येकवृत्तित्वइति ।** पुरुषार्थत्वात् पुरुषं प्रति पारतन्त्र्यमिति हेतुसाध्ययोरभेदशङ्कां परिहरति **पुरुषार्थत्वमिति ।** परिच्छेदधारणादिति ग्रन्थे धारणशब्दार्थमाह **धारणं मेधेति ।** परिच्छेदाहरणादीति पाठे ज्ञानेन्द्रियसाध्यो रूपादिप्रत्ययः परिच्छेदः हस्तादिकर्मेन्द्रियसाध्य आहरणादिः† ॥ ३३५ ।

अणुश्च ॥ १३ ॥

साम प्राण इति व्युत्पाद्येति । *एष उ एव साम वाग्वै सा अम एष* सा चामश्चेति तत्साम्नः सामत्वमिति पूर्ववाक्येन सामशब्दः प्राणे व्युत्पादितः । ननूभयमुभयत्र विषयः तत्र व्यापित्वश्रुतीनामुपासनार्थत्वहेतुरणवश्चेत्यधिकरणे दर्शितः । अस्मिन्नधिकरणे तु प्राणव्याप्तिकश्रुतेराधिदैविकविषयत्वे हेतुरुच्यतइति विशेषमाह **हेतुभेदस्य चाधिकरणाभेदकत्वादिति ।** पूर्वपक्षे विशेषाभावे सैद्धान्तिकहेतुभेदमात्रेण नाधिकरणभेदो भवति ईक्षत्यधिकरणादिषु अधिकरणैक्ये ऽपि सैद्धान्तिकहेतुबाहुल्यदर्शनादिति भावः । स्वमते त्वणवश्चेत्यधिकरणमिन्द्रियविषये सांख्यविप्रतिपत्तिनिरासार्थम् । इदमधिकरणं यद्यपि प्राणविषये श्रुतिविप्रतिपत्तिनिरासार्थं तथाप्यत्रैकेन्द्रियविषयश्रुतिविप्रतिपत्तिनिरासो ऽप्यर्थात्सिध्यति समः प्लुषिणेत्यादेः प्राणे तत्तच्छरीरानुरोधिसंकोचविकासपरतयोपपादनेन हि त्वगिन्द्रियस्यापि तथैव संकोचविकासशालितया‡ सर्वाङ्गीणशैत्योपलब्धिकरणत्वमित्यर्थात्सिध्यति सम एभिस्त्रिभिर्लो-

* किं निर्गमतेति १ पु॰ पा॰ । † अत्र पञ्चमं वायुक्रियाधिकरणं पूर्णम् ।

‡ शीलतयेति १ पु॰ पा॰ ।

केरिति प्रायो विभुत्वाम्नानं परम् आधिदैविकविषयतया योजनीयमिति सर्वाधिकरणसद्भावात् प्राणप्रधानमिदमधिकरणमित्यणुश्चेत्येकवचनेन दर्शितमिति तात्पर्यम्। कुटो घट इति। घटः कुटो निपावो ऽस्त्रीत्यमरसिंहः। सम एभिस्त्रिभिर्लोकैरित्येतदिति। समेनेन सर्वेणेत्येतत्तु न विभुत्वप्रतिपादनैकान्तिकं प्लुषिमशकनागव्यतिरिक्तमपि यद्यत्प्राण्यस्ति तत्तच्छरीरानुकूलसंकोचविकासशालितया तेन सर्वेणापि सममित्येवमर्थताया अप्युपपत्तेरिति भावः* ॥

३३५ । २१ ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥

न तु करणानामिति। ननु यद्वीत्यादिटीकोक्तस्योत्सर्गस्येन्द्रियेषु *प्रवृत्तिर्बलवद्बाधकाभावेनाभ्युपगन्तुमयुक्ता यश्चक्षुषि तिष्ठन्नित्यादेस्तदपवा-*दकस्य सत्त्वादिति चेत्सत्यम्। ईश्वराधिष्ठानमपरामृश्यायं पूर्वपक्षः। (अत एव सिद्धान्ते करणानि चेतनाधिष्ठितानीत्यनुमानस्येश्वरेण सिद्धसाधनमाशङ्क्य परिहरिष्यते। न चेश्वरेण सिद्धसाधनत्वम्। तदभ्युपगमे त्वयैवोत्सर्गबाधस्येष्टत्वादिति। अथ वा उत्सर्गस्येश्वराधिष्ठितत्वांशवदन्याद्यधिष्ठितत्वाद्यंशे त्यागो न कार्यः। तत्र बलवत्प्रमाणाभावादिति तात्पर्यम्।)† अत एव करणानि‡ चेतनाधिष्ठितानीति सिद्धान्त्यनुमानस्य पूर्वपक्षे जीवाधिष्ठितत्वे सिद्धसाधनत्वम्। जीवस्य बलवत्प्रमाणवशादधिष्ठातृत्वमङ्गीकृत्यानुपदं वक्ष्यते न च तदस्ति जीवइति। यद्यप्यभिमतार्थग्राहकेन्द्रियमनःसंयोजनतद्ग्रहणार्थचक्षुर्विस्फारणश्रोत्रावधानदानादिना जीवस्येन्द्रियाधिष्ठातृत्वमनुभवसिद्धमुपपद्यते च तदिन्द्रियाणामतीन्द्रियत्वे ऽपि तेषामभिमतार्थे ग्रहणाय नोदनकारिणीषु नाडीषु स्पार्शनापरोक्षज्ञानस्य तन्मूलप्रयत्नस्य च संभवाद् नाडीगोचरप्रयत्नेनैव तन्नोदनीयानां श्वासजमलानामिच्छया मोचनधारणदर्शनात्। अथ यो वेदेदं जिघ्राणीत्यादिश्रुत्यनुमतं च जीवस्येन्द्रियाधिष्ठातृत्वं तथापि जीवाधिष्ठानं न सार्वत्रिकम्। अनिच्छतो ऽप्यनभिमतज्ञानादिदर्शनादिति तात्पर्यम्।

३३६ । २३ न ह वै देवानिति। ननु अग्न्यादिदेवताः एतदिन्द्रियसाध्यपुण्यफलभागिन्यः तदधिष्ठातृत्वादित्यनुमाने नास्त्यागमविरोधः। सत्यम्।

---

* अत्र षष्ठं श्रेष्ठाणुत्वाधिकरणं पूर्णम्

† ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु.। ‡ अत एव सिद्धान्ते करणानीति १ पु. पा.।

प्रयोजकत्वं त्वनुमानस्य तदा भवति । आगमस्तावद्देवतानां पापफलं नास्तीति वदति ततश्च यथा तासां पापहेतुज्ञानकर्मकारयितृत्वे ऽपि तथाभूतज्ञानकर्मतात्पर्यत्वात् तदुत्पत्तावालोकादिवत्करणानुग्राहकतया सहकारिमात्रत्वाद् न तज्जन्यपापफलभागित्वम् एवं तज्जन्यपुण्यफलभागित्वाभावस्याप्युपपत्तेः । न च पुण्यमेवामुं गच्छतीति श्रुतिबलात्तासां तज्जन्यपुण्यफलभागित्वं शङ्कनीयम् । न ह्येषा श्रुतिरिन्द्रियाधिष्ठातृदेवतानां स्वस्वाधिष्ठेयेन्द्रियजन्यज्ञानकर्मप्रयुक्तपुण्यफलभागित्वं ब्रवीति किं तु वाङ्मनःप्राणरूपच्यन्नोपासकस्य सार्वात्म्यफलप्राप्त्यनन्तरम् आत्मान्तरगतपापफलानुभवप्रसक्तौ तन्निवारणं करोति । अमुं च्यन्नोपासकमुपासनाजन्यं पुण्यमेव गच्छति न त्वात्मान्तरगतं पापमित्यनेन वाक्येन च्यन्नोपासकस्य पापप्राप्त्यभावे प्रतिपाद्ये सामान्यमुखेन तत्समर्थनार्थं न ह वै देवानिति वाक्यं देवतामात्रमेव किमपि पापं न स्पृशति हिरण्यगर्भवदुत्कृष्टदेवताभावं प्राप्तं च्यन्नोपासकं किमपि पापं न स्पृशतीति किमु वक्तव्यमिति तदभिप्रायः ।

तत्किमितीति । मृत्युमतीत्य यत्प्राप्तं तत्किमिति प्राप्यविशेषनिर्धारणार्थः प्रश्नः । स यदेत्यादिश्रुतिं तदुत्तरत्वेन व्याचष्टे उच्यतइति । अतिमुक्ता त्यक्तवती । अग्निरेवाभवदिति । एव चाग्निभावः प्राप्य इत्युक्तं भवति । दर्शनाय चक्षुरित्यस्याभिप्रायमाह न चैतन्यायेति । चैतन्यस्यात्मरूपत्वान्न तत्र चक्षुरपेक्षा किं तु चाक्षुषवृत्ताविति गूढो ऽभिप्रायः । अमुमभिप्रायं विवरीतुम् अथ यो वेदेदमित्यादिश्रुतिवाक्यं तद्विवृणोति अथापीति । अथशब्दो ऽप्यर्थे वर्ततइत्यर्थः। क इहाप्यर्थ इत्याकाङ्क्षायामाह दर्शनाद्यर्थे चक्षुराद्यपेक्षायामपीति । अथ यत्रैतदाकाशमित्यादिवाक्ये चक्षुर्ग्रहणं सर्वेषामिन्द्रियाणां दर्शनग्रहणं सर्वेन्द्रियजन्यवृत्तीनां चोपलक्षणम् अतो दर्शनादीति चक्षुरादीति चोभयत्राप्यादिग्रहणम् । स्वतएव यो वेदेतीति । स्वस्वरूपलाभार्थं कारणमनपेक्ष्य यो वेदेत्यर्थः । स आत्मेति । वेदेत्यत्र प्रकृत्यर्थभूतवेदनस्वरूप आत्मेत्यर्थः । यदि नित्यात्मस्वरूपमेव वेदनं कुत्र तर्हीन्द्रियापेक्षा किंरूपं च वेदेत्यत्र प्रत्ययार्थभूतं वेदनं प्रति कर्तृत्वमित्याकाङ्क्षायां गन्धाय घ्राणमिति वाक्यम् । तत्र गन्धशब्दो वृत्तिरूपगन्धज्ञानपर इति व्याचष्टे तस्येति । एवं च गन्धवेद-

नरूपचैतन्यावच्छेदकवृत्त्युत्पत्त्यर्थमिन्द्रियाद्यपेक्षा तत्कर्तृकत्वोपाधिकं च तदवच्छिन्नस्य*स्वरूपकर्तृत्वमित्युक्तं भवति† ॥

३३६ । २५ **तद्इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥**

भेदश्रुतेरिति‡ वैलक्षण्याच्चेति§ सूत्रयोर्भाष्यकारैरसुरपाप्मविद्धत्वाविद्धत्वगोचरा मृत्युप्राप्त्वाप्राप्त्वगोचरा च द्विविधा भेदश्रुतिरुदाहृता टीकाकारैस्तु द्वितीयैवोपात्ता न त्वाद्या तत्किमाद्यशङ्कायामस्वारस्यादित्याशङ्क्य मृत्युप्राप्तशब्देनैवासुरपाप्मविद्धत्वस्यापि संगृहीतत्वादित्याह **मृत्युर्वागादीनां स्व||विषयासङ्ग इति ।** असुरशब्देनासुरपाप्मविध्वस्तानिति शब्देन । उक्तार्थोपपादनार्थं मृत्युप्राप्तेत्यादिटीकामुपादाय श्रुतिद्वयमप्युपन्यस्यति **श्रूयते हीति ।** श्रूयतइत्यस्य विषयासङ्गवत्त्वमित्यनेन संबन्धः । त्वं न उद्गायेति । देवैर्नियुक्तायां वाचि यो भोगः अभिवदनलक्षणं फलं तद्देवेभ्य आगायत्सकलदेवसाधारणं गानेन सा वाक् संपादितवती तच यत्कल्याणं स्वरवर्णादिभ्रंशरहितमभिरूपमभिवदनं तदात्मने आगायदिति लिखितश्रुतिभागस्यार्थः । आदिशब्देन तामभिद्रुत्य पाप्मना विध्यन्नित्यन्तो वाक्यशेषः संगृहीतः । तानि मृत्युरित्यादिश्रुत्यन्तरोदाहरणे ऽपि श्रूयतइत्यनुषङ्गः कार्यः । केषु चित्कोशेषु विषयासङ्गवत्त्वमित्यस्य तानि मृत्युरित्यस्य च मध्ये संश्राव्येति पदान्तरयुक्तः पाठो दृश्यते स न साधुरिव लक्ष्यते । यो वाचि भोग इत्यादिश्रुतिरुद्गीथविद्याप्रकरणगता तानि मृत्युरित्यादिश्रुतिः सप्तान्नब्राह्मणगतेति भेदात् । **अर्थालोचनमिति** ज्ञानेन्द्रियाभिप्रायम् । टीकायामन्ये त्वित्यादिना वृत्तिकारमतमुपन्यस्तं तद्भाष्यकारमते सूत्रयोजनाक्लेशो ऽस्तीत्यपरितोषादिति वक्तुं भाष्यकारमते सूत्रयोजनां दर्शयति **भाष्यकारैर्हीति । न केवलमध्याहारापेक्षत्वादिति ।** अनेन भेदशब्दाध्याहारभियेत्येतत्प्रतिज्ञायां तत्त्वान्तराणीत्यध्याहारभियेत्येवमर्थतया व्याख्यातम् । **घच्प्रत्ययो भवतीति ।** घच्प्रत्ययान्तो निपात इत्यर्थः ।

३३८ । २२ **तन्मात्रमयुक्तमित्युक्तं भवतीति ।** वस्तुतस्तु भाष्यकारीयायामाद्यसूत्रव्याख्यायामयुक्तत्वप्रदर्शनार्थो न भवति वृत्तिकारमतस्योपन्यासः

---

* एकः स्वशब्दो नास्ति १ पु. । † अत्र सप्तमं ज्योतिराद्यधिकरणं पूर्णम् ।
‡ व्या. सू. अ. २ पा. ४ सू १८ । § व्या. सू. अ. २ पा ४ सू १९ ।
|| स्वशब्दो नास्ति २ पु. ।

किं तु तस्यैवायुक्तत्वप्रदर्शनार्थः । तस्मिन्नुपन्यस्यमानएव हि तदयुक्तत्वं स्फुटं प्रतीयते । तथा हि । संशयवाक्ये न तावत्प्राणव्यावृत्तत्ववागाद्येकादशानुगतमिन्द्रियत्वं सिद्धान्ते निर्वक्तव्यतया उपक्रान्तम् । अपि तु देहाधिष्ठानत्वे सति रूपाद्यालोचनकरणत्वमिन्द्रियत्वमिति कर्मेन्द्रियेभ्यो ऽपि व्यावृत्तं निरुक्तं निष्प्रयोजनं वा ऽधिकरणम् । यदि पूर्वपक्षरीत्या प्राणानुगतमिन्द्रियत्वं निरुच्यते यदि वा सिद्धान्तरीत्या तद्व्यावृत्तम् उभयथापि हि नास्ति प्रयोजनम् । न हि वैशेषिकशास्त्रवत्साधर्म्यवैधर्म्यविचारार्थो ऽस्य शास्त्रस्य प्रवृत्तिः । न च प्राणस्येन्द्रियत्वे इन्द्रियेभ्य एव त्वम्पदार्थो विवेक्तव्यः अनिन्द्रियत्वे तु प्राणादपीति प्रयोजनभेदः शङ्कनीयः । न ह्यीन्द्रियेभ्यो ऽहं भिन्न इति त्वम्पदार्थो विवेक्तव्यः किं त्वन्धः काणो मूको बधिरः कुणिः खञ्ज इत्यादिरूपतत्तदिन्द्रियविशेषाभेदभ्रमनिरासायान्यादहं भिन्न इत्यादिप्रकारेण । अतः प्राणद्वादशानामिन्द्रियत्वे ऽपि प्राणादपि त्वम्पदार्थस्य विवेकः कार्य एव । भाष्यकारीये तु पूर्वपक्षे प्राणाद्विवेकव्यतिरेकेणेन्द्रियेभ्यो विवेको न कार्यः । वृत्तिमतः प्राणात्तत्त्वान्तरस्य तद्वृत्तिभ्यस्तत्त्वान्तरत्वस्य कैमुतिकन्यायेन सिद्धेः । पाणिनिस्मृतिमवलम्ब्य पूर्वपक्षो ऽपि तुच्छः । तामेवावलम्ब्येन्द्रदृष्टेषु विषयेष्विन्द्रजुष्टेषु भोग्येष्विन्द्रसृष्टेषु घटादिष्विन्द्रदत्तेषु ग्रामादिषु चेन्द्रियत्वपूर्वपक्षप्रसङ्गात् । इन्द्रियशब्दरूढिमवलम्ब्यातिप्रसङ्गपरिहारे तत एव प्राणव्यावृत्तेरपि लाभात् । सूत्रयोजनाक्लेशभिया तुच्छाधिकरणार्थपरिग्रहस्तु वदान्यगृहान्तःप्रवेशक्लेशभिया तद्द्वारदृष्टपरिग्रहतुल्यः । न च भाष्यकारमते सूत्रयोजनाक्लेशोऽपि । तथा हि । प्रतिज्ञाध्याहारस्तावदसिद्धः । ते वागादयः श्रेष्ठादन्यत्र श्रेष्ठादन्ये तत्त्वान्तराणीति सौत्रपदैरेव प्रतिज्ञालाभात् । भेदश्रुतेरित्यनेन पौनरुक्त्यमप्यसिद्धम् । तद्व्यपदेशादित्यस्य उत्पत्तिव्यपदेशादित्येतदर्थकत्वेन भेदव्यपदेशादित्येतदर्थकत्वाभावादुत्पत्तिव्यपदेशः प्राणे ऽप्यस्तीति व्यभिचारवारणाय श्रेष्ठादन्यत्रेति हेतावपि विशेषणम् । इन्द्रियाणीति मनः सर्वेन्द्रियाणि चेत्येतच्छ्रुतिगतशब्दानुकरणम् । तत्र इतिशब्दमात्रमध्याहर्तव्यम् । तथा च श्रेष्ठव्यतिरेकेण श्रेष्ठोत्पत्तिव्यतिरेकेणेन्द्रियाणि जायन्तइति शब्देनोत्पत्तिव्यपदेशादिति हेत्वर्थो भवतीति श्रेष्ठव्यतिरेकोक्तया श्रेष्ठोत्पत्तिव्यतिरेक इन्द्रियाणामुत्पत्तिव्यपदेशोक्तिसामर्थ्याल्लभ्यते । यथा सिंहतुल्यपराक्रमो राजेत्यत्र राज्ञः पराक्रमोक्तिसा-

मर्थात्सिंहोत्त्या सिंहपराक्रमो लभ्यते एवमभूत एव हेत्वर्थो भाष्ये व्यपदेशभेदादित्यनेन व्यपदेशविशेषादित्यर्थकेन विवक्षितः । अत एव को ऽयं व्यपदेशभेद इति प्रश्नपूर्वकं हेत्वर्थस्यैव विवरणमुत्तरत्र क्रियते न तु हेत्वर्थस्य प्रसाधनम् । हेत्वर्थस्वरूपस्यैव प्रश्नदर्शनात् । अतः श्रेष्ठादन्यत्रेत्येतद्धेतावप्यन्वेति इन्द्रियाणीत्येतद्धेतावेवान्वेतीति । इदं सर्वं भाष्याभिमतमेव । तच्छब्दस्यानन्तरोक्तपरामर्शकत्वमप्युपपद्यतएव । न वियदश्रुते*रित्यारभ्योत्पत्तेः प्रकृतत्वात् तथा प्राणाः† श्रेष्ठश्चे‡ति सूत्रयोः प्राणेन्द्रियविषयतयापि तस्याः प्रकृतत्वात् । एतस्माज्जायतइति विवक्षितमूलश्रुत्युपात्ततया ऽपि तत्परामर्शोपपत्तेश्च । तथा प्राणा इति सूत्रे हि विषयवाक्यसंनिहितोपमानस्यापि तच्छब्देन परामर्शो ऽङ्गीकृतः । इहेन्द्रियाणीति सौत्रशब्देनैवोपात्ते मूलश्रुतिवाक्ये तत्संनिहितपरामर्शः सुतरामुपपद्यते । एतेन प्राण इन्द्रियाणीति संज्ञाभेदमात्रं न तत्त्वान्तरत्वसाधकमिति शङ्का ऽपि निरस्ता । प्राणोत्पत्तिव्यतिरेकेणोत्पत्तिकथनस्य हेत्वर्थत्वात् । नन्वेवमपि श्रेष्ठादन्यत्रेत्यस्य साध्यान्वितस्य हेतावव्यावृत्त्या ऽन्वयः हेताविति शब्दाध्याहारश्चेति क्लेशो ऽस्तीति चेद् न । परमते व्यावृत्त्या तदन्वयावश्यम्भावात् । टीकायां हि तेनेन्द्रियशब्देन तेषां वागादीनां व्यपदेशादिति हेतुरुक्तः स तु वागादीनामेव श्रेष्ठं वर्जयित्वेन्द्रियशब्देन व्यपदेशादित्यवधारणापेक्षः । अन्यथेन्द्रियव्यपदेशस्य प्राणव्यावृत्तत्वाऽप्रतीतौ तत्प्रवृत्तिनिमित्तस्येन्द्रियत्वस्य प्राणाद्व्यावृत्त्यसिद्धेः । अत एव चाचार्यैर्दर्पणे सावधारणो हेतुरुपन्यस्तः । तेनेन्द्रियशब्दे तेषामेव वृद्धव्यवहारे व्यपदेशादिति । एतेन हेताविति शब्दाध्याहारक्लेशो ऽपि निरस्तः । परमतएव भेदश्रुते§रित्यधिकरणान्तरसूत्रे वागादीनीन्द्रियाणि श्रेष्ठात्तत्त्वान्तराणीति प्रतिज्ञाध्याहारार्थबहुक्लेशप्रसङ्गाद्यदिन्द्रियाणि श्रेष्ठादन्यत्रेत्यस्मात्सूत्रादनुषक्तः प्रतिज्ञा लभ्यतइति चेत्तर्हि श्रेष्ठादन्यत्रेत्यस्य ते वागादयः श्रेष्ठादन्यत्रेन्द्रियाणीति पूर्वाधिकरणसाध्यान्वितस्य पुनस्तद्धेतावन्वितस्य भेदश्रुतेरिति सूत्रे ऽप्यन्वय इति परमतएवातिक्लेशः । अस्मन्मते त्विन्द्रियाणीत्यस्य विनैवेतिशब्दाध्याहारं तइन्द्रियाणीति पद-

---

* व्या० सू० अ० २ पा ३ सू० १ । † व्या० सू० अ० २ पा० ४ सू० १

‡ व्या० सू० अ० २ पा० ४ सू० ८ । § व्या० सू० अ० २ पा० ४ सू ८ ।

निर्देशार्थत्वेनाप्यस्त्युपपत्तिः । तथा पञ्चनिर्देशस्य मनः सर्वेन्द्रियाणि चेतीन्द्रियोत्पत्तिप्रतिपादकवाक्यस्मरणार्थत्वाद् न वैयर्थ्यं तत एव तत्स्मारणसिद्धेः न हेतावपि तदन्वयापेक्षा इतिशब्दाध्याहारेण हेतौ तदन्वयस्यापि अनुकृतेस्तस्य चेति सूत्रे* तस्य चेत्यंशस्यैव विवक्षितश्रुतिवाक्यसूचनप्रयोजनात् । तस्मात्स्वरूपव्याक्रियैव निराक्रियेत्यभिप्रेत्य टीकायां वृत्तिकारमतोपन्यास इत्येव युक्तम्† ॥

संज्ञामूर्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥ ३३९

विषयप्रदर्शकं भाष्यमुदाहृत्य व्याचष्टइति । भाष्यं गृहीत्वा तदुदाहृतं विषयवाक्यं व्याचष्टइत्यर्थः । अरुणादाविति । यद्यप्यरुणाधिकरणे एकहायनीद्रव्यवदारुण्यस्यापि साक्षादेव क्रयान्वयः शाब्दो व्युत्पादितः तथापि श्रुतक्रयसाधनत्वनिर्वाहार्थमारुण्यस्यैकहायनीद्रव्यावच्छेदकत्वेनार्थः पार्ष्णिकान्वयो ऽभ्युपगत इति तदभिप्राया परम्परासंबन्धोक्तिः सप्तदशारत्निर्वाजपेयस्य यूप इति तु साक्षात्प्रधानसंबन्धाऽसंभवेन शाब्दपरम्परासबन्धाश्रयणे उदाहरणम् ।

यत्र च कर्ता कर्त्रन्तरं प्रति करणमिति । जीवस्तावत् तृतीयाश्रुत्या करणत्वेन प्रतीयते चेतनस्य चेतनान्तरं कर्तारं प्रति करणतयोपकरणत्वं च प्रयोज्यकर्तृत्वेनैव भवति नान्यथेति भावः । न च पाचयत्योदनं देवदत्तेनेतिवदिह तृतीयायाः कर्त्रर्थत्वं शङ्कनीयम् । तत्र णयन्तधातूक्ताख्याताभिहितकर्तृकप्रयोजकव्यापारव्यतिरेकेण तत्प्रकृतिभूतपचत्यर्था‡नभिहितकर्तृकप्रयोज्यव्यापारवदिहाख्याताभिहितकर्तृकाध्यारोपितप्रयोजकव्यापाररूपव्यापारव्यतिरेकेणा§नभिहितकर्तृकस्य कस्य चित्प्रयोज्यव्यापारस्याभावात् । तस्मादुत्तमपुरुषनिर्दिष्टाया देवतायाः कर्तृत्वेनान्वये सति तृतीयान्तनिर्दिष्टस्य जीवस्य तस्यां करणत्वेनैवान्वयो वक्तव्य इति भावः ।

प्रधानान्वययोग्यतायामिति । यथेष्टकाः पक्त्वा भुङ्क्ते इत्यत्रेष्टकानां प्रधानक्रियान्वयाऽयोग्यत्वादुपसर्जनक्रियान्वयः तथेहापीत्यर्थः । ३४० । प्रवेशक्रियान्वयपक्षे ऽपि न कर्तरि तृतीया । न च यथेष्टकाः पक्त्वा भुङ्क्ते

---

* व्या सू॰ अ १ पा॰ ३ सू २२ । † अत्राष्टमम इन्द्रियाधिकरणं पूर्णम् ।
‡ पचत्यर्थेति पु पा॰ । § रूपव्याकरणक्रियाव्यतिरेकेणेति २ पु पा ।

इत्यत्रेष्टकानां कर्मत्वस्य क्त्वाप्रत्ययेनानभिधानादिष्टका इति कर्मणि द्वितीया तथेह कर्तरि तृतीया शङ्कनीया। युक्ता तत्र क्त्वाप्रत्ययस्य कर्मानभिधायित्वाद् द्वितीया समानकर्तृकयोः पूर्वकालइति स्मरणादिह क्त्वाप्रत्ययेन कर्तुरभिधानमस्तीति न कर्तरि तृतीया युक्ता। न च क्रियाद्वयकर्तुरैक्यमेव क्त्वाप्रत्ययार्थः न तु तद्गतकर्तृशक्तिरत्यतस्तदनभिधानात्तत्र तृतीया भवितुमर्हतीति शङ्कनीयम्। तथा सतीष्टकाः पक्त्वा ऽहं भोक्ष्यइत्यत्रापि मयेति तृतीयाप्रसङ्गात्। न च भोजनक्रियाकर्तुराख्यातेनाभिधानात्तृतीया न भवतीति वाच्यम्। न ह्यनभिहितसूत्रस्याभिहितकारकशक्त्याश्रये तृतीया न भवतीत्यर्थः किं त्वनभिहितकारकशक्त्याश्रये भवतीति। भाष्यवार्तिकयोः पर्युदासपक्षाश्रयणात्। अत एव प्रासादे आस्तइत्यत्र प्रसीदन्त्यस्मिन् जना इत्यर्थेऽधिहितेन घञा प्रसादनक्रियाधिकरणत्वस्याभिहितत्वे ऽपि आसिक्रियाधिकरणत्वस्यानभिधानात् सप्तमी एवमिहापि भुजिक्रियाकर्तृत्वस्याभिधाने ऽपि पाकक्रियाकर्तृत्वानभिधानात् तृतीया स्यात्तस्मात्तत्र क्त्वाप्रत्ययेन कर्तृशक्त्यभिधानमाश्रित्यैव तृतीयाभाव उपपादनीयः तथेहापि कर्तरि तृतीया न भवतीति करणार्थैव सेति युक्तम्। तदयमर्थः सेयं देवता जीवरूपेणानुप्रविश्य तद्भोगार्थे नामरूपे व्याकरवाणीति संकल्पितवतीति* ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजि-
द्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्त-
कल्पतरुपरिमले द्वितीयाध्यायस्य चतुर्थः पादः ॥

समाप्तो ऽविरोधाख्यो द्वितीयो ऽध्यायः ॥



* नवमं संज्ञामूर्तिक्लृप्त्यधिकरणं पूर्णम्।